।। कोबातीर्थमंडन श्री महावीरस्वामिने नमः ।।

।। अनंतलब्धिनिधान श्री गौतमस्वामिने नमः ।। ।। गणधर भगवंत श्री सुधर्मास्वामिने नमः ।।

।। योगनिष्ठ आचार्य श्रीमद् बुद्धिसागरसूरीश्वरेभ्यो नमः ।। ।। चारित्रचूडामणि आचार्य श्रीमद् कैलाससागरसूरीश्वरेभ्यो नमः ।।

आचार्य श्री कैलाससागरसूरि ज्ञानमंदिर

पुनितप्रेरणा व आशीर्वाद

राष्ट्रसंत श्रुतोद्धारक आचार्यदेव श्रीमत् पद्मसागरसूरीश्वरजी म. सा.

जैन मुद्रित ग्रंथ स्केनिंग प्रकल्प

ग्रंथांक : १

श्री महावीर जैन आराधना केन्द्र

आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
कोबा, गांधीनगर-श्री महावीर जैन आराधना केन्द्र
आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
कोबा, गांधीनगर-३८२००७ (गुजरात)
(079) 23276252, 23276204
फेक्स : 23276249
Websiet : www.kobatirth.org
Email : Kendra@kobatirth.org

शहर शाखा

आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
शहर शाखा
आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
त्रण बंगला, टोलकनगर
परिवार डाइनिंग हॉल की गली में
पालडी, अहमदाबाद – ३८०००७
(079) 26582355

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ श्रीजिनायनमः ॥

॥ श्रीशीलतरंगिणी ॥

॥ शीलोपदेशमालावृत्तिः ॥

(मूलकर्त्ता—जयकीर्त्तिसूरिः टीकाकार—सोमतिलकसूरिः)

उपावी प्रसिद्ध करनार.

पंडित श्रावक हीरालाल हंसराज. (जामनगरवाला)

संवत्—१९६६. सने १९०९

किं—रु.—९—०—०

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

☞ जामनगर जैनज्ञानस्करोदय छापखानामां छाप्युं.

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ श्रीजिनाय नमः ॥

॥ अथ श्रीशीलोपदेशमालावृत्तिः प्रारभ्यते ॥

(मूलकर्त्ता—श्रीजयकीर्त्तिसूरिः)

(टीकाकार—श्रीसिंहतिलकसूरिः)

उपावी प्रसिद्ध करनार पंडित श्रावक हीरालाल हंसराज (जामनगरवाळा)

यस्योपदेशसमये दशनांशुमिश्राः । स्कंधोपरि प्रसृमराश्चिकुरप्ररोहाः ॥ कल्याणपात्र-दधिसंकलितोरुदुर्वा—लीलां दधुः स कुशलाय युगादिदेवः ॥ १ ॥ श्रिये स शांतिर्मृगलांछनः सन् । युक्तं दधानः कुमुदां विकाशं ॥ योऽभूद्भवानीहितभावमाप्य । शिवोत्तमांगस्थिरभासुरश्रीः ॥ २ ॥ शिवश्रियो रूपमनन्यरूपं । ज्ञानात्मदर्शे परिभाव्य जज्ञे ॥ आशैशवात्तन्मयमानसो यः । स नेमिनाथः शिवतातिरस्तु ॥ ३ ॥ भावा अनेके प्रतिबिंब्य यस्य । ज्ञाने विबाधं दधिरे निवासं ॥ फणामिषात्सप्तनयाश्च तस्थु—स्त्यक्त्वा रिपुत्वं स शिवाय पार्श्वः ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ ४ ॥ यस्मिञ्जिने गर्भगतेऽपि पित्रोः । श्रीः सर्वतोऽजायत वर्द्धमानाः ॥ सिद्धार्थसूनुश्चरमप्रभुर्मा । सिद्धार्थसार्थप्रवरं विदध्यात् ॥ ५ ॥ जयंतु ते श्रीगुरवः कलावतां । जमोऽपि येषां करसंगमान्नरः ॥ रत्नेषु चंद्रोपलवद्भुवि स्थितिं । समश्नुते नाशितदोषदुर्दशः ॥ ६ ॥ चक्रे पुरा यज्जयसिंहसूरि–शिष्येण शास्त्रं जयकीर्त्तिनाम्ना ॥ तस्याहमासूत्रयितास्मि वृत्तिं । सुखावबोधां स्वपरोपकृत्यै ॥ ७ ॥ इह हि प्रकरणकारः प्रगुणिततत्त्वोपदेशसुधासारः पुण्यवल्लरीपल्लवोल्लासवर्षारंभे श्रीशीलोपदेशमालाख्यप्रकरणप्रारंभे सारेतरविचारणप्रवणचतुरचेतश्चमत्कृतये प्रेक्षावतां प्रवृत्तये विघ्नविनायकोपशमनाय च समुचितेष्टदेवतानमस्कारपूर्वकमभिधेयप्रयोजनसंबंधबंधुरां प्रथमगाथामाह—

॥ मूलम् ॥—आबालबंभयारिं । नेमिकुमारं नमित्तु जयसारं ॥ सीलोवएसमालं । वुत्तामि विवेयकरिसालं ॥ १ ॥ व्याख्या—आबालब्रह्मचारिणं जगत्सारं नेमिकुमारं द्वाविंशं तीर्थंकरं नत्वा प्रणम्य विवेककरिशालां शीलोपदेशमालामहं वक्ष्यामीति समुदायार्थः । अवयवार्थस्त्वयं—भावप्रधानत्वान्निर्देशानां, बालं बालभावं, आ अभिव्याप्य, ब्रह्मचारी च-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तुर्यव्रतधारी तं, तत्तादृगनुरूपरूपसंपन्निर्जितनिर्जरराजनारीं राजीमतीं परित्यज्योज्जयंतशिखरिशिखरे मंक्षु दीक्षाकक्षीकारात्, तत्परित्यागस्वरूपं तु विस्तरतः पुरतो वक्ष्यमाणश्रीनेमिजिनचरिते स्पष्टयिष्यते. जगत्सारं जगति त्रिभुवने सारं प्रधानं, अनन्यसाधारणदुर्द्धरशीलधुरो धौरेयत्वात्. यद्वा जगति सारं रहस्यभूतं परमरूपतया ध्येयमित्यर्थः, अथवा जयसारं जयो बाह्यांतरारीणां निर्जयस्तेन सारमुत्कृष्टमिति. एवंविधं नेमिकुमारमिति वर्षशतत्रयीं यावत्संसारवासेऽपि स्वयमन्निसरंतीं राज्यलक्ष्मीं तृणवदजीगणदिति तस्य कुमारत्वं ज्ञेयं. शीलोपदेशमालां शीलस्य मैथुनपरिहाररूपचतुर्थव्रतरूपस्योपदेशा अन्वयव्यतिरेकाभ्यां कथानकानि, तेषां माला श्रेणिः, यद्वा मालेव माला, शीलोपदेशपुष्पाणां बाहुल्येन हृदि कंठपीठे च धारणसाधर्म्यान्मालात्वं. एतावता केषांचिद्रचनानां विशेषोपदेष्टव्यत्वेन पुनर्ज्ञणनेऽपि न दोषः, यदुक्तं—सज्झायज्झाणतवोसहेसु । उवएसथुइपयाणेसु ॥ संतगुणकित्तणेसु य । न हुंति पुणरुत्तदोसाउ ॥ १ ॥ इति, शीलोपदेशमालामेव विशिनष्टि—विवेककरिशालां, विवेको हेयोपादेयविचारः, स एव करी हस्ती, तस्य शालेव शाला विवेकगजेंऽस्य निवासभू-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मित्वात्. एवंविधां शिलोपदेशमालां ज्ञापिष्यामीति संक्षेपार्थः। अत्र संबंधो वाच्यकरूपो, वाच्यः प्रकरणार्थः, वाचकं प्रकरणं, अभिधेयः शीलोपदेशाः, विवेककरिशालामिति च प्रयोजनं, तच्च द्विधा, कर्तुः श्रोतुश्च, परापरज्ञेदादेकैकमपि द्विविधं, तत्र कर्तुः परं मोक्ष प्राप्तिः, अपरं भव्यसत्वानुग्रहः, श्रोतुरपि परं शिवगतिरपरं तु प्रकरणार्थावबोधः, इतरतीर्थंकरनमस्कारनिरपेक्षं श्रीनेमेरेव नमस्कारकरणं ग्रंथस्य शीलप्राधान्यमेव व्यनक्ति. अतिशयास्तु जयसारमिति अपायाऽपगमातिशयः, जगत्सारमिति पूजातिशयः, तस्य चाऽन्यथाऽनुपपत्तित्वाद् ज्ञानातिशयः, ततोऽवश्यंभावित्वाद्वपदेशस्य च वचनातिशयः, इति चत्वारोऽतिशयाः, इति प्रथमगाथार्थः ॥ अथ फलोपदर्शनपूर्वं शीलमेवोपदिशन्नाह—

॥ मूलम् ॥—निम्महियसयलहीलं। डुहवल्लीमूलनक्कणणकीलं॥ कयसिवसुहसंमीलं। पालह निच्चं विमलसीलं ॥ २ ॥ व्याख्या—नित्यं विमलशीलं पालयतेति संबंधः, तद्विशेषणान्याह—निर्मथितसकलहीलं, निर्मथिता मंथेन दधिज्ञांभमिव चूर्णिता सकला समग्रा हीला परिभवो येनेति, शीलभाजां मृगपतिगजेंद्रभुजंगसंग्रामादिपराभवा हि न बाधंते, तथा

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दुःखवल्लीमूलोत्खननकीलं, दुःखमेव च वल्ली कर्मजलधरान्निवर्षणेन प्रादुर्भावुकत्वात्, तस्या दुःखवल्ल्या मूलमुत्पत्तिभूमिः, तदुत्खननाय कीलं कीलकमिव. शीलेन चिराचीर्णदुःखलक्षाणि निःकृत्यंते. कृतशिवसुखसंमीलमिति, कृतो विहितः शिवसौख्यानां मोक्षसौख्यानां सन्मीलः प्राप्तिर्येनेति, नित्यमिति निरंतरं, दानतपोभावनादीनि हि यावत्पालितफलावहानि भवंति, न तथा शीलं, तद्धि चिरमनुपाल्यैककृत्वस्तद्भंजने संपूर्णव्रतभंगात्, अतस्तन्निरंतरं सेव्यं. यदुक्तं—बुड्ढंतिनामभारा । तच्चिय बुड्ढंति वीसमंतेहिं ॥ सीलभरो वोढव्वो । जावजीवं अवीसामो ॥ १ ॥ इति भावः ॥ इहपरभवप्राप्यं तन्माहात्म्यमेव गाथायुगलेनाह—

॥ मूलम् ॥—लच्छी जसं पयावो । माहप्पमरोगया गुणसमिद्धी ॥ सयलसमीहियसिद्धी । सीलाउ इह भवेवि भवे ॥ ३ ॥ परलोएवि हु नरसुर—समिद्धिमुवभुंजिऊण सीलनरा ॥ तिहुयणपणमियचरणा । अरिणा पावंति सिद्धिसुहं ॥ ४ ॥ व्याख्या—इह भवे तावत् शीलादजिह्मब्रह्मसेवनाल्लक्ष्मीश्चक्रवर्त्तिवासुदेवबलदेवमांडलिकादिश्रीः, यशः सर्वदिग्गामी साधुवादः, प्रतापोऽखंडिताज्ञैश्वर्यं, माहात्म्यं सर्पादेः पुष्पमालादिदर्शनं, अरोगता ज्वरातिसा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रत्नगंदरराजयक्ष्माद्यबाध्यता, गुणसमृद्धिः गुणानां महाव्रताणुव्रतानां परिपोषः; सर्वसंग्राहकविशेषणमेवाह—सकलसमीहितसिद्धिः निखिलवांछितप्राप्तिः शीलादिह भवेऽपि जायत इति. परलोके पुनर्निश्चितं शीलभरात्सुसेवितादित्यध्याहारः, नरसुरसमृद्धिं मनुष्यदेवलक्ष्मीमुपभुज्य भोग्यतामापद्य त्रिभुवनप्रणतचरणास्त्रिजगद्वंद्याः सिद्धिसुखं प्राप्नुवंति, अत एव किंभूताः? अरिणा ऋणं प्राक्तनं शुभाऽशुभं कर्म अवश्यभेद्यत्वात्, तदेव ऋणमिव ऋणं देयद्रव्यरूपं, तन्न विद्यते येषामिति अऋणाः क्षीणसमस्तकर्माणो मुक्तिरूपं परमपदमश्नुवते. ॥ इति गाथाद्वयार्थः, भावार्थस्तु कथानकगम्यः । तत्र च गुणसुंदरीपुण्यपालदृष्टांतौ दर्शेते. तथाहि—

जंबूद्वीपाभिधो द्वीप–श्चक्रवर्त्तीश्वरो ह्यसौ ॥ चंद्रसूर्यमिषाच्चक्र–चतुष्टयभृदस्ति यः ॥१॥ तत्रैव भारते क्षेत्रे । दक्षिणे श्रीविभूषितं ॥ श्रीभद्दिलपुरं नाम । पुरमस्ति मनोहरं ॥ २ ॥ यत्राऽभ्रंलिहसौधाग्रे । स्वर्णकुंभायते रविः ॥ स्वर्गगंगा पताकेव । तारकाः किंकिणीनिभाः ॥ ३ ॥ तत्रारिकेसरी राजा । विक्रमोऽरिकेसरी ॥ संभावयामि रत्नानि । यत्प्रतापकणानिव

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ ४ ॥ देवी कमलमालास्ति । तस्याईद्धर्मशालिनी ॥ अनंगनोगसौनाग्या । लालितस्मर-कुंजरा ॥ ५ ॥ तस्यां दैवतसंघाना–मुपयाचितकव्रजैः ॥ नदपादि चिरादेका । सुता सुतशताधिका ॥ ६ ॥ धन्यंमन्यो नृपोऽतुच्छं । जन्मोत्सवमचीकरत् ॥ अथाह्वयच्च सान्वर्थं । नाम्ना तां गुणसुंदरीं ॥ ७ ॥ कामद्रुमलतेवेयं । वर्द्धमाना दिने दिने ॥ अैंदवीव कला जज्ञे । सर्वेषां प्रियदर्शना ॥ ८ ॥ माद्यद्धन्मादकुद्ध्यान्निः । सिक्तस्तत्तनुकानने ॥ हावनावलसन्नायो । ववृद्धे यौवनद्रुमः ॥ ए ॥ साऽन्यदाऽधीत्य शास्त्राणि । सर्वांगीणविनूषणा ॥ मात्रादेशात्सनाना–मागा–त्पितुः पदनिनंसया ॥ १० ॥ चतुःषष्टिकलापूर्णां । साक्षादिव सरस्वतीं ॥ तनयां विनयानम्रा–मंकमारोपयन्नृपः ॥ ११ ॥ सन्नां पश्यन्नथोन्मत्त–शृंगारैकतरंगिणीं ॥ जगंति तृणवन्मेने । सोंतर्मद इव द्विपः ॥ १२ ॥ दिव्या सन्ना सुराश्चामी । सेवकाः कामितश्रियः ॥ अहं त्विंद्रः किमन्यद्वा । स्वर्गे किंचिद्विशिष्यते ॥ १३ ॥

इत्यादिगर्वहृत्पूरा–ऽजीर्णोद्रेकवशादिव ॥ स दंनाक्रांतनोगीवो–ज्जगार गरलं वचः ॥ ॥ १४ ॥ कस्य प्रसादप्रासाद—देवतायितमाप्य नोः ॥ नुंजध्वं नुवि साम्राज्यं । नवंतो ना-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

किकेलिन्निः ॥ १५ ॥ इत्थं वचनमाकर्ण्य । समकालं समाकुलाः ॥ गोमायव इवाहुस्ते । सेवका नूमिकामुकं ॥ १६ ॥ शश्वत्प्रसादकल्पद्रु—छायां तव वयं श्रिताः ॥ मनीषितफलास्वादं । स्वामिन् नृंगा इवाप्नुमः ॥ १७ ॥ श्रुत्वेदं कर्ममर्मज्ञा । जैनधर्माधिवासिता ॥ तडुक्तं दूरयंतीव । कुमारी धुधुवे शिरः ॥ १८ ॥ सविस्मितेन नूपेन । पृष्टा स्पष्टमुवाच सा ॥ शुन्नाशुन्नफलप्राप्तौ । तात कर्मैव कारणं ॥ १९ ॥ किमन्येन चिरं जीया—छ्लक्ष्मीरेकैव केवलं ॥ यस्याः प्रसादाच्चाटूनि । कुर्वते धनिनां जनाः ॥ २० ॥ तन्निशम्य महाकोपो । ध्रुवौ नंगुरयन्नृपः ॥ आह कस्य प्रसादेन । त्वयैवं भुज्यते सदा ॥ २१ ॥ तयोचे सर्व एवायं । जनः स्वकृतकर्मणां ॥ अश्नुते फलमन्यो हि । निमित्तं केवलं नवेत् ॥ २२ ॥ अंकादुत्सार्य राजेज्ञे । गृहीत्वाभरणादिकं ॥ जीर्णप्रायां विवर्णां च । शाटिकां परिधाप्य च ॥ २३ ॥ जीर्णवस्त्रावृतं रोरं । कृशांगं काष्टहारिणं ॥ निजपुंसा समानाय्य । तस्याः पाणिमयोजयत् ॥२४॥ युग्मं ॥ गच्छ भुंक्ष्व निजं कर्म । स्वजिह्वाफलमाप्नुहि ॥ सेवकांश्च दिदेशैनां । योऽनुगंता समे रिपुः ॥ २५ ॥ शिशौ न युज्यते कोपो—ऽनौचित्यमाचरत्यपि ॥ बाल्ये पत्न्याः स्तनौ क-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

र्षन् । वध्यो भवति किं सुतः ॥ २६ ॥

इत्यादिबहुविज्ञप्तो । नृपः शुकांतमंत्रिभिः ॥ न कस्यापि वचो मेने । भोगीव प्रत्युताऽकुपत् ॥ २७ ॥ विशिष्यविकसद्वक्त्र–पंकजा गुणसुंदरी ॥ भोद्ये स्वपुण्यकर्माणि । धन्याहमिति मानिनी ॥ २८ ॥ राजहंसीव काकस्य । ङमकस्यानुयायिनी ॥ तज्जीर्णमंदिरं प्राप्य । ददौ पत्युरथासनं ॥ २९ ॥ युग्मं ॥ गच्छ राजसुते स्वैरं । किमत्रास्ति तवोचितं ॥ सुवर्णं यत्र यत्रैति । तत्र तत्रार्थमावहेत् ॥ ३० ॥ रोरेणोदीरिता प्राह । मावादीरीदृशं पुनः ॥ स्वामिंश्चिंतामणिप्राय–स्त्वमेव शरणं मम ॥ ३१ ॥ युग्मं ॥ सा भंगुरनखाप्यस्य । जटाधारान् शिरःकचान् ॥ यावत्प्रारभते मोक्तुं । विनयावनताननां ॥ ३२ ॥ तावन्मलयजस्यात्र । सौरभ्यमुपलभ्य सा ॥ साश्चर्यं चिंतयित्वाथ । ज्ञाततत्वाऽवदत्पतिं ॥ ३३ ॥ स्वामिन्नद्य त्वया काष्ट–भारः क्व विनिवेशितः ॥ तेनोचे भोजनप्राप्त्या । मुक्तः कांदविकापणे ॥३४॥ ततस्तेन समं गत्वा । भारमानाययद्गृहे ॥ अन्नवस्त्रो हि किं भानु–स्तेजोमालिन्यमश्नुते ॥ ॥ ३५ ॥ श्रीखंडखंडमादाय । गत्वा सौगंधिकापणं ॥ विक्रीय तेन वित्तेन । वस्त्राभरणमग्र-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

हीत् ॥ ३६ ॥ केशान् क्लेशानिवोन्मोच्य । तैलेनाभ्यज्य तस्य सा ॥ करांहिनखसंस्कार—पूर्वं स्नानमकारयत् ॥ ३७ ॥ रंको राजसुतालाभा—त्पुण्येनैवैष पालितः ॥ पुण्यपाल इति स्पष्टं । सान्वयं नाम निर्ममे ॥ ३८ ॥

यस्मात्तेन तदानिन्ये । छेदयित्वाथ पादपं ॥ नृत्यैरानाययद्गेहं । चांदनं नृपनंदिनी ॥३९॥ नित्यशो भुज्यमानानि । व्यवहारबहिष्कृतैः ॥ त्रुट्यंति मेरुशृंगाणि । ज्ञात्वेति गुणसुंदरी ॥ ॥ ४० ॥ निःशेषमपि विक्रीय । कृत्वा हेमसहस्रकं ॥ क्रयविक्रयसंक्रांत्या । व्यवहारमसूत्रयत् ॥ ४१ ॥ हेयोपादेयविज्ञान—वंध्यं पशुमिवाधिपं ॥ विज्ञा विज्ञाय शिक्षार्थं । बहिर्ग्रामसुपानयत् ॥ ४२ ॥ मातृकां पाठयित्वाथ । ज्ञापयित्वाक्षरावलिं ॥ गणितव्यवहारेऽपि । प्रावीण्यमनयत्पतिं ॥ ४३ ॥ वस्त्रक्रयाणकादीनां । शिक्षयित्वा परीक्षणं ॥ तमन्वशिक्षदेकांते । हेयोपादेयकर्मसु ॥ ४४ ॥ सर्वविद्यासु निष्णात—धिषणा गुणसुंदरी ॥ तमल्पदिवसैश्चक्रे । धर्मकर्मैकमार्मिणं ॥ ४५ ॥

ततः सार्थेन संगत्य । गत्वा पोतनपत्तनं ॥ आपणादिव्यवहृतौ । तमन्निङ्गतमं व्यधात्

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ ४६ ॥ चक्रे मुग्धापि वैदग्ध्यं । पत्युः प्रत्युत सा तथा ॥ यथा चित्तेषु दक्षाणा--मपि चित्रमजीजनत् ॥ ४७ ॥ क्रमेण सर्वकृत्येषु । प्रवृत्ते नर्त्तरि स्वयं ॥ निश्चिंता वह्निकावर्णा—वलीमालमलोकयत् ॥ ४८ ॥ तत्र सप्तौषधीयोगं । ज्ञात्वा कल्याणसिद्धिदं ॥ योजयित्वेष्टिकाचक्रे । चकार कनकोच्चयं ॥ ४९ ॥ विशेषचिंतानिर्मुक्ता । निर्मग्नेव सुधांबुधौ ॥ धर्मारामेऽधिकं रेमे । नृंगीव सरसीरुहे ॥ ५० ॥ पुण्यपालोऽपि नूपाल । श्व लक्ष्मीविलासकृत् ॥ प्रसिद्धिं परमां प्राप । दानवैदग्ध्यकेलिभिः ॥ ५१ ॥ यथा लक्ष्मीस्तथा धर्म—स्तेन दानं ततो यशः ॥ तथा च तस्य वैदग्ध्य—मवर्द्धिष्टोत्तरोत्तरं ॥ ५२ ॥ नक्तंच—श्रीपरिचयाज्जडा अपि ॥ नवंत्यभिज्ञा विदग्धचरितानां ॥ नपदिशति कामिनीनां । यौवनमद एव ललितानि ॥ ५३ ॥ तत्रत्यराजादेशेन । भुवमादाय धर्मधीः ॥ नत्तुंगतोरणं तत्र । जिनचैत्यमचीकरत् ॥ ५४ ॥ नित्यमेकत्रवासेन । जडात्मा जायते नरः ॥ इति राजांगजाऽकार्षी—देशांतरमतिं पतिं ॥ ५५ ॥ वाहनानि प्रभूतानि । क्रयाणकशतानि च ॥ आदाय महतीं सार्थ—रचनामुत्सुकश्च सः ॥ ५६ ॥ पाथेयमपाथेयानां । वाहनं वाहनार्थिनां ॥ यद्यामि यः सदा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ज्येति । पटहेनेत्यघोषयत् ॥ ५७ ॥ युग्मं ॥ तत्रत्यनृपमापृच्छ्य । मागधैः कृतमंगलः ॥ दानं ददानो दंतीव । सिंहलंप्रति सोऽचलत् ॥ ५८ ॥ गच्छन् मार्गे सर्वर्द्ध्या । कल्पद्रुरिव जंगमः ॥ नायकः पुण्यपालाख्यः । सर्वत्रेति प्रथामगात् ॥ ५९ ॥ जीर्णान्यन्युद्धरंस्तीर्थ–प्रज्ञावनपुरस्सरं ॥ पुण्यपुंजानिव स्वस्य । नव्यचैत्यान्यचीकरत् ॥ ६० ॥ देशाननेकानुल्लंघ्य । यशो विस्तारयन् भुवि ॥ क्रमेण सिंहलद्वीपं । प्रापदानंदबंधुरः ॥ ६१ ॥ स तत्राद्भुतमाणिक्य–निर्मितैर्नूरिभूषणैः ॥ विभुष्य सेवकांश्चक्रे । कल्पवृक्षानिवांगिनः ॥ ६२ ॥ वाजिनस्तेजन्नालेज–देशजांल्लक्षसंख्यया ॥ जनैरानाययामास । स्पर्द्धिष्णुरिव वासवं ॥ ६३ ॥ विंध्याचलादथानाय्य । दानस्पर्धापराधिनां ॥ सहस्रं भद्रजातीय–दंतिनामप्यमग्रहीत् ॥ ६४ ॥ विभूतिमनुभाव्याथ । प्रभूतां गुणसुंदरी ॥ नवाचावसरं प्राप्य । पतिं मधुरया गिरा ॥ ६५ ॥ स्वामिन् घर्मांशुसंतप्त–विहंगगलचंचलं ॥ वित्तं विवेकिना प्राप्य । तूर्णं कार्यं फलेग्रहि ॥६६॥

किं तेन नाथ वित्तेन । यत्पुण्यांगं न पोषति ॥ यद्वा स्वजनसंबंधि–कौतुकाय न जायते ॥ ६७ ॥ तद्गंतुमुचितं तत्र । यत्र राजारिकेसरी ॥ उन्मील्य नयने सोऽपि । प्रेक्षतां क-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

र्मजं फलं ॥ ६८ ॥ श्रुत्वा तन्नाषितं पुण्य–पालस्तन्नावपंमितः ॥ सद्यः प्रास्थानिकीं ढक्कां । प्रौढप्रौढिरदापयत् ॥ ६९ ॥ पुण्यपालो महीपालैः । संमुखागमनादिना ॥ मार्गे सत्क्रियमा-
णोऽगा–त्सम्राडिव पदे पदे ॥ ७० ॥ तीर्थे प्राप्य महादान–प्रवृत्त्या संघपूजया ॥ प्रन्नावना-
दिकृत्यैश्च । चक्रेऽर्हद्दर्शनोन्नतिं ॥ ७१ ॥ चक्रवर्त्ती ह्ययं किं वा । वासवो वा धरागतः ॥ वा-
सुदेवो महासैन्यः । किं वा साधयते महीं ॥ ७२ ॥ इत्यादि लोकैराशंक्य । युक्तयुक्त्या वि-
ज्ञाव्य च ॥ महानायक इत्येष । प्रसिद्धिं प्रापितः परां ॥ ७३ ॥ क्रमेणाक्रम्य सीमांतं । श्री-
न्नद्दिलपुरस्य सः ॥ अनेकान् पूर्वसंकेतान् । जन्मन्नूमेर्व्यलोकयत् ॥ ७४ ॥ स्मारं स्मारं का-
ष्टहारि–प्रस्तावं सुहृदां पुरः ॥ वेधसापि हि दुर्लंघ्यं । वैचित्र्यं कर्मणोऽवदत् ॥ ७५ ॥ स्था-
पयित्वा पुरासन्ने । सार्थं स्वार्थपरार्थवित् ॥ विमानप्रतिमं तत्र । नव्यसौधं व्यधापयत् ॥७६॥
स्थाले निधाय रत्नानि । पुंजीकृत्य गुणानिव ॥ अरिकेसरिन्नूपाय । प्राभृतं सार्थपो ददौ ॥
॥७७॥ तत्तद्देशांतरोद्दंतैः । पुण्यपालोऽनुशीलितैः ॥ आश्चर्यकारिन्निश्चक्रे । राजानं विस्मिताश-
यं ॥ ७८ ॥ जन्मन्यपि न दृश्यंते । ये न्नावा न्नूधवैरपि ॥ हेलया तेऽनुन्नूयंते । देशांतरवि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

हारिन्निः ॥ ७९ ॥ हस्तिनः कतिचिद्राजा । जिघृक्षति धनैरिति ॥ मंत्रिणोदीरितोऽवादी—
दुदारः श्रेष्ठिपुंगवः ॥ ८० ॥ किं धनैः सर्वमेवेदं । विन्यस्तं स्वामिपादयोः ॥ तत्प्रसद्यानुगृ-
ह्णीध्वं । तत्रैवागमनेन मां ॥ ८१ ॥ कौतुकेन महीशोऽपि । दिदृक्षुस्तस्य वैभवं ॥ परिमेयप-
रीवारः । सार्थमध्यमथासदत् ॥ ८२ ॥ विचित्रभाषानेपथ्यैः । प्रविशन्निःसरज्जनैः ॥ सार्थं
स वीक्ष्य स्वर्लोक—मिव चित्ते चमत्कृतः ॥ ८३ ॥ तावता पुण्यपालोऽथ । विनयाद्भूमिना-
यकं ॥ स्नानमंडपमासाद्य । स्नानपीठमवीविशत् ॥ ८४ ॥ देवद्ध्यां स्नानमाधाय । चीनांशु-
कसमावृतः ॥ जिनार्चनचिकी राजा । मध्ये देवगृहं ययौ ॥ ८५ ॥ कर्पूरपूरकस्तूरी—चंद-
नाऽगुरुकुंकुमैः ॥ स्तवनैरुत्तमैस्तत्र । प्रपूज्य जिनपुंगवं ॥ ८६ ॥ ततो भोजनशालाया—मुप-
विष्टे महीपतौ ॥ स्वर्णासनोपरि न्यस्ता । रत्नस्थालावली शुभ्रा ॥ ८७ ॥ पूर्वदिग्द्वारतः श्वेत
—वस्त्राभरणधारिणी ॥ देवीव काचिद्भार्येत्य । न्यधात्तत्र फलावलीं ॥ ८८ ॥ निर्गत्य दक्षिण-
द्वारा । नीलनपथ्यभूषणा ॥ भूयो रसवतीं रम्यां । पर्यवेषयदंगना ॥ ८९ ॥ प्रतीच्याः पी-
तवस्त्रादि—हृद्या पक्वान्नमाक्षिपत् ॥ भृदिच्या रक्तनेपथ्या । घृतादि मानिनी न्यधात् ॥९०॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दृष्ट्वा चतस्रो नृपालो–ऽनन्यरूपा मृगेक्षणाः ॥ सविस्मयतयाऽप्राक्षी–त्कियदंतःपुरं तव ॥ ९१ ॥ सस्मितं पुण्यपालोऽपि । नृपालमलपत्तरां ॥ यथावधारितं स्वामिन् । भवता तत्त-
१५ ॥ थैव हि ॥ ९२ ॥ भोजनादूर्ध्वमेकांते । पुण्यपालनरेंद्रयोः ॥ आसीनयोर्नवस्नेह–गोष्टीसु हृतचेतसोः ॥ ९३ ॥ समयज्ञा तदा हर्षा–द्वेगतो गुणसुंदरी ॥ वहिकां पितृदत्तां तां । परि-धाय समागमत् ॥ ९४ ॥ दृष्ट्वोपलक्ष्य वैलक्ष्य–मंदाक्षोऽपरुषं जगौ ॥ वत्से नेपथ्यमादाय। ममोत्संगमलंकुरु ॥ ९५ ॥ तथाकृते नृपोऽवादी–न्मन्वानः कर्मजं फलं ॥ उन्मार्गतस्त्वयैवा-हं । सन्मार्गमवतारितः ॥ ९६ ॥ अपरापरशृंगारा । भोजनावसरे तदा ॥ एकैवाहं समा-यांती । त्वया वै नोपलक्षिता ॥ ९७ ॥ वत्से कोऽयं पुण्यपालो । मंदं पृष्टा सती सती ॥ वे-त्रिणा ज्ञापयामास । सा स्वं वृत्तांतमादितः ॥ ९८ ॥ मंत्रिसामंतशुश्रांत–प्रमुखा नगरीज-नाः ॥ तमुदंतमथाकर्ण्य । तत्र सोत्कंठमेयरुः ॥९९॥ आलिलिंगुर्जनन्यस्तां । बाष्पाविलवि- ॥ १५ ॥
लोचनाः ॥ वत्से त्वत्संगमादद्य । मुदाऽस्मासु पदं ददे ॥ १०० ॥ धात्र्यः सख्यस्तथा प्रीत्या । शैशवस्नेहसोत्सुकाः ॥ गाढहुंकारहुंकारा । इगादुपचुढौकिरे ॥१॥ समाकर्ण्य समाकर्ण्य ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तस्य वैभवसंभवं ॥ जल्पंत्यो विस्मयाच्चक्रुः । कोलाहलमलं स्त्रियः ॥ २ ॥ पितृसेवकलो-
कानां । प्रमोदाकुणसुंदरी ॥ वस्त्राभरणतांबूलै—रुचितां सत्क्रियां व्यधात् ॥ ३ ॥ पुण्यपालो-
ऽपि बालेंदु—रिव सोत्कंठमीक्षितः ॥ विनयावनतग्रीवो । नतः श्वसुरमादरात् ॥ ४ ॥ महा-
र्ह्यांश्च गजारूढौ । जामातृश्वसुरौ ततः ॥ सांतःपुरपरीवारौ । नगरंप्रति चेलतुः ॥ ५ ॥
श्रीवर्द्धमानसूरीणा—मंतरा धर्मदेशनां ॥ मिष्टपण्यां नृपः श्रुत्वा । जामातरमवोचत ॥ ६ ॥
वैराग्यं जातमस्माकं । वैभवश्रवणात्तव ॥ तथापि श्रोतुमिच्छामि । जिनधर्मं सविस्तरं ॥७॥
संभूय सर्वे सानंदं । नत्वा सुरींद्रपादयोः ॥ शश्रुवुर्द्धर्ममाहात्म्यं । संवेगावेगकारणं ॥ ८ ॥
यथा—लक्ष्मीर्यशः कुले जन्म । प्रतापः प्रियसंगमः ॥ श्रीधर्मकल्पवृक्षस्य । फलमेतज्जिनो-
दितं ॥ ९ ॥ यत्पुनर्गुणसुंदर्या । शीलं पालितमुज्ज्वलं ॥ तस्येदं फलमत्रास्ते । प्रांते मोक्षो-
ऽपि लप्स्यते ॥ १० ॥ भवांभोधिरपारोऽयं । दुःखकल्लोलसंकुलः ॥ दीक्षापोतमनादृत्य । तरीतुं न हि शक्यते ॥ ११ ॥ श्रुत्वाऽन्यधत्त भूपालः । श्रयामि चरणौ तव ॥ महात्मनाऽ-
प्यथादिष्टं । न च भाव्यं निरुद्यमैः ॥ १२ ॥ गत्वा मंत्रिभिरामंत्र्य । मुक्त्वा कारां कृपापरः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यानां रक्षणं, अवनीनाथो नरेंद्रः, अपि शब्दाद् इभकोऽपि, पुरुषः पुमान् धर्माधारः, नारी स्त्री मोक्षसाधकरत्नत्रयधारिणी, जात्यपेक्षया सर्वेषामेकवचनं, सदा निरंतरं सर्वाण्येतानि शीलपवित्राण्येव अर्घंति गौरवं लभंते; शीलवंत एव पूज्याः सुगतिगमनयोग्याश्च भवंतीति शेषः ॥ ५ ॥ इतरनरप्रवृत्तये दुःकरकारकत्वेन शीलकलितानेव गाथाद्वयेनोपश्लोकयन्नाह—

॥ मूलम् ॥—दायारसिरोमणिणो । के के न हुया जयंमि सप्पुरिसा ॥ के के न संति किं पुण । थोवच्चियधरियसीलनरा ॥ ६ ॥ छट्ठट्ठमदसमाइ—तवमाणावि हु अईव नग्गतवं ॥ अक्खलियसीलविमला । जयंमि विरला महामुणिणो ॥ ७ ॥ व्याख्या—जगति भूतले दातृशिरोमणयोऽवदान्याः के के सत्पुरुषा न भूता न जाताः? यदाहुः—कर्णश्चर्म शिबिर्मांसं । जीवं जीमूतवाहनः ॥ ददौ दधीचिरस्थीनि । नास्त्यदेयं महात्मनां ॥ १ ॥ के के वा न संति न विद्यंते सत्पुरुषा दातारः? कृपार्द्रतया ये स्वजीवमपि तुलया तोलयंति, पुनः स्तोका एव धृतशीलनराः सत्पुरुषा अपीतिशेषः ॥ ६ ॥ द्वितीयगाथार्थमाह—षष्ठाष्टमदशमादि अतीवोग्रतपस्तप्यमाना अपि खु निश्चयेन जगति अस्खलितशीलविमलाः अखंडित-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ पुत्राऽन्नावान्नृपोऽदत्त । जामात्रे राज्यसंपदं ॥ १३ ॥ स्वयं महाविभूत्या तु । दत्वा वांछितमर्थिनां ॥ चारित्रमुररीकृत्य । निष्कलंकमपालयत् ॥ १४ ॥ पुण्यपालमहीपालो । जिनधर्मं प्रन्नावयन् ॥ साम्राज्यं पालयामास । चिरं सन्नीतिपेशलः ॥ १५ ॥ यौवनं निधनारूढं । श्रीन्नराः क्षणन्नंगुराः ॥ कायोऽपायशतोपेत–स्तस्माद्धर्मे मतिं कुरु ॥ १६ ॥ इत्युक्तो गुणसुंदर्या । पुत्रं राज्ये सुलोचनं ॥ निवेश्य दंपती दीक्षां । जगृहाते महोत्सवात् ॥ १७ ॥ निरतीचारचारित्र–मनुपाल्य चिराय तौ ॥ प्रापतुर्मोक्षमक्षीण–सुखमक्षयमव्ययं ॥ १८ ॥ ये शीलमाणिक्यमखंमेत–यत्नेन धीरा हृदि धारयंति ॥ ते स्युः परत्रेह च वांछितार्थ–प्राप्तिप्रहृष्टा गुणसुंदरीव ॥ १९ ॥ इति श्रीगुणसुंदरी कथा ॥

सिद्धेः साधकेषु धर्मोपायांतरेषु सत्स्वपि शीलमेव परमार्थतस्तत्कारणमित्याह—

॥ मूलम् ॥—देवो गुरू य धम्मो । वयं तवं गुत्तिमवणिनाहोवि ॥ पुरिसो नारीवि सया । सीलपवित्ताइं अग्घंति ॥ ५ ॥ व्याख्या—देवः शासनादिकरः, गुरुर्धर्माचार्यः, धर्मो हेयोपायोपदेशो, व्रतं दीक्षांगीकारः, तपो बाह्याऽभ्यंतरन्नेदाद् द्वादशन्नेदं, गुप्तिर्मनोवचनका-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ब्रह्मचर्या विरला एव महामुनयः, दुःपरिपाल्यत्वाद्ब्रह्मव्रतस्य. यदागमः—अक्काण रसणी कम्माण । मोहणी तह वयाण बंभवयं ॥ गुत्तीण य मणगुत्ती । चउरो दुक्कोहिं जिप्पंति ॥ ॥ १ ॥ अतस्तपस्वित्वेऽपि विरला एव निर्मलशीला इति भावः ॥ तदेव लौकिकदृष्टांतेन दर्शयन्नाह—

॥ मूलम् ॥—जं लोए वि सुणिज्जइ । नियतवमाहप्परंजियजयावि ॥ दीवायणविस्सामित्त–पमुहमुणिणोवि पब्भट्ठा ॥ ८ ॥ व्याख्या—यल्लोकेऽपि श्रूयते यन्निजतपोमाहात्म्यरंजितजगतोऽपि द्वीपायनविश्वामित्रप्रमुखमुनयोऽपि प्रभ्रष्टाः, शुष्कपलाशशेवालजलाहारा अपि स्त्रीविभ्रमभ्रांता भ्रष्टशीला जाताः, इति गाथार्थः ॥ ८ ॥ भावार्थः पुनः कथानकगम्यः, स चेत्थं—

पूर्वजः पांडवेयानां । हस्तिनापुरनायकः ॥ मृगव्यव्यसनी राजा । शांतनुः काननं ययौ ॥ १ ॥ सारंगः स्वप्रियां प्रेम्णा । पुरस्कृत्य पलायितः ॥ तत्पृष्टे स व्रजन् वेगा–द्विवेश वरकाननं ॥ २ ॥ आरुरोह महासौधं । दृष्ट्वाग्रे सप्तभूमिकं ॥ तत्र बालार्घपाद्यादि–युक्त्या

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

चोपचचार तं ॥ ३ ॥ सुमुखीमुज्झसत्प्रेम–रोमांचामथ सोऽन्यधात् ॥ कासि त्वं कस्य वा पुत्री । कथमेकाकिनी वने ॥ ४ ॥ जह्नोर्विद्याधरेशस्य । गंगा नाम्नी सुतास्म्यहं ॥ आपति-प्राप्ति तिष्ठामि । ज्योतिर्विद्याक्ष्यर्यंत्रिता ॥ ५ ॥

तन्नाथ फलितं युष्म–त्संगमेनाधुना मम ॥ ततश्च परिणीयागा–न्नृपो गंगां स्वपत्तनं ॥ ॥ ६ ॥ क्रमेणाऽसूत सा सूनुं । गांगेयान्निधमुर्जितं ॥ धनुर्वेदादिविद्याश्च । मातुलस्तमपीप-ठत् ॥ ७ ॥ अन्यदा शांतनुर्नाव–मारूढां यमुनातटे ॥ कन्यां सत्यवतीं वीक्ष्य । तत्पितुस्ता-मयाचत ॥ ८ ॥ नौसैन्याधिपतिः प्राह । वरस्त्वादृक्क्व लभ्यते ॥ गांगेयोऽस्ति परं सूनु–स्तव तद्दातुं नोत्सहे ॥ ९ ॥ सति राज्यधरे तस्मिन् । सुतोऽस्याः क्रोपभुज्यते ॥ श्रुत्वेति वि-गतानंदो । राजा स्वीयां पुरं ययौ ॥ १० ॥ गांगेयोऽथ पितुर्नाव–वेदी नाविकमाह तं ॥ त्व-द्दौहित्राय दास्येऽहं । राज्यं ब्रह्मधरः स्वयं ॥ ११ ॥ तत्साहसेन संतुष्टाः । पुष्पवृष्टिपुरस्सरं ॥ एनं जयजयारावा । भीष्ममित्यूचिरे सुराः ॥१२॥ नाविकस्तनयां तूर्णं । दत्वा भीष्ममभाष-त ॥ कालिंदीकूलमाप्यैना–मङ्कमहमेकदा ॥ १३ ॥ रत्नांगदसुता सत्य–वती प्रोक्ता सुरैर-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सौ ॥ वात्सल्यात्पालिता त्वेषा । प्रियया मेऽनपत्यया ॥ १४ ॥ आनंदादथ तां भीष्म–श्चक्रे पितुरुपायनं ॥ नृपयम्य नेरशस्तां । सुखाऽद्वैतमविंदत ॥१५॥ क्रमेणासूत सा सूनु–द्वयमद्वैतसाहसं ॥ चित्रांगदचित्रवीर्या–ह्वयमन्योऽन्यवत्सलं ॥ १६ ॥ शांतनौ द्युगते भीष्मो । राज्ये चित्रांगदं न्यधात् ॥ सोऽन्यदा समरे नीलां–गदेन रिपुणा हृतः ॥ १७ ॥

सोऽथो विचित्रवीर्याय । दत्वा साम्राज्यमग्रतः ॥ अंबिकांबालिकांबाख्याः । कन्यकाः पर्यणाययत् ॥ १८ ॥ राजयक्ष्माणमापन्नं । धर्मकर्मार्थविच्युतं ॥ तं विज्ञाय कुलच्छेद–शंकी भीष्मो व्यचिंतयत् ॥ १९ ॥ यथा तथा कुलं वृद्धि–मापाद्यमिति साग्रहं ॥ ऋषिं द्वीपायनं सत्य–वतीभवमजूहवत् ॥ २० ॥ क्षीयमाणं कुलं बंधो । समयश्च समुद्धर ॥ इत्यर्थितो वधूस्तिस्रः । स तनूजानजीजनत् ॥ २१ ॥ नेत्रयोः पट्टबंधेन । संगता धृतराष्ट्रसूः ॥ पांडुर्नूश्चंदनालिप्ता । निःशंका विदुरप्रसूः ॥ २२ ॥ ईदृशोऽपि मुनिः कामं । चक्राणो दुस्तपं तपः ॥ हेलया भ्रंशमापन्नो । विषयाः खलु दुर्जयाः ॥ २३ ॥ यदाहुः—कानीनस्य मुनेः स्वबांधववधूवैधव्यविध्वंसिनो । नप्तारः किल तेऽपि गोलकसुताः कुंडाः स्वयं पांडवाः ॥ पं-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

चैतेऽपि समानजायत इति प्रातः समुत्कीर्त्तनं । तेषां पावनमाः कथं नु विषमा धर्मस्य शून्या गतिः ॥ २४ ॥ इति संक्षेपतः प्रोक्तं । द्वीपायनकथानकं ॥ यथाज्ञातमथोदंतो । विश्वामित्रस्य कथ्यते ॥ २५ ॥ विश्वामित्रः किल क्षत्र—मंमनं गाधिनंदनः ॥ वशिष्टस्पर्द्धया दीक्षां । तापसीमयमग्रहीत् ॥ २६ ॥ पक्वशुष्कपलाशांबु—शेवालाहारलीलया ॥ सूर्यदृष्टिस्तपो बाढं । तपतेस्म स दुस्तपं ॥ २७ ॥ अथास्य विश्वविश्वस्य । सृष्टौ शक्तिरजायत ॥ वस्तूनां प्रतिवस्तूनि । सृजंतं तं दिवेश्वरः ॥ २८ ॥ ज्ञानेन विज्ञो विज्ञाय । तपसो भ्रंशनाय सः ॥ मेनकां प्रेषयामास । भूतले देवकामिनीं ॥ २९ ॥ युग्मं ॥ सा वसंतादिसामग्र्या । भूतलं देवलोकवत् ॥ कृत्वा विवशयामास । पंचाक्षीं तस्य सत्वरं ॥ ३० ॥ ध्यानभ्रंशमथाऽवाप्य । विस्मृत्य स्वतपःक्रियां ॥ जग्राह मेनकां कंठे । कामविह्वलिताशयः ॥ ३१ ॥ तथा च तन्नास्त्रे—सुगुप्तानामपि प्राय । इंद्रियाणां न विश्वसेत् ॥ विश्वामित्रोऽपि सोत्कंठं । कंठे जग्राह मेनकां ॥ ३२ ॥ अनुरागभरां भुक्त्वा । चिराच्चैतन्यमीयुषा ॥ ध्यानभ्रंशे कियान् कालो—ऽतीतः पृष्टेति साऽवदत् ॥ ३३ ॥ सप्तोत्तराण्यतीतानि । नववर्षशतानि च ॥ मासाः षड् व्य-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तीताश्चान्यत् । समतीतं दिनत्रयं ॥ ३४ ॥ तादृक् क्षत्रियवंश्योऽपि । विश्वामित्रो महातपाः ॥ तपसो भ्रंशितस्तस्माद् । दुःपाल्यं शीलमुज्ज्वलं ॥ ३५ ॥ स्वरूपमात्रमत्रोक्तं । ग्रंथविस्तर-भीतितः ॥ भारतादवगंतव्य । तन्नयोर्विस्तरः पुनः ॥ ३६ ॥ अत्र प्रमुखशब्देन रेणुकादिका-मुकतया प्रथिता जमदग्निप्रभृतयो ज्ञेयाः, इति गाथार्थः ॥ आस्तां मिथ्यात्विमुनयः, ज्ञात-तत्वानामपि शीलदुःपाल्यत्वमाह—

॥ मूलम् ॥—जाणंति धम्मतत्तं । कहंति भावंति भावणाउ य ॥ भवकायरावि सीलं । धरिउं पालंति नो पवरा ॥ ए ॥ व्याख्या—जानंति अवबुध्यंते यथोक्तमार्गमित्यर्थः, । च कारस्य सिंहावलोकितन्यायेन न केवलं जानंति धर्मतत्वं कथयंति च, एतावता तत्वज्ञान-दृढता निवेदिता. भावना अनित्यतादिद्वादशविधा भावयंति अनुशीलयंति, भवकातरा अपि संसारभीरवोऽपि, प्रवरा उत्तमकुलजातयः शीलं धृत्वा न पालयंति, सिंहवदादृत्यापि गोमा-युवत् सत्तत्वतश्चलंति, न च तद्वदेव पालयितुं क्षमाः, यदागमः—' चत्तारि पुरिसजाया प-न्नत्ता, तं जहा—सीहत्ताए नामं एगे निक्खंते सीहत्ताए विहरइ; सीहत्ताए नामं एगे निक्खं-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ते सियालत्ताए विहरइ; सीयालत्ताए नामं एगे निरुकंते सीहत्ताए विहरइ; सियालत्ताए नामं एगे निरुकंते सियालत्ताए विहरइ ' इति. तत्र प्रथमतृतीयभंगौ सुभगौ, न त्वितरौ. ॥ सर्वधर्मेभ्योऽपि तद्दुःकरतामाह—

॥ मूलम् ॥—दाणतवभावणाइ—धम्माहिंतो सुदुक्करं सीलं ॥ इय जाणिय णो भव्वा । अइयत्तं कुणह तत्तेव ॥ १० ॥ व्याख्या—दानतपोभावनादिधर्मेभ्यः शीलं सुदुष्करं, सुतरां दुःखेन क्रियत इति. यदुक्तं—क्षणिके भावनादाने । तपोऽपि नियतस्थिति ॥ यावज्जीवं तु शीलस्य । दुष्करं परिशीलनं ॥ १ ॥ इति ज्ञात्वा णो भव्याः तत्रैव शीलेऽतियत्नं परमादरं कुरुत ? मा दुष्करत्वात्तदुपेक्षध्वमिति गाथार्थः ॥ १० ॥ तत्प्रामाण्यमेवाह—

॥ मूलम् ॥—तं दाणं सो य तवो । सो भावो तं वयं खलु पमाणं ॥ जत्थ धरिज्जइ सीलं । अंतररिहिययनवकीलं ॥ ११ ॥ व्याख्या—तद्दानं, तदेव दानं दानतया गण्यते इति. तच्च तपः, स भावः, खलु ध्रुवं व्रतमपि तदेव प्रमाणं, यत्र दाने तपसि भावे व्रते च आचर्यमाणे, अंतररिपुहृदयनवकीलं अंतरंगशत्रुनाशनं शीलं ध्रीयते धार्यत इति ॥ ११ ॥ शेषब्र-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तातिचारेऽपि निरतिचारशीलाऽनुशीलितस्य माहात्म्यमाह—

॥ मूलम् ॥—कलिकारनवि जणमा—रनवि सावज्जजोगनिरनवि ॥ जं नारनवि सिध्र-इ । तं खलु सीलस्स माहप्पं ॥ १२ ॥ व्याख्या—कलिकारकोऽपि संग्रामकामोऽपि, अत एव जनमारकोऽपि जनसंहारहेतुरपि, सावद्ययोगनिरतोऽपि, परकलत्रापहारसपत्नीसंयोगादिपापव्यापारासक्तोऽपि, एवंविधोऽपि नारदो यत्सिध्यति, तत्खलु शीलस्य माहात्म्यं, शेषव्रतानि शिथिलीकृत्यापि देवर्षिर्यन्मोक्षं प्राप्नोति, स निर्मलशीलस्य प्रभावः, इति गाथार्थः ॥ ॥ १२ ॥ व्यासार्थः पुनः कथानकगम्यः ॥ तत्र च रुक्मिणीदृष्टांतः, स चायं—

द्वारवत्यां महापुर्यां । कृष्णनामाऽर्द्धचक्र्यभूत् ॥ बलदेवान्वितो राज्य—मूर्जस्वलमपालयत् ॥ १ ॥ अन्यदा नारदो भ्राम्यन् । कलिकेलिकुतूहली ॥ हरिमंदिरमभ्यागात् । प्रभावैभवभास्करः ॥ २ ॥ संमुखं कतिचित्पादा—नर्घपाद्यपुरस्सरं ॥ प्रत्युद्गम्य स रामेण । मुकुंदेन नमस्कृतः ॥ ३ ॥ तत्र स्थित्वा क्षणं क्रीडा—लोलः शुद्धांतमीयिवान् ॥ नार्चितो भामया वक्तुं । दर्पणे वीक्षमाणया ॥ ४ ॥ देवाधीश्वरपत्न्योऽपि । मदवज्ञां न हि व्यधुः ॥ एषा

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पुनरहंयुक्त्वा–दौचित्यमपि नाऽाचरत् ॥५॥ क्रुद्धः सोत्फालमुत्प्लुत्य । स गत्वा कुंमिनं पुरं ॥ रुक्मिण्या सत्कृतस्तस्याः । पुरो हरिगुणान् जगौ ॥ ६ ॥ कृत्वाऽनुरागिणीं रूपं । लिखित्वा च पटे द्रुतं ॥ कृष्णस्य दर्शयामास । सत्यभामाऽन्यसूयया ॥ ७ ॥ केयं देवीति कृष्णस्य । पृच्छतो मुनिरब्रवीत् ॥ रुक्मिणीनामकन्येयं । रुक्मिराजलघुस्वसा ॥८॥ चित्रं कृष्णो गुणांस्तस्याः । शृण्वन् कुंदेंदुबंधुरान् ॥ अनुरागभरं बभ्रे । नारदंप्रत्युवाच च ॥ ९ ॥

तथा कुरुष्व देवर्षे । यथेयं स्यान्मम प्रिया ॥ कल्पद्रोः प्रार्थना यद्वा । किमु स्यान्निष्फला क्वचित् ॥ १० ॥ मा खिद्यथास्तथा कर्त्ता । यथा स्यात्तव गोचरा ॥ दूतं प्रेषय रुक्मिराट् । त्वयि कीदृक् विचेष्टते ॥ ११ ॥ हृष्टः कृष्णस्तमभ्यर्च्य । देवर्षिमिति भाषिणं ॥ रुक्मिणीं याचितुं दूतं । प्राहिणोद्रुक्मिणंप्रति ॥ १२ ॥ रुक्मी प्राह न गोपाय । ददामो भगिनीं वयं ॥ पुरा प्राप्तो वरोऽमुष्याः । शिशुपालो महाभुजः ॥ १३ ॥ रत्नं हेमाश्रितं भाति । नाऽरकूटास्पदीकृतं ॥ इति दूतमुखेनायं । नारायणमबीभणत् ॥ १४ ॥ अथो पितृस्वसाऽमुष्या । रुक्मिणीमवदत्तदा ॥ अतिमुक्तोऽवदद्वत्से । त्वामग्रमहिषीं हरेः ॥ १५ ॥ याचमा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नमपि प्रीत्या । निराकृत्याद्य तं रुषा ॥ रुक्मिणा शिशुपालाय । वत्से दत्तासि संप्रति ॥१६॥ शिशुपालस्य वैरूप्यं । पुरा विज्ञाय नारदात् ॥ तस्मै दत्तां तदाकर्ण्य । विषादाद्दुर्मनायिता ॥ ॥ १७ ॥ ज्ञानिवाणी ज्ञवेन्मिथ्या । किं कदापीति ज्ञाषिणीं ॥ रुक्मिणीं केशवे रक्तां । निश्चिकाय पितृस्वसा ॥ १८ ॥ युग्मं ॥ ततः शीघ्रं सा दूतेन । कृष्णमेवं व्यजिज्ञपत् ॥ रुक्मिण्यामनुरूपायां । सानुरागं मनोऽत्र चेत् ॥ १९ ॥ शीघ्रमेयास्तदा गुप्त—वृत्त्या माघाष्टमीदिने ॥ नागार्चनज्ञलाच्चैना—मानयिष्याम्यहं वने ॥ २० ॥

इतश्च कुंडिने क्लृप्त—वैवाहिकमहोत्सवे ॥ शिशुपालः समज्यागात् । तत्पाणिग्रहणोत्सुकः ॥ २१ ॥ विज्ञायागमनं तस्य । कलिप्रियमुनेर्मुखात् ॥ रथज्ञ्यमथारुह्या—जग्मतुः सीरिशार्ङ्गिणौ ॥ २२ ॥ पूर्वसंकेतिते स्थाने । पितृस्वस्रा पुरस्कृतां ॥ निरीक्ष्य रुक्मिणीं पीन—वक्षोजज्ञरमंथरां ॥ २३ ॥ यादृशी नारदेनोक्ता । ततोऽप्येषाऽतिरिच्यते ॥ इत्यनुध्याय गोविंदः । सरागमिदमूचिवान् ॥ २४ ॥ युग्मं ॥ ज्ञद्दे समागतो दूरा—दनुरागवशंवदः ॥ त्वामहं संस्मरन् ज्ञृंगः । कल्पज्ञेरिव मंजरीं ॥ २५ ॥ तस्मादलं विलंबेन । समारोह द्रुतं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रथं ॥ पितृस्वसृसमादिष्टा । रुक्मिण्यपि तथाऽकरोत् ॥ २६ ॥ स्वदोषमथ निह्नोतुं । पूच्चकार पितृस्वसा ॥ ह्रीयते ह्रीयते हाहा । रुक्मिणी हरिणा हृगत् ॥ २७ ॥ पूरयित्वा पांचजन्य-मजन्यमिव विद्विषां ॥ कार्यसंसिद्धिसोत्साह-श्चचाल सबलो हरिः ॥ २८ ॥ अथ सांग्रामिकातोद्य-निर्घोषक्षोभितांबरौ ॥ जिह्वालामिव कुर्वाणौ । रोदसीमस्त्रसंचयैः ॥ २९ ॥ प्रत्याहर्त्तुं समायांतौ । दमघोषजरुक्मिणौ ॥ सबलौ रुक्मिणी ज्ञात्वा । नयकंप्राऽवदत्प्रियं ॥३०॥ युग्मं ॥ युवामेकाकिनौ नाथ । तौ त्वसंख्यबलावृतौ ॥ मत्कृतेऽयमपायोऽनू-द्युवयोराकुलास्मि तत् ॥ ३१ ॥ मा भैः प्रिये रिपूच्छेदि । शौर्यं पश्येति स ब्रुवन् ॥ तन्नीनेदाय तालार्द्धं । चिच्छेदैकेन पाणिना ॥ ३२ ॥ प्रिये मदग्रे कावेतौ । वराकौ काकचंचलौ ॥ इत्युक्त्वा मुष्टिकावज्रं । कर्पूरवदचूर्णयत् ॥ ३३ ॥ युद्धसंरंभिणं कोपा-द्वीक्ष्याऽनुजमथो बलः ॥ आगृह्य सप्रियं प्रैषीत् । स्वयं तत्रैव तस्थिवान् ॥ ३४ ॥ रुक्मिण्याऽभ्यर्थितः स्माह । रौहिणेयं नरायणः ॥ क्रूरोऽपि रुक्मिन्नृपालो । जीवन् रक्ष्यो रणांगणे ॥ ३५ ॥ रथेन जविना गेहं । प्रस्थिते सप्रिये हरौ ॥ ममंथ मंथाचलव-द्भामो वैरिबलार्णवं ॥ ३६ ॥ हलेन कुलिशेनेव ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

विद्विषां बलसूदनः ॥ मुरली पातयामास । दंतावलशिलोच्चयान् ॥ ३७ ॥ समरांगणविध्व-
स्त—तुरंगपुङ्खचामरैः ॥ धरा चकार वीराणां । सकेशास्तरणं किल ॥ ३८ ॥ रणोन्नटन्नटैः
साई । पतितैः स्यंदनव्रजैः ॥ वेतालैरिव कंकालै । रणन्नूर्न्नीषणाऽभवत् ॥ ३९ ॥ स्वसैन्येन
समं न्नीतः । शिशुपालः शृगालवत् ॥ नष्ट्वा क्वापि जगामासौ । बकमुक्तो यथा ऊषः ॥
॥ ४० ॥ तदानीं नारदो व्योम्नि । रणकेलिकुतूहली ॥ ननर्त्त हस्तताल्याभ्यां । शिशुपालं ह-
सन्नलं ॥ ४१ ॥

अथ वीर्यकृतोत्फालः । पंचास्य इव रुक्मिराट् ॥ कुंभलीकृतकोदंडो । रामस्य पुरतोऽ-
भवत् ॥ ४२ ॥ सोऽपि तीक्ष्णक्षुरप्रेण । छिंदंस्तस्य शरावलीं ॥ वेगान्मुमुंच मुंमुंच । सतुंड
रामनापितः ॥ ४३ ॥ बभ्राण जीवन्मुक्तोऽसि । वधूभ्रातेति तक्षिरा ॥ तस्माच्छिक्षुरिवात्मानं ।
पोषय त्वं म्रियस्व मा ॥ ४४ ॥ अक्षमः कुंभिनं गंतुं । रुक्मी व्रीडावशंवदः ॥ निवेश्य त-
स्थिवांस्तत्र । पुरं भोजकटाभिधं ॥ ४५ ॥ कीर्त्तिस्तंभनिभे तस्मि—न्नायुगांतं निवेशिते ॥ कृ-
तकृत्यस्ततो रामः । पुरीं द्वारवतीं ययौ ॥ ४६ ॥ सन्निकर्षमथासाद्य । द्वारिकाया जनार्दनः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ त्याजयन् ह्रियमित्यूचे । रुक्मिणीं मधुराक्षरैः ॥ ४७ ॥ सैषा सौधावलीरत्न–द्युतिविद्योति-
तांबरा ॥ दवैर्विनिर्मिता देव–पुरीव द्वारिकापुरी ॥ ४८ ॥ अत्र क्रीडागृहाराम–धारामंदिरके-
लिभिः ॥ आरामं सफलीकुर्या–देवनारीव नंदने ॥ ४९ ॥ तदाऽवसरमासाद्य । रुक्मिणी त-
मभाषत ॥ भृत्येव धृत्वा नीताऽत्र । स्वामिन् का भविताऽस्म्यहं ॥ ५० ॥ सोढव्यं तु सपत्नी-
नां । हास्यमित्यूचिषीं च तां ॥ सर्वासु धुरि कर्त्तास्मी–त्युक्त्वा हरिरतोषयत् ॥ ५१ ॥ गांधर्वे-
ण विवाहेन । वसंत इव माधवीं ॥ अथैतां विभ्रमांभोधि–तरीं हरिररीरमत् ॥ ५२ ॥

उद्याने कमलागेहे । लक्ष्म्या मूर्त्तिं पुरातनीं ॥ उत्सार्योतिष्ठपत्तत्र । रुक्मिणीं कलयेव ह-
रिः ॥ ५३ ॥ श्रीरिवाऽनिमिषी भूयाः । सत्यभामासमागमे ॥ शिक्षयित्वेति तामागा–त्प्र-
भाते माधवो गृहान् ॥ ५४ ॥ क्व मुक्ता धूर्त्त भार्येति । भामयाऽधिकभामया ॥ पृष्टः स स्प-
ष्टमाचष्ट । मुक्तास्ति श्रीगृहे बहिः ॥ ५५ ॥ द्रुतं भामापि संभ्रांता । सपत्नीभिः समन्विता
॥ तत्र गत्वा विलोक्यापि । साक्षाल्लक्ष्मीममन्यत ॥ ५६ ॥ अहो चित्रकृतश्चित्र–कारि चि-
त्रेषु कौशलं ॥ इत्युदीर्य पदोस्तस्या । न्यस्य मौलिं व्यजिज्ञपत् ॥ ५७ ॥ हरिणाऽभिनवानी-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

त–जायारूपविजित्वरीं ॥ मां कुर्याः कमले तेऽर्चां । करिष्ये पूर्णकामिता ॥ ५८ ॥ इतस्ततो विलोक्याथ । ज्ञापितं सत्यया पुनः ॥ क्व नु धूर्त्त प्रियाऽस्तीति । दर्शयामि चलाग्रतः ॥ ॥ ५९ ॥ अथोद्यान्ताय हरेरग्रे । नूयोऽज्ञापत रुक्मिणी ॥ अमूषु का नमस्या मे । ततः सत्यामदर्शयत् ॥ ६० ॥ त्वयैव पाठितैषापि । कपटैः पाटवं परं ॥ निर्लज्जा यदसौ स्वस्य । पादयोर्मामपातयत् ॥ ६१ ॥ कृष्णः सस्मितमाहस्म । को दोषो वंदने स्वसुः ॥ एषैव तव संतुष्टा । पूरयिष्यति वांछितं ॥ ६२ ॥ कोपकंप्रतनून्नामा । वायुग्रामितपत्रवत् ॥ उत्प्लुत्य खेदपाथोधि–मग्ना स्वावासमासदत् ॥ ६३ ॥ इत्थं सर्वसपत्नीभ्यो–ऽधिकसत्कारपूर्वकं ॥ रुक्मिणीं पट्टराज्ञीत्वे । स्थापयामास केशवः ॥ ६४ ॥ एवं जनक्षयं कुर्वन् । सापत्न्यं च महाकलिं ॥ नारदः सिद्धिमाप्नोति । यत्तच्छीलस्य जृंभितं ॥ ६५ ॥ इति केवलशीलपालने कथा ॥ अथ तपस्विनोऽपि शीलरहितस्य तद्वैपरीत्यमाह—

॥ मूलम् ॥—दायावि तवस्सीवि हु । विसुद्धभावोवि सीलपरिभट्ठो ॥ न लहइ सिवसुहमसमं । ता पालह दुक्करं सीलं ॥ १३ ॥ व्याख्या—दाता सदा दानोन्मुखः, तपस्वी

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

षष्ठाष्टमादितुश्चरतपश्चरणशीलः, विशुद्धभावोऽपि निर्मलमनःप्रचारः, अपिशब्दः सर्वत्र योज्यः, एवंविधोऽपि शीलपरिभ्रष्टः प्राणी, असममसामान्यं केवलिनापि प्ररूपयितुमशक्यं, सिद्धिसुखं न लभते, मोक्षं न प्राप्नोति, तस्माद्दुःकरं शीलं पालयत? चेन्मोक्षार्थिनो भो भव्याः, इति शेषः, प्राकृतत्वाद्विशेषोपदेशयोः संख्याविषम्येऽपि न दोषः ॥ १३ ॥ अथ गाथायुगलेन पुनस्तस्यैव दुःपरिपाल्यतामाह—

॥ मूलम् ॥—दीसंति अणेगेउ । भग्गखग्गविसमंगणे महासमरे ॥ भग्गेवि सयलसिन्ने । मंत्तीसादायिणो धीरा ॥ १४ ॥ दीसंति सीहपोरिस–निम्महणादलियमयगलगणाय ॥ मयणसरपसरसमये । सपोरिसा केवि विरला य ॥ १५ ॥ व्याख्या–भग्नखड्गविषमांगणे करालकरवालविसंस्थुलप्रांगणे महासमरे महायुद्धे सकलसैन्ये सर्वकटके भग्नेऽपि मंत्रीसादायिणो 'मा भैषुः, मा भयं कुरुध्वमिति वादिनोऽनेके धीरा दृश्यंते, शत्रुसुभटै र्निजकटके दिशो दिशं नाशितेऽपि ये साहसमवष्टभ्य रणांगणे तिष्ठंति, एवंविधा अपि पुरुषाः संसारे संतीत्यर्थः, यतस्तादृशा एव सुभटसीमानमवगाहंते. यदुक्तं—भग्नेषु सैन्येषु महाभटा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नां । ये वैरिवारोन्मुखपादपाताः ॥ तानुत्तमांगेन दधाति धात्री । तैरेव यस्माद्भ्रियते धरित्री ॥ १ ॥ इति, ' मं न्नीसा ' इति अपभ्रंशनिपातः ॥ द्वितीयगाथार्थमाह—सिंहपौरुषनिर्मथनादलितमदकलगणाश्च दृश्यंते, मदकला गजेंद्राः, ईदृशा अपि धीराः संतीत्यर्थः, किंतु मदनशरप्रसरसमये कंदर्पोन्मादे जागरुके सति केचिदेव सपौरुषाः, विरला एव कंदर्पशस्त्रपाते शीलरूपास्त्रधारिण इत्यर्थः, उक्तंच—दशावस्थो दशग्रीवो । देवदानवदुर्जयः ॥ कंदर्पराक्षसेंद्रोऽसौ । शीलास्त्रेणैव साध्यते ॥ १ ॥ सुन्नटानामपि स्त्रीजैत्रतामाह—

॥ मूलम् ॥—जे नामंति न सीसं । कस्सवि भुवणेवि ते महासुहडा ॥ रागंधा गलियबला । रुलंति महिलाण चरणतले ॥ १६ ॥ व्याख्या—भुवनेऽपि जगत्यपि ये कस्यापि शीर्षं न नामयंति, तेऽपि महासुन्नटा रावणप्राया महावीरा रागांधा अनुरागवशंवदाः, गलितबलाः कंदर्पवशात्क्षीणप्राणा इव महिलानां स्त्रीणां चरणतले रुलंति लुठंतीति न्नावः ॥१६॥ विशिष्य तदेवाह—

॥ मूलम् ॥—सक्कोवि न य खंडइ । माहप्पमडप्फरं जए जेसिं ॥ तेवि नरा नारी-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

हिं । कारविया नियदासत्तं ॥ १७ ॥ व्याख्या—येषां पुरुषाणां माहात्म्यमस्फुरं स्फूर्त्ति-गर्वं जगति संसारे शक्रोऽपि न खंडयति, आस्तां मनुष्यः, देवेंद्रोऽपि येषामहंकारं निराकर्तुं न क्षमः, तेऽपि नरा नारीभिर्निजदासत्वं कारिताः, ये स्ववीर्यादंयुतया शक्रमपि न गणयंति, तेऽपि स्त्रीभिर्नानाभंग्या विडंबिता इति ॥ १७ ॥ अत्र च भुवनानंदाराज्ञीरिपुमर्दननृपदृष्टांतः, तथाहि—

अस्तीह भरतक्षेत्रे । सुखावासाभिधं पुरं ॥ यत्राभ्रंलिहसौधेषु । तारकैरकतायितं ॥ ॥ १ ॥ तत्र मानोन्नतस्तीव्र—प्रतापतपनान्वितः ॥ सुमेरुरिव रत्नाढ्यो । रिपुमर्दनभूपतिः ॥ २ ॥ तस्यास्ति सचिवो बुद्धि—सागरो न्यायसागरः ॥ प्रेयसी प्रेमसर्वस्वं । तस्यास्ति रतिसुंदरी ॥ ३ ॥ तत्रास्ति पूर्वदिग्भागे । विमानोपममुन्नतं ॥ श्रीमद्युगादिदेवस्य । चैत्यमत्यंतसुंदरं ॥ ४ ॥ तत्पुरस्तादतिस्फार—सहकारो द्रुमोन्नतः ॥ तत्रास्ते कीरमिथुनं । नरभाषाविशारदं ॥ ५ ॥ अन्येद्युस्तनये जाते । हर्षितौ कीरदंपती ॥ नरेंद्राद्धिकं स्वस्य । साफल्यं दधतुर्भुवि ॥ ६ ॥ अन्यकीरीसमासक्तं । पतिं मत्वाऽन्यदा शुकी ॥ न प्रवेशमदात्तस्मै

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

। गम्यतां यत्र ते प्रिया ॥ ७ ॥ अन्यासक्ते नरे प्रेम । परायत्ताश्च संपदः ॥ निर्विशेषङ्गसेवा च । नृणामेषा विषत्रयी ॥ ८ ॥ अपुनःक्रियया ज्ञेऽ–ऽपराधः क्रम्यतां मम ॥ शुकेनाऽत्यर्थ-मुक्तापि । नाऽमन्यत तदा शुकी ॥ ९ ॥ शुकोऽवादीत्तदा देहि । पुत्रं मे कुलकारणं ॥ य-थेष्टं येन गच्छामि । त्वमप्यास्त यथासुखं ॥ १० ॥ अपराधान् स्वयं कृत्वा । हंत पुत्रं च या-चसे ॥ अतिदक्षोऽसि ज्ञोः कीर । किमु नीराजकं जगत् ॥ ११ ॥ एवं विवदमानौ तौ । पु-त्रार्थे जातसंशयौ ॥ क्रमाद्राजकुलं प्राप्य । स्वरूपं निजमूचतुः ॥ १२ ॥ वप्त्वा क्षेत्रे यथा बीजं । स्वामिनोत्पन्नमाप्यते ॥ तथैव पित्रा लभ्येय–मवश्यं पुत्रसंततिः ॥ १३ ॥ इत्थं वि-चार्य कीराय । नृभुजा दापितः सुतः ॥ तां स्थितिं लेखयामास । वह्निकायां च कीरिका ॥ ॥ १४ ॥ श्रुतज्ञानिनमासीनं । सहकारतरोस्तले ॥ वैराग्यगर्भिता स्वायु––र्वेदित्वा पृच्छति-स्म सा ॥ १५ ॥ इतो बद्धमनुष्यायु–स्तृतीयदिवसे शुकि ॥ मंत्रिपुत्रीत्वमासाद्य । राजभा-र्या भविष्यसि ॥ १६ ॥ कदाचिदुपयोगेन । दृष्ट्वा जातिस्मृतिर्भवेत् ॥ सेति साधूक्तवृत्तांतं । चैत्यभित्तावलेखयत् ॥ १७ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स्वयं गत्वा मुनेः पार्श्वे । युक्त्याऽनशनमग्रहीत् ॥ यथावत्पालयामास । वर्द्धमानशुभा-
शया ॥ १८ ॥ मंत्रिणो रतिसुंदर्या । भार्यायाः कुक्षिपंकजे ॥ सुस्वप्नसूचिता श्रीव–दधित-
स्थौ शुभोदया ॥ १९ ॥ उत्पन्ना समये देवी । जयंती रूपसंपदा ॥ तनया भुवनानंदा । ना-
म्नी प्रौढिमवाप सा ॥ २० ॥ स्तोकैरेव दिनैः प्राच्य–पुण्यस्य परिपाकतः ॥ कलाकलापप्रा-
वीण्यं । भारतीव बभार सा ॥ २१ ॥ अन्यदोद्यानशृंगारे । चैत्ये दृष्ट्वाऽक्रावलीं ॥ जातजा-
तिस्मृतिः कीर–भवस्य श्रुतमस्मरत् ॥ २२ ॥ एतस्यैव जिनेशस्य । प्रभावान्मंत्रिसद्मनि ॥
जाताहमिति तं नित्यं । पूजयमास भक्तितः ॥ २३ ॥ जाताश्विजतुरंगीभि–र्मैत्रिजात्यतुरंग-
मात् ॥ किशोरकाननेकांस्ता–नन्यदाऽनाययन्नृपः ॥ २४ ॥ न ददौ भुवनानंदा । दातुं यत्ना-
तवाजिना ॥ जाता एते यतो बीजं । यस्य तस्यैव वस्तु तत् ॥ २५ ॥ न प्रत्येति नृपश्चित्त–
द्वीक्ष्यतां वहिकां निजां ॥ यत्कीरश्चंद्रपुत्रस्य । विवादे लिखितं स्वयं ॥ २६ ॥

तथैव तद्विलोक्याथ । वहिकायां महीभुजा ॥ विस्मयापन्नचित्तेन । सा ज्ञाता बालपं-
क्तिता ॥ २७ ॥ दिनैः कैश्चिदतिक्रांतै । रिपुमर्दनभूपतिः ॥ सामर्थो भुवनानंदां । परिणीयेद-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मादिशत् ॥ २८ ॥ पंडितासि प्रिये तावन्नागंतव्यं गृहे मम ॥ सर्वलक्षणयुग् याव-ज्जातो
भवति नो सुतः ॥ २९ ॥ ईषत्स्मित्वा तयाप्युक्तं । पुत्रे जाते ध्रुवं ह्यहं ॥ स्वामिंस्त्वद्गेहमे-
ष्यामि । किंचेदमपरं शृणु ॥ ३० ॥ तदाहं क्वापि चेत्त्वत्तो । धावयामि निजौ पदौ ॥ वाह-
यामि भवंतं च । स्वकीयोपानहावपि ॥ ३१ ॥ इति प्रतिज्ञामासूत्र्य । गता सा स्वपितुर्गृहे
॥ कथयामास चैकांते । वृत्तांतं मंत्रिणः पुरः ॥ ३२ ॥ वत्से कथमिदं याति । दुर्घटं घटना-
पदं ॥ तात किं सुप्रयुक्ताया । असाध्यं विद्यते मतेः ॥ ३३ ॥ यदुक्तं नीतौ—एकं हन्यान्न
वा हन्या-दिषुर्मुक्तो धनुष्मता ॥ बुद्धिर्बुद्धिमतोत्सृष्टा । हंति राष्ट्रं सराजकं ॥ ३४ ॥ मंत्रि-
णाऽज्ञाणि नो बुद्ध्या । न दानैर्न च पौरुषैः ॥ विधातुं शक्यते कार्यं । मुक्त्वा दैवबलं परं ॥
॥ ३५ ॥ भुवनानंदया प्रोक्त-मित्थमेव न संशयः ॥ सापि कर्मवशाद्बुद्धिः । प्राणिनामिह जा-
यते ॥ ३६ ॥ अथ तात नृपावास-प्रत्यासन्नमहीतले ॥ श्रीमन्नाभेयदेवस्य । भवनं लघु का-
र्यतां ॥ ३७ ॥ सुभगा गीतवादित्र-गीतैस्तत्र यथांगनाः ॥ संगीतं कुर्वते रम्यं । त्रिकालं का-
र्यतां तथा ॥ ३८ ॥ अंतर्विलासिनीगेहं । कार्यतां मद्गृहं पुनः ॥ तदुक्तं कारयामास । मंत्री

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मंत्रमहोदधिः ॥ ३९ ॥ वाद्यमानैरथातोद्यै–र्गीयमानैश्च गीतकैः ॥ ननर्त्त स्फारशृंगारा । तत्र मंत्रिसुता स्वयं ॥ ४० ॥ कदाचिदन्निधां श्रुत्वा । मा स्मरन्मां नरेश्वरः ॥ लीलावतीत्यतो नाम । बभ्राराधरमात्मनः ॥ ४१ ॥ कलपंचमकाकल्या । गीतान्याद्यजिनेशितुः ॥ सौधाग्र-न्नागमारूढो–ऽन्यदा शुश्राव पार्थिवः ॥ ४२ ॥

सामान्यराजपुत्रस्य । वेषमाधाय भूमिभृत् ॥ तत्रैत्य पश्चिमद्वारे । वीक्षते प्रेक्षणीय-कं ॥ ४३ ॥ नृत्यंत्या नृपतिर्नेत्र–क्षुरप्रेण तथा हृतः ॥ लीलावत्या यथा स्थाना–दुद्धातुमपि नाऽस्मरत् ॥ ४४ ॥ सुखासनेन संगीता–नंतरं गतया तया ॥ राजापि तद्गृहेऽनैषी–त्क्षणदां क्षणदामिव !! ४५ ॥ एवं प्रतिदिनं तत्र । प्रेक्षते प्रेक्षणक्षणं ॥ रात्रिं नयति तत्रैव । सत्रागारे जनाधिपः ॥ ४६ ॥ यद्यद्विचेष्टते राजा । तत्र सा तत्पितुः पुरः ॥ ज्ञापयत्यखिलं सोऽपि । लिलेख वहिकापटे ॥ ४७ ॥ अन्यदोपानहौ मुक्त्वा । साऽारुरोह सुखासने ॥ उपानद्वाहिनी नास्ति । तदेते त्वं मुदानय ॥ ४८ ॥ तेनापि शिरसादाय । समानीते तदंगणे ॥ तथैव च नि-शीथिन्यां । नर्त्तकी तमसूषुपत् ॥ ४९ ॥ अन्यदोक्तं तया स्वामिन् । मत्पादौ दुःखतस्तमां

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ उन्नापय सखीं येन । तलहस्तयति क्षणं ॥ ५० ॥ तृतीयजनसंचार–मसहिष्णुः स्वयं नृपः ॥ तथा व्यश्रामयत्पादौ । निदद्रौ सा यथासुखं ॥ ५१ ॥ स्वप्ने संपूर्णचंद्रं सा । प्रविशंतं निजानने ॥ दृष्ट्वा जागरिताऽपश्य–त्संवाहनपरं नृपं ॥ ५२ ॥ निवार्य सहसोन्नाय । तस्याग्रे स्वप्नमाख्यत ॥ तेनोक्तं तनयो भावी । भद्रे सर्वोत्तमस्तव ॥ ५३ ॥ रात्रेर्विरामसंसूची । शंखो दध्वान तावता ॥ उन्नाय सत्वरं राजा । जगाम निजमंदिरं ॥ ५४ ॥ धर्मध्यानं दधाना सा । रजनीमत्यवाहयत् ॥ उदिते भास्वति प्रातः । प्राप सा जनकालयं ॥ ५५ ॥ उक्त्वा पितुर्निशावृत्तं । गृहद्वारं पिधाय च ॥ सुखेन पालयामास । गर्भमेकांतमाश्रिता ॥ ५६ ॥

द्वितीयेऽह्नि नृपस्तस्याः । पप्रच्छ प्रातिवेश्मिकीं ॥ लीलावती गता कुत्र । न जानामीति साऽवदत् ॥ ५७ ॥ राजापि विरहेणास्याः । सुतरां दुर्मनायितः ॥ निर्गमय्य निशां कष्टात् । प्रातः पप्रच्छ मंत्रिणं ॥ ५८ ॥ युष्मद्देवगृहे मंत्रिन् । यासीन्मूलविलासिनी ॥ नाम्ना लीलावती सास्ते । क्व गतेति निवेद्यतां ॥ ५९ ॥ देव सा कुत्सिताचारा । चैत्यान्निष्कासिता मया ॥ येन कस्यापि गेहे सा । गत्वा नयति शर्वरीं ॥ ६० ॥ तस्मात्तदास्पदे कापि । गवे-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ष्याऽन्यास्ति नर्त्तकी ॥ श्रुत्वेति मौनमालंब्य । तस्थौ गुप्ताकृतिर्नृपः ॥ ६१ ॥ प्रासूत समये सापि । सुतं सर्वांगलक्षणं ॥ प्रच्छन्नं मंत्रिणानीतः । कलापारीणतां क्रमात् ॥ ६२ ॥ अन्यदा तनयां मंत्री । सपुत्रां नीतवान् सद्मां ॥ कृताऽवगुंठना केयं । पप्रच्छेति च भूपतिः ॥ ६३ ॥ सैवेयं भुवनानंदा । मत्पुत्री तव वल्लभा ॥ पुत्रस्ते मम दौहित्र–श्चैष नाथावधार्यतां ॥६४॥ यावता भाषते भूपः । किंचिद्विस्फुरिताधरः ॥ अमात्यस्तावता तस्य । हस्ते स्वां वह्निकामदात् ॥ ६५ ॥ यत्कृतं जल्पितं यच्च । तया सार्द्धं रहस्यपि ॥ तत्सर्वं लिखितं दृष्ट्वा । नृपश्चित्रायितोऽभवत् ॥ ६६ ॥ त्रपास्नेहरसोन्मिश्रां । क्षिपन् दृष्टिं प्रियांप्रति ॥ स्मारं स्मारं निजं वृत्तं । शिरश्चिरमधूनयत् ॥ ६७ ॥ सुतं सर्वांगमालिंग्य । स्वीयांकमधिरोप्य सः ॥ उवाच वत्स ते राज्य–मिदं लक्ष्म्यस्तथाऽखिलाः ॥ ६८ ॥ रे जितो रंजितश्चाहं । जनन्या तव हेलया ॥ पुत्रोत्पत्त्या महासत्या । प्रतिज्ञायाश्च पूरणात् ॥ ६९ ॥ धिग् धिग् धैर्येण वीर्येण । शौर्येण यशसापि च ॥ लीलया निर्जितो योऽहं । हंत प्रत्युत योषिता ॥ ७० ॥ खेदितव्यं न मंत्र्यूचे । प्रतापोऽयं तवैव यत् ॥ माहात्म्यं तद्वेधार्वांतं । यन्निरस्कुरुतेऽरुणः ॥ ७१ ॥ अथ

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वैराग्यमासाद्य । दत्वा राज्यं सुतस्य च ॥ दीक्षामादाय राजेंद्रः परमार्थमसाधयत् ॥ ७२ ॥ इ-
दृशोऽपि प्रचंडात्मा । रिपुमर्दननृपतिः ॥ दासत्वं कारितः पत्न्या । परेषां गणना तु का ॥
॥ ७३ ॥ इति स्त्रीदासत्वे रिपुमर्दननृपकथा ॥ विशिष्य स्त्रीवशंवदत्वमेवाह—

॥ मूलम् ॥—मरणेवि दीणवयणं । माणधणा जे नरा न जंपंति ॥ तेवि हु कुणंति लज्झिं । बालाण य नेहगहगहिला ॥ १८ ॥ व्याख्या—ये मानधना उत्तमा नरा मरणेऽपि प्राणावसानेऽपि दीनवचनं हीनवाक्यं न कथयंति, तेऽपि मानिनः हु निश्चयेन स्नेहग्रहग्रहि-
लाः प्रेमकदाग्रहग्रस्ताः संतो बालानां स्त्रीणां लज्झिं कुर्वंति, रंकवत्प्रार्थनाचाटुवाक्यान्युदीर-
यंति; मानधनाः मानो गर्वः स एव धनं येषामिति त एवोत्तमाः, यदुक्तं—अधमा धनमि-
च्छंति । धनमानौ हि मध्यमाः ॥ उत्तमा मानमिच्छंति । मानो हि महतां धनं ॥ १ ॥ इति,
अत्र च श्रीविजयपालनृपपद्माद्दृष्टांतः, तथाहि—

पुरं पुरिमतालाख्यं । यत्र सौधाग्रभूमिषु ॥ आरूढस्त्रीमुखैरासी-दकाले चंद्रविभ्रमः ॥
॥ १ ॥ राजा विजयपालाख्य-स्तत्र मानिशिरोमणिः ॥ तस्योद्यद्विभ्रमारंभा । रंभा नाम्न्य-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स्ति वल्लभा ॥ २ ॥ अन्यदा गजमारुह्य । स व्रजन् राजपाटिकां ॥ लक्ष्मीं श्रेष्ठिसुतां ना-
म्ना–ऽऽकृष्टलक्ष्मीमिवापरां ॥ ३ ॥ तन्नेत्रबाणाकृष्टो । व्यावृत्यागत्य सद्मनि ॥ तत्पितुर्मा-
र्गयित्वा तां । पर्यणैषीन्नराधिपः ॥ ४ ॥ अंतःपुरममुंचानो । रात्रिंदिवमनन्यधीः ॥ तामेव र-
मते राजा । त्यक्तराज्यव्यवस्थितिः ॥ ५ ॥ तद्भोगनटितः कीट । इव विस्मृतचेतनः ॥ विवे-
कविकलः कालं । कियंतमपि सोऽनयत् ॥ ६ ॥

अन्यदा मंत्रिणाऽज्ञाणि । स्वामिन् रागवशंगतः ॥ सामान्योऽपि नरो याति । लघुत्वं
किमु पार्थिवः ॥ ७ ॥ सेव्यमानाः क्रमेणैव । धर्मकामार्थविस्तराः ॥ फलंति वांछितान् भो-
गान् । अन्यथा निष्फला इमे ॥ ८ ॥ रागोरुगरलांधानां । नश्यंति गुणिनां गुणाः ॥ गुरूणा-
मुपदेशाश्च । प्रविशंति न कर्णयोः ॥ ९ ॥ शत्रवस्तव राजेंद्र । भवंत्युद्यमशालिनः ॥ तदा-
सक्तिं विमुच्यातो । राज्यचिंतां कुरु प्रभो ॥ १० ॥ आकर्णयाऽनभिज्ञोऽसि । मंत्रिंस्तेनेत्थमु-
च्यते ॥ निशालुर्घूर्णमानः किं । पटहतूर्यं प्रतीक्षते ॥ ११ ॥ पिपासुर्जलमासाद्य । किं सुधा-
र्थमुदीक्षते ॥ एवं रामानुरक्तः कि–मन्यकार्येऽनुरज्यते ॥ १२ ॥ किंतु यावन्मृगाक्षीयं । व-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

र्त्तते नेत्रगोचरे ॥ तावज्जानीहि मे जीवं । न कार्यं राज्यचिंतया ॥ १३ ॥ इत्थं भूमिपतिं म-
त्वा । राज्यचिंताबहिर्मुखं ॥ यावत्किमपि संभूय । सूत्रयंति परस्परं ॥ १४ ॥ तावत्प्राज्ञा-
तिकीं वांतिं । प्राप सा नृपवल्लभा ॥ आहूताश्च ततो राज्ञा । संरंभेण चिकित्सकाः ॥१५॥
प्रतिक्रियाभिरत्यर्थं । यावतोपचरंति ते ॥ तावज्ज्ञानूदये जाते । सहसा मृत्युमाप सा ॥ १६ ॥
राजा तत्कालमुन्मील–न्मूर्छाविह्वलविग्रहः ॥ पपात धरणीपीठे । काष्ठवज्जतचेतनः ॥ १७ ॥
चांदनैः सलिलैः सिक्त–स्तालवृंतैश्च वीजितः ॥ प्राप्य चैतन्यमुन्मत्त । इव बालो रुरोद सः
॥ १८ ॥ क्व गतासि प्रिये देहि । प्रतिवाचं ममोचितां ॥ एवंविधमहं हास्यं । न चिरं सो-
ढुमीश्वरः ॥ १९ ॥

इत्यादि लपतस्तस्य । तस्याः पार्श्वममुंचतः ॥ कोऽप्युवाच मृतैवेयं । संस्कारः कार्य-
तामतः ॥ २० ॥ नृपतिः कुपितोऽवादी––त्कोऽयं दौरात्म्यन्नाजनं ॥ तद्क्णोति कटुकैर्वर्णैः ।
कर्णौ टंकिकयेव मे ॥ २१ ॥ रे रे संस्कार्यतां पाप । स्वपुत्रप्रमुखो जनः ॥ मम प्राणप्रिया
त्वेषा । जीविष्यति शतं समाः ॥ २२ ॥ तस्माद्वाक्यममांगल्यं । यो वक्ष्यति स मे रिपुः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ इत्यूचानमपि नृप–मुपेक्ष्य तत्क्रिया कृता ॥ २३ ॥ विशिष्य तामथाऽपश्यं—स्तद-द्वैतनिमग्नधीः ॥ निरुद्धेंद्रियसंचारो । योगात्मेवाऽभवन्नृपः ॥ २४ ॥ यावन्नोपलभे प्राण—प्रियायाः शुद्धिमुत्तरां ॥ तावन्न भोजनं कुर्वे । प्रत्यक्षासीदिदं नृपः ॥ २५ ॥ भोजनत्यागिनो राज्ञो–ऽतिक्रांता दश वासराः ॥ मंत्रिभिः शिक्षयित्वेति । प्रैषि कोऽपि नृपांतिके ॥२६॥ देवाद्य वर्द्धसे दिष्ट्या । प्रियायाः शुद्धिलब्धितः ॥ पृच्छति क्षितिपे मोदात् । स गीर्वाणगिराऽगृणात् ॥ २७ ॥ देव शक्रसभामध्य—मध्यासीना तव प्रिया ॥ मनीषितसुखैस्तोषं । धत्ते मत्तेभगामिनी ॥ २८ ॥

त्वद्दर्शनमृते किं तु । ताम्यंती त्वामथाख्यत ॥ तवापि तत्रावस्थातुं । मर्त्यलोके न युज्यते ॥ २९ ॥ येनाधिव्याधिदौर्गंध्य–बाधाभिः पिच्छलो ह्ययं ॥ स्वर्गः सर्वेंद्रियप्रीति–स्फीतिकृद्भोगभासुरः ॥ ३० ॥ तन्नाथ चेन्मया कार्यं । शीघ्रमत्र समेहि तत् ॥ स्वाधीने नंदने विद्वान् । को नाम रमते मरौ ॥ ३१ ॥ भो भो मंत्रिजनाः शीघ्रं । दर्शयत स्वर्वर्त्म मे ॥ येन गच्छामि पश्यामि । प्रियाया वदनांबुजं ॥ ३२ ॥ विधेहि भोजनं देव । स्नानपानादिकं कुरु

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ साम्राज्यराष्ट्रकोशादेः । स्मर पुण्यं च साधय ॥ ३३ ॥ यावद्व्रजामि गत्वाहं । तत्र यौष्माकमागमं ॥ इति तद्वचसा राजा । भोजनादिकमाचरत् ॥ ३४ ॥ युग्मं ॥ यतः—निर्बुद्धिर्वा सुबुद्धिर्वा । रंको वा यदि वा नृपः ॥ अलीकमपि रागेण । वेत्ति सत्यतया पुमान् ॥ ॥ ३५ ॥ चिरेण पुनरागत्य । स पुमान्नृपतेः पुरः ॥ मनोहरफलान्युच्चै—रपूर्वाण्युपदां व्यधात् ॥ ३६ ॥ देवीप्रहितकल्पद्रु—फलानीमानि स ब्रुवन् ॥ ययाचे तत्करा भूपं । सर्वांगाभरणानि च ॥ ३७ ॥ दत्वास्मै तानि भूपस्य । पश्यतो मंक्षु मंत्रिणः ॥ प्रच्छन्नं स्थापयामासुः । कतिचिद्वासरानमुं ॥ ३८ ॥ सोऽतीतैर्वासरैः कैश्चि—देत्यायाति मुहुर्मुहुः ॥ कश्चिद्भूर्तनरोऽज्ञासी—दमुं वृत्तांतमन्यदा ॥ ३९ ॥ भूर्जपत्रमिव श्लक्ष्णं । हेमपत्रं विधाय सः ॥ मृगनाभिरसैर्बभ्रे । तत्रोत्कीर्त्याक्षरावलीं ॥ ४० ॥ ततो लेखमिवावेष्ट्य । नृपहस्ते च सोऽर्पयत् ॥ देव्या प्रस्थापितः स्वर्गा—देवाहं लेखवाहकः ॥ ४१ ॥ श्रुत्वेत्युत्कृत्य रोमांच—प्रपंचोद्यंचिरोमभृत् ॥ धन्येयं देवसामग्री—त्यभिनंदन्नवाचयत् ॥ ४२ ॥

स्वस्ति श्रीपुरिमतालेः । पाकशासनतेजसः ॥ श्रीमद्विजयपालस्य । राज्ञः पादपयोरुहा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

न् ॥ ४३ ॥ श्रीस्वर्गादातुरा राज्ञी । लक्ष्मीर्नत्वानुरागतः ॥ विज्ञापयति सोत्कंठं । यथात्र कुशलं मम ॥ ४४ ॥ युग्मं ॥ गुरुन्नारवतीवाहं । त्वया हृदयवासिना ॥ न शक्नोमि समागंतुं । तत्राप्युत्कंठयान्विता ॥ ४५ ॥ तस्मादाभरणं स्वीयं । सर्वांगीणं प्रसद्य मे ॥ प्रेषितव्यं यदेवीषु । पतिमानभरं वहे ॥ ४६ ॥ अन्यच्च पक्षमासांतः । सद्भाभरणादिकं ॥ प्रेष्यमस्यैव वृद्धस्य । हस्ते स्वश्रेयसा सह ॥ ४७ ॥ भणिता मंत्रिणो राज्ञा । सारमाभरणं मम ॥ वस्त्रांगरागसंयुक्त–मस्य हस्ते वितीर्यतां ॥ ४८ ॥ यतः—वाचिको लभते लक्षं । कोटिं वै लेखहारकः ॥ दृष्टेः कोटिशतं मौढ्यं । निर्मूढ्यः स्वेष्टसंगमः ॥ ४९ ॥ अविमृश्यतया राज्ञो । ज्ञात्वा राज्यं विनश्वरं ॥ मंत्रिभिर्मंत्रयित्वाथ । विज्ञप्तः सादरं नृपः ॥ ५० ॥ एषः स्वर्गे कथं गंता । राज्ञोचेऽत्रागतो यथा ॥ देवीप्रसादतः स्वामि–न्नत्रागाद्याति तत्कथं ॥ ५१ ॥

श्रुत्वेति राजा पप्रच्छ । प्राक्तनः स कथं गतः ॥ वह्निदग्ध इति प्रोक्ते । तथैनमपि चादिशत् ॥ ५२ ॥ ततो जाज्वल्यमानाग्नि–पातनाय स चालितः ॥ तद् दृष्ट्वा श्रेष्ठिना पद्मनाम्नावाचि नरेश्वरः ॥ ५३ ॥ एष देवातिवर्षीयान् । जराजर्जरितांगकः ॥ न तु गंतुं क्षमः को-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ऽपि । तत्प्रेष्यस्तरुणो नरः ॥ ५४ ॥ सचिवैराहृतं स्वामि—न्नेष एव सदुत्तरः ॥ मुखरः शीघ्रगो देव्याः । पार्श्वेऽतः प्रेष्यतामिति ॥ ५५ ॥ तथैव प्रतिपेदाने । राज्ञि मंत्रिजनैस्तदा ॥ नियंत्र्य नीयमानोऽसौ । शौनिकैश्च पशुर्यथा ॥ ५६ ॥ पृष्टं संबंधिन्निर्दोषः । को नामानेन निर्मितः ॥ तैरूचे मुखदोषाद्धि । नापराधोऽस्य कः परः ॥ ५७ ॥ सोऽथ तत्स्वजनैर्मैत्रि—वर्गमामंत्र्य नक्तिकः ॥ मोचितः प्रथमश्चापि । कृपया तैरमुच्यत ॥ ५८ ॥ अन्यदा पुनराहस्म । मंत्रिवृन्नरराधिपः ॥ स्वर्गादानाय्यतां देवी । दुःखितोऽहं विना तया ॥ ५९ ॥ विमृश्य सचिवैः काचि—न्नृपालंकारधारिणी ॥ नाम्ना लक्ष्मीर्नवोन्निद्र—यौवना नायिकोत्तमा ॥ ६० ॥ स्थापिता बहिरुद्याने । शिक्षयित्वा विचक्षणा ॥ नृपाग्रेऽवाचि देव्यर्थं । स्वर्गेऽस्ति प्रेषितो जनः ॥ ६१ ॥

द्वितीये दिवसे प्राप्तः । सोऽथ व्यज्ञपयन्नृपं ॥ उद्यानमागता देवी । देव दिष्ट्याऽन्निवर्द्धसे ॥ ६२ ॥ दत्वा सर्वांगसंलग्नं । तस्मै स्वाभरणादिकं ॥ सामग्र्या स महत्याथ्र । प्रापदुद्यानमादरात् ॥ ६३ ॥ दृष्ट्वा देवीं नृपो हृष्ट । आचष्ट सचिवोत्तमान् ॥ स्वर्गवासो महादे-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

व्या । ज्ञापितो रूपसंपदा ॥ ६४ ॥ पूर्वं श्यामा ह्रस्वकर्णा । लंबोष्ठी वक्रनासिका ॥ आसीदे-
षाऽधुना जाता । वरांगोपांगभासुरा ॥ ६५ ॥ का भ्रांतिरत्र तत्रत्य—भोजनं हि सुधारसः ॥
मंत्रिणोऽकथयन् श्रेष्ठाः । सर्वे भावा दिवौकसां ॥ ६६ ॥ किं च तुष्टेन शक्रेण । युष्मदीयो-
परोधतः ॥ सर्वांगसुंदरीकृत्य । प्रहितेयं तवांतिके ॥ ६७ ॥ आनंदमेदुरिभाव—मापन्नेन म-
हीभुजा ॥ निजेनस्कंधमारोप्य । निन्ये सांतःपुरे रयात् ॥ ६८ ॥ प्रवर्द्धमानरागेण । भुंजा-
नस्तां दिवानिशं ॥ पृच्छति स्वर्गवार्त्ताः स । वक्ति सापि सुशिक्षिता ॥ ६९ ॥ एवं महामान-
धना नरा ये । तृणानुरूपां गणयंति पृथ्वीं ॥ तेऽपि स्मरावेशवशेन चाटु—शतानि कुर्वंति म-
नस्विनीनां ॥ ७० ॥ इति स्नेहग्रहिलत्वे विजयपालदृष्टांतः ॥ पंडितानामपि स्त्रीपारतंत्र्यमाह

॥ मूलम् ॥—जे सयलसत्थजलनिहि—मंदरसेला सुएण गारविया ॥ बालालब्भुरवयणे-
हिं । तेवि जायंति हयहिययां ॥ १७ ॥ व्याख्या—ये केचित्पंडिताः सकलशास्त्रजलनिधि-
मंदरशैलाः, सकलशास्त्राण्येव जलनिधिः समुद्रस्तत्र मंदरशैलाः सुमेरुपर्वता इवाऽवगाहक-
त्वात्, तथा श्रुतेन सिद्धांतेन गर्विताः, इतराऽसाधारणतन्मर्मज्ञानेन ये साहंकारास्तेऽपि ता-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दृशो विज्ञांसोऽपि बालालल्लुरवचनैः स्त्रीविलासोन्मिश्रवाक्यैर्निहतहृदया अपहतान्निप्राया जाताः, तत्रैव रागसागरे मग्ना बभूवुरित्यर्थः, उक्तं च—तावदेव कृतिनामपि स्फुरत्येष निर्मलविवेकदीपकः ॥ यावदेव न कुरंगचक्षुषा । ताड्यते चपललोचनांचलैः ॥ १ ॥ इति. पुनरपि लौकिकदेवानामेव स्त्रीविडंबितत्वमाह—

॥ मूलम् ॥—हरिहरचउराणणचंद–सूरखंदाइणोवि जे देवा ॥ नारीण किंकरत्तं । करंति धिद्धी विसयतण्हा ॥ २० ॥ व्याख्या—हरिहरचतुराननचंद्रसूर्यस्कंदादयोऽपि ते देवा नारीणां किंकरत्वं दासत्वं कुर्वंति, अतो धिक् धिक् विषयतृष्णां इंद्रियार्थलोलतां. लौकिकमते ह्यमी देवाः स्त्रीभिर्नवनवप्रकारैर्विनटिताः, तत्र हरिर्नारायणस्तस्य तु स्त्रीपारवश्यं रुक्मिणीपाणिग्रहणप्रस्तावे स्पष्टीकृतमेव, अतो न पुनरुच्यते. क्रीमालौल्येन च गोपीषु तत्तद्विगोपकप्रकारा लौकिकप्रसिद्धत्वादनेकशो ज्ञेयाः, यथा—राधा पुनातु जगदच्युतदत्तदृष्टि–र्मंथानकं विदधती दधिरिक्तभांडे ॥ तस्याः स्तनस्तबकलोलविलोचनालि–र्देवोऽपि दोहनधिया वृषभं न्यरुंधत् ॥ १ ॥ इत्यादि, हरो महेश्वरः, तस्य च पार्वतीविरहाऽसहिष्णुतयाऽर्धनारीनटेश्वर-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मूर्त्तिधारकत्वेन स्पष्टमेव नारीकिंकरत्वं. यदुक्तं—अंबेयं नेयमंबा न हिकिल कपिलः श्मश्रुरस्या मुखाग्रे । तातोऽयं नैव तातः स्तनगुरु हृदयं नैव दृष्टं कदाचित् ॥ केयं कोऽयं किमेतत्कथमिति सन्नयं याति दूरं विशाखे । देव्या सार्द्धं सहास्यं रहसि परिणतः पार्वतीशः पुनातु ॥ १ ॥ इत्यादि कियदुच्यते. चतुराननो ब्रह्मा, तद्वृत्तं चेदं—किल प्रजापतिः पूर्वं । कदाचित्काननं श्रितः ॥ अध्युष्टाः शरदां कोटी—स्तपस्तेपे स दुस्सहं ॥ १ ॥ तद् ज्ञात्वा त्रिदशाधीश—श्चुक्षोन्न निजचेतसि ॥ यद्येष क्रोधमाधत्ते । मामपि ध्वंशयेत्तदा ॥ २ ॥ न मेरौ रमते नैष । नंदनेऽप्यन्निनंदति ॥ नो नाटकमन्निष्टौति । न प्रीणाति प्रिया अपि ॥ ३ ॥ इत्थं विगतचेतस्क—मुपलक्ष्य बिभौजसं ॥ कृतांजलिपुटाः प्राहु । रंभाद्यास्त्रिदशस्त्रियः ॥ ४ ॥ स्वाधीने संपत्सर्वे । देवराज तवापि किं ॥ दुःसाध्यं विद्यते किंचि—द्विषणो येन लक्ष्यसे ॥ ॥ ५ ॥ यद्यपि स्त्री न मंत्रार्हा । स्वभावचपलाशया ॥ तथापि हि हिते दुःखं । निवेद्य सुखमाप्यते ॥ ६ ॥ उक्तं च—सुहृदि निरंतरचित्ते । गुणवति भृत्ये प्रियासु नारीषु ॥ स्वामिनि सौहार्दयुक्ते । निवेद्य दुःखं सुखी भवति ॥ ७ ॥ चतुर्दशजगत्सृष्टा । प्रजापतिरपि स्वयं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ यत्तपस्तपते तीव्रं । तेन मे कंपते मनः ॥ ८ ॥ कियन्मात्रमिदं स्वामिन् । क्षोन्नयामः क्षणेन तं ॥ इति ताः प्रतिजानाना । विसृष्टास्तेन भूतले ॥ ९ ॥ सुरांगनाः समागत्य । स्वरग्रामैकपेशलं ॥ संगीतं सूत्रयंतिस्म । पुरः संभूय वेधसः ॥ १० ॥ तद्गीतनृत्यवादित्र—व्याक्षिप्तसकलेंद्रियः ॥ निश्चेष्टकायतां प्राप । ब्रह्मा हरिणवत्क्षणात् ॥ ११ ॥ अथोचुस्तास्तपस्त्यक्त्वा । वृणीध्वं वरमीप्सितं ॥ तासु रंभा सुसंरंभ—वाचोवाच पितामहं ॥ १२ ॥

एता वयमसौ भागः । सेयं कादंबरी प्रभो ॥ अमीष्वाद्दीयतामेकं । यद्यस्मासु प्रसादभाक् ॥ १३ ॥ स्रष्टा विमृष्टं भ्रंशाय । तपसः सेविता ह्यमूः ॥ भागस्य जीवघातोऽय—मुचितो न तपस्विनां ॥ १४ ॥ सुरा तु सलिलोद्गारा । न तुष्टा शिष्टचेतसां ॥ अतस्तामुररीकृत्य । पपौ निःशंकमात्मभूः ॥ १५ ॥ जातोन्मादः क्षुधाक्रांत—श्छागं हत्वा जघास सः ॥ कामयामासिवांस्ताश्च । परीक्षामिति चक्रिरे ॥ १६ ॥ क्षीयमानादसौ तावत्तपसो भ्रंशितो ध्रुवं ॥ विक्रीणीते कथं पूर्वा—क्षीर्णं ध्यात्वेति तास्तदा ॥ १७ ॥ नृत्यंत्यो दक्षिणाशायां । जग्मुर्दैवव्यस्ततो विधिः ॥ मुखमेकं तपोवर्ष—कोट्या तत्संमुखं व्यधात् ॥ १८ ॥ एवं द्वितीय-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

कोट्या तु । तृतीयं विदधे मुखं ॥ चतुर्थं चोत्तराशायां । चक्रे तद्दर्शनोत्सुकः ॥ १९ ॥ अनुरागपरीक्षार्थं । नृत्यंत्यो गगने गताः ॥ अर्द्धकोट्याथ संजज्ञे । शीर्षं खरमुखं पुनः ॥ २० ॥

नमस्कृत्योपहस्याथ । गताः स्वर्गं सुरांगनाः ॥ इन्द्रं चतुर्मुखो जातः । स्त्रीदासत्वमियाय च ॥ २१ ॥ चंद्रश्च किल ज्योतिष्केंद्रपदवीप्राप्तिप्रस्तावे सुरासुरैः सपरिवारैर्नमस्करणार्थमागतै रूपाहृतचित्तः सुरगुरुन्नार्यामभिगम्य बुधमजीजनत् ॥ सूर्यश्च तेजसोऽसहमानां पश्चिमाशामाश्रित्य वरुणरूपधारिणीं रत्नादेवीनाम्नीं भार्यामजस्रमभिगंतुकामस्त्वष्टा निजशरीरमतक्षत् ॥ स्कंदश्च कार्त्तिकेयः, स यद्यपि लौकिकानां ब्रह्मचारितयाऽभिमतस्तथापि देवश्चेदऽविरतत्वाद्दुःशीलताभाजनमेवेति. आदिशब्दादहल्याजारतया प्रसिद्धा इंद्रादयोऽपि ज्ञेयाः, यदुक्तं—किमु कुवलयनेत्राः संति नो नाकनार्य—स्त्रिदशपतिरहल्यां तापसीं यत्सिषेवे ॥ हृदयतृणकुटीरे दीप्यमाने स्मराग्ना—वुचितमनुचितं वा वेत्ति कः पंडितोऽपि ॥ १ ॥ इति गाथाक्षरार्थः, एतानेवंविधानेव पूजयतामुपहसनीयतामाह—

॥ मूलम् ॥—पूइज्जंति सिवन्नं । केहिंवि जइ कामगद्दहा देवा ॥ गत्तासूयरपमुहा । किं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

न हु पूयंति ते मूढा ॥ २१ ॥ व्याख्या—यदि कैश्चिन्मिथ्यात्वमदिराविलुप्तचैतन्यैः शिवार्थं मोक्षाऽवाप्तये कामगर्दभा देवाः पूर्वोक्तस्वरूपा हरिहरब्रह्मादयः पूज्यंते आराध्यतया सेव्यंते, ते कामगर्दभा इति कामेन कंदर्पेण गर्दभा इव युक्तविचारमूढत्वेन खरप्रायाः, यथा प्रजापतिः स्वां दुहितरमकामयदित्यादि. यद्वा कामानुरक्ततया स्त्रीभिर्गर्दभवद्वाह्यंत इति कामगर्दभाः, यदुक्तं—शंभुस्वयंभुहरयो हरिणेक्षणानां । येनाऽक्रियंत सततं गृहकर्मदासाः ॥ वाचामगोचरचरित्रपवित्रिताय । तस्मै नमो भगवते कुसुमायुधाय ॥ १ ॥ इति. एवंविधानपि ये निर्विवेकिनस्तत्त्वतयाऽर्चयंति ते मूढा अज्ञा गर्त्ताशूकरमुखान् खु निश्चितं किं न पूजयंति? नगरशूकरा अपि हि नित्यं कामातुरा भवंति, तेऽपि हि तेषां कथं पूज्यतां न प्राप्नुयुः? निर्विशेषाचारत्वादित्यर्थः ॥ अथ कामातुरान् ब्राह्मणादीन् गुरुतया प्रतिपद्यमानान् मिथ्यात्विन एवोपहसन्नाह—

॥ मूलम् ॥—विसयासत्तोवि नरो । नारीवा जइ भइज्ज गुरुभावं ॥ ता पारदारिएहिं । वेसाहिं वा किमवराहं ॥ २२ ॥ व्याख्या—विषयासक्तोऽपि नरो व्यासविश्वामित्रवशिष्ठब्रा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ह्मणादिः, नारी वा विषयासक्ता पार्वत्यरुंधत्यादिर्वा यदि गुरुत्नावं त्नजेत, गुरुतयाऽऽश्येत, तर्हि पारदारिकैर्वेश्याभिर्वा किमपराद्धं? किं विनाशितं? निर्विशेषगुणत्वात्, इत्युपहासः, त्नत्कंच—सरागोऽपि हि देवश्चे—द्गुरुरब्रह्मचार्यपि ॥ कृपाहीनोऽपि धर्मः स्या—त्कष्टं नष्टं हहा जगत् ॥ १ ॥ इति लौकिकदेवगुरूणां शीलविकलत्वं ज्ञेयं. तच्च शास्त्रोक्तयुक्त्यैव निवेदितं. स्वमतेऽपि सर्वेऽपि दिवौकसस्तापसाश्च अविरतत्वादेव दुःशीलताभाजनमिति नागमविरोधः ॥ अथ चतुर्थव्रतत्नंगे शेषव्रतचतुष्टयस्यापि त्नंगमाह—

॥ मूलम् ॥—मेहुणसन्नारूढो । नवलक्खं हणेइ सुहुमजीवाणं ॥ इय आगमवयणाउ । हिंसा जीवाणमिह पढमा ॥ २३ ॥ व्याख्या—मैथुनसंज्ञारूढो ब्रह्मसेवापरः पुमान् सूक्ष्मजीवानां केवलिज्ञेयप्राणिनां नवलक्षान् हंति उत्कृष्टत इत्यर्थः, यदागमः—इत्थीजोणीए संत्नवंति बेइंदियाइ जे जीवा ॥ इक्को व दोव तिन्निव । लक्खपहुत्तं च उक्कोसं ॥ १ ॥ पुरिसेण सह गयाए । तेसिं जीवाण होइ उद्दवणं ॥ वेणुगदिट्ठंतेणं । तत्तायससलागनाएणं ॥ २ ॥ पंचिंदिया मणुस्सा । एगनरभुत्तनारिगब्भंमि ॥ उक्कोसं नवलक्खा । जायंति एगवेलाए ॥ ३ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नवलक्काणं मज्झे । जीयइ इक्किव दोण्हव सम्मत्ती ॥ सेसा पुण एमेवय । विलयं वच्चंति तत्तेव ॥ ४ ॥ किंच—मेहुणं सेवमाणस्स केरिसए असंजमे कज्जइ? गोयमा से जहा नाम एगेवि पुरिसे पूरनलियं वा रूवनलियं वा तेणं अनकणगेणं समन्निघंसिज्जा मेहुणं सेवमाणस्स एरिसए असंजमे कज्जइ, इत्यागमवचनादिह शीलाङ्गे जीवानां हिंसा प्रथमा, एवं प्राणातिपातव्रतं प्रथममेव विराधितमित्यर्थः, द्वितीयव्रतं तु—

॥ मूलम् ॥—नो कामीणं सच्चं । पसिद्धमेयं जणस्स सयलस्स ॥ तिन्नयरसामिपमुहा—दत्तंपि हु तन्न खलु हुज्ज ॥ २४ ॥ अबंभं पयडंविय । अपरिग्गहियस्स कामिणी नेय ॥ इय सीलवज्जियाणं । कन्न वयं पंचवयमूलं ॥ २५ ॥ व्याख्या—न च कामिनां सत्यं, विषयार्त्तानां सत्यवादित्वं न संभवति; प्रसिद्धमेतज्जनस्य सकलस्य. यदुक्तं—वणिक्पणांगनादस्यु—द्यूतकृत्पारदारिकः ॥ द्वारपालश्च कौलश्च । सप्ताऽसत्यस्य मंदिरं ॥ १ ॥ ननु पित्राद्यनुज्ञया परिणीतेषु स्वदारेषु मैथुनसेवाहेवाकिनोऽपि कथं तृतीयव्रतभंग इत्याह—तिन्नयरेत्ति—तत्राऽब्रह्मसेवायां तीर्थकरस्वामिप्रमुखाऽदत्तमपि भवेत्, तत्र तीर्थकराऽदत्तं मोक्षफलवृत्तानां सर्वथा मैथुन-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

निषेधात्. स्वामी मंमलाधिपतिस्तेनाऽप्यदत्तमननुज्ञातं, प्रमुखशब्देन जीवाऽदत्तं गुर्वदत्तं ग्राह्यं. यदागमः—सामीजीवादत्तं । तिन्नयरेहिं तहेव य गुरूहिं ॥ एवमदत्तादाणं । चनविहं विंति गीयत्था ॥ १ ॥ इति शीलनंगे तृतीयव्रतनंगो ज्ञेयः । अबंनंति, अब्रह्म चतुर्थव्रतनंगः प्रकट एव. पंचमं तु अपरिग्गहिय—अपरिग्रहिकस्य कामिनी नैव, आस्तां सेवा, परिग्रहव्रतनंगं विना कामिन्यपि न संनवतीत्यर्थः, इति शीलविवर्जितानां पंचव्रतमूलं कुत्र व्रतं? शीले विलीने पंचापि व्रतानि नग्नान्येवेत्यर्थः । नपदेशमाह—

॥ मूलम् ॥—ता कह विसयपसत्ता । हवंति गुरुणो तहा पुणो तेहिं ॥ नग्गा जिणाण आणा । नणियं एयं जन सुत्ते ॥ २६ ॥ व्याख्या—तत्कथं विषयासक्ता गुरवो नवंति, एकशीलव्रतनंगे सर्वव्रतानां नंगाच्छीलवंत एव गुरवः सेव्याः, विशेषमाह—तथा पुनस्तैर्दुःशीलैर्जिनानां तीर्थंकराणामाज्ञा नग्ना, यतः सूत्रे सिद्धांते नणितं कथितमेतद्वक्ष्यमाणं, तदेवाह—

॥ मूलम् ॥—न हु किंचि अणुन्नायं । पमिसिद्धं वावि जिणवरिंदेहिं ॥ मुत्तुं मेहुणनावं । न तं विणा रागदोसेहिं ॥ २७ ॥ व्याख्या—जिनवरेंद्रैस्तीर्थंकरैर्न हु निश्चयेन किम-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

व्यनुज्ञातं सावद्यरूपं, न च तदेव प्रतिषिद्धं, असंस्तरणात् सावद्यस्याप्यंगीकरणात् उत्सर्गापवादज्ञेदाभ्यामुभयमपि सर्वव्रतेषु संमतं निवारितं चेत्यर्थः, यदुक्तं पूज्यश्रीजिनवल्लभसूरिपादैः—संथरणंमि असुद्धं। दुण्हविगिण्हंति दितयाणहियं ॥ आउरदिट्ठंतेणं । तं चेव हियं असंथरणे ॥ १ ॥ परं मैथुनभावं मुक्त्वा चतुर्थव्रतभंगं परित्यज्य, यतस्तत्रौत्सर्गापवादौ न स्तः, तद्धि रागद्वेषाभ्यां विना न संभवति; तावेव च संसारमूलारंभस्तंभौ. यदुक्तं—को दुक्कं पाविज्जा । कस्सवि सुखेहिं विम्हउ दुज्जा ॥ कोवि न लहिज्ज मुक्कं । रागद्दोसा जइ न दुज्जा ॥ १ ॥ उपसंहरन्नाह—

॥ मूलम् ॥—ता सयल इयरकट्ठा—णुट्ठाणसमुज्जमं परिहरेउं ॥ इक्कं चिय सीलवयं । धरेह साहीणसयलसुहं ॥ २८ ॥ व्याख्या—ततः सकलेतरकष्टानुष्ठानसमुद्यमं तपश्चरणादितीव्रतरविधेयोत्साहं परिहृत्य परित्यज्य, स्वाधीनसकलसुखं स्वायत्तस्वर्गापवर्गसौख्यमेकमेव शीलव्रतं धारयत ? इतरव्रताऽनपेक्षयं ब्रह्मव्रतमेव पालयतेत्यर्थः ॥ धीरानेवोपदेशन्नयन्नाह—

॥ मूलम् ॥—सावज्जजोगवज्जण—सज्जा निरवज्जउज्जुआवि जए ॥ नारीसंगपसंगा ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

न्नग्गा धीराण सिवमग्गा ॥ २९ ॥ व्याख्या—जगति संसारे धीराणां धैर्यशालिनां शिवमार्गा मोक्षपंथानो नारीसंगप्रसंगान्न्ना:, नार्याः संगः संबंधस्तस्य प्रसंगस्तस्मात्. किं न्नूतास्ते? सावद्ययोगवर्जनसज्ञाः, सावद्ययोगा अब्रह्मसेवादयस्तेषां च वर्जने परिहारे सज्ञाः सुलन्नाः, तथा निरवद्ये सुशीले ऋजवः सरला इति, नारीसंगस्यैव तत्प्राप्तावंतरायीन्नूतत्वात्. यदाहुः—संसार तव पर्यंत–पदवी न दवीयसी ॥ अंतरा दुस्तरा न स्यु–र्यदि रे मदिरेक्षणाः ॥ १ ॥ इति. नारीसंगमेव दृष्टांतेन दृढयन्नाह—

॥ मूलम् ॥—संवेगगहियदिक्खो । तप्पवसिद्धीवि अद्दयकुमारो ॥ वयमुष्प्रिय चन्नवीसं । वासे सेविमु गिहवासं ॥ ३० ॥ व्याख्या—संवेगगृहीतदीक्षो वैराग्यादान्नवृतस्तन्नवसिद्धिस्तन्नवमोक्षगाम्यपि आर्द्रकुमारो वृतं चारित्रमुष्प्रित्वा त्यक्त्वा चतुर्विंशतिवर्षान् गृहवासं गार्हस्थ्यं सेवितवान् अंगीकृतवानिति गाथार्थः, न्नावार्थस्तु कथानकगम्यः, स चेन्नं—

अत्रैव न्नारते वर्षे । क्षोणौ वेणीमणीयितं ॥ पुरं राजगृहं न्नूत्या । न्नर्त्सितस्वर्गपत्तनं ॥ ॥ १ ॥ तत्र श्रीश्रेणिको राजा । राजशब्दभ्रमादिव ॥ यं वर्द्धमानप्रेमाणः । सेवंते सकलाः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

कलाः ॥ २ ॥ तस्यास्ति तनयो जैन–धर्मज्ञो निर्नयोऽनयः ॥ यन्मतितारका राज–मंडले दीप्यतेऽधिकं ॥ ३ ॥ चिरत्नप्रीतिवृद्ध्यर्थ–मन्यदाईकभूपतेः ॥ द्वीपांतरे नृपः प्रैषी–न्मंत्रिणं प्राभृतान्वितं ॥ ४ ॥ तत्तद्देशोचितं सोऽथ । प्राभृतं कंबलादिकं ॥ नृपस्य पुरतोऽमुंच–त्प्रीतिपुंजमिव प्रभोः ॥ ५ ॥ आदाय परमप्रीत्या । तदाईकमहीपतिः ॥ अप्राक्षीत्कुशलं राज्ये । सादरं मगधेशितुः ॥ ६ ॥ सोऽपि श्रीश्रेणिकोदंत–प्रेंखोलन्मलयानिलैः ॥ सुतरां नर्त्तयामास । तन्मनोवृत्तिवल्लरीं ॥ ७ ॥

अथ पप्रच्छ भूभर्तुः । सूनुराईकनामकः ॥ मंत्रिंस्त्वत्स्वामिनो योग्यः । कुमारोऽप्यस्ति कश्चन ॥ ८ ॥ यतश्चिरंतनप्रीते–रविच्छेदाय सादरं ॥ तेन सार्द्धमहं प्रीतिं । चिकीर्षामि कुलोचितां ॥ ९ ॥ यतः—धन्यास्त एव यत्प्रीति–र्वर्द्धमाना दिने दिने ॥ क्रमात्पुत्रप्रपौत्रेषु । संक्रामति ऋणं यथा ॥ १० ॥ मंत्रिणाऽज्ञापि धर्मज्ञो । बुद्धिमान् कुरुणानिधिः ॥ पंचमंत्रिशतस्वामी । कृतज्ञो दक्षशेखरः ॥ ११ ॥ विद्याविनयसंपन्नः । श्रीश्रेणिकनृपांगजः ॥ अभयोऽभिधया ख्यातः । किमु नाकर्णितस्त्वया ?! ॥ १२ ॥ युग्मं ॥ श्रेणिकांगभुवा सार्द्धं । मैत्र्यं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मिच्छंतमात्मजं ॥ साधु वत्स सुपुत्रोऽसी—त्यभ्यनंदत्तमार्हकः ॥ १३ ॥ कुमारोऽपि गुणांस्तस्य । नाम चाकर्ण्य विस्मितः ॥ परमानंदसंपूर्ण । इति मंत्रिणमब्रीत् ॥ १४ ॥

न गंतव्यमनापृच्छ्य । श्रोतव्यं वाचिकं मम ॥ अभयंप्रति मच्चेतो । यतो धावति साग्रहं ॥ १५ ॥ निजपुंसा सहामात्यो । विसृष्टोऽथ नृपेण सः ॥ अभयाय कुमारोऽपि । प्राहिणोन्मौक्तिकादिकं ॥ १६ ॥ मंत्री राजगृहेऽभ्येत्य । श्रेणिकाय तदार्पयत् ॥ अभयाय च तद्धस्तु । वाचिकेन समं ददौ ॥ १७ ॥ आसन्नभव्यः कोऽप्येष । जिनशासनवत्सली ॥ पुरा विराध्य चारित्र—मनार्येषूदपद्यत ॥ १८ ॥ अभव्यो दूरभव्यो वा । न मया सख्यमिच्छति ॥ यतः समानधर्माणां । जायते प्रीतिरंगिनां ॥ १९ ॥ ततस्तस्मै ध्रुवं प्रेष्या । प्रतिमा तीर्थशासितुः ॥ जातिस्मरणमासाद्य । स तया बोधिमाप्स्यति ॥ २० ॥ इत्यनुध्याय मतिमा—नभयो धर्मवत्सलः ॥ प्रतिमामादिदेवस्य । सौवर्णीं सुप्रतिष्ठितां ॥ २१ ॥ निधाय सोपकरणां । पेटामध्ये समुद्भके ॥ नरेंद्रप्राभृतैः सार्द्धं । तस्य पुंसः करे ददौ ॥ २२ ॥ आर्हतोऽपि समुद्घाट्य । मंजूषां हर्षपूरितः ॥ दृष्ट्वादिदेवप्रतिमां । स दध्याविति चेतसि ॥ २३ ॥ इदमाभरणं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

कंठे । शीर्षे वा हृदि धार्यते ॥ दृष्टपूर्वमिति ध्यायन् । जातिस्मरणमाप्तवान् ॥ २४ ॥

इतो भवे तृतीयेऽहं । वसंतपुरपत्तेन ॥ कुटुंबी मगधे देशे—ऽभुवं सामायिकान्वितः ॥ ॥ २५ ॥ भार्या बंधुमती चासीत् । तया सार्द्धमथान्यदा ॥ धर्मं श्रुत्वा सवैराग्यो । दीक्षामहमुपाददे ॥ २६ ॥ संयतीजनमध्यस्था—मन्येद्युर्वीक्ष्य वल्लभां ॥ प्राक्तनेनानुरागेण । कामयामासिवांश्च तां ॥ २७ ॥ तद् ज्ञात्वा सापि मा भांक्षी—देष मे स्वस्य च व्रतं ॥ प्रपाद्यानशनं प्राणां—स्त्यक्त्वा देवभुवं ययौ ॥ २८ ॥ तत् श्रुत्वाऽनशनेनाहं । व्रतभंगभयात्खलु ॥ विपद्य त्रिदशो भूत्वा—ऽनार्येषूत्पत्तिमाप्नुवं ॥ २९ ॥ स गुरुः स च बंधुर्मे । येनाहं प्रतिबोधितः ॥ इत्यभयदिदृक्षायै । स चकार मनोरथं ॥ ३० ॥ अभयं द्रष्टुमिच्छामि । तेनेत्युक्ते पिताऽवदत् ॥ स्वस्थाने तस्थुषामेव । प्रीतिः श्रीश्रेणिकेन नः ॥ ३१ ॥

पित्रा निवारितश्चैषः । स्वयं गंतुं च सोत्सुकः ॥ अनुरक्तः कुलस्त्रीव—र्गंतुं स्थातुं च नाऽशकत् ॥ ३२ ॥ दृष्टानिव दृढं ध्याय—न्नदृष्टानपि तद्गुणान् ॥ सदने कानने चापि । न क्वापि धृतिमाप सः ॥ ३३ ॥ तदेकाग्रतया तिष्ठन् । योगीवाऽनन्यकार्यकृत् ॥ प्रोषितेव

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पतिप्राप्त्यै । दिनं कष्टादवाहयत् ॥ ३४ ॥ तत्संबद्धाः कथाः कुर्व–न्नार्ड्कः प्रेक्षते क्षणं ॥ न-
क्षीय गच्छतः स्वेष्टं । पक्षिणो बहुमन्यत ॥ ३५ ॥ अथार्ड्कनृपो ज्ञात्वा । ययासुं निजमात्म-
जं ॥ आदिशत्तस्य रक्षायै । सामंतशतपंचकं ॥ ३६ ॥ निजपार्श्वममुंचानै–श्शाययेव दिवा-
निशं ॥ कारागतमिवात्मानं । कुमारस्तैरमन्यत ॥ ३७ ॥ अथ प्रतीतये तेषां । बहिर्वाहान्
स वाहयन् ॥ गत्वा दूरमपि स्वेच्छं । स्वयं व्यावर्त्ततेस्म च ॥ ३८ ॥ अथार्हत्प्रतिमामग्रे–ऽधि-
रोप्य मणिभिर्नृतं ॥ प्रगुणं कारयामास । यानपात्रं स वारिधौ ॥ ३९ ॥ अथ तेषु त्वदृष्टेषु
। पोतमारुह्य तत्क्षणात् ॥ आर्यदेशं स चासाद्य । सप्तक्षेत्र्यां धनान्यदात् ॥ ४० ॥ प्रत्येकबुद्धः
प्रतिमा—मन्नयाय विसृज्य सः ॥ यतिलिंगमुपादाय । यावत्सामायिकं जगौ ॥ ४१ ॥ व्यो-
म्नि देवतया ताव—दूचे त्वं मा ग्रहीर्व्रतं ॥ यतो भोगफलं कर्म । भोज्यं तीर्थंकरैरपि ।४२।
तस्मादभुक्त्वा तत्कर्म । व्रतं नादातुमर्हसि ॥ ननु किं तेन धर्मेण । नरके येन गम्यते ॥
॥ ४३ ॥ दैवीं वाचमनादृत्य । सहसा व्रतमग्रहीत् ॥ अत्युग्रं पालयंस्तत्स । वसंतपुरमास-
दत् ॥ ४४ ॥ स च बंधुमतीजीव–स्तत्पुरश्रेष्ठिनो गृहे ॥ धनवत्याख्यजायायां । श्रीमत्या-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ह्वा सुताऽभवत् ॥ ४५ ॥ बहिर्देवकुलेऽन्येद्युः । प्रतिमां तस्थुषो मुनेः ॥ वयस्याभिर्युता तत्र । श्रीमती रंतुमाययौ ॥ ४६ ॥ वृणीत सख्यो भर्त्तारं । तत्रोचुरिति बालिकाः ॥ श्रीमतिर्मुनिमाश्लिष्य । वृतोऽयमिति चाब्रवीत् ॥ ४७ ॥ त्वया साधु वृतं साधु । कथयंतीति देवता ॥ ववर्ष तत्र रत्नानि । तन्वाना गर्जितारवं ॥ ४८ ॥ गर्जन्नीताश्च सा तस्य । पादयोरलगन्मुनेः ॥ अनुकूलोपसर्गोऽयं । मत्वेत्यन्यत्र सोऽगमत् ॥ ४९ ॥ अस्वामिकं भवेद् द्रव्यं । राजसादिति निश्चयात् ॥ यावद्गृह्णंति रत्नानि । तानि ते नृपपूरुषाः ॥ ५० ॥ मया वरणके दत्ता—न्येतानीति सुरीवचः ॥ तावत् श्रुत्वाश्च पश्यंत—स्तत्राऽहींस्ते पलायिताः ॥ युग्मं ॥ तद्धनं देवदत्ताख्य । आददे श्रीमतीपिता ॥ निर्विघ्नं शेषलोकाश्च । केवलं कौतुकेक्षिणः ॥ ५२ ॥ पित्रोक्तापि न सा वव्रे । वरं यौवनवत्यपि ॥ स एव मे वरो द्रव्यं । ददौ यद्गृहदेवता ॥५३॥ संगृह्णता च तद् द्रव्यं । त्वयाप्यनुमतं पितः ॥ नाऽन्यस्मै तदहं देया । यदुक्तं लौकिकैरपि ॥ ॥ ५४ ॥ सकृज्जल्पंति राजानः । सकृज्जल्पंति साधवः ॥ सकृत्कन्याः प्रदीयंते त्रीण्येतानि सकृत्सकृत् ॥ ५५ ॥ वत्से नृंग इव भ्राम्यन् । स कथं लप्स्यते त्वया ॥ लब्धोऽपि हि कथं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ज्ञेयो । ज्ञिक्कवो हि परःशताः ॥ ५६ ॥ श्रीमत्यूचे तदा तात । तदंहौ लग्नया मया ॥ लक्ष्मास्ति दृष्टं चेद्दीक्ष्ये । हेलया लक्षयामि तं ॥ ५७ ॥ तदा प्रभृति ये तत्र । समागच्छंति साधवः ॥ ज्ञिक्षादानं वंदनं च । सर्वेषां सा समाचरत् ॥५८॥ द्वादशेऽब्दे तमायात—मज्ञासीच्छ्रुतलक्ष्मदर्शनात् ॥ श्रीमत्याह प्रभवान् स्वामिन् । वरो मे यत्तदा वृतः ॥ ५९ ॥ तदा निष्ठ्युतवन्मुक्त्वा । मां निरस्य गतोऽसि हा ॥ प्रसीद सांप्रतं नाथ । नोपेक्षस्व प्रभजस्व मां ॥ ६० ॥ अतःपरमपि त्वं चे—न्मां स्वामिन्नवमन्यसे ॥ स्त्रीहत्यापातकेन त्वां । लिप्त्वाहं प्रवितामिनसात् ॥ ६१ ॥ दिव्यां गिरमनुध्याय । राज्ञा लोकैश्च सोऽर्थितः ॥ श्रीमतीमुपयेमे तां । प्राविं किं जायतेऽन्यथा ॥ ६२ ॥

क्रमेण तनये जाते । श्रीमतीमार्ङ्कोऽवदत् ॥ सहायस्ते बभूवात—स्तनयः प्रव्रजाम्यहं ॥ ६३ ॥ श्रीमती धीमती तर्कु—मादायोपाविशत्तदा ॥ जवाच बालको मातः । प्रारब्धं किमिदं त्वया ॥ ६४ ॥ वत्स तातस्तपस्यायै । गंता ते त्वं पुनर्लघुः ॥ शरणं तर्कुरेवेति । श्रुत्वा कीरवदाह सः ॥ ६५ ॥ मातः क्व तातो मे गंता । बध्ध्वा तं स्थापयाम्यहं ॥ तर्कुसूत्रे-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ण तत्पादौ । वेष्टयन्नित्थमाह च ॥ ६६ ॥ मा नैषीर्बेढ एवांब । तंतुनेव हिपो मया ॥ आ-
र्ईकश्चार्ईचित्तोऽनू–नद् दृष्ट्वा बालचेष्टितं ॥ ६७ ॥ मत्पादयोर्विधातासौ । यावंतः सूत्रवेष्टका-
न् ॥ स्थास्यामि गृहवासेऽहं । तावंत्यब्दानि नाधिकं ॥ ६८ ॥ गणितास्तंतुबंधाश्च । जाता द्वा-
दश संख्यया ॥ सोऽतोऽतिक्रमयामास । द्वादशाब्दीं गृहस्थितः ॥ ६९ ॥ मनसापि व्रते न-
ग्ने । पुराऽनार्यत्वमाप्नुवं ॥ सांप्रतं सर्वथा मुक्ते । का गतिर्मे भविष्यति ॥ ७० ॥ वि दृश्ये-
त्यवधौ पूर्णे । श्रीमतीमनुमान्य सः ॥ मुनिवेषमुपादाय । विजहार समीरवत् ॥ ७१ ॥ चौ-
रवृत्तिपरं स्वीयं । सामंतशतपंचकं ॥ दृष्ट्वोपलक्षयामास । मुनी राजगृहाध्वनि ॥ ७२ ॥ ज-
ठरापूरणोपायै–र्विद्यमानैरपीतरैः ॥ केयमाजीविकारब्धा । पृष्टास्तेऽपीति तं जगुः ॥ ७३ ॥
यदादि भवता मुक्ता । वयं तत्र वनांतरे ॥ तदादि दर्शयामो न । स्वं मुखं स्वामिनो ह्रिया
॥ ७४ ॥ गवेषयंतस्त्वामेव । भुवमेतावतीमिताः ॥ अनन्यजीवनोपाया । जीवामश्चौर्यकर्म-
णा ॥ ७५ ॥ भद्राः शृणुत भव्याः स्थ । तेनाहं संगतोऽस्मि तत् ॥ आलोच्य पापं स्वाचीं-
र्णं । पुण्यमार्ज्जितां पुनः ॥ ७६ ॥ श्रुत्वा तद्देशनां धर्म–मर्यां ते राजसूनवः ॥ प्रव्रज्यां ज-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

गृहुर्धन्याः । संसारांभोधितारिणीं ॥ ७७ ॥ तैर्युक्तो वंदितुं वीर–मन्निराजगृहं ययौ ॥ विवादं कर्त्तुमारेभे । गोशालो मिलितोंतरा ॥ ७८ ॥ अहो नु कष्टैकफलं । वृथेदं तप्यते तपः ॥ सुखदुःखादिभोक्तृत्वे । प्रमाणं नियतिः खलु ॥ ७९ ॥ नपक्रमशतैः प्राणी । यत्र साधयितुं क्षमः ॥ दृश्यते जायमानं त–द्भीलया नियतेर्बलात् ॥ ८० ॥ आर्द्रकर्षिरुवाचेदं । मा यदृदतया वद ॥ नियत्या पौरुषेणापि । कार्यसिद्धिर्द्वयात्मिका ॥ ८१ ॥ यथा स्थाले स्थितं भोज्यं । कर्मणा प्राप्तमस्ति तत् ॥ तावन्न प्रविशेद्भक्ते । यावत्प्रेषति नो करः ॥ ८२ ॥ यद्वा नियतिजं किंचि–त्किंचित्पौरुषसंभवं ॥ कार्यं द्वयात्मकं चैव । नैव ह्येकात्मकं क्वचित् ॥ ॥ ८३ ॥ यदाहुः—

दैवमचिंत्यं बलव—द्बलवान्नियतिश्च पुरुषाकारोऽपि ॥ पतति कदाचिन्नभसः । खाते पातालतोऽपि जलं ॥ ८४ ॥ इत्थं निर्वचनीचक्रे । कुमारर्षिर्दुरात्मकं ॥ देवखेचरगंधर्वै—स्तुष्टुवे च सकौतुकैः ॥ ८५ ॥ अथ जीवदयाभास–धर्मभ्रांततपस्विनं ॥ हस्तिमांसाकुलं हस्ति –तापसाश्रममासदत् ॥ ८६ ॥ तत्राहुस्तापसा धान्यैः । किं जीवैर्बहुभिर्हतैः ॥ वरमेको ह-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तो हस्ती । चिरं येनातिगम्यते ॥ ८७ ॥ इत्ययोनिगमैर्बद्धो । दिशि यत्रास्ति वारणः ॥ तत्संमुखं गतः साधु–र्मुनिपंचशतीवृतः ॥ ८८ ॥ भक्तिनम्रैर्जनैर्वंद्य–मानं दृष्ट्वा मुनिं गजः ॥ लघुकर्मतया नंतुं । भावनामकरोदयं ॥ ८९ ॥ अयस्कांतमणेरेव । महर्षेर्दर्शनादिव ॥ त्रुटित्वा परतः पेतु–र्दुरितानीव शृखलाः ॥ ९० ॥ विलोक्य गजमायांतं । पलायंचक्रिरे जनाः ॥ तत्रैवाऽकंपितस्तस्थौ । मुनिर्मेरुरिवाऽनिलैः ॥ ९१ ॥ गजोऽप्यागत्य विनम–त्कुंभः प्रणमतिस्म तं ॥ स्पर्शं स्पर्शं मुनेः पादौ । परमं सुखमाप च ॥ ९२ ॥ प्रभावाऽतिशयं दृष्ट्वा । कुपिता अपि तापसाः ॥ प्रत्यबोध्यंत ते सर्वे । श्रीआर्द्रकमहर्षिणा ॥ ९३ ॥ ततः संवेगनिर्वेद–युक्ता मुक्तिसमीहया ॥ भक्त्या नत्वा जिनं वीरं । व्रतमाददिरेऽथ ते ॥ ९४ ॥ तत्राऽभयजुषा भक्त्या । श्रीश्रेणिकमहीभुजा ॥ वंद्यमानः कुमारर्षि–र्धर्मलाभाशिषं ददौ ॥ ९५ ॥

अनाबाधं परिपृच्छ्य । मुनिमाह महीपतिः ॥ महर्षे श्रोतुमिच्छामि । साश्चर्यं हस्तिमोचनं ॥ ९६ ॥ मुनिनोचे महाराज । न चित्रं करिमोचनं ॥ सुदुष्करं तंतुपाश––मोचनं प्रतिभाति मे ॥ ९७ ॥ तत्पृष्टः प्रथयामास । तर्कुतंतुकथां मुनिः ॥ धर्मात्मावुपकारित्वा–द-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

न्यनंदत्तथाऽन्नयं ॥ ९८ ॥ निःकारणवत्सलेन । त्वयाहं प्रतिबोधितः ॥ इत्युदंतं निवेद्यासौ । । तस्मै धर्माशिषं ददौ ॥ ९९ ॥ इत्याश्चर्यकरं तस्य । निशम्य चरितं जनाः ॥ श्रेणिकान्न-यसंयुक्ताः । प्रहृष्टाः स्वगृहं ययुः ॥ १०० ॥ नत्वा पुरे राजगृहे जिनेंद्रं । श्रीवीरनाथं मुनि-राईकाख्यः ॥ कृत्वा कृतार्थं स्वमनुष्यजन्म । कर्माणि न्नित्वा च शिवं प्रपेदे ॥ १ ॥ विशु-द्धसंवेगगृहीतदीक्षो । मोक्षान्निगामी स च तन्नवेऽपि ॥ असेवत द्वादशकद्वयाब्दीं । गार्हस्थ्य-धर्मं विषया हि न्नीमाः ॥ २ ॥

॥ इति श्रीरुद्रपल्लीयगच्छे न्नट्टारकश्रीसंघतिलकसूरिपट्टावतंसश्रीसोमतिलकसूरिविरचि-तायां श्रीशीलोपदेशमालावृत्तौ शीलतरंगिण्यां श्रीआर्द्रकऋषिकथा ॥

आस्तां सामान्यमात्रस्य, तीर्थंकरदीक्षितस्यापि नारीसंगाद्दोषमाह—

॥ मूलम् ॥—पइदिवसं दहदह—बोहगोवि सिरिवीरनाहसीसोवि ॥ सिणियसुन्नवि स-त्तो । वेसाए नंदिसेणमुणी ॥ ३१ ॥ व्याख्या—प्रतिदिवसं नित्यं दशदशबोधकोऽपि, दशज-नान् प्रतिबोध्य चारित्राय प्रेषयन्नपि, एवंविधः श्रीवीरनाथशिष्योऽपि तत्करप्राप्तदीक्षोऽपि श्रे-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

णिकसुतो नंदिषेणमुनिर्वेश्यागृहे द्वादशवर्षानिवासीदिति पूर्वगाथासंबंधः ' दशपाषाणे ह ' इति सूत्रेण दहः, गाथार्थोऽयं, भावार्थस्तु कथानकगम्यस्तथाहि—

क्वापि देशे द्विजः कोऽपि । यज्ञं कर्तुं प्रचक्रमे ॥ यज्ञपाटकरक्षायै । तत्रैकं दासमादिशत् ॥ १ ॥ स भृत्यो जिनधर्मज्ञो—ऽन्यदा विप्रमुवाच तं ॥ अहमप्याचरिष्यामि । यज्ञशेषान्मनीषितं ॥ २ ॥ तथेति प्रतिपन्ने च । रक्षकस्तत्र सोऽभवत् ॥ आहूयंत तथा विप्रा । विडुरा यज्ञकर्मसु ॥ ३ ॥ हूयंते मधुपर्काद्या । घृतकुंभशतानि च ॥ भोज्यंतेऽतिथयः शालिमोदकादिभिरन्वहं ॥ ४ ॥ अवशेषं प्रासुकान्नं । मुनिभ्यः स सदाप्यदात् ॥ भक्तितश्च सदाचारः । सुशुद्धं तंडुलोदकं ॥ ५ ॥ वस्त्रादिकमपि प्राप्य । स यथावसरं ददौ ॥ दानप्रांते तथात्मान—मपुनाद्वंदनादिना ॥ ६ ॥ मृत्वोत्पन्नः स देवेषु । भोगांश्च बुभुजे चिरं ॥ अल्पा हि क्रिया भाव—सहिता स्यात्फलेग्रहि ॥ ७ ॥

ततः श्रेणिकराजस्य । सुतत्वेनोदपद्यत ॥ नंदिषेण इति ख्यातः । स प्राप्तो यौवनश्रियं ॥ ८ ॥ क्रमेणाऽतुल्यलावण्य—रूपभाग्यवपुःश्रियः ॥ राजकन्यापंचशती । स पित्रा पर्य-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

णायितः ॥ ९ ॥ इतश्च—हस्तियूथपतिः कश्चि–त्सल्लकीवनमध्यगः ॥ वशासु क्रीडति स्वैरं । सुरीष्विव सुरेश्वरः ॥ १० ॥ मामुल्लेद्य गजो मान्नू–त्करिणीयूथनायकः ॥ इति ध्यात्वा जातजातं । निजघान स हस्तिनं ॥ ११ ॥ विप्रजीवस्तु तद्यूथे । वशाकुक्षाववातरत् ॥ गर्भमेनं कथंकारं । रक्षिष्यामीति हस्तिनी ॥ १२ ॥ विमृश्य खंजतां प्राप्ता । मायया मंदचारिणी ॥ प्रेम्णा प्रतीक्ष्यमाणं तं । गत्वा यामैकतोऽमिलत् ॥ १३ ॥

एवं मिलंती धूर्त्तत्वा–देकाहेन द्व्यहेन वा ॥ गजं विश्वासयामास । स्त्रीभ्निः कः को न वंच्यते ॥ १४ ॥ दूरस्थे नायकेऽन्येद्युः । प्रसवासन्नवासरे ॥ जगामाश्रममाधाय । स्वशीर्षे तृणपूलकं ॥ १५ ॥ पतंतीं पादयोरेनां । विज्ञाय शरणार्थिनीं ॥ अवोचंस्तापसा वत्से । तिष्ठात्र भयवर्जिता ॥ १६ ॥ जातमात्रं सुतं तत्र । मुक्त्वा यूथं स्वयं ययौ ॥ स्तन्यं बालाय दत्तेस्म । प्रच्छन्नं त्वंतरांतरा ॥ १७ ॥ तापसैः सहजप्रेम्णा । नीवारैः सल्लकीदलैः ॥ पोष्यमाणो गतो वृद्धिं । क्रमादाश्रमवृक्षवत् ॥ १८ ॥ पोतोऽसौ पोतवत्क्रीडन् । नीवारादिकमाहरन् ॥ जटाजूटकबंधं च । स चक्रे शिरसि स्वयं ॥ १९ ॥ तपस्विलीलया कामं । सिंचन्ना-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

श्रमपादपान् ॥ स सेचनक इत्यासी–त्प्रसिद्धोऽभिधया भुवि ॥ २० ॥ तुंगः सप्तकरान् दीर्घो । नवहस्तांस्त्रीन् विस्तृतः ॥ लघुग्रीवो मधुपिंग–नेत्रः सप्तांगसुंदरः ॥ २१ ॥ चत्वारिंशदधिकया । चतुःशत्या सुलक्षणैः ॥ स युक्तो भद्रजातीयो । मदोन्मत्तः क्रमादभूत् ॥ २२ ॥ पयः पातुं समायातं । पितरं तटिनीतटे ॥ विनाश्य सबलत्वेन । जघ्ने यूथपतिः स्वयं ॥२३॥

अवबुध्य निजोदंत–मसौ दध्याविदं हृदि ॥ यथाऽहं रक्षितश्चद्म । कृत्वा मात्रा तपोवने ॥ २४ ॥ मया च यादृगाचीर्णं । स्वपितुः क्रूरकर्मणा ॥ तथा परोऽपि मा कार्षी–न्मयीति परिभाव्य सः ॥ २५ ॥ बभ्रंज कपिवन्नीडं । स तदा तापसाश्रमं ॥ तापसाः श्रेणिकायाख्यन् । गजं तं च सुलक्षणं ॥ २६ ॥ राजापि कानने गत्वा । बध्वा तं पुरमानयत् ॥ अदृष्टपूर्वबंधेन । स जज्वाल भुजंगवत् ॥ २७ ॥ महास्थाने महालान–बद्धो भग्नोद्यमस्तदा ॥ निमीलितेक्षणस्तस्थौ । मानीव भग्नमत्सरः ॥ २८ ॥ नस्त्वया त्वाश्रमक्षेमं । साध्वकारीति तापसाः ॥ आलानस्तंभबद्धं त–मागत्यैवमतर्जयन् ॥ २९ ॥ रे दुरात्मंस्त्वमस्माभि–र्लालितः पालिताश्चिरं ॥ यदाचरश्च दुःकर्म । तस्येदं भुज्यते फलं ॥ ३० ॥ अमीषां वचना-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

न्नून–मेनां प्राप्तोऽस्म्यहं दशां ॥ ध्यात्वेति स्तंभमुन्मूल्य । त्रोटयित्वा च बंधनं ॥ ३१ ॥ क्रुधारुणेक्षणः क्षिप्रं । गत्वा वनमथाश्रमं ॥ संमर्द्य तिलवत्पर्ण–शालां चिक्षेप तूलवत् ॥३२॥ रिरक्षया तापसानां । गजस्य च जिघृक्षया ॥ हयारूढैः सुतैः सार्द्धं । वने श्रीश्रेणिको ययौ ॥ ३३ ॥ मंत्रैर्दुष्टं भूतमिव । सादिनो मंत्रवादिनः ॥ न क्षमास्तं वशे नेतुं । बभूवुः श्रेणिकांगजाः ॥ ३४ ॥ श्रुत्वा तु नंदिषेणस्य । वचोऽहिरिव जांगुलेः ॥ स स्मृत्वा प्राक्तनं जन्म । चित्रार्पित इवाऽभवत् ॥ ३५ ॥ बालश्चागमिवारुह्य । नंदिषेणोऽथ हस्तिनं ॥ हेलयाऽनयदालान–स्तंभगोचरचारितां ॥ ३६ ॥ ज्ञात्वा सल्लक्षणैः पूर्णं । युवराजमिवापरं ॥ चक्रे सेचनकं पट्ट–हस्तिनं श्रेणिको नृपः ॥ ३७ ॥

अन्यदा श्रीमहावीरं । चैत्ये गुणशिलाह्वये ॥ वंदितुं श्रेणिकोऽगच्छ–त्सांतःपुरसुतव्रजः ॥ ॥ ३८ ॥ श्रुत्वा चतुर्विधां तस्य । देशनां श्रवणामृतां ॥ गार्हस्थ्यधर्मसर्वस्व–मन्नयाद्याः प्रपेदिरे ॥ ३९ ॥ श्रीश्रेणिकमथापृच्छ्य । कथंचिद्भवलीप्सया ॥ नृपवीरमपासर्प–न्नंदिषेणो वरेण्यधीः ॥ ४० ॥ अंतरिक्षस्थया ताव–दूचे देवतया स्फुटं ॥ अभुक्तं क्षीयते कर्म । वत्स नो-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

गफलं किमु ॥ ४१ ॥ तस्मात्कालं प्रतीक्षस्व । मास्म मिथ्योत्सुकीभव ॥ चारित्रावरकं कर्म । क्षपय गृह एव तत् ॥ ४२ ॥ किं करिष्यति मे कर्म । साधुवर्त्मनि तस्थुषः ॥ इत्यवष्टभ्य धीरत्वं । सोऽगाद्वीरपदांतिके ॥ ४३ ॥ प्रभुणापि निषिद्धोऽयं । विरराम न चाग्रहात् ॥ ॥ हस्तिनः संमुखावेव । दंतौ स्यातां न पृष्ठतः ॥ ४४ ॥ सोंगीकृत्य मुदा दीक्षां । व्यहार्षीत्प्रभुणा सह ॥ स्वात्मानं कृशयामास । तपोभिरतिदुस्सहैः ॥ ४५ ॥ उत्पद्यमानां भोगेच्छां । निरुरुत्सुर्बलादपि ॥ विशिष्यातापनां चक्रे । घोरां पितृवनादिषु ॥ ४६ ॥

विकाराऽरण्यसांमुख्यं । भृशामिंद्रियतस्करैः ॥ भजमानैरसौ मानी । स्वात्मघातमचिंतयत् ॥ ४७ ॥ शस्त्रेण निघ्नतस्तस्य । शस्त्रं कुंठं चकार सा ॥ वह्नौ निपततो देवी । वह्निं चक्रे च शीतलं ॥ ४८ ॥ भक्षयतो वत्सनागं । निर्वीर्यत्वमजीजनत् ॥ उद्बंधनं दधानस्य । पत्रवत्पाशमच्छिदत् ॥ ४९ ॥ पतंतं शैलतो धृत्वा । सुरी सादरमब्रवीत् ॥ अलं भवति वै क्षेप्तुं । कोऽप्यभुक्त्वात्र कर्म किं ॥ ५० ॥ अवश्यमेव भोक्तव्यं । वेद्यं कर्म जिनैरपि ॥ मुधैवोत्तिष्ठसे तत्त्वं । किं न स्मरसि मद्वचः ॥ ५१ ॥ भृशायिततपःकर्मा । सोऽन्यदा षष्ठपारणे ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अनाभोगतयैकाकी । विवेश गणिकागृहं ॥ ५२ ॥ धर्मलाभ इति प्रोच्य । यावद्व्यावर्त्तते मुनिः ॥ तावता गणिका हास्य–समन्वितमिदमूचुषी ॥ ५३ ॥ धर्मलाभैर्न नः कार्यं । द्रव्यलाभोऽस्तु केवलं ॥ एषापि मामुपहस–त्येवं गर्वभरान्मुनिः ॥ ५४ ॥ निवृतस्तृणमाकृष्य । लब्ध्या द्रव्यमपातयत् ॥ अथाऽनुधाव्य वेश्यापि । लग्ना शृंगीव तत्पदोः ॥ ५५ ॥ अब्रवीच्च समागत्य । कल्पवृक्ष इवांगणे ॥ अनाथामनुरक्तां मां । नाथ न त्यक्तुमर्हसि ॥ ५६ ॥ महात्माऽपि तदुल्लापै–रक्तः साम्नेव सिंधुरः ॥ जानन्नपि विषं भोगान् । प्रेम्णात्मानमबंधयत् ॥ ॥ ५७ ॥ स्मृत्वा देवीगिरं राग–मूढो वीरवचश्च तत् ॥ तत्रोवास त्यक्तलिंगो । वेद्यं कर्म किमन्यथा ॥ ५८ ॥ अधिकान् दश वा यत्र । दिने बोधयिताऽस्मि न ॥ प्रत्यङ्गासीत्तदा नंदिषेणो दीक्षामथात्मनः ॥ ५९ ॥ बुभुजे विपुलान् भोगान् । प्रबोध्य च जनान् दश ॥ प्रहित्योपजिनं धन्यो । भोजनादिकमाचरत् ॥ ६० ॥ अथ भोग्यायुषि क्षीणे । सबले कर्मबंधने ॥ प्रबुद्धा नव नो टक्क–जातीयो दशमोऽन्यदा ॥ ६१ ॥ समयज्ञा तदा वेश्या । प्रोचे रसवतीं कृतां ॥ अपूर्णान्निग्रहः सोऽपि । नोत्तस्थौ न च सोऽबुधत् ॥ ६२ ॥ सिक्थेऽत्रे विरसीभूते

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

। मुहुर्वेद्या तमाह्वयत् ॥ निष्पन्नमन्यदस्त्यत्रं । तत्किं स्वामिन् विलंबसे ॥ ६३ ॥ तेनोक्तं दशमो नाद्य । प्रबुद्धः साह सस्मितं ॥ नव त्वमेव दशमः । स्वामिन्नोमित्युवाच सः ॥६४॥ मत्वा नोगफलं कर्म । क्षीणं श्रेणिकसंनवः ॥ गत्वा श्रीवीरपादांते । तपस्यां पुनराददे ॥ ॥ ६५ ॥ स्वदुश्चरितमालोच्य । सहमानः परीषहान् ॥ नंदिषेणो विशुद्धात्मा । जगाम त्रिदिवालयं ॥ ६६ ॥ किं चित्रं यदसौ तादृक् । विषयैर्विवशीकृतः ॥ स्मृतिमात्रेण निघ्नंतो । विषया हि विषोपमाः ॥ ६७ ॥

॥ इति श्रीरुद्रपल्लीयगच्छे श्रीसिंहतिलकसूरिपट्टावतंसश्रीसोमतिलकसूरिविरचितायां श्रीशीलोपदेशमालावृत्तौ श्रीशीलतरंगिण्यां श्रीनंदिषेणमहर्षेः कथा ॥

तन्नवसिद्धिगामिनामपि विषयदुर्जेयतामाह—

॥ मूलम् ॥—जनंदणो महप्पा । जिणन्नाया वयधरो चरमदेहो ॥ रहनेमी रायमई । राइमई कासि ही विसया ॥ ३१ ॥ व्याख्या—यदुनंदनः श्रीसमुद्रविजयनरेंद्रसूनुर्महात्मोपशांतचित्तो जिनभ्राता श्रीमन्नेमिजिनलघुबांधवो व्रतधरो गृहीतदीक्षश्चरमदेहस्तन्नवमोक्षगा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मी, एवंविधोऽपि रथनेमी राजीमतींप्रति रागमतिं चकार, ही इति खेदे विषयाः खेदावहा दुर्लंघ्याः, को न्नावः? यैर्विषयैरेवंविधोऽपि रथनेमिर्विकारकातरतां प्रापितः, ते विषयाः केन जेतुं शक्यंते इति. राजीमत्यां श्रीमदुग्रसेनात्मजायां रागोऽनुरागश्चेतःक्षोन्नस्तस्मिन्मतिं बुद्धिं स चकार; इति गाथार्थः, न्नावार्थस्तु कथानकगम्यः, स चेन्नं—

राज्यं राजिमतीं चापि । परित्यज्य विरक्तधीः ॥ द्वाविंशः श्रीजिनो नेमिः । प्रपन्नो रैवते व्रतं ॥ १ ॥ रथनेमिर्लघुभ्राता । पाणिग्रहणलीप्सया ॥ राजीमतींप्रति प्रैष—त्प्राभृतानि प्रसत्तये ॥ २ ॥ प्राभृतं प्रेषयत्येव । स्वभ्रातुः प्रेमतो मयि ॥ इति तत्स्नेहतः सापि । निर्विकल्पतयाऽग्रहीत् ॥ ३ ॥ विवाहाकांक्षयाऽन्येद्युः । प्रार्थयंतं नृपांगजा ॥ मदनंफलमाघ्राय । वमित्वेति तमब्रवीत् ॥ ४ ॥ भुंक्ष्वेदं किमहं श्वास्मि । भुंजे यन्नांतमार्त्तवत् ॥ भ्रात्रा त्यक्तां कथं तर्हि । मामुपन्नोक्तुमर्हसि ॥ ५ ॥ अन्यच्च—को नाम गजमुज्झित्वा । रासन्नं बहुमन्यते ॥ को वा रत्नमनादृत्य । काचेऽपि कुरुते मतिं ॥ ६ ॥ भ्रातृस्नेहानुगाम्येष । इति प्राभृतमाददे ॥ जन्मांतरेऽपि नो न्नूया—द्वरो नेमिजिनात्परः ॥ ७ ॥ उत्पन्ने केवलज्ञाने । स्वामि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नोऽथ पतिव्रता ॥ उपादाय व्रतं राजी–मती जज्ञे महत्तरा ॥ ८ ॥ विहरन्नन्यदा स्वामी । रैवते समवासरत् ॥ ययुः सांतःपुरास्तत्र । कृष्णाद्या वंदितुं प्रभुं ॥ ९ ॥ श्रुत्वा संसारवैराग्य –जननीं धर्मदेशनां ॥ रथनेमिरुपादत्त । चारित्रं श्रीजिनांतिके ॥ १० ॥ राजीमत्यंतिके स्त्रै- णं । स्वस्वदीक्षामपालयत् ॥ उत्तमार्थविधेयेषु । शिथिलाः कृतिनः किमु ॥ ११ ॥

अन्यदा नेमिनं नत्वा । रथनेमिः पथि व्रजन् ॥ बाधितो वृष्टिकायेन । प्राविशत्कंदरां गिरेः ॥ १२ ॥ राजीमत्यपि मेघांबु–बाधिता तद्गुहांतरे ॥ रथनेमिमजानाना । तत्रस्थं प्रा- विशत्तदा ॥ १३ ॥ तमदृष्ट्वा तमिस्रेण । श्रोणीनिहितचक्षुषं ॥ वस्त्राणि परितोऽक्षेप्सी–द्धा- नाय महासती ॥ १४ ॥ स्वर्गलोकजयायेव । साधयंतीं तपःक्रियां ॥ दृष्ट्वा विवसनां तन्वीं । सोऽभूत्कामातुरो भृशं ॥ १५ ॥ पिंमितं सृष्टिसर्वस्व–मिवाऽसौ हा मृगेक्षणा ॥ नैकशोऽपि मया भुक्ता । धिग्मे जन्म निरर्थकं ॥ १६ ॥ भ्रातुर्वैरादिवाजघ्ने । तथा कामेन मर्मसु ॥ य- था विवशितः सोंतः । स्वात्मानमपि नाऽस्मरत् ॥ १७ ॥ ईषत्कंप्रवपुर्नृत्य । इवोद्वाय विसं- स्थुलः ॥ रथनेमिः पुरस्तस्या–स्तस्थावुत्तानितेक्षणः ॥ १८ ॥ आगच्छ स्वेच्छया भद्रे । कुर्वेहे

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सफलं जनुं ॥ उन्नावपि वयःप्रांते । चरिष्यावस्तपोविधिं ॥ १९ ॥ श्रुत्वेत्यश्रव्यमव्याज-चित्ता संवीय वाससी ॥ सती स्पष्टमन्नाषिष्ट । धारयित्वाथ धीरतां ॥ २० ॥ महानुन्नाव संरंन्नः । कोऽयं ते नवकारणं ॥ संस्मरस्व प्रतिज्ञां तां । प्रव्रज्यां मास्म विस्मर ॥ २१ ॥ संयतीप्रतिसेवादि । यदुक्तं बोधिघातकं ॥ श्रीमता नेमिनाथेन । किं तच्चाद्यैव विस्मृतं ॥ २२ ॥ यदुक्तं—संयतीप्रतिसेवायां । धर्मोन्नाहर्षिघातयोः ॥ देवद्रव्यविनाशे च । बोधिघातो निवेदितः ॥ २३ ॥ पूर्वं गृहस्थया यस्त्वं । मया वाचापि नेहितः ॥ साहं व्रतप्रतिज्ञायां । त्वामद्य कथमाड्ये ॥ २४ ॥ अहं श्रीन्नोजवंशीया । त्वमंधककुलोन्नवः ॥ इदं चाऽनुचितं कर्म । इ-योर्व्रीनाविवर्धकं ॥ २५ ॥

अगंधनकुले जाता—स्तिर्यंचो ये भुजंगमाः ॥ तेऽपि वांतं न चाश्नंति । तदिच्छुस्त्वं ततोऽधिकः ॥ २६ ॥ इदं हि सफलं जन्म । निष्कलंकस्य देहिनः ॥ खंमितब्रह्मचर्यस्य । धिगिदं जीवितं पुनः ॥ २७ ॥ अहो स्त्रीसंकुले लोके । चपलं हृदयं तव ॥ न क्वापि स्थितिमाप्नोति । वातोन्मूलितवृक्षवत् ॥ २८ ॥ वराटिकाकृते तस्मा—न्मास्म कोटिं विनाशय ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तस्माद्धीरत्वमाधाय । शुद्धं धर्मं समाचर ॥२९॥ इत्यादिमदनोन्माद–दर्पसर्पैकजांगुलीं ॥ तदुक्तियुक्तिमाकर्ण्य । चिंतयामासिवानिदं ॥ ३० ॥ स्त्रीजातावपि धन्यासौ । निधानं गुणसंपदां ॥ कुकर्मजलधौ मग्नो । धिगहं पुरुषोऽपि हि ॥ ३१ ॥

अहो धीरत्वमेतस्याः । स्त्रीजातेरपि निर्मलं ॥ धिग्मेऽधैर्यं पुरुषस्या–ऽपि पंचव्रतधारिणः ॥ ३२ ॥ मया पूर्वमिदानीं च । धिगाचीर्णमनीदृशं ॥ यद्वाऽवस्थावशात्पुंसां । लघुता गुरुतापि च ॥ ३३ ॥ तस्मादेषैव बंधुर्मे । गुरुर्वापि न संशयः ॥ नष्टोऽहं महासत्या । यया नरककूपतः ॥ ३४ ॥ भावयित्वेति धन्यात्मा । श्रीमन्नेमिपदांतिके ॥ गत्वा दुश्चीर्णमालोच्य । तपस्यां गाढमग्रहीत् ॥ ३५ ॥ चतुर्वर्षशतप्रांते । द्वाद्मस्थ्यं वर्षमेककं ॥ प्रपाल्य केवली जातः । पंचवर्षशतानि सः ॥ ३६ ॥ वर्षाधिकां नवशतीं । शरदामखिलायुषः ॥ प्रपूर्य सर्वशुद्धात्मा । रथनेमिः शिवं ययौ ॥ ३७ ॥ अहो दौरात्म्यमेतेषां । विषयाणामनुत्तरं ॥ यैरसौ विरतात्मापि । चक्रे निजवशंवदः ॥ ३८ ॥ इति श्रीरथनेमिकथा ॥

अथ पूर्वोक्तदृष्टांतत्रयोपसंहारमाह—

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ मूलम् ॥—मयणपवणेण जइ । तारिसावि सुरसेलनिच्चला चलिया ॥ ता पक्कपत्त-सरिसा । इयरसत्ताण का वत्ता ॥ ३३ ॥ व्याख्या—मदनपवनेन कंदर्पवातेन यदि सुरशैल-निश्चला मेरुधीरास्तादृशा अपि श्रीआर्द्रकनंदिषेणरथनेमिप्रभृतयोऽपि महामुनयश्चलिताश्चं-चलचित्ता जातास्तदा पक्कपत्रसदृशानामपि हीनतरसत्वानां सामान्यप्राणिनां का वार्त्ता ? न कापीत्यर्थः, इति गाथार्थः ॥ ३३ ॥ कंदर्पस्यैव दुर्जयत्वमाह—

॥ मूलम् ॥—जिप्पंति सुहेणं चिय । हरिकरिसप्पाइणो महाकूरा ॥ इक्कुच्चिय दु-ज्जेयो । कामो कयसिवसुहविरामो ॥ ३४ ॥ व्याख्या—महाक्रूरा दुष्टाध्यवसाया हरिकरिस-र्पादयः सिंहहस्तिभुजंगमप्रभृतयो जीवाः सुखेनैव जीयंते, तत्तदुपायैः पुरुषैर्वशीकृत्य दम्यं-ते, परं कृतशिवसुखविरामो दलितमोक्षः, एवंविध एकः कामो मन्मथ एव दुर्जेयो जेतुम-शक्यः, उक्तं च—मत्तेभकुंभदलने भुवि संति शूराः । केचित्प्रचंडमृगराजवधेऽपि दक्षाः ॥ किंतु ब्रवीमि कृतिनां पुरतः प्रसह्य । कंदर्पदर्पदलने विरला मनुष्याः ॥१॥ कामजेतृनेव श्ला-घयन्नाह—

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ मूलम् ॥—तिहुयणविभयणनड्ड-पयावपयडोवि विसमसरवीरो ॥ जेहिं जिउ लीलाए । नमो नमो ताण धीराणं ॥ ३५ ॥ व्याख्या—यैर्महात्मभिस्त्रिभुवनविमर्दनोद्भटप्रतापप्रकटोऽपि, स्वर्गमर्त्यपातालवासिवशीकरणसमर्थमाहात्म्यकलितोऽपि विषमशरवीरः कंदर्पभुज्जटो लीलया जितः, तेभ्यो धीरेभ्यो नमोनमः, त एव नमस्कारार्हा यैरात्मा वशीकृतः, त एव धीरा वंद्याः, वीरो हि विद्याबली भवति, स च बलेनापि जयति, तद्धर्मत्वात्, एवं कंदर्पोऽपि पिशाचवद्बलयति. यदुक्तं—मध्यत्रिवलीत्रिपथे । पीवरकुचचत्वरे च तरलदृशां ॥ बलयति मदनपिशाचः । पुरुषं हि मनागपि स्खलितं ॥ १ ॥ इति गाथार्थः, यशोऽपि शीलप्राप्यमेवेत्युपदिशन्नाह—

॥ मूलम् ॥—नियसीलवहणघनसार-परिमलेणं असेसभुवणयलं ॥ सुरहिज्जइ जेहिं इमं । नमो नमो ताण पुरिसाणं ॥ ३८ ॥ व्याख्या—निजशीलवहनघनसारपरिमलेन यैरिदमशेषभुवनतलं सुरभीक्रियते तेभ्यः पुरुषेभ्यो नमोनमः, निजेन आत्मना शीलस्य वहनं धारणं अंगीकरणमित्यर्थः, तदेव घनसारः कर्पूरस्तस्य परिमलः सौरभ्यं, तेन त्रिभुवनमपि

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सुरभीकृतं, शीलेन जगदपि यैर्वासितं, त एव वंद्या इत्यर्थः ॥ विशिष्य वैषम्यज्ञापनार्थं तद्दुर्जेयतामाह—

॥ मूलम् ॥—रमणीकरुक्कविक्केव–तिक्खबाणेहिं सीलसन्नाहो ॥ जेसिं गन्न न न्नेयं । नमो नमो ताण सुहमाणं ॥ ३९ ॥ व्याख्या—येषां शीलसन्नाहो ब्रह्मचर्यकवचो रमणीकटाक्षविक्षेपतीक्ष्णबाणैर्नेदं न गतः, स्त्रीनेत्रापांगशरैर्न न्निन्नः, तेन्यः सुन्नटेन्यो नमोनमः, तेन्य एव नमस्कारः कर्त्तुमर्हः, को वा स्त्रीन्निर्न खंमितः प्राणी ? यदुक्तं—कोऽर्थान् प्राप्य न गर्वितो विषयिणः कस्यापदोऽस्तं गताः । स्त्रीन्निः कस्य न खंडितं भुवि मनः को नाम राज्ञां प्रियः ॥ कः कालस्य न गोचरांतरगतः कोऽर्थी गतो गौरवं । को वा दुर्जनवागुरासु पतितः क्षेमेण जातः पुमान् ॥ १ ॥ इति गाथार्थः, अथैनमेवार्थं दृष्टांतेन दृढयन्नाह—

॥ मूलम् ॥—निवधूया नियरूवा–वहन्निया सेससुंदरीवग्गा ॥ घणसोहग्गनिरुवम–पिम्मा लायसरुइरम्मा ॥ ४० ॥ जरजज्जरथेरी इव । परिहरिया जेण नेमिनाहेण ॥ बंन्नव्वयधारीणं । पढमोदाहरणमेस जए ॥ ४१ ॥ युग्मं ॥ व्याख्या—निजरूपापहसिताऽशेषसुंदरी-

॥ ८२ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वर्गा रूपनिर्जितदेवांगना घनसौन्नाग्यस्पृहणीयतमा निरुपमप्रेमा नवनवबद्धस्नेहा लावण्यरुचिरम्या सौंदर्यकांतिहृद्या नृपसुहिता, प्रस्तावाज्ञाजिमती, येन नेमिना येन द्वाविंशतितमतीर्थंकरेण जराजर्जरितस्थविरेव परिहृता, जरा सर्वेंद्रियनैर्बल्यरूपा वयःपरिणतिस्तया जर्जरिता श्लथीन्नूतांगा वृद्धेत्यर्थः, वृद्धा हि नीरसत्वादिन्निर्यूनां परिहार्या न्नवति, अतो नीरागहृदयत्वेन येन वृद्धावत्यक्ता, एष जिनो जगति भुवने ब्रह्मव्रतधारिणां मध्ये प्रथमोदाहरणं मूलदृष्टांतरूपः, दृष्टांतो ह्यर्थस्थापको न्नवति. यदुक्तं—तावदेव चलत्यर्थो । मंतुर्विषयमागतः ॥ यावन्नोक्तंननेनेव । दृष्टांतेनावलंब्यते ॥ १ ॥ इति गाथार्थः, न्नावार्थस्तु श्रीनेमिचरित्रगम्यः, स चेत्थं—

यस्य चरित्रं नवनव–रूपं नवनवरसामृतं पुष्णन् ॥ निधिनवकमिव नतानां । प्रकटयति स शांतये नेमिः ॥ १ ॥ अस्यैव त्रिजगत्यस्ति । शीलरेखेति लांछने ॥ कंबुरेखा इति चाहु–स्तच्चरित्रमिहोच्यते ॥ २ ॥ अस्य द्वीपस्य द्वीपस्ये–वाऽसंख्यद्वीपराजिषु ॥ समस्ति न्नारतं क्षेत्रं । क्षेत्रं सकलसंपदां ॥ ३ ॥ चपलापि कमला यस्मि–न्नचलीन्नूय तस्थुषी ॥ इ-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तीव तत्र विख्यात–मास्तेऽचलपुरं वरं ॥ ४ ॥ विक्रमाक्रांतभूचक्र–स्तत्र श्रीविक्रमो नृपः ॥ यं प्राप्य समरे लक्ष्मी–र्हरिसौभाग्यमश्नुते ॥ ५ ॥ विशुद्धपक्षा हंसीव । धारिणी तस्य व-ल्लभा ॥ स्वप्ने निशांते सान्येद्यु–र्मांकंदद्रुममैक्षत ॥ ६ ॥ एतमारोपयिष्यामि । नववाराव-धि द्रुमं ॥ ततोऽस्य फलमुत्कृष्टं । भविष्यत्युत्तरोत्तरं ॥ ७ ॥ आरोपयाम्यहमेनं । प्रथमं तु तवांगणे ॥ इति दिव्यपुमान् कश्चि–न्निशांते तामभाषत ॥ ८ ॥ प्रातर्जागरिता देवी । स्व-प्नं राज्ञे न्यवेदयत् ॥ तत्पृष्टाः पंडिताः प्रोचुः । पुत्रप्राप्तिमहाफलं ॥ ९ ॥ नवकृत्वो रोपणे-ऽस्य । सहकारस्य यत्फलं ॥ शास्त्रेण तन्न जानीमो । ज्ञानी वेद परं यदि ॥ १० ॥ समं प्र-मोदभारेण । गर्भं बभ्रेऽथ धारिणी ॥ असूत समये सूनुं । सत्काव्यं कविगीरिव ॥ ११ ॥ नि-र्मुक्तबंधनं दीय–मानदानं महीपतिः ॥ दशाहं कारयामास । सुतजन्ममहोत्सवं ॥ १२ ॥ द्वादशाह्नि स्ववंद्येषु । वस्त्राद्यैः पूजितेषु च ॥ नृपतिः सुभगां तस्य । धन इत्यभिधां व्यधा-त् ॥ १३ ॥ वर्द्धमानः क्रमेणासौ । कलाभिर्वयसापि च ॥ कामिनीमोहनं प्राप । यौवनं र-तिकाननं ॥ १४ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

इतश्च कुंकुमपुरे । राजा सिंहाभिधोऽभवत् ॥ तस्यास्ति वल्लभा नाम्ना । विमला विमलाशया ॥ १५ ॥ स्वर्गावतीर्णा गंगेव । जनतापापहारिणी ॥ पुत्री धनवतीत्यस्ति । स्वस्तिमल्लक्षणांकिता ॥ १६ ॥ रतिप्रीत्योर्विजयाय । कपोलौ फलकाविव ॥ दधाना संहितापांग–क्षुरप्रा धनवत्यभूत् ॥ १७ ॥ प्रसन्नचंद्रवदना । भ्राजिष्णूत्पललोचना ॥ यौवनाब्धिविगाहाप्त–कुचकुंभेव सा बभौ ॥१९॥ अथ गत्वान्यदोद्यानं । जातिसौरभ्यपेशलं ॥ रेमे धनवती स्वैरं । श्रीरिवांभोजकानने ॥ १९ ॥ भ्रमरीव भ्रमंती सा । वनेऽशोकतरोस्तले ॥ सचित्रपट्टकं कंचि–न्नरमासीनमैक्षत ॥२०॥ ब्रुवाणा किमिहाऽस्तीति । तस्याः कमलिनी सखी ॥ कौतुकादाच्छिनद्धस्ता–त्सचित्रां चित्रपट्टिकां ॥ २१ ॥ सुराऽसुरनरेंद्रेषु । रूपमीदृगसंभवि ॥ तन्नूनं स्वेच्छयाऽलेखि । स्वकौशलदिदृक्षया ॥ २२ ॥ अहो रूपमहो रूप–मक्ष्णोरमृतपारणं ॥ न रेखामात्रमप्यत्र । जाने सामान्यवेधसः ॥ २३ ॥ सस्मितं चित्रकृत्प्राह । श्रुत्वा कमलिनीवचः ॥ न देवो दानवो वायं । किंत्वसौ मानवो धनः ॥ २४ ॥ तस्यापि सहजं रूपं । न शेके लेखितुं मया ॥ अलेख्येतद्यथा दृष्टं । यथा शक्त्या च किंचन ॥ २५ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पृष्टः कोऽयं धन इति । प्रोचेऽचलपुरेशितुः ॥ श्रीविक्रमाख्यनृपतेः—स्तनयोऽयं धनानिधः ॥ २६ ॥ ददर्श रूपसौंदर्यं । तत् श्रुत्वा धनवत्यपि ॥ जाता च तत्क्षणोदंच—द्रोमांचांकुरदंतुरा ॥ २७ ॥ मूर्छतीमिव तद्रूपं । दर्शं दर्शं मुहुर्मुहुः ॥ दृष्ट्वा धनवतीं किंचि—त्कुड्मलीकृतलोचनां ॥ २८ ॥ साधु चित्रनिधे साधु । सुचित्रं चित्रितं त्वया ॥ इत्युक्त्वा स्पष्टवक्रोक्तिं । कमलिन्यन्यतोऽगमत् ॥ २९ ॥ तल्लावण्यं धनवती । कर्णेहत्य निपीय सा ॥ वनं विषमिव त्यक्त्वा । सतृष्णा गृहमभ्यगात् ॥ ३० ॥ आसने शयने याने । भोजने वा दिवानिशि ॥ धनैकमानसा क्वापि । न लेभे निःस्ववच्छृतिं ॥ ३१ ॥ सान्यदा भाषिता सख्या सखेदं रहसि स्थिता ॥ कृष्णपक्षेंदुलेखेव । सखि किं क्षीयसेऽन्वहं ॥ ३२ ॥ सरोषेवाऽवक् सा तन्वी । सखि किं प्राकृतोचितं ॥ मामालपसि यस्मात्त्वद्गु—क्षमप्यस्ति किंचन ॥ ३३ ॥ सा प्राह सत्यं जानामि । मानिनि त्वां धनायितीं ॥ न हि तद्विस्मृतं चित्र—दर्शनं मे निधानवत् ॥ ३४ ॥ जानत्या यन्मया प्रोचे । सनर्मं वचनं त्वयि ॥ क्षंतव्यं यन्न रोषाय । जायते हास्यजल्पितं ॥ ३५ ॥ तदा प्रभृति किंचाहं । त्वां तस्मिन्ननुरागिणीं ॥ ज्ञात्वा दैवज्ञ-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मप्राक्ष–मेनमर्थं परेद्यवि ॥ ३६ ॥ किमस्या मे वयस्याया । ज्ञविताऽज्ञीप्सितः पतिः ॥ ते-
नाप्येवमिति प्रोवे । सप्रत्ययवचस्विना ॥ ३७ ॥ तस्मात्कातर्यमुत्सृज्य । ज्ञज धैर्यमनावि-
ले ॥ तयेत्युदीरिता सौख्यं । किंचिदूनवती ययौ ॥३८॥ सान्यदा कृतशृंगारा । जनकं वंदितुं
ययौ ॥ वरचिंतांबुधौ राजा । ममज्जाथ तदीक्षणात् ॥ ३९ ॥ फलितान्येव दृश्यंते । चिंति-
तानि महात्मनां ॥ तदैवेतीव वै दूतः । समेतो विक्रमांतिकात् ॥ ४० ॥

राजकार्यमथाख्याय । तस्मिंस्तूष्णीमुपेयुषि ॥ तत्र दूत किमाश्चर्य–मेवं पृष्टोऽन्यधादि-
ति ॥ ४१ ॥ देव श्रीविक्रमधन–ज्ञूनृदंज्ञोधिकौस्तुज्ञं ॥ रत्नं त्रिभुवनाऽनर्घ्यं । धनं जानीहि के-
वलं ॥ ४२ ॥ सृजतो वेधसश्चापि । धनं धनवतीं तथा ॥ तथा कार्यं यथा नाथ्र । प्रयासः
स्यान्फलेग्रहिः ॥ ४३ ॥ साधु दूत त्वया प्रोक्तं । नूनमालोच्य मे मनः ॥ पुनस्तत्रम्यतां तत्र
। चरितार्थमिदं कुरु ॥ ४४ ॥ अथाह दूतवृत्तांतं । धनवत्याः पुरः सखी ॥ अश्रद्दधाना सा
सख्या । वराप्तेः सूचकं वचः ॥ ४५ ॥ आनाययदथो दूतं । सखीं प्रेष्य निजांतिके ॥ विशि-
ष्य शंकिते कार्ये । सौद्यमा हि विवेकिनः ॥ ४६ ॥ युग्मं ॥ श्रुत्वा दूतमुखात्सर्वं । सुमुखी

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मुमुदेतमां ॥ कौंकुमेन रसनाग्र । लिखित्वा लेखमार्पयत् ॥ ४७ ॥ प्रापयेथा धनस्यामु—मि-
त्युक्त्वा विससर्ज तं ॥ गतोऽचलपुरे शीघ्रं । दूतः सानंदमानसः ॥ ४८ ॥ राजानमुपतस्थेऽ-
थ । सन्नास्थं द्वाःस्थसूचितः ॥ सिंहः सविस्मयोऽप्राक्षीत् । कुशलं विक्रमस्य च ॥ ४९ ॥
देवास्ति कुशलं तत्र । प्रेषितः किंतु सोत्सुकः ॥ दातुं युष्मत्कुमाराय । सुतां धनवतीमहं ॥
॥ ५० ॥ वरो धनवतीरूपाऽ—नुरूपो धन एव तत् ॥ युवयोर्वर्द्धतां स्नेहो—ऽपत्यसंयोजनादपि
। ५१ । तथेति प्रतिपद्याऽसौ । विसृष्टो धनमभ्यगात् ॥ तस्मै धनवतीलेखं । मूर्त्तं स्नेहमिवाऽ-
र्पयत् ॥ ५२ ॥ कुमारः स्वयमुन्मुद्य । वाचयांचक्रवानग्र ॥ तदैवाऽवसरं प्राप्य । निजघ्ने स्म-
रसायकैः ॥ ५३ ॥ नवता निर्जितोऽनंगः । स्पर्द्धयेव निहंति मां ॥ तस्मान्मा मामुपेक्षेथा ।
नाग्र नाग्रे न चापरं ॥ ५४ ॥ तस्या वैदग्ध्यतस्तुष्टः । सह हारेण हारिणा ॥ कुमारोऽपि
सशृंगारं । प्रतिलेखं तदा ददौ ॥ ५५ ॥ वस्त्राद्यावर्जितो दूतः । प्रेषितस्तत्पुरं ययौ ॥ निवेद्य
सिद्धं कार्यं च । नृपं सिंहमतोषयत् ॥ ५६ ॥ अग्र तस्याः कुमारस्य । सहारं लेखमार्पयत्
॥ रहस्युद्धृत्य रोमांचो—त्कुंचितांगमवाचयत् ॥ ५७ ॥ हृद्यादधानं त्वामेष । बाधते मामपि

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स्फुटं ॥ तस्मात्करगृहं कृत्वा । साधनीयो ह्यसौ रिपुः ॥ ५८ ॥ मत्वा तमिति कंदर्प–राजा-
ज्ञाऽनुविवर्त्तिनं ॥ गुणावलीमिवैतस्य । हारं कंठेऽध्यरोपयत् ॥ ५ए ॥ अथ सिंहनृपः प्रैषी–
त्पुण्याढ्यं तां स्वयंवरां ॥ परिणीय धनस्तां चा–ऽनैषीज्जन्म कृतार्थतां ॥ ६० ॥ अन्यदोद्यान-
मासीनं । ज्ञानिनं श्रीवसुंधरं ॥ विज्ञाय सपरिवारो । विक्रमो वंदितुं ययौ ॥ ६१ ॥ पृष्टश्च
सहकारस्य । नवकृत्वोऽधिरोपणं ॥ शशंस चरितं साधु–र्नेमेर्नवभवात्मकं ॥ ६२ ॥ स्थैर्यं
जिनमते प्राप्य । सर्वेऽपि स्वगृहं ययुः ॥ जग्मतुः क्रीडयाऽन्येद्यु–र्वनं धनवतीधनौ ॥ ६३ ॥ त-
त्र दृष्ट्वा मुनिं कंचि–न्मूर्छया भग्नचेतनं ॥ सपर्ययाऽकेरात्सुस्थं । धन्यंमन्यस्ततो धनः ॥६४॥
शुश्राव देशनां तस्य । परं वैराग्यमासदत् ॥ प्रत्यलाभ्नयतां साधुं । गृहे नीत्वा च पायसं ॥
॥ ६५ ॥ मासकल्पं स्थापयित्वा । जातौ धर्मदृढाशयौ ॥ पित्राऽवस्थापितो राज्ये । धनः पृ-
थ्वीमपालयत् ॥ ६६ ॥ धनदत्तधनदेव–भ्रातृभ्यामन्वितो धनः ॥ जग्राह सुगुरोः पार्श्वे । धनव-
त्या सह व्रतं ॥ ६७ ॥ क्रमात्सूरिपदं प्राप्य । भव्यलोकानबूबुधत् ॥ भ्रातृभ्यां धनवत्या स ।
सदाऽनशनमग्रहीत् ॥ ६८ ॥ मासांते परिपूर्णायुः । सौधर्मे स्नेहबंधुरौ ॥ धनो धनवती चा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स्तां । शक्रसामानिकौ सुरौ ॥ ६९ ॥

इतश्च वैताढ्यगिरे–रुत्तरश्रेणिमंडनं ॥ सूरतेजःपुंजमिव । सूरतेजाभिधं पुरं ॥ ७० ॥ यथार्थनामा तत्रास्ति । सूरः खेचरकुंजरः ॥ तस्य विद्युन्मतीत्यस्ति । भार्या लक्ष्मीरिवेरिव ॥ ७१ ॥ धनजीवस्ततश्च्युत्वा । तस्याः कुक्षावजातरत् ॥ कलाकलापपारीणो । नाम्ना चित्रगतिर्बभौ ॥ ७२ ॥ अत्रैव दक्षिणश्रेणि–मंडने शिवमंदिरे ॥ अनंगसिंहो राजास्ति । राजोज्ज्वलयशोव्रजः ॥ ७३ ॥ शशिप्रभायां तत्पत्न्यां । च्युतः सौधर्मनाकतः ॥ जज्ञे धनवतीजीवो । नाम्ना रत्नवती सुता ॥ ७४ ॥ संजाता भूरिरत्नोर्ध्वं । लक्ष्मीरिव महोदधेः ॥ पित्रोरतिप्रिया सासी–ज्जाता बहुसुतोपरि ॥ ७५ ॥ लक्ष्म्या इव हरिः कोऽस्या । भविष्यति वरो वरः ॥ विमृश्येति नृपोऽप्राक्षी–दैवज्ञं सोऽप्यदोऽवदत् ॥ ७६ ॥ युधि यः करवालं ते । हस्तादुद्दालयिष्यति ॥ नंदीश्वरे च यत्रीर्षे । पुष्पवृष्टिः पतिष्यति ॥ ७७ ॥ विशुद्धोन्नयपक्षस्य । त्वत्सुता तस्य मानसे ॥ खेलिष्यति मरालीव । सलीलं सुविविक्तधीः ॥ ७८ ॥ इति रत्नवतीपुत्री–वरज्ञानोपयोगधीः ॥ श्रुत्वा विद्याधरो ज्योति–र्विदं दानैरतोषयत् ॥ ७९ ॥ इतश्च

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

भरतक्षेत्रे । पुरे चक्रपुराभिधे ॥ राजा सुग्रीवनामाऽभू–द्ग्रैवेयकमिव श्रियः ॥ ८० ॥ पत्न्यौ यशस्वतीभद्रे । इत्यास्तां हे क्रमेण ते ॥ सुमित्रपद्मनामानौ । तयोरास्तां सुतोत्तमौ ॥ ॥ ८१ ॥ तयोर्मध्ये गुणश्रेष्ठो । ज्येष्ठः श्रीजिनधर्मवित् ॥ द्वितीयो विपरीतात्मा । पापी क्रूरश्च सर्पवत् ॥ ८२ ॥ अस्मिन् सति कथं भावी । मम राज्यधरः सुतः ॥ इति ध्यात्वा सुमित्राय । भक्ष्ये तस्मै विषं ददौ ॥ ८३ ॥

सुमित्रे व्यसनं प्राप्ते । कथं पद्मो विकस्वरः ॥ इति नाऽलोचयत्क्रूरा । कुतः स्त्रीणां विचारधीः ॥ ८४ ॥ मूर्छंतं तं विषोर्मिभिः । श्रुत्वा मर्मणि चाहतः ॥ संभ्रांतो मंत्रिभिः सार्द्धं । राजा तत्र गतो रयात् ॥ ८५ ॥ प्रयुक्तैर्मंत्रतंत्राद्यै–रनेकैरपि मंत्रिभिः ॥ न शांतो गरलावेगो । दुर्जनस्येव दुष्टधीः ॥ ८६ ॥ एषा ददौ विषमिति । लोकोक्तिं च निशम्य सा ॥ पलाय्य प्रगता क्वापि । भक्ष्ये दुष्टेव सर्पिणी ॥ ८७ ॥ तस्याऽमुष्मिकपाथेयं । राजा धर्ममचीकरत् ॥ स्मारं स्मारं गुणान् सूनो–र्मुक्तकंठं रुरोद च ॥८८॥ तदानीं कौतुकाकांक्षी । व्रमंश्चित्रगतिर्भूवि ॥ सुमित्रग्लानितश्चक्र–पुरं दुःखितमैक्षत ॥ ८९ ॥ विमानादवतीर्याथ । तं ज्ञात्वा

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

विषमूर्छितं ॥ मंत्रपूतांबुनाऽन्नोद्य । सचैतन्यममुं व्यधात् ॥ ९ ॥ स्वस्थचेताः समुन्नाय । सुमित्रो मतिमद्वरः ॥ किमेतदिति पप्रच्छ । मंत्रस्याहो महाबलं ॥ ९१ ॥ उक्तेऽथ सकलोदंते । सुमित्र उदयोन्मुखः ॥ सर्वाशा दीपयंश्चित्रं । पद्मं मुकुलितं व्यधात् ॥ ९२ ॥

॥ ९२ ॥

तत उन्नाय सोत्कंठं । प्राणदानोपकारिणं ॥ नत्वा चित्रगतिं तस्य । पप्रच्छ च कुलादिकं ॥ ९३ ॥ वयस्यः खेचरस्याथ । मंत्रिपुत्रसमीपगः ॥ उवाच वंशनामादि । सर्वं हर्षप्रकर्षकृत् ॥ ९४ ॥ विषदाऽप्युपकर्त्री मे । विमाता संगमात्तव ॥ मृत्तिकां खनतः कुंभ—कारस्येव निधीक्षणं ॥ ९५ ॥ स्तुत्वा सुमित्रो बंदीव । पितृव्यां सह साग्रहं ॥ स्वसमृद्ध्यनुसारेण । खेचरेशमुपाचरत् ॥ ९६ ॥ आपृच्छ्यमानं तमथ । स्वगृहे गमनोत्सुकं ॥ सुमित्रोऽन्वयार्थयामास । केवल्यागमनावधि ॥ ९७ ॥ कियन्निर्वासरैरागा—त्पूर्वज्ञातश्च केवली ॥ ययौ चित्रगतिर्नंतुं । सुमित्रादिसमन्वितः ॥ ९८ ॥ ततश्च सुग्रीवादीनां । पुरो गत्वा निषेदुषां ॥ दिदेश देशनां क्लेश—नाशिनीं ज्ञानिनायकः ॥ ९९ ॥ मोक्षान्निलाषिजीवानां । धर्मोऽयं प्रतिभूयते ॥ निग्रहिततमाः कार्य—स्ततश्चैष मनीषिभिः ॥ १०० ॥ एता भूपत्वचक्रित्व—देवत्वा-

॥ ९२ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दिसमृद्धयः ॥ स्वाराधितस्याऽमुष्यैव । धर्मस्य परमाणवः ॥ १ ॥ धर्मश्च द्विविधः सिद्धये । यतिश्रावकभेदतः ॥ तत्रैकः सरलः पंथा । किंचिद्वक्रो द्वितीयकः ॥ २ ॥ ततश्चित्रगतिः प्राह । संसारे वंचितोऽस्मि हा ॥ नैकधापि मयाऽचीर्णो । यद्धर्मः स्ववशोऽप्ययं ॥ ३ ॥ इति सम्यक्त्वकल्पद्रुं । व्रतशाखाऽभिवेष्टितं ॥ निरतीचारतापुष्पै—रलंकृतमशिश्रयत् ॥ ४ ॥ सुग्रीवोऽथ नमद्ग्रीवो । मुनिं विज्ञप्तवानिति ॥ सुमित्राय विषं दत्वा । भ्रष्टा कुत्र गता तु सा ॥ ५ ॥ स चाऽवोचदितो नष्टा । गच्छंती तस्करैः पथि ॥ आच्छिद्य वस्त्रालंकारा—न्नीता पल्लीपतेः पुरः ॥ ६ ॥ तेनापि वणिजां हस्ते । विक्रीताथ पलायिता ॥ तेन्योऽपि दग्धा दावाग्नौ । प्रथमं नरकं ययौ ॥ ७ ॥

तत उद्धृत्य तिर्यक्त्वे । भ्रमानंतं भ्रमिष्यति ॥ राजाह यत्कृते पापं । चीर्णं पद्मः स विद्यते ॥ ८ ॥ स्वयं तु नरकं प्राप । विचित्रा कर्मणां गतिः ॥ अहो असारसंसारे । मुधा मुह्यंति जंतवः ॥ ए ॥ युग्मं ॥ संवेगविहितोत्साहः । सुमित्रोऽप्यवदत्तदा ॥ तात मामनुमन्यस्व । येन चारित्रमाश्रिये ॥ १० ॥ उद्विग्नोऽहं भ्रवादस्मात् । स्मशानादिव दारुणात् ॥ शा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

किन्य इव निघ्नंति । यत्र पुत्रानपि स्त्रियः ॥ ११ ॥ सुग्रीवः संयमारामे । सुग्रीवोऽपि निषिध्य तं ॥ निवेश्य च निजे राज्ये । स्वयं चारित्रमग्रहीत् ॥ १२ ॥ सुमित्रमंतर्नगरं । पावेश्याऽन्निनवं नृपं ॥ मित्रमापृच्छ्य तं चित्र–गतिर्निजपुरं ययौ ॥ १३ ॥ सुमित्रो भूपतिर्ग्रामान् । पद्मस्य कतिचिद्ददौ ॥ स पुनस्तैरसंतुष्टः । स्वैरं बभ्राम भूतले ॥ १४ ॥

इतश्चानंगसिंहस्य । सुतः कमलखेचरः ॥ सुमित्रभगिनीं जेहे । कलिंगनृपवल्लभां ॥ ॥ १५ ॥ सुमित्रमैत्र्यमाद्दत्य । तत्र चित्रगतिः स्वयं ॥ गत्वा संग्राममारेभे । कमलेन समं बली ॥ १६ ॥ आगादनंगसिंहश्च । सुतसाहाय्यकाम्यया ॥ तं च चित्रगतिश्चक्रे । रणे निःशेषितायुधः ॥ १७ ॥ अथ सस्मार मारैक–सारं रत्नवतीपिता ॥ करवालमहारत्नं । चिरतं देवतार्पितं ॥ १८ ॥ शशंसाशु शिशो रेरे । नश्यतां निशितासिना ॥ एष तेऽहं लविष्यामि । मौलिं कमलनालवत् ॥ १९ ॥ सोऽपि सस्मितमाहस्म । वृद्ध किं न श्रुतं त्वया ॥ कातरस्य करे शस्त्रं । वीराणामेव मंडनं ॥ २० ॥ चित्रकायवदुत्प्लुत्य । ततश्चित्रगतिर्द्रुतं ॥ निस्त्रिंशमाच्छिदत्पाणे–र्मित्रस्य च सहोदरीं ॥ २१ ॥ गत्वा चक्रपुरे तस्या–र्पयत्सोऽपि विरक्त-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

धीः ॥ राज्ये न्यस्य सुतं दीक्षा–मादत्त मतिमद्वरः ॥ २२ ॥ अथो सुमित्रराजर्षि–स्तप्यमानो महातपः ॥ मगधेषु गतः कायो–त्सर्गे बहिरवस्थितः ॥ २३ ॥

वैमात्रेयः स पद्मोऽथ । दृष्ट्वा तं प्रतिमास्थितं ॥ रोषावेशात्प्रजज्वाल । घृताहुत्येव पावकः ॥ २४ ॥ क्रूरात्मा शत्रुमानी स । यियासुर्जननीगतिं ॥ तूणीराद्बाणमाकृष्य । विव्याध व्याधवन्मुनिं ॥ २५ ॥ महात्मापि शुभध्याना–राधनादिसमाधिना ॥ आयुः समाप्य देवोऽनू–द्ब्रह्मलोके महर्द्धिकः ॥ २६ ॥ ततश्चित्रगतिर्मित्रं । सुमित्रस्य परासुतां ॥ ज्ञात्वाऽशोचीदथो नंदी–श्वरे यात्रामसूत्रयत् ॥ २७ ॥ रत्नवत्या समं पुत्र्या–ऽनंगसिंहस्तथा परे ॥ खेचरास्तीर्थयात्रायै । मिमिलुस्तत्र हर्षतः ॥ २८ ॥ तत्र चित्रगतिर्ऽर्च्य–पूजां श्रीशाश्वतार्हतां ॥ विधाय विविधैः स्तोत्रै–स्तुष्टुवे तुष्टमानसः ॥ २९ ॥ स्वामिन्ननंतसंसार–भ्रमश्रांतस्य देहिनः ॥ आनंदाय त्वमेवैको । मरावि व महासरः ॥ ३० ॥ मूढः संसारमग्नोऽपि । यदापं दर्शनं तव ॥ प्राप्स्यामि तेन निःशंकं । समृद्धीरुत्तरोत्तराः ॥ ३१ ॥ अत्र चित्रगतिं स्मृत्वा । दिव्यैर्ऽमूल्यमादरात् ॥ श्रीसुमित्रसुरः पुष्प–वृष्टिं तन्मस्तकेऽकरोत् ॥ ३२ ॥ खेचरोऽनंगसिं-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

होऽथ । पुष्पवृष्टिविलोकनात् ॥ ज्ञात्वा खड्गहरं चामुं । निश्चिकायात्मजावरं ॥ ३३ ॥ परस्परं प्रशंसंतौ । सुरचित्रगती तदा ॥ विलोक्य खेचरैर्नेमे–विगर्वैः सूरसंभवः ॥ ३४ ॥ तदा रत्नवतीदृष्टि–र्लावण्यामृतसागरे ॥ तथा चित्रगतौ मग्ना । यथा स्थानान्न चाऽचलत् ॥ ३५ ॥ तथा सरागां तां वीक्ष्य । स्मृत्वा च गणकोदितं ॥ तमर्थं ज्ञापयामास । सूरं रत्नवतीपिता ॥ ॥ ३६ ॥ कारयामासतुर्मोदा–द्विवाहं तौ तयोरथ ॥ ननु को वाऽनभिज्ञोऽपि । रत्नं स्वर्णे न योजयेत् ॥ ३७ ॥ धर्मकामावसावर्थ–पुष्टौ सह तयाऽचरत् ॥ चतुर्थं पुरुषार्थं च । साधयिष्यति स क्रमात् ॥ ३८ ॥ धनदत्तधनदेव–सुरौ तु स्वर्गतश्च्युतौ ॥ मनोगतिचपलग–त्याख्यौ जातावथानुजौ ॥ ३९ ॥ स ताभ्यां रत्नवत्या च । युतश्चित्रगतिर्नृपः ॥ सुतं पुरंदरं राज्ये । निवेश्य व्रतमाददे ॥ ४० ॥ तप्यमानस्तपो बाढं । भव्यान् धर्मे प्रवर्त्य च ॥ पादपोपगमेनायु–र्भुक्त्वा चित्रगतिर्मुनिः ॥ ४१ ॥ सुरोत्तमोऽभवत्तुर्ये । कल्पे माहेंद्रनामनि ॥ तत्रैव देवतां प्रापु–र्बांधवौ रत्नवत्यपि ॥ ४२ ॥ युग्मं ॥ हर्षवर्षसुखितायुषि कल्पे–ऽनल्पसंपदि निनाय स तुर्ये ॥ सप्तसागरमितं निजमायुः । सातिरेकमतिशायिसुखश्रीः ॥ ४३ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ इति श्रीशीलोपदेशमालावृत्तौ श्रीनेमिचरित्रे नवचतुष्टयवर्णनो
नाम प्रथमः सर्गः समाप्तः ॥ श्रीरस्तु ॥

इतश्च—विदेहे पश्चिमे भूमी—भामिनीभालपुंड्रके ॥ विजयः पद्मनामास्ति । तत्र सिंहपुरं पुरं ॥ ४४ ॥ हरिनंदी नृपस्तत्र । शात्रवाऽनलवारिदः ॥ यत्कीर्त्तेः शकलाकार—श्चंद्रो भाति नभोंगणे ॥ ४५ ॥ तत्प्रिया व्यूढकंदर्प—शासना प्रियदर्शना ॥ यक्षुणैश्चंद्रिकागौरै—राश्चर्यै रंजितं जगत् ॥ ४६ ॥ ततश्चित्रगतेर्जीव—श्च्युत्वा माहेंद्रकल्पतः ॥ अपराजितनामाऽभू—त्तयोः पुत्रः पवित्रधीः ॥ ४७ ॥ सुहृद्विमलबोधाख्या—स्तस्य मंत्रिसुतोऽभवत् ॥ नेत्रयोरिव तुल्यासी—त्सुखदुःखदशा तयोः ॥ ४८ ॥ अन्यदा विदधानौ तौ । विपिने वाहखेलनं ॥ नीतौ दूरमरण्यानीं । दुष्टाश्वाभ्यां कृणैकतः ॥ ४९ ॥ अवतीर्य च कुर्वाते । यावत्तौ श्लथबंधनौ ॥ तावन्निपेततुस्तूर्णं । कृतघ्नाविव वाजिनौ ॥ ५० ॥ मार्गश्रांतौ तृषाक्रांतौ । राजा मंत्रितनूजवौ ॥ न्यायधर्माविव कलौ । कृणं जातौ गतश्रियौ ॥ ५१ ॥ सरो मित्रमिव प्राप्य । पीत्वाऽमृतमिवाऽमृतं ॥ स्वस्थचित्तावभूतां ता—वब्धिपारगताविव ॥ ५२ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

राजसूनुरुवाचेयं । मित्र देशांतरस्पृहा ॥ आवयोः फलिता किं तु । पित्रोरननुमोदनात् ॥ ५३ ॥ ताभ्यामपि सोढव्यो । विप्रयोगो यथा तथा ॥ तस्मादाश्चर्यसंपूर्णं । भ्रमावो वसुधातलं ॥ ५४ ॥ इत्यनेकचमत्कार–निरीक्षणपरायणौ ॥ विजह्रते भुवं स्वैरं । सोन्मादौ दंतिनाविव ॥ ५५ ॥ एकत्र त्रासितं राज–पुत्रैः शरणमागतं ॥ रक्षित्वा तस्करं राज्ञ–श्चमूचक्रं विजित्य च ॥ ५६ ॥ श्रीकोशलनरेंद्रस्य । रूपेण सुरसुंदरीं ॥ सुतां कमलमालाख्यां । पर्यणैषीन्नरेशभूः ॥ ५७ ॥ युग्मं ॥ अन्यदा रत्नमालाह्वां । खेचरेश्वरनंदिनीं ॥ खेचरेणानुरागेण । हृतां ज्ञात्वा प्रलापतः ॥ ५८ ॥ रुदंतीं तमनिच्छंतीं । तां कन्यामुदमोचयत् ॥ असौ नानायुधैर्युध्वा । खेचरात्सूर्यकांततः ॥ ५९ ॥ अनिच्छते कुमाराय । सोऽपि तद्धैर्यतोषवान् ॥ अदत्त व्रणरोहिणीं । महर्घ्यां मणिमूलिकां ॥ ६० ॥ ददौ च तद्भयस्यस्य । रूपांतरविधायिनीं ॥ गुटिकां गौरवं कर्तुं । यतो जानंति तादृशाः ॥ ६१ ॥ रत्नमालान्विधा सा च । तस्याः पित्रोरनुज्ञया ॥ ज्ञात्वाऽनुरागिणीं राज–सूनुना पर्यणीयत ॥ ६२ ॥ पुनरन्यत्र भुवन–भानुर्विद्याधरेश्वरः ॥ दैवज्ञवाक्यतोऽनेन । स्वकन्ये पर्यणाययत् ॥ ६३ ॥ घातकेनाऽहतस्याथ ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सुप्रभाख्यस्य भूपतेः ॥ व्रणसंरोहणं कृत्वा । मूलिकायाः प्रभावतः ॥ ६४ ॥ अनन्यरूपरूपश्री–त्रासितत्रिदशांगनां ॥ हरिनंदसुतः कन्या–मुपायंस्त प्रशस्तधीः ॥ ६५ ॥ युग्मं ॥

तत्रैव विचरंतौ तौ । प्राप्तौ कुंभपुरेऽन्यदा ॥ नेमतुः पंकजासीनं । केवलज्ञानिनं मुनिं ॥ ६६ ॥ श्रुत्वा तद्देशनां श्रोत्र–पात्राऽमृततरंगिणीं ॥ आवां भव्यावुताऽभव्या–विति पप्रच्छतुश्च तं ॥ ६७ ॥ भव्यौ युवामथान्यत्त्वं । शृण्वितः पंचमे भवे ॥ द्वाविंशस्तीर्थपो नेमि–नामा भावी भवानिह ॥ ६८ ॥ गणभृत्प्रथमो भावी । मंत्रिसूनुरयं पुनः ॥ श्रुत्वेति हृष्टौ तीर्थानि । वंदमानौ विचेरतुः ॥ ६९ ॥ इतो जनानंदिपुरे । जितशत्रुर्महीपतिः ॥ धारिणीति प्रिया तस्य । शीलालंकारधारिणी ॥ ७० ॥ च्युत्वा रत्नवतीजीवः । श्रीमन्मांद्देऽकल्पतः ॥ तस्याः कुक्षावथोत्पेदे । जात्यं रत्नमिवाकरे ॥ ७१ ॥ युग्मं ॥ समयेऽसूत सा पुत्रीं । सुधामिव शशिप्रभा ॥ नाम्ना प्रीतिमती कन्या । प्रावर्द्धत गुणैः सह ॥ ७२ ॥ सरस्वत्यां चिरावास–क्लेशोद्विग्ना इवाऽखिलाः ॥ तामेवाऽशिश्रियुर्विद्या । द्वितीयाधारलिप्सया ॥ ७३ ॥ क्रमेण यौवनं प्राप्ता । प्रतिज्ञामकरोदियं ॥ जीयेऽहं विद्यया येन । वरिष्यामि तमेव हि ॥७४॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पिता प्रतिज्ञां विज्ञाया । विज्ञायाथातिदुस्तरां ॥ चक्रे स्वयंवरारंभं । दुहितुर्वरहेतवे ॥ ७५ ॥ यासु यासु कलासूच्चै—र्दक्षा प्रीतिमती श्रुता ॥ तासामन्यसने प्रीति—मती जाता नृपावलिः ॥ ७६ ॥ जितशत्रुनृपादूता—स्तत्र भूचरखेचराः ॥ सर्वेऽप्येयुः सुतार्त्या तु । हरिनंदिनृपं विना ॥ ७७ ॥ कैश्चित्कौतुकतः कैश्चि—द्भाग्यसौभाग्यगर्वितैः ॥ तत्राऽऽयातैर्नरैः शेषा । शून्येव वसुधाऽजनि ॥ ७८ ॥

अथागान्मित्रयुक् तत्र । कुमारोऽप्यपराजितः ॥ कलाकौशलमीमांसा—सुधापानपिपासया ॥ ७९ ॥ मा कश्चिद् दृष्टपूर्वी नौ । ज्ञासीदित्यन्यरूपिणौ ॥ गुटिकां वदने क्षिप्त्वा । सद्यो भूतावुभावपि ॥ ८० ॥ पुरस्सरप्रतीहारी—गीयमानगुणावलिषु ॥ तत्रोच्चमंचासीनेषु । खचरेषु नरेषु च ॥ ८१ ॥ वरमालायुता सख्या—न्विता चामरहारिणी ॥ स्वर्गावतीर्णा देवीवा—ऽयाता प्रीतिमती तदा ॥ ८२ ॥ वीक्षमाणाः कुमारीं तां । तथा कामेन मोहिताः ॥ क्षणं भ्राजो यथा सर्वे । कीलिताक्षा इवाऽभवन् ८३ ॥ अमी शतश आसीना । विद्याधरनरेश्वराः ॥ भारतीव परीक्ष्यैषु । वृणीष्व प्रवरं वरं ॥ ८४ ॥ इति वेत्रवतीप्रोक्ता । कन्या प्री-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तिमती तदा ॥ पप्रच्छ वादिनीन्नूय । तेषु प्रश्नोत्तरावलीं ॥ ८५ ॥ स्त्रीजातिपक्षपातेन । सर-
स्वत्येव कीलिताः ॥ न शेकुरुत्तरं दातुं । सापराधा इवाग्र ते ॥ ८६ ॥ अनुरूपो वरोऽमुष्या
। नूनं विस्मृत्य वेधसा॥ वर्षीयत्वान्न सृष्टोऽस्ती–त्यनुदध्यौ कनीपिता ॥ ८७ ॥ अत्र धात्रीध-
वाः सर्वे । मेलिताः परितो मया ॥ सुताया नोचितः कोऽपि । हा न्नावि किमतःपरं ॥८८॥
मा विषीद महाराज । बहुरत्ना वसुंधरा ॥ अधिकोऽपि गुणैर्न्नावी । प्रतीक्षस्व ततोऽधुना ॥
॥ ८९ ॥ इत्युक्ते मंत्रिणा राजा । यः कोऽप्यत्र जयेदिमां ॥ स एवास्या वरो न्नावी । षट-
हेनेत्यघोषयत् ॥ ९० ॥ तत् श्रुत्वा चिंतयामास । हरिनंदितनून्नवः ॥ न युज्यते स्त्रिया सा-
र्द्धं । वादं कर्त्तुं महीयसां ॥ ९० ॥ उक्तं च—

बालसखित्वमकारणहास्यं । गर्हन्नयानमसंस्कृतवाणी ॥ स्त्रीषु वाद इमा खलसेवा ।
षट्सु नरो लघुतामुपयाति ॥ ९१ ॥ जितायामपि नोत्कर्षः । स्त्रियामित्यपराजितः ॥ पस्प-
र्श मणिना शाल–न्नंजिकां दिव्यशक्तिना ॥ ९२ ॥ ततः पांचालिकाऽवादी–न्मानं प्रीतिम-
ति त्यज ॥ गृहाण प्रति वादं मे । नृपा नृपशवो ह्यमी ॥ ९३ ॥ वादारूढा न जीयेऽहं । सू-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रिणापि दिवौकसां ॥ गुरो राजसुतस्यास्य । हस्तन्यासप्रसादतः ॥ ९४ ॥ ब्राह्मीपुत्र्येव पांचाल्या । प्रोक्ता प्रीणितमानसा ॥ वादं कर्तुं समागत्य । तामपृच्छन्नृपांगजा ॥ ९५ ॥ को गुरुर्यो हि तत्वज्ञः । को धर्मः प्राणिनां दया ॥ किं विधेयं नवोच्छेदः । किं सत्यं प्राणिनां हितं ॥ ९६ ॥ अथ पप्रच्छ पांचाली । प्रिया का ब्रह्मचारिणां ॥ मैत्रीति मणिमाहात्म्या–दुत्तरं नाऽबुधत्कनी ॥ ९७ ॥ इच्छं विनिर्जिता प्रीति–मती पुत्तलिकां जगौ ॥ त्वत्कंठे किं क्षिपाम्येनां । मालामेषा ततोऽवदत् ॥ ९८ ॥ निधेहि मद्गुरोरस्य । कंठपीठे वरस्रजं ॥ प्रतिज्ञा येन दुःपूरा । पर्यपूरि तव क्षणात् ॥ ९९ ॥ सापि पूर्वनवप्रेम–रोमांचोद्भूतकंचुका ॥ कंठपीठे कुमारस्या–ऽम्लानां मालामरोपयत् ॥ १०० ॥ अथ चुक्षुभिरे । नृपा निस्त्रपा इत्थमालपन् ॥ कोऽयं कापटिकोऽस्मासु । सत्स्विमां परिणेष्यति ॥ १ ॥

इति प्रचंडप्रारंभाः । कोपकंपितभूतलाः ॥ सर्पा इव गरुत्मंतं । तं योद्धुमुपतस्थिरे ॥ ॥ २ ॥ एकेनापि कुमारेणा–ऽनेकतामिव जग्मुषा ॥ निरस्ताः परितः सर्वे । समीरेण तुषा इव ॥ ३ ॥ स्त्रिया जिताः पुरा शास्त्रैः । शस्त्रैरेकेन चाधुना ॥ ध्यात्वा पुनरयुद्ध्यंत । संभू-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

येति महीधवाः ॥ ४ ॥ कुमारः पातयामास । निःपक्षीकृत्य वेगतः ॥ उत्प्लुत्योत्प्लुत्य व-
ज्रीव । नृनृतोऽपि गरीयसः ॥ ५ ॥ सोमप्रज्ञान्निधानोऽथ । मातुलस्तुमुलेऽपि तं ॥ अब्रह्मन्न-
मिवादित्यमुपलक्षयतिस्म सः ॥ ६ ॥ वारितास्तेन नृपाला । विरेमू रणतः क्षणात् ॥ स्वयं
त्वालिंग्य सर्वांगं । कुमारमिदमूचिवान् ॥ ७ ॥ चिरदृष्टोऽसि जामेय । कथं ब्रमसि नृगव-
त् ॥ त्वत्स्वरूपोपलंभाय । पितरौ ताम्यतस्तव ॥ ८ ॥ ते जन्ययात्रिकीभूय । जितशत्रुतनू-
जया ॥ विवाहं कारयामासुः । कुमारस्य महोत्सवात् ॥ ९ ॥ जितशत्रुरथ स्वीय–मंत्रि-
णः सुमतेः सुतां ॥ प्रीत्या विमलबोधाख्य–तन्मित्रेणोदवाहयत् ॥ १० ॥ नेजतुः सहजं रू-
पं । तौ जातोद्वाहमंगलौ ॥ स्वं स्वं स्थानमलंचक्रुः । सत्कृता नृनृतोऽथ ते ॥ ११ ॥ त-
तोऽत्रगत्य तत्रस्थ–माह्वातुमपराजितं ॥ कीर्त्तिराजो महामंत्री । प्रेषितो हरिनंदिना ॥ १२ ॥

आप्ताऽनाय्य प्रियाः सर्वाः । खेचरीभूचरीश्च ताः ॥ आपृच्छ्य श्वसुरं प्रीति–मतीयुक्त-
स्ततोऽचलत् ॥ १३ ॥ दानेन प्रीणयन् पृथ्वीं । स समृद्ध्या महेंद्रवत् ॥ अल्पैरेव दिनैः प्राप
। पुरं सिंहपुराभिधं ॥ १४ ॥ कुमारोऽलुठदुत्कंठा–निर्भरं पादयोः पितुः ॥ जनन्यै ताश्च व-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ध्वश्च । नमंतिस्म प्रमोदतः ॥ १५ ॥ तौ मनोगतिचपल–गतिजीवौ दिवश्च्युतौ ॥ जज्ञाते सूरसोमाख्या–वनुजौ तं प्रणेमतुः ॥ १६ ॥ हरिनंदी नृपोऽन्येद्युः । पुत्रं राज्ये न्यवीविशत् ॥ स्वयं तु व्रतमादाय । जगाम पदमव्ययं ॥ १७ ॥ मंत्री विमलबोधाख्यो । देवी प्रीतिमती च सा ॥ बांधवौ मंडलाधीशा–वपराजितनृनृतः ॥ १८ ॥ राजाऽपराजितः पुत्रं । पद्मं राज्ये न्यवेशयत् ॥ बंधुन्यां मंत्रिणा वध्वा । सार्द्धं च व्रतमग्रहीत् ॥ १९ ॥ प्रपाल्याऽनशनं प्रांते । परिपूर्णायुषश्च ते ॥ संजाता आरणे कल्पे । शक्रसामानिकाः सुराः ॥ २० ॥ इतश्च प्रथमे द्वीपे–ऽनूपे सौख्यलताश्रियां ॥ श्रीहास्तिनं पुरं पारा–वारो रत्नमहर्द्धिभिः ॥ २१ ॥ तत्र श्रीषेणराजास्ति । हास्तिकस्पर्द्धितोमरः ॥ महिषी श्रीमतीनाम्नी । तस्य दंतींद्रगामिनी ॥ २२ ॥ अपराजितजीवोऽथ । शंखस्वप्नेन सूचितः ॥ तस्याः कुक्षिमवातारी–त्पांचजन्य इवांबुधौ ॥ २३ ॥ प्रसूतः समये पित्रा । भाषितः शंख इत्यसौ ॥ कलाकलापसंपूर्णः । संजज्ञे यौवनोन्मुखः ॥ २४ ॥

जीवो विमलबोधस्य । सुबुद्धेर्मंत्रिणः सुतः ॥ मतिप्रज्ञ इति ख्यातो । मैत्र्यं चाऽनेन

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पूर्ववत् ॥ २५ ॥ सीमादेशजनोऽन्येद्युः । श्रीश्रीषेणं त्यजिज्ञपत् ॥ गिरौ विशालशृंगेऽस्ति । श्रीचंडशिशिरा नदी ॥ २६ ॥ पल्लीशः समरकेतु–स्तत्र दुर्गबली बली ॥ युष्मद्देशस्य लक्ष्मीं स । विलुंटति सुदुर्ग्रहः ॥ २७ ॥ श्रुत्वेत्यश्रव्यमव्याज–प्रतापतपनोपमः ॥ तन्निग्रहचिकी राजा । यात्राढक्कामवोवदत् ॥ २८ ॥ कुमारो विक्रमोल्लास–केसरी नृपमब्रवीत् ॥ पल्लीशमात्रे कस्तात । संरंभः क्रियते स्वयं ॥ २९ ॥ तुष्टेन राज्ञादिष्टोऽथ । सैन्यान्वादितन्नूतलः ॥ कुमारः शंख इत्याख्यः । पल्लीसीमानमासदत् ॥ ३० ॥ अथो पलाय्य पल्लीशे । दुर्गे मुक्त्वाऽन्यतो गते ॥ युवराजोऽपि नीतिज्ञः । स्वयं कुंजे न्यलीयत ॥ ३१ ॥ सारसैन्यजुषा स्वीय–सामंतेन स मंत्रवित् ॥ गाढं पल्लीपतेर्दुर्गे । सुगृहीतमकारयत् ॥ ३२ ॥ रे रे गृह्णीत गृह्णीत । शंखं जीवंतमेव हि ॥ इत्यादिशन् भटान् पल्ली–पतिर्गाढमढौकत ॥ ३३ ॥ कुमारोऽपि महासारो । दुर्गस्थैः स्वबलैः समं ॥ कर्मभिः स्वमिव प्राणी । परितस्तमवेष्टयत् ॥ ॥ ३४ ॥ तथाऽन्नितो गृहीतः का–प्यवकाशमनाप्नुवन् ॥ न्यस्य कंठे कुठारं स । कुमारं शरणं ययौ ॥ ३५ ॥ यश्चोपलक्षितं लोप्त्रं । दत्वा सीमांतवासिनां ॥ दुर्गे मुक्त्वा स्वसामंतं ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तं सहादाय चाऽचलत् ॥ ३६ ॥ पथि व्रजन्नथान्येद्युः । शिबिरे सुखनिद्रितः ॥ निशीथे करुणं शब्दं । श्रुत्वा तदनुगाम्यभूत् ॥ ३७ ॥ विलोक्य वनितामेकां । रुदंतीमिदमूचिवान् ॥ किं ते दुःखकरं भीरु । विश्वस्ता साऽप्यभाषत ॥ ३८ ॥

अंगदेशेऽस्ति नगरी । चंपा चंपकसौरभा ॥ जितारिस्तत्र राजास्ति । तस्य कीर्तिमती प्रिया ॥ ३९ ॥ तत्कुक्षिशुक्तिमुक्ताभा । सुता नाम्ना यशोमती ॥ गुणपूर्णा पुराऽन्यासा—दिव सा प्राप यौवनं ॥ ४० ॥ कलाकलापरुचिरा । पक्षद्वययुतापि च ॥ पद्मिन्या इव नैवास्या । राजानो रुचिमादधुः ॥ ४१ ॥ किंतु यूनां गुणग्राम—वर्णनाऽवसरेऽन्यदा ॥ श्रुत्वा श्रीषेणजं शंखं । गाढं तत्राऽन्वरज्यत ॥ ४२ ॥ पिता तामन्वमोदिष्ट । ज्ञात्वा शंखानुरागिणीं ॥ दातुं चैनां नरान् प्रैषी—त्स यावद्धस्तिनापुरे ॥ ४३ ॥ तावता तामयाचिष्ट । मणिशेखरखेचरः ॥ निराकृतश्च दत्तेति । एषा श्रीषेणसूनवे ॥ ४४ ॥ तामहार्षीदमर्षेण । श्येनको वर्त्तिकामिव ॥ अहं तु लग्ना तद्बाहा—वियतीं भुवमागता ॥ ४५ ॥ नष्टांचक्रे करात्तस्या—स्तेनाहं पापिना बलात् ॥ सा मां धात्रीं विना कष्टं । स्थास्यतीति दुनोति मां ॥ ४६ ॥ मा रो-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दीर्नज धीरत्वं । मातरेष व्रजाम्यहं ॥ हत्वा तं खेचरं कन्या–माहर्त्तास्मि तवाधुना ॥४७॥

इत्युक्त्वा तामथान्वेष्टुं । प्रवृत्ते वीरकुंजरे ॥ उदयाद्रौ ध्रुवं प्राची । सूर्यं दीपमिवाऽमुचत् ॥ ४७ ॥ विशालशृंगशैलस्य । गुहाद्वारमधिष्ठितं ॥ तामन्यर्थ्ययमानं त–मज्ञाक्षीत्खेचराधमं ॥ ४९ ॥ मम प्राणप्रियो भर्त्ता । शंख एव न चापरः ॥ घोषयंतीं प्रतिज्ञां स्वा–मिति शुश्राव भूपभूः ॥ ५० ॥ करवालं क्षिपत्काल–माकृष्यायांतमुत्सुकं ॥ वितर्क्य शंखमेवामुं । खेचरस्तामथाऽब्रवीत् ॥ ५१ ॥ मम भाग्यैरिवाकृष्टः । शंखोऽयं तव वल्लभः ॥ प्राप्तस्तर्हि करोम्येनं । पश्य देवांगनातिथिं ॥ ५२ ॥ शंखः साक्षेपमाहस्म । रेरे विद्याधराधम ॥ परस्त्रीचौर्यपापज्ञो–र्दर्शयामि फलं तव ॥ ५३ ॥ खेचरस्तद्वचः श्रुत्वा । रेकारमिव केसरी ॥ कंपयन् पादघातेन । भुवं संमुखमीयिवान् ॥ ५४ ॥ अगण्यपुण्यमाहात्म्या–त्कुमारः खेचरेशितुः ॥ अवंध्यान्यपि शस्त्राणि । निजशस्त्रैरपाकरोत् ॥ ५५ ॥ लाघवेन कुमारोऽथ । धनुराच्छिद्य हस्ततः ॥ तद्बाणेन तमाजघ्ने । योगीवात्मानमात्मना ॥ ५६ ॥ पतितस्तत्प्रहारेण । छिन्नमूल इव द्रुमः ॥ तमाश्वास्य च वातायैः । पुनर्युद्धार्थमाह्वयत् ॥५७॥ सोऽवक्कुमार से-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यं ते। गुणरक्ता यथा प्रिया ॥ तथा मामपि जानीहि । भृत्यमादेशकारिणं ॥ ५८ ॥ किं चातः पुण्यवृद्ध्यर्थं । सिद्धायतनयात्रया ॥ अस्माननुगृहीतुं च । वैताढ्यमनुगम्यतां ॥ ५९ ॥ तथेति प्रतिपद्याथ । शंखः श्रीहस्तिनापुरे ॥ निवेद्य निजवृत्तांतं । प्रजिघाय चमूं रयात् ॥ ॥ ६० ॥ स्वामिनः समरस्रंसि–प्राणदानोपकारिणं ॥ पत्तयो मणिचूडस्य । कुमारं नेमुरादरात् ॥ ६१ ॥ तत्राऽानायितया धात्र्या । कन्यया च तया युतः ॥ क्रमेण प्राप्य वैताढ्यं ।शंखः खेचरभूषितः ॥ ६२ ॥ यशोमत्या समं शंख–स्तत्र श्रीशाश्वताईतां ॥ चकार सिद्धचैत्येषु । पूजामव्याजचेतसा ॥ ६३ ॥

अनैषीत्कनकपुरे । कुमारं मणिशेखरः ॥ आनर्च दिव्यवस्त्राद्यै–स्तत्र सत्रैरिव श्रियां ॥ ६४ ॥ तत्रासौ शत्रुसंहार–राज्यविश्राणनादिभिः ॥ चक्रे खेचरवीराणा–मुपकारानेनकशः ॥ ६५ ॥ तुष्टया विद्याधरैर्दत्ता–स्तत्र विद्या असाधयत् ॥ न चोपायंस्त तत्कन्या । यशोमत्या विना ह्यसौ ॥ ६६ ॥ खेचरैः स्वसुतायुक्तै–र्यशोमत्या च भूषितः ॥ श्रीजितारिकृतोत्साहां । प्राप चंपापुरीमथ ॥ ६७ ॥ तत्र शंखो महाभूत्या–ऽभिभूतस्वर्गवैभवे ॥ साईं खेच-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रकन्यान्नि–रुपयेमे यशोमतीं ॥ ६८ ॥ यात्रां श्रीवासुपूज्यस्य । कृत्वा कृत्यविदां वरः ॥ आपृच्छय श्वसुरान् सर्वान् । हस्तिनापुरमीयिवान् ॥ ६९ ॥ तौ सूरसोमयोर्जीवौ । श्रीशंख-स्यारणाच्युतौ ॥ अभूतामनुजौ प्राग्व–द्यशोगुणधरान्निधौ ॥ ७० ॥

अथ राज्यधुरं न्यस्य । शंखे श्रीषेणभूपतिः ॥ व्रतमादाय सद्ध्याना–त्केवलज्ञानमास-दत् ॥ ७१ ॥ हस्तिनापुरमायातो–ऽन्यदा श्रीषेणकेवली ॥ सुवर्णाम्भोजमासीनो । विदधे ध-र्मदेशनां ॥ ७२ ॥ तत्र सांतःपुरो नंतु–मागतः शंखभूपतिः ॥ धर्ममाकर्ण्य वैराग्या–पन्नो विज्ञप्तवानिति ॥ ७३ ॥ असार एव संसारः । स्वामिन् सत्यविचारतः ॥ प्रेमबंधः किमर्थोऽयं । यशोमत्यां तथापि मे ॥ ७४ ॥ केवली केवलालोक–विलोकितचराचरः ॥ तत्प्राग्भवसंबं-धं । साऽनुबंधमथान्वशात् ॥ ७५ ॥ प्रिया धनवतीत्यासी–द्राजन् धनभवे तव ॥ आद्ये क-ल्पे ततो रत्न–वतो चित्रगतिर्भवान् ॥ ७६ ॥ मांहेंद्रेऽथ प्रीतिमती । त्वं कुमारोऽपराजितः ॥ आरणेऽथो यशोमत्या–ख्या प्रिया सप्तमे भवे ॥ ७७ ॥ इतोऽपराजिते देवौ । ततश्च्युत्वा-श्च भारते ॥ द्वाविंशस्तीर्थकृन्नेमि–स्त्वं भावी यादवान्वयी ॥ ७८ ॥ एषा राजीमती कन्या ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

त्वय्येकायतता गता ॥ अनूढा व्रतमादाय । ततो मुक्तिं गमिष्यति ॥ ७९ ॥ चतुर्ज्ञानः कलापकं ॥ अतोऽयं प्रेमसंरंभो । जागरूको ह्योरपि ॥ नवमे तु भवे मुक्ति–फलेन परिणस्यति ॥ ८० ॥ प्राग्भवेऽष्वनुजौ यौ ते । तावप्येतौ सहोदरौ ॥ मंत्री मतिप्रभश्चैते । गणेशास्ते च भाविनः ॥ ८१ ॥ पुंडरीकं ततः पुत्रं । न्यस्य राज्येऽगृहीद्व्रतं ॥ सप्रियः साऽनुजो मंत्रि–युतः श्रीशंखभूपतिः ॥ ८२ ॥

अपूर्वः कोऽपि शंखोऽयं । तपस्तापमवाप्य यः ॥ न गतो रागसाहाय्यं । विश्वनिर्वापणक्षमः ॥ ८३ ॥ अर्हद्भक्त्यादिनाऽऽराध्य । विंशतिस्थानकान्यसौ ॥ चकार तीर्थकृन्नाम–कर्म शुद्धनिकाचितं ॥ ८४ ॥ वैराग्यमुद्वहन् लेप–रहितः शुक्लतां दधत् ॥ शंखः खंख इवाभाति । किं त्वंतर्वक्रतोज्झितः ॥ ८५ ॥ भावना क्षामणा कर्म–गर्हणाऽनशनं तथा ॥ चतुःशरणता पंच–परमेष्ठिनमस्क्रिया ॥ ८६ ॥ षोढेत्याराधनापूर्व–मंतरंगरिपुक्षयं ॥ कृत्वा निर्ममताभागी । पादपोपगमं गतः ॥ ८७ ॥ तथा संलेखनां कृत्वा । यशोमत्यादिभिर्युतः ॥ मृत्वाऽपराजिते शंखो । विमानेऽनुत्तरे ययौ ॥ ८८ ॥ तत्रापराजितविमानवरेंतरंग–रंगानुषंगि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

हृदयो हृदयंगमश्रीः ॥ स त्रिंशतं त्रिकयुतामथ सागराणा–मायुर्निनाय जिननायकगीतसौ-
ख्यं ॥ ८९ ॥ इति श्रीरुद्रपल्लीयगच्छे श्रीसंघतिलकसूरिपट्टावतंसश्रीसोमतिलकसूरिविरचि-
तायां शीलतरंगिण्यां श्रीनेमिचरित्रे भवचतुष्टयवर्णनो नाम द्वितीयः सर्गः समाप्तः ॥ श्रीः ॥

इतश्च जंबूद्वीपस्य । भरतार्धेऽस्ति दक्षिणे ॥ श्रीकुशार्त्त इति ख्यातो । देशः कोश इ-
व श्रियां ॥ १ ॥ सर्वशस्यश्रियोपेते । लंबशालिनि राजिते ॥ तत्र देशे परे क्षेत्रे । दोष एको
निरीतिता ॥ २ ॥ तत्राविर्भूतशौर्यश्री–भरं शौर्यपुरं पुरं ॥ यच्छ्रीकौतुहली शक्रः । सहस्रन-
यनोऽभवत् ॥ ३ ॥ तत्राद्यः श्रीदशार्हेषु । पूज्यार्हन्नासनांचितः ॥ समुद्रविजयो राजा । रा-
जेव ज्योतिषां गणे ॥ ४ ॥ तस्य नाम्ना शिवादेवी । शिवदेवीव धूर्जटेः ॥ सप्तांगादानतः प-
त्यु–र्या ततोऽप्यतिरिच्यते ॥ ५ ॥ इतश्च कार्त्तिके कृष्ण–द्वादश्यां रजनीभरे ॥ चित्रानक्षत्र-
गे कन्या–राशौ शीतकरे स्थिते ॥ ६ ॥ च्युत्वा स शंखजीवोऽथ । विमानादपराजितात् ॥
अवातरन्निवाकुक्षौ । ज्ञानत्रयविभूषितः ॥ ७ ॥ सुखासिंकाकणो जज्ञे । नारकाणामपि क्व-
णं ॥ अजृंभत जगत्त्रय्या–मुद्योत इव सर्वतः ॥ ८ ॥ गजो ध्वजो हरिः श्रीः स्रक्। रत्नराशिः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

शिखी ज्वलन् ॥ शशिसूर्यौ विमानश्च । सरो वार्धिर्वृषो घटः ॥ ९ ॥ एतांश्चतुर्दश स्वप्नान् । दृष्ट्वा प्रविशतो मुखे ॥ व्यबुध्यत शिवादेवी । रोमांचोत्कलिकाकुला ॥ १० ॥ समुद्विजया-याऽख्य-दाकर्ण्यानंदितश्च सः ॥ क्रोष्टुकिं स्वनिमित्तङ्गं । पप्रच्छ स्वेच्छया गिरा ॥ ११ ॥ तत्कालमागतः पुण्या-च्चारणश्रमणोऽपि च ॥ तदाकर्ण्य महास्वप्नां-स्ताविच्छं फलमूचतुः ॥ ॥ १२ ॥ माता तीर्थकृतां देव । चक्रिणो वा निरीक्षते ॥ स्वप्नानेतान्महापुण्य-प्राग्नारप्राप्य-संपदः ॥ १३ ॥ तस्माज्जगत्त्रयत्राण-दीक्षितोऽन्नयदर्शनः ॥ सर्वाधारः कुलोत्तंसो । ज्ञानी लोकोत्तरः सुतः ॥ १४ ॥

श्रुत्वेति राजा राज्ञी चा-ऽनंदतां प्रश्रितोदयौ ॥ सत्कृत्य बहुमानेन । विसृष्टौ ज्ञानिनौ च तौ ॥ १५ ॥ गर्भावतरितं ज्ञात्वा । शक्राश्वासनकंपतः ॥ तुष्टुवुर्जिनमानम्य । द्वाविंशं तीर्थनायकं ॥ १६ ॥ पुपोष लक्ष्मी राजानं । देशस्याऽभ्युदयोऽभवत् ॥ नरेंऽस्य च कोशेषु । रत्नवृष्टिरजायत ॥ १७ ॥ लक्ष्मीवत्तेव वैदग्ध्यं । सदर्थं कविगीरिव ॥ रत्नं खानिरिवाऽनर्घ्यं । देवी गर्भं बभ्रार सा ॥ १८ ॥ प्रभुप्रभातविर्भूत-शुक्लध्यानामृतैरिव ॥ छुरितं वपुराधत्त । शि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वा वै पांडुतांजितं ॥ १९ ॥ शुभ्रगर्भानुभावेन । गुप्तिनिर्मोचनादिकां ॥ नरेंद्रः पूरयामास । शिवाया दोहदावलीं ॥ २० ॥ यदैच्छन्नृपतिः कर्तुं । कर्म पुंसवनादिकं ॥ तदुपेत्याशु शक्रेण । कृतमेव व्यलोकयत् ॥ २१ ॥ ववृधे नोदरं मातु—श्चित्रं वृद्धिमति प्रभौ ॥ संपत्तौ वा विपत्तौ वा । महतां विकृतिः कुतः ॥ २२ ॥ श्रावणश्वेतपंचम्यां । चंद्रे चित्रागते निशि ॥ लग्ने सौम्यग्रहैर्युक्ते । शिवया सुषुवे सुतः ॥ २३ ॥ षट्पंचाशद्दिक्कुमार्य । आसनस्य प्रकंपतः ॥ तत्रागत्य जिनं नेमु—र्ज्ञापयंत्यः स्वमागमं ॥ २४ ॥ एकाः संवर्त्तवातेना—ऽयोजनं सूतिकागृहं ॥ संशोध्य नाऽतिदूरस्था । गुणान् जैनानगासिषुः ॥ २५ ॥ अन्या गंधांबुना सिक्त्वा । भूमिं दूरमनर्त्तिषुः ॥ भृंगारपाणयः काश्चि—त्काश्चिदर्पणपाणयः ॥ २६ ॥ सचामराः सव्यजना । अन्याश्चपि सदीपिकाः ॥ समातरं जिनं नत्वा । नातिदूरस्थिता जगुः ॥ २७ ॥ धरिण्यां निदधुर्जैनं । नालं छित्वा च काश्चन ॥ विवरं पूरयामासुः । कर्पूराद्यैः सुगंधिभिः ॥ ॥ २८ ॥ चक्रुः प्राच्यामुत्तरस्यां । दक्षिणस्यां च सूतितः ॥ सिंहासनचतुःशालान् । रम्यांस्त्रीन् कदलीगृहान् ॥ २९ ॥ चक्रुरुद्वर्त्तनस्नाने । तास्तत्र च जिनांबयोः ॥ विलिप्य चंदनैर्व-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स्नात्रालंकारादीरभूषयत् ॥ ३० ॥ विधाय चंदनन्यस्म । रक्षाग्रंथिं निबध्य च ॥ पर्वतायुर्न्नवेत्युक्त्वा–ऽस्फालितौ गोलकौ तदा ॥ ३१ ॥

अथासनप्रकंपेना–गत्य सौधर्मनायकः ॥ त्रिःपरीत्य सूतिगृहं । नत्वा च जिनमातरौ ॥ ॥ ३२ ॥ दत्वाऽवस्वापिनीं मातु–र्निर्ममे पंचरूपतां ॥ यियाचिषुरिव स्पष्टं । प्रभोः पंचमहाव्रतीं ॥ ३३ ॥ जिनमेकेन रूपेण । विधृत्य करसंपुटे ॥ अधार्षीन्नत्रमेकेन । मूर्त्तिद्वय्या च चामरौ ॥ ३४ ॥ मुहुर्मुहुर्वलद्ग्रीवं । दत्तदृष्टिर्जिनानने ॥ पुरः पंचमरूपेण । वज्रमुल्लालयन् ययौ ॥ ३५ ॥ अतिपांडुकंबलायां । प्राग्मुखेऽस्थापयज्जिनं ॥ त्रिषष्टिरपरे शक्रा–स्तथैव मिमिलुस्तदा ॥ ३६ ॥ आयोजनमुखै रूप्य–हेममृन्मणिनिर्मितैः ॥ सर्वे तीर्थोदकन्नृतै–राभियोगिकढौकितैः ॥ ३७ ॥ केवलैर्मिश्रितैरष्ट–सहस्रप्रमितैः पृथक् ॥ भृंगारैः कलशैः स्नात्रं । चक्रुर्वादित्रपूर्वकं ॥ ३८ ॥ युग्मं ॥ जिनेंद्रं स्नपयित्वेंश । अच्युताद्या यथाक्रमं ॥ अभ्यर्च्य दिव्यपुष्पाद्यै–स्तुष्टुवुस्तुष्टमानसाः ॥ ३९ ॥ इशानेंद्रः पंचमूर्त्ती–र्विकृत्य प्रभुमाददे ॥ स्वोत्संगेऽथ सुधर्मेशो । विधातुं स्नात्रमुद्यतः ॥ ४० ॥ विधाय चतुराशासु । स्फाटिकान् चतुरो वृ-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

षान् ॥ तच्छृंगोच्छलितक्षीर–धाराभिः स्नपितः प्रभुः ॥ ४१ ॥ तुंबरुर्गायति स्वामि–गुणान् स्तौतिस्म वासवः ॥ वादित्रध्वनिभिः स्पष्टं । नृत्यंतिस्म सुरांगनाः ॥ ४२ ॥ उन्मृज्य गंधकाषाय्या–ऽभ्यर्च्य कल्पतरोः सुमैः ॥ वासवः स्वामिनं दिव्य–वाससी पर्यधीपत् ॥४३॥ तत्पुरस्तंडुलैर्दिव्यै–र्लिखित्वा सोऽष्टमंगलीं ॥ नीराजनाविधिं चक्रे । गीयमानैश्च मंगलैः ॥ ४४ ॥ पुलोमतनयारंभा–प्रनृत्यप्सरसां गणैः ॥ नृत्यज्ञैः सूत्रयामास । वासवः प्रेक्षणीयकं ॥ ४५ ॥ नृत्यंत्योऽप्सरसो नेत्र–कटाक्षैः कुसुमैरिव ॥ अपूपुजन् जिनाधीशं । रणत्कंकणनूपुराः ॥ ४६ ॥ प्रभोर्मुखेंदुकांत्येव । निमीलत्करपंकजः ॥ कंठे पुष्पस्रजं न्यस्य । काव्यपुष्पैरथार्चयत् ॥ ४७ ॥ युष्मद्वरीरकांतींद्र–नीलश्रेणिविलोकिनी ॥ सहस्रनयनी नाथ । ममाद्यैव प्रसीदति ॥ ४८ ॥ कालिंदीश्यामला काय–कांतिस्ते यदुनायक ॥ चित्रं गंगांबुगौराणां । प्रसूतिर्यशसां भुवि ॥ ४९ ॥ संपूर्णापि महारत्नै–रियं मेरुतटीधरा ॥ त्वयैवाऽनर्घ्यरत्नेन । जाता रत्नवती ध्रुवं ॥ ५० ॥ दक्षिणावर्त्तशंखोऽयं । यदंके धारितस्त्वया ॥ नूनं तेनार्चकस्यासौ । वांछितानि तनोत्यलं ॥ ५१ ॥ स्तुत्वेतीशानदेवेंद्रा–दादाय करसंपुटे ॥ त–

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

थैव स्वं विकृत्यासौ । जिनं मात्रंतिकेऽमुचत् ॥ ५२ ॥ मार्त्तंम इव पद्मिन्याः । शिवादेव्याः सुरेश्वरः ॥ जहेऽवस्वापिनीं जैनीं । प्रतिमूर्त्तिं च तां स्वयं ॥ ५३ ॥ युग्मं ॥

अथ शक्राज्ञया श्रीदः । समुद्विजयौकसि ॥ ववर्ष हर्षकारीणि । स्वर्णरत्नान्यनेकशः ॥ ५३ ॥ जिनांगुष्टे सुरेंद्रेण । पीयूषमवतारितं ॥ अपिबत्क्षुधितो नाथो–ऽस्तन्यपाना जिना यतः ॥ ५४ ॥ पंच चाऽप्सरसः स्वामि–धात्रीत्वे स्थापितास्तदा ॥ गत्वा नंदीश्वरद्वीपे । चक्रे सोऽष्टाह्निकोत्सवं ॥ ५५ ॥ जग्मुः सर्वे यथास्थानं । विदधुश्च महोत्सवान् ॥ विभ्राता रजनी ताव–ज्जिनतेजोऽपहृतेव सा ॥५७॥ ववुः प्रदक्षिणावर्त्ता । वायवो जनप्रीतिदाः ॥ प्रसेदुः ककुभो जातं । सर्वं हर्षमयं जगत् ॥ ५८ ॥ आविश्चक्रे रविं प्राची । प्रभोः फलमिवोपदां ॥ पद्मिनीव जजागार । देवी पद्मविलोचना ॥ ५९ ॥ ददर्श च सुतं राज्ञी । कल्पद्रुमिव जंगमं ॥ चेटीन्निर्वर्द्धितस्ताव–न्नरेंद्रः पुत्रजन्मना ॥ ६० ॥ सद्यः प्रमुदितो राजा । वसंत इव कोकिलः ॥ चकार चारकं मुक्त–बंधनं यदुपुंगवः ॥ ६१ ॥ जातं हस्त्यश्वरत्नादि–प्राभृतै राजकाहृतैः ॥ विस्तीर्णमपि संकीर्णं । समुद्विजयांगणं ॥ ६२ ॥ न्यत्यद्वारांगनाना-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दं । पूजितज्ञातिनागरं ॥ चक्रे जन्मोत्सवं सूनो–र्नृपो भुवनचित्रकृत् ॥ ६३ ॥ षष्टिजागरणार्केंदु–दर्शनादिपुरस्सरं ॥ द्वादशाहे नृपो नाम–विधानोत्सवमातनोत् ॥ ६४ ॥ गर्भगेऽप्यर्भके लोका–ऽरिष्टानि प्रलयं ययुः ॥ अरिष्टनेमिरित्यस्य । विदधे नाम सान्वयं ॥ ६५ ॥ बहुशः क्रीडितापत्या । अप्यदृष्टाऽर्भका इव ॥ रमयांचक्रिरे बंधु–वध्वस्तं स्पर्द्धयोद्धुराः ॥६६॥ स्वामी नेमिर्नराधीशै–र्नीयमानः करात्करं ॥ पद्मात्पद्मांतरं गच्छन् । राजहंस इवाबभौ ॥ ॥ ६७ ॥ स्वामिकंठे बभौ मुक्ता–ऽन्विता हैमी ललंतिका ॥ मुखचंद्रस्य सेवायै । ताराश्रेणिरिवोद्गता ॥ ६८ ॥ स्वामी सहजसौभाग्या–ज्जनैराहितमंगलः ॥ कुमारो ववृधे पित्रो–र्मनोरथशतैः समं ॥ ६९ ॥

इतश्च निहते कंसे । जरासंधाऽरिचक्रिणः ॥ दूतेऽपमानिते पृष्टः । क्रोष्टुकिर्यादवेश्वरैः ॥ ॥ ७० ॥ स प्राह भरतार्द्धेशौ । कृष्णरामौ भविष्यतः ॥ अचिरेण भवद्भिस्त–द्व धार्यात्र विषमता ॥ ७१ ॥ परं पश्चिमदिग्भागे । श्रीविंध्यगिरिसंमुखं ॥ गत्वा जलनिधेस्तीरे । स्थातव्यमविशंकितं ॥ ७२ ॥ कृष्णप्रिया सत्यभामा । यत्र पुत्रद्वयप्रसूः ॥ नगर्याः स्थापनां कु-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

त्वा । स्थेयं तत्र सुनिश्चितं ॥ ७३ ॥ सप्तकोटिकुलैर्युक्ताः । प्रस्थिताः सूर्यपत्तनात् ॥ उग्रसेनस्त्वगादेका–दशकोटिकुलान्वितः ॥ ७४ ॥ क्रमाद्विंध्याचलं प्राप्ता । यादवाः कालसंकथाः ॥ आकर्ण्य पूजयामासुः । क्रोष्टुकिं सत्यवादिनं ॥ ७५ ॥ अन्यदा गच्छतां तेषां । समगंस्ताऽतिमुक्तकः ॥ नत्वा पृष्टः समुद्राद्यै–र्भावि नः किमतःपरं ॥ ७६ ॥ मुनिर्जगाद द्वाविंशो । जिनस्ते भविता सुतः !! बलकृष्णौ भारतेशौ । द्वारिकायां भविष्यतः ॥ ७७ ॥

इत्युक्त्वा विहृतेऽन्यत्र । मुनौ प्रमुदिताशयाः ॥ सुराष्ट्रामंडले प्राप्य । यादवाः शिबिरं न्यधुः ॥ ७८ ॥ सत्यभामा तदाऽसूत । तनयौ भानुभामरौ ॥ अथ सुस्थितमुद्दिश्य । चक्रे विष्णुस्तपोऽष्टमं ॥७९॥ प्रत्यक्षीभूय संतुष्टः । सोऽपि श्रीरामकृष्णयोः ॥ सुघोषपांचजन्याख्यौ । शंखौ दत्वेत्थमाह च ॥ ८० ॥ वद कार्यं कुतोऽस्मार्षी–स्तेनोचे द्वारिकापुरी ॥ विष्णुना यांबुना लुप्ता । तामथो दातुमर्हसि ॥ ८१ ॥ विज्ञप्तस्तेन देवेंद्रः । सोऽपि श्रीदादकारयत् ॥ पुरीं विस्तरदैर्घ्याभ्यां । नवद्वादशयोजनां ॥ ८२ ॥ तत्राऽष्टादशहस्तोच्चो । हस्तान् द्वादश विस्तृतः ॥ नवहस्तान् धरामग्नो । वप्रश्चक्रे सखातिकः ॥ ८३ ॥ एकद्वित्रिकभूमा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

द्या–वृत्तादिविविधश्रियः ॥ प्रासादाश्चक्रिरे देवै–र्विमाना इव कोटिशः ॥ ८४ ॥ एते सौधा द-
शार्हाणा–मुग्रसेनस्य चेतरे॥ इत्यादिव्यक्तिभिर्देवैः । प्रासादा हेलया कृताः ॥ ८५ ॥ मणि-
स्वर्णमयाः सर्वे । सप्राकाराश्च सुंदराः ॥ सर्वे कल्पद्रुसंवीताः । प्रासादास्तत्र रेजिरे ॥८६॥
चक्रेऽष्टादशभूमिकः। सर्वतोभद्र आख्यया ॥ प्रासादो वासुदेवस्य । बलस्य पृथिवीजयः ॥८७॥
तयोरग्रे सभां कृत्वा । चक्रे चैत्यावलीं ततः ॥ एकाहोरात्रमात्रेण । धनदेन कृता पुरी ॥
॥ ८८ ॥ पश्चिमांभोधितीरेऽथ । कृष्णो राज्येऽभ्यषिच्यत ॥ श्रीद्वारिकां प्रविष्टश्च । देवैः कृ-
तमहोत्सवः ॥ ८९ ॥

अथ श्रीनेमिरारामे । रेमे रामादिभिः सह ॥ ज्ञानत्रययुतोऽप्यङ्ग । इव शैशवकेलि-
भिः ॥ ९० ॥ तेऽपि तं खेलयामासुः । प्रभुं प्रचुरकेलिभिः ॥ वयोऽनुगामिनो भावा । बा-
धंते महतामपि ॥ ९१ ॥ अथाऽतिक्रम्य बाल्यं स । यथाकामितवैभवः ॥ द्रुरिव प्राप तारु-
ण्यं । पुष्पफलदशामिव ॥ ९२ ॥ चतुरस्राकृतिर्वज्र–र्षभनाराचविग्रहः ॥ स्वामी दशधनु-
स्तुंगो । गुणैर्निरुपमोऽभवत् ॥ ९३ ॥ आत्मोपाध्यायतां प्राप्य । स्वामी सर्वकलास्वपि ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तत्तत्कौशलविज्ञाना–दाश्चर्यं हृदि निर्ममे ॥ ९४ ॥ यौवनं तु विकारीति। प्रसिद्धिर्यास्ति शा-
स्वती ॥ सफला सा कृता किं तु । कामिनीषु न चात्मनि ॥ ९५ ॥ इतश्च वणिजोऽन्येत्य।
विक्रेतुं रत्नकंबलान् ॥ ततो विशेषलाभाय । पुरे राजगृहे ययुः ॥ ९६ ॥ तैश्च ते जीवयश-
से । दर्शिता नैगमोत्तमैः ॥ लक्षार्घमादिशंती सा । तन्मूल्यं जगदेऽथ तैः ॥ ९७ ॥ धिग-
स्माकिन्द्वारिकायां । न दत्ता लक्षलाभतः ॥ यतोऽतिलिप्सा जीवानां । मूलनाशाय केवलं ॥
॥ ९८ ॥ द्वारिका केति पृष्टास्ते । राजपुत्र्या सविस्तरं ॥ ऊचुस्ते वार्द्धिना दत्ते । स्थाने दे-
वैर्विनिर्मिता ॥ ९९ ॥ पूरिता धनधान्याद्यै–र्धनदेन चिराय सा ॥ शास्ति तां केशवः सूनु–
र्देवकीवसुदेवयोः ॥ १०० ॥

श्रुत्वेति भूताविष्टेव । कीर्णकेशा शिरो घ्नती ॥ जीवत्यद्यापि कंसारि–रित्यूचे मगधे-
शितुः ॥ १ ॥ सोऽप्युदीर्णप्रकोपाग्नि–वार्त्ययेव धुवन् शिरः ॥ वत्से धीरा भवेत्युक्त्वा । या-
त्राढक्कामताडयत् ॥ २ ॥ सहदेवादयः पुत्राः । परितः परिवव्रिरे ॥ दुर्योधनशिशुपाला–द-
यो भूपाः सहस्रशः ॥ ३ ॥ वार्यमाणोऽपशकुनैः । प्रतापी प्रज्ज्वलन् क्रुधा ॥ प्रतस्थेऽथ ज-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रासंधः । पश्चिमांप्रति सूर्यवत् ॥ ४ ॥ अथ व्योमांगणे भ्राम्यन् । नारदो रणकौतुकी ॥ प्र-
स्थानं मगधेशस्य । जगाद द्वारिकेशितुः ॥ ५ ॥ अथास्फालितबाहूरु–हरिर्हुंकारमुच्चरन् ॥
पटहं वादयामास । प्रयाणप्रवणाशयः ॥ ६ ॥ दशार्हाः सपरीवारा । युधि सज्जा अमीमि-
लन् ॥ अर्धाष्टकोटयः पुत्राः । परितस्तमवेष्टयन् ॥ ७ ॥ उग्रसेनोऽप्यढौकिष्ट । धरादितनया-
न्वितः ॥ महसेनादयोऽप्येयुः । शांतनुक्षितिपोद्भवाः ॥ ८ ॥ पांडवाः पंच पंचांग–धरा इव
महाबलाः ॥ पत्नीश्वश्वादिसंबंधे । ये च तेऽपि तदाऽमिलन् ॥ ९ ॥ सहर्षं गोत्रवृद्धाग्निः । कृ-
तयात्रिकमंगलः ॥ सूच्यमानजयारंभो । मागधैः शकुनैरपि ॥ १० ॥ जगत्कुक्षिंभरिप्रौढ—
नांदीनिर्घोषमंगलः ॥ गरुडध्वजमारुह्य । रथं दारुकसारथिं ॥ ११ ॥ रम्ये क्रोष्टुकिना दत्ते ।
मुहूर्त्ते विजयाह्वये ॥ पूर्वोत्तरस्यामाशायां । प्रतस्थे सबलो हरिः ॥ १२ ॥ युग्मं ॥ संजग्मा-
ते धीरनादौ । सेनांभोधी रयादथ ॥ प्रलयानिलसंक्षुब्धौ । सह्यविंध्यगिरी इव ॥ १३ ॥ स्व-
र्णरूप्यमयस्फार–मुकुटद्युतिमंडलैः ॥ चंडसूर्यसहस्राढ्या । तदानीं द्यौरजायत ॥ १४ ॥
गजगर्जारवैरश्व–हेषितै रथचीत्कृतैः ॥ पदातिसिंहनादैश्च । जगद्ब्दमयं बभौ ॥ १५ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तुरंगमखुरोत्खात–धूलीधूसरितेंबरे ॥ दर्शरात्राविव स्वैरं । संचेरुर्भूतराक्षसाः ॥ १६ ॥ हंस-डिंभकमंत्रिभ्यां । मंत्रयित्वाऽथचक्रभृत् ॥ परप्रत्यूहनाशाय । चक्रव्यूहमथाऽकृत ॥ १७ ॥ स-हस्रारतया राज–सहस्रं तुंबके स्थितं ॥ रथानां द्विसहस्री च । पृथग्हस्तिशतं तथा ॥१८॥ पंचसहस्राण्यश्वानां । पदातीनां तु षोडश ॥ सहस्राः षट् सपादाश्च । चक्रांते स्थापिता नृ-पाः ॥ १९ ॥ नृपपंचसहस्रीयुग्–मुखेऽस्थान्मगधेश्वरः ॥ बलं कौरवगांधार–द्रमाभृतां पृष्ट-तोऽभवत् ॥ २० ॥ चक्रव्यूहाद्बहिर्व्यूहै–र्विविधैर्धरणीधवाः ॥ रणाय यादवाधीशान् । वृण्वा-ना अवतस्थिरे ॥ २१ ॥ तत् श्रुत्वा युद्धपाथोधि–यादसो यादवा अपि ॥ विदधुर्गरुडव्यूहं । च-क्रव्यूहजिगीषया ॥ २२ ॥ अर्द्धकोटिः कुमाराणां । व्यूहस्य स्थापिता मुखे ॥ गोविंदबल-भद्रौ च । स्वयं मूर्द्धनि तस्थतुः ॥ २३ ॥ तस्थुस्तत्परितः सर्वे । तथा श्रीकोणिनायकाः ॥ यथा दृष्ट्वापि शत्रूणां । दर्पोऽरेको विलीयते ॥ २४ ॥ विज्ञायाऽवधिना शक्रो । दिव्यशस्त्रैरलं-कृतं ॥ प्राहिणोन्नेमये स्वीयं । रथं मातलिसारथिं ॥ २५ ॥

अथ योद्धुं दुढौकाते । सेनान्यावुभयोरपि ॥ जगत्त्रयचमत्कारी । प्रवृत्तस्तुमुलो रणे ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ २६ ॥ खड्गघातेन वीराणा–मुत्पेदेऽग्निः परस्परं ॥ स एव शमितो वीर–शरीररुधिरप्लवैः ॥ २७ ॥ पादातिपादपातोद्य–धूलिभिर्विस्तृतं तमः ॥ त्रुटत्केयूररत्नौघैः । प्रकाशश्चाऽजनि क्षणात् ॥ २८ ॥ चतुरंगचमूघात–विसर्पिरुधिरप्लवैः ॥ रक्तीकृत इवादित्यो । नेजेऽस्ताचलचूलिकां ॥ २९ ॥ रक्तप्रीणितवेताला । इव तत्र रणांगणे ॥ छिन्नशिर्षा महारौद्राः । कबंधाः पर्यनर्त्तिषुः ॥ ३० ॥ सुभटानां सिंहनादैः । पूरितेऽथ समंततः ॥ ननर्त्त नारदस्तत्र । लब्धतालोंबरे तदा ॥ ३१ ॥ निवृत्ताः सजयारावा । यादवा जितकासिनः ॥ कटकं हतसेनानि । निर्वृत्तं मगधेशितुः ॥ ३२ ॥ द्वितीयेऽह्नि च सेनानी । स्थापितो दमघोषजः ॥ स्मित्वाऽभाषत गोविंदं । रक्ष नोः कृष्ण गोकुलं ॥ ३३ ॥ इत्यादि लपतस्तस्य । शिरो नारायणोऽलुनात् ॥ चक्रस्थं तंतुना कुंभं । कुंभकार इवाऽसिना ॥ ३४ ॥ रामस्य निहते पुत्र–दशके मगधेशिना ॥ धावित्वा सोऽपि तस्याऽहं–स्तदाऽष्टाविंशतिसुतान् ॥ ३५ ॥ कृष्णेन पुनरेकोन–सप्ततिस्तत्सुता हताः ॥ तनूजवधरोषांधो । जरासिंधोऽप्यधावत ॥ ३६ ॥ निहतो गदया रामः । पपात रुधिरं वमन् ॥ केशवो घननाराच–दुर्दिनैश्च तिरोहितः ॥ ३७ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

इत्थं विरलीकृतामर्ङ–चक्रिणा यदुवाहिनीं ॥ परिम्लानमुखीं वीक्ष्य । मातलिर्नेमिमा-
लपत् ॥ ३८ ॥ स्वामिन्नखंडब्रह्मांड–रक्षणक्षमदोर्युग ॥ यदूनां निर्दयं निघ्नन् । नोपेक्ष्यो म-
गधाधिपः ॥ ३९ ॥ यद्यपि त्वं समाचार–स्तृणे स्त्रैणे परे निजे ॥ तथापि नाथ निर्नाथ–मधु-
ना कुलमुद्धर ॥ ४० ॥ पश्य विश्वोपकर्त्तापि । सूर्यः संकोच्य कैरवान् ॥ विकाशयति किं
नाब्ज–काननं निजबांधवं ॥ ४१ ॥ किंचामी माऽवजानंतु । पश्यंतु तव दोर्बलं ॥ शत्रव-
स्तकृष्णास्त्रं । कुलमुज्ज्वाल्यतां यदोः ॥ ४२ ॥ श्रुत्वेति सान्वयं नाम । विधातुं निजमुद्य-
तः ॥ अरिष्टनेमिरास्फाल्य । पाणिना धनुराददे ॥ ४३ ॥ तमालश्यामलः कुर्वन् । राजहं-
सानितस्ततः ॥ ववर्षे नेमिपर्जन्यो । धारासारैः शरोत्करैः ॥ ४४ ॥ खंमयित्वा किरीटानि ।
मुंमयित्वा शिरांसि च ॥ लक्षं विलक्षतां निन्ये । राज्ञां स्वामी किरीटिनां ॥ ४५ ॥

मगधेशबलांभोधि–र्यन्मग्नो यदुगोष्पदे ॥ नेमिनो योगिनाथस्य । तन्माहात्म्यविजृंभि-
तं ॥ ४६ ॥ श्रीनेमेरुपचारेण । पुनर्नवबलो बलः ॥ द्विषतो दलयामास । मत्तदंतीव पादपा-
न् ॥ ४७ ॥ हतप्रतिहतं ज्ञात्वा । स्वसैन्यं मगधाधिपः ॥ क्रुद्धः काल इवोत्ताली । जगादेति

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

जनार्दनं ॥ ४९ ॥ रेरे गोपालबाल त्वं । हत्वा जामातरं बलात् ॥ पश्चिमाब्धिं गतो नष्ट्वा । वेताल इव मंत्रिणः ॥ ५० ॥ कालेन ढौकितोऽसि त्वं । नश्यन्नपि शृगालवत् ॥ प्रतिज्ञां पूरये पुत्र्या । नीत्वा कंसपथेऽधुना ॥ ५१ ॥ अरिष्टारिरुन्नाशिष्ट । मा विलंबस्व ढौक्यतां ॥ पितुः पुत्र्या जामातुश्च । सार्थमेकं करोमि यत् ॥ ५२ ॥ इति कालकरालौ तौ । तर्जयंतौ परस्परं ॥ वारिधी इव गर्जंतौ । युयुधाते बलोत्कटौ ॥ ५३ ॥ न तन्नस्त्रं न सा विद्या । न सा चारी न स भ्रमः ॥ येन युद्धं न चक्राते । तदानीं तौ रणोद्भटौ ॥ ५४ ॥ चेलुः कुलाचला भ्रेमु—र्द्विग्गजाश्च भ्रमाकुलाः ॥ क्षुब्धा वारिधयो जातं । ब्रह्मांडं स्फुटितं यथा ॥ ५५ ॥ अथ श्रीमगधाधीशो । निर्जितास्त्रगणस्तदा ॥ कंसारिंप्रति चिक्षेप । चक्रं सूर्यमिवाऽपरं ॥ ५६ ॥ केलिकंदुकवत्तच्च । स्पृष्ट्वा वक्षःस्थलं हरेः ॥ आरुरोह करांभोजं । राजहंस इव स्फुटं ॥५७॥ कृष्णोऽभून्नवमो वासु—देवोऽयमिति घोषिणः ॥ सिक्त्वा गंधांबुना पृथ्वीं । पुष्पवर्षं दधुः सुराः ॥ ५८ ॥ अतोऽपि विब्रुवाणस्य । चक्रेण मगधेशितुः ॥ स्कंधबंधं द्विधाचक्रे । त्रिदशैश्च जयध्वनिः ॥ ५९ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अथ जीवयशाः सर्व–संहारप्रतिन्नूरिव ॥ अजुहोन्मातृन्निः साऽ । प्राणान् वैश्वानरे र-
यात् ॥ ६० ॥ मातलिः प्रेषितो नेमि–नाथेन स्वास्पदं ययौ ॥ न्नरताऽ हरिर्जित्वा । जगाम
द्वारिकां पुनः ॥ ६१ ॥ अथाभिषेके संजाते । द्वे द्वे कन्ये पृथक्पृथक् ॥ राज्ञां षोडशभिर्न्नक्त्या
। सहस्रैर्ढौकिते हरेः ॥ ६२ ॥ शंखः खड्गो धनुश्चक्रं । वनमाला मणिर्गदा ॥ तस्याऽचक्रिणः
सप्त । रत्नान्येतानि जज्ञिरे ॥ ६३ ॥ तदऽचक्रवर्त्तित्व–समृद्ध्या समलंकृतः ॥ बुभुजे न्नरता-
ऽस्य । साम्राज्यं सबलो हरिः ॥६४॥ अयुतदशके राज्ञां स्तंन्नीकृते रणमंमूपे । प्रतिहरिरमा
पाण्यादंतं विधाप्य सुरद्विषः ॥ सह परिजनैर्लीलाकेलीकलाः कलयन्नलं ॥ विषय विमुखः
श्रीमान्नेमिर्निनाय स यौवनं ॥ ६५ ॥

॥ इति श्रीरुद्रपल्लीयगच्छे श्रीसंघतिलकसूरिपट्टावतंसश्रीसोमतिलकसूरिविरचितायां श्री-
शीलोपदेशमालावृत्तौ श्रीशीलतरंगिण्यां श्रीनेमिचरित्रे गर्भावतारजन्मस्नात्रोत्सवबाल्यसंग्रा-
मवर्णनो नाम तृतीयः सर्गः समाप्तः ॥ श्रीरस्तु. ॥

अथ प्रद्युम्नशांबाद्यान् । कुमारान् कामचारिणः ॥ खेचरीन्नूचरीन्नार्या–सहस्रैः परितो

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वृतान् ॥ १ ॥ निरीक्ष्य क्रीडतोऽन्येद्यु–र्द्वारिकोपवनादिषु ॥ श्रीसमुद्रशिवादेव्या–वित्ति श्री-
नेमिमूचतुः ॥ २ ॥ लोकोत्तरैश्चरित्रैस्ते । वत्स विश्वैकवत्सल ॥ आवामेव परां रेखां । वहा-
वः पुत्रिणां धुरि ॥ ३ ॥ यत्पुनर्यौवनस्थोऽपि । न धत्से दारसंग्रहं ॥ तेन दूयावहेऽत्यर्थं ।
वीक्ष्य पुत्र परस्नुषाः ॥ ४ ॥ दृष्ट्यैव सर्वं संबद्धं । विधिना निर्मितं जगत् ॥ माणिक्यमपि
नाज्ञाति । पश्य हेमाश्रयं विना ॥ ५ ॥ विशिष्याहं शिवादेवी । वधूसंदर्शनोत्सुका ॥ ता ए-
व धन्या मन्येऽहं । वनिता भूमिमंडले ॥ ६ ॥ स्फुरंति पुरतो यासां । यथादिष्टविधायिकाः॥
वध्वः प्रवरनेपथ्या । नयनाऽमृतपारणाः ॥ ७ ॥ युग्मं ॥ उवाच पितरौ नेमि–र्नमन् मधुर-
या गिरा ॥ कन्यां दुःखपरीणामां । नाहं स्वीकर्त्तुमुत्सहे ॥ ८ ॥ दक्षां हितावहां कांतां । य-
दा द्रक्ष्याम्यहं पुनः ॥ तदैव स्वीकरिष्यामि । खेदः कार्यो न तन्मनाक् ॥ ९ ॥ यादृक्ता-
दृग्विधा दुःख–वल्लरीरिव दारुणाः ॥ संगृह्य जायते कष्ट–भाजनं को विदांवरः ॥ १० ॥ इ-
त्युक्त्वा बोधितौ तेन । पितरौ सरलाशयौ ॥ स्वपराज्यां न गृह्यंते । यदि वा तत्त्वदृष्टयः ॥
॥ ११ ॥ इतो यशोमतीजीवो–ऽपराजितविमानतः ॥ च्युत्वोग्रसेनजायाया । धारिण्यास्तन-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

याऽजनि ॥ १२ ॥ राजीमतीकुमारीति । पितृभ्यां विदधेऽन्विधा ॥ ववृधे कल्पवल्लीव । सा शाश्वतरसाश्रया ॥ १३ ॥ दधाना कुमुदोल्लासं । चंद्रलेखेव लीलया ॥ संगृह्णाना कलाः सर्वाः । सा जज्ञे यौवनोन्मुखी ॥ १४ ॥ राजीमत्या मुखेनेंदु–र्वराकः स्पर्धतां कथं ॥ पयोधरोन्नतौ यस्या । विशेषश्रीर्न दीप्यते ॥ १५ ॥ यौवनं कलयाम्यस्याः । स्रष्टारं येन हेलया ॥ त्रयाणामपि चातुर्यं । कायवाङ्मनसां दधे ॥ १६ ॥

अन्यदा क्रीडया नेमिः । कुमारैः परिवारितः ॥ विवेशायुधशालायां । हरेर्हरिरिवापरः ॥ १७ ॥ दृशं व्यापारयन् शार्ङ्गे । नंदकेऽथ सुदर्शने ॥ शंखं स्वलक्ष्मप्रेम्णेव । स ददर्श मुहुर्मुहुः ॥ १८ ॥ जिघृक्षुं पाणिना शंखं । नेमिं मत्वाथ यामिकः ॥ नत्वा विज्ञपयामास । सस्मितं श्रूयतां प्रभो ॥ १९ ॥ पांचजन्यममुं नाऽन्यो । विष्णोरादातुमीश्वरः ॥ दूरे पूरयितुं तस्मा–त्प्रयासं मा वृथा कृथाः ॥ २० ॥ वार्यमाणोऽपि तेनेत्थं । स्वामी स्वस्थाममांसलः ॥ केलिकंदुकवद्बालः । शंखं जग्राह पाणिना ॥ २१ ॥ हेलया पांचजन्योऽथ । धारितः स्वामिना मुखे ॥ हृदयान्निर्गतशुक्ल–ध्यानपिंड इवाबभौ ॥ २२ ॥ पूरितेऽथो जजागार । जगत्कुक्षिं-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

न्नरिर्ध्वनिः ॥ मूर्छिताः पतिता न्भूमौ । यामिकाः सामया इव ।२३। चुक्षुभुर्लोलकल्लोलाः । सागराः प्रलये यथा ॥ न्तत्कंपितं धरापीठं । ब्रह्मांडं स्फुटितं किल ॥२४॥ चिरमेकत्र संवास–प्रेम्णेवाऽजनि तत्क्षणात् ॥ कंप्रं द्वारवतीवप्रं । संगंतुमिव वारिधिं ॥ २५ ॥ तदानीं राजकाकीर्णा –मास्थानीमास्थितो हरिः ॥ ध्वनिं श्रुत्वाथ संभ्रांतो । दृशं किक्षेप सर्वतः ॥ २६ ॥

आह रामं किमन्यस्माद् । द्वीपतो विष्णुरागमत् ॥ किं वाऽन्यो विष्णुरुत्पेदे । पांचजन्यो जगर्ज यत् ॥ २७ ॥ यामिकैरेत्य विज्ञप्त–स्तावतेति विकल्पयन् ॥ त्वदीयः शंख एवायं । दध्वने नाथ नेमिना ॥ २८ ॥ श्रुत्वेति संभ्रमावेगा–दमांतमिव विस्मयं ॥ मापयन् केशवस्तस्थौ । मौलिकंपनदंन्नतः ॥ २९ ॥ नूनमस्मत्कुले चक्र–वर्त्ती नेमिरजायत ॥ यच्छंखेऽस्मिन्मयाऽध्माते । नेदृग्नादः कदाप्यभूत् ॥ ३० ॥ इति चिंतयतस्तस्य । नेमिर्लोकंपृणाशयः ॥ स्वयं तत्राऽागमत्प्रीत्या । विघ्नित्सुरिव संशयं ॥ ३१ ॥ निजार्धासनमासीनः । कुमारो हरिणोच्यत ॥ रोदःकुक्षिंभरिध्वानः । शंखः किं पूरितस्त्वया ॥ ३२ ॥ न्नमित्युदीरिते तेन । रोमांचांकुरदंतुरः ॥ हरिः पुनरुवाचेदं । नेमिनं मधुराक्षरैः ॥ ३३ ॥ पांचजन्ये त्वया

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

भ्रात–र्ध्माते नूरप्यकंपत ॥ जज्ञे च क्षोन्नसंरंन्न–श्चिरं राममनस्यपि ॥ ३४ ॥ तत्ते भुजबलं बंधो । दृष्टुमस्मि कुतूहली ॥ नियुद्धं कुर्वहे तस्मा–त्क्षणं गत्वा खलूरिकां ॥ ३५ ॥ प्रतिश्रुतवति स्वामि–न्यपि कौतुकिनि स्वयं ॥ प्रहृष्टौ समनह्येतां । मल्लयुद्धाय बांधवौ ॥ ३६ ॥ स्वामी निजबलानंत्यं । विमृश्य पुनरब्रवीत् ॥ नियुद्धमावयोर्भ्रातः । केलिनापि न युज्यते ॥ ३७ ॥ तदन्योऽन्यं भुजस्तंन्न–वालनेनैव कौतुकं ॥ पूर्यतामावयोरत्र । रामः साक्षीव जायतां ॥ ३८ ॥ इत्युक्ते धारयमास । भुजं तिर्यग्जनार्दनः ॥ तं नेमिर्नामयामास । बालकस्त्रपुसीमिव ॥ ३९ ॥ स्वाम्यथ न्नोगिन्नोगाभं । भुजदंडमधारयत् ॥ वालनायाऽस्य कंसारि–र्नालंन्नूष्णुर्मनागपि ॥ ४० ॥

लग्नो नेमिभुजस्तंन्ने । हरिः सर्वान्निसारतः ॥ लंबमानो बभौ स्वैरं । वनौका इव शाखिनि ॥ ४१ ॥ न च नेमिभुजोऽचाली–द्वज्रस्तंन्न इव क्वचित् ॥ आकारमवगुह्याथा–ऽलिलिंग भ्रातरं हरिः ॥ ४२ ॥ अवादीत्स्वकुलं श्लाघ्य–मावयोरेव बांधव ॥ यत्राऽनन्यसमस्थामा । वीरो युष्मादृशोऽजनि ॥ ४३ ॥ इत्यादि श्लाघ्यमानः सन् । विससर्ज जिनं हरिः ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अथोपराममाहस्म । विस्मयस्मेरमानसः ॥ ४४ ॥ ददृशे भुजशौंडीर्यं । नेमेरार्यानुजन्मनः ॥ ईदृग्भुजबलं विश्वे । न शक्रस्य न चक्रिणः ॥ ४५ ॥ भ्रातर्जगज्जयाऽजय्य–शौर्यशाली समुद्भजः ॥ षट्खंडमेदिनीराज्यं । किं न भुंक्ते सुदुर्लभं ॥ ४६ ॥ शार्ङ्गिशंकापनोदाय । सीरी सस्मितमाख्यत ॥ एतद्बलेन साम्राज्य–मावाभ्यामपि भुज्यते ॥ ४७ ॥ भ्रातर्लंकं नरेंद्राणां । न रोत्स्येच्चेदसौ हरात् ॥ कथं तदाऽवधिष्यस्त्वं । जरासंधं रणांगणे ॥ ४८ ॥

द्वाविंशत्तीर्थकृद्भावी । नेमिर्नैमित्तिकोदितः ॥ राज्याय स्पृहयत्येष । कथं नरककारिणे ॥ ४९ ॥ तथापि शंकामुद्धर्तु–मस्य देवतयोच्यत ॥ एष मोक्षंगमी नाथः । कौमारेऽपि दृढव्रतः ॥ ५० ॥ श्रुत्वेति तुष्टो गोविंदो । बलमापृच्छ्य भक्तितः ॥ जगामांतःपुरं नेमि–चरित्रं च तदन्वधात् ॥ ५१ ॥ तत्र नेमिनमाह्वाय्य । सवात्सल्यमधोक्षजः ॥ विशिष्यबहुमानेन । प्रीणयामासिवानसौ ॥ ५२ ॥ रत्नसिंहासनासीनौ । स्नातौ चंदनचर्चितौ ॥ दिव्यां रसवतीं भुक्त्वा–वन्योऽयं प्रेमपेशलौ ॥ ५३ ॥ इति प्रत्यहमाराम–वापीषु सरसीषु च ॥ हरिः सांतःपुरः प्रीत्या । रेमे श्रीनेमिना समं ॥ ५४ ॥ सौविदानादिशद् द्वार–पालांश्च हरिरेकदा ॥ न

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

क्वापि स्खलनीयोऽयं । बंधुः प्राणप्रियो मम ॥ ५५ ॥ ऊचे स रुक्मिणीनामा–रेवतीप्रमुखाः प्रियाः ॥ देवरो नेमिरावर्ज्यो । युष्मान्निश्चतुरोक्तिभिः ॥ ५६ ॥ एकाक्यपि ययौ नेमि–र्विष्णोरंतःपुरं ततः ॥ समचित्ता हि निःशंकं । संचरंति समंततः ॥ ५७ ॥ निर्विकारतया स्वामी । वर्दश्चारुवचोभरं ॥ तोषयामास सोत्प्रास–केलीलोलाः प्रजावतीः ॥ ५८ ॥ अथाख्यत शिवा विष्णुं । तथा नेमिं प्रबोधय ॥ स्नुषामुखदिदृक्षां मे । यथा पूरयति क्षणात् ॥ ५९ ॥

नारायणोऽपि नामाद्यै–स्तमर्थं तमबीभणत् ॥ सोऽपि वेकोक्तिभिश्चक्रे । ताः सदेलं निरुत्तराः ॥ ६० ॥ चिकीर्षुरिव साहाय्य–मुपयामास नेमिनः ॥ वसंतर्तुरवातारी–द्दक्षिणानिलमांसलः ॥ ६१ ॥ पौरैरंतःपुरेणापि । परितः समलंकृतः ॥ अच्युतो रैवते रंतुं । जगाम सह नेमिना ॥ ६२ ॥ कोकिलाभिरिवाहूताः । पीतासवसमंथराः ॥ रामाभिः साऽमारामं । यादवाः क्रीडितुं ययुः ॥ ६३ ॥ स्फुरत्केसरतूणीरं । कामदेवमिवार्चितुं ॥ ते पुष्पावचयं चक्रुः । सजाया वनवीथिषु ॥ ६४ ॥ हरेरादेशतः सत्य–भामाद्या नेमिना सह ॥ पुष्पोच्चिचीषया जग्मु–र्वनमध्यं मृगेक्षणाः ॥ ६५ ॥ कामभल्लीमिव स्फार–माकंदतरुमंजरीं ॥ सोरःप्र-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

काशनं काचि–द्व्यतरन्नेमिनः करे ॥ ६६ ॥ नज्जागरूककंदर्प–रक्षापोट्टलिकामिव ॥ धम्मिल्लं मल्लिकापुष्पैः । श्रीनेमेः कापि निर्ममे ॥ ६७ ॥ रजोऽपनयनव्याजा–च्छ्रीनेमेर्नयनांतरात् ॥ मधुपीव पपौ काचि–द्वदनांभोजसौरभं ॥ ६८ ॥ दर्शयंती भुजामूलं । चक्रे काचिद्विशेषकं ॥ विगलद्वसना कापि । चक्रे पत्रं कपोलयोः ॥ ६९ ॥ विकर्त्तुमनलंभूष्णुः । श्रीनेमिमिति लज्जया ॥ अतिक्रांते वसंतर्त्ता–वथ ग्रीष्मर्तुरागमत् ॥ ७० ॥ वापीष्वथ हरेर्भार्याः । प्रविष्टा जलकेलये ॥ प्रजावतीन्निराकृष्य । सह नीतः प्रभुः पुनः ॥ ७१ ॥ वीतव्रीडा जलक्रीडा–स्ताः साई विष्णुना व्यधुः ॥ श्रीनेमिस्तत्र साक्षीव । जातस्तेन धृतः करे ॥ ७२ ॥ अथ संकेतिताः शार्ङ्ग–पाणिना रुक्मिणीमुखाः ॥ श्रीनेमिनं सशृंगारं । जलशृंगैरलेखयन् ॥७३॥ चिक्रीड नेमिनाथोऽपि । ताभिः साईमशंकितः ॥ विमुखां न हि कस्यापि । वांछां कुर्वंति तादृशाः ॥ ७४ ॥ ताडिता शृंगिकांभोभिः । काचिद्वक्षोजकुंभयोः ॥ हारलीलायितं प्राप । विकीर्णैर्जलबिंदुभिः ॥ ७५ ॥ विगलच्छ्रीवत्सिकाः काश्चि–त्काश्चिद्त्रुटितकंचुकाः ॥ चक्रिरे काश्चनाऽवस्त्रा । जलसेकेन नेमिना ॥ ७६ ॥ स्वयं न लिप्तो रागेण । स्वामी पुष्करपत्रवत् ॥ ॥१३३॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सरागास्ताः पुनश्चक्रे । तांबूलं चूर्णवर्णवत् ॥ ७७ ॥

श्रीनेमिरथ रुक्मिण्या । दत्तहस्तावलंबनः ॥ पुष्करिण्या अवातारीत् । तीरे राजमरालवत् ॥ ७८ ॥ कुकूलान्युपनिन्येऽथ । प्रद्योर्जीवती मुदा ॥ गांधारी कबरीबंधं । व्यधत्त विविधक्रमं ॥ ७९ ॥ कुमारं वीजयामास । रेवती सिचयांचलैः ॥ हारमारोपयामास । कंठे पद्मावती प्रद्योः ॥ ८० ॥ संवाहयंती चरणौ । सिंचंती चंदनद्रवैः ॥ सत्यभामा सप्रेमैव । कुमारमिदमाख्यत ॥ ८१ ॥ अज्ञानस्येव कोऽयं ते । श्रीकुमार कदाग्रहः ॥ यत्पूर्वपुरुषाचीर्णः । पंथा लोलुप्यते हठात् ॥ ८२ ॥ आद्ये वयसि राजन्याः । सफलीकृतयौवनाः ॥ दारसंग्रहतः सर्वे । प्रांते व्रतमशिश्रयन् ॥ ८३ ॥ तन्नवान् नूरिसौभाग्यं । नियमैः पूरयन् वयः ॥ उपहास्यस्तालफला–ऽभिलाषीव न कस्य तत् ॥ ८४ ॥ इत्यादियुक्तिभिस्तासु । ब्रुवाणासु हरिर्जगौ ॥ त्वं बंधो माऽवमन्यस्व । कुरु प्रीताः प्रजावतीः ॥ ८५ ॥ पूर्वं जिनेश्वराः प्रायः । सकलत्रा इहाऽभवन् ॥ तीर्थस्य स्थापनां कृत्वा । प्रांते मुक्तिं च ते ययुः ॥ ८६ ॥ सुव्रतोऽस्मत्कुले पूर्वं । भोगान् भुंक्त्वाऽदधे व्रतं ॥ तत्त्वयापि कुलाचारो । न लोप्यः कुलमंडन

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ ८७ ॥ इत्युक्त्वा पादयोर्लग्नो । नेमेः सांतःपुरो हरिः ॥ बंधोर्दाक्षिण्यतो नाथ–स्तथेति प्रत्यपद्यत ॥ ८८ ॥ श्रीसमुद्रशिवादेव्यौ । श्रुत्वाऽभ्युपगमं प्रभोः ॥ संदेशहारिणं दानैः । संतोष्य मुदितौ स्थितौ ॥ ८९ ॥ ततोऽतिमुदितः कृष्णः । सप्रियः प्रावृडागमे ॥ विधाय न्युंछनान्यस्य । समेतो द्वारिकां पुरीं ॥ ९० ॥

अथ योग्यां प्रभोः कन्या–मन्विष्यन् हरिरौच्यत ॥ सदर्थं नामया मेऽस्ति । स्वसा राजीमती लघुः ॥ ९१ ॥ तदानीं सूर्यवत्सोऽपि । ज्योतिर्बुधबलान्वितः ॥ उग्रसेनाभिधानस्य । राज्ञः सदनमागमत् ॥ ९२ ॥ तेनापि कुड्मलीकृत्य । करौ तस्मै सुता ददे ॥ समुद्रविजयायाऽख्यत् । तदागत्य जनार्दनः ॥ ९३ आदूय क्रोष्टुकिं लग्न–मपृच्छन्नथ सोत्सुकाः ॥ तेनोक्तं कर्म वैवाह्यं । न युक्तं शयने हरेः ॥ ९४ ॥ विहस्य हरिराहस्म । द्विधापि सबले मयि ॥ जागरूके हरौ साक्षा–दियं शंका कुतस्तनी ॥ ९५ ॥ अन्यच्च न विलंबार्हं । नेमेरुद्वाहमंगलं ॥ नालानस्तंभितस्यापि । विश्वस्तिर्मत्तदंतिनः ॥ ९६ ॥ तेनोचे श्रावणश्वेत–षष्ठी शुद्धास्ति तर्हि नोः ॥ सज्जौ जातावुग्रसेन–समुद्रावपि सत्वरं ॥ ९७ ॥ उन्नयोरुच्चचाराथ ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

गेहयोर्मंगलध्वनिः ॥ सुवासिन्यस्तदाऽऽनंद–मेदस्विन्योऽन्नितोऽन्नमन् ॥ ९८ ॥ सरत्नतोरणा सर्व–सामग्री मंरूपादिका ॥ मनीषितानुसारेण । देवैरेव विनिर्ममे ॥ ९९ ॥ लग्नासन्ने दिने कुंती–शिवाद्या यदुयोषितः ॥ न्यस्य सिंहासने नेमिं। प्राच्यां सोलूखलगीतिकं ॥ १०० ॥ स्नपयामासुराश्वेव । बद्धप्रतिसरं वरं ॥ पारिणेत्राणि सिचया–न्यश्र ताः पर्यधापयन् ॥ १ ॥

अथोग्रसेनसदने । गत्वा कन्यामसिस्नपन् ॥ मंरूनाय चतुष्के च । सैरंध्यूस्तां न्यवेशयन् ॥ २ ॥ तदा राजीमतीरूप–निरीक्षणपिपासिताः ॥ तस्थुर्मृगेक्षणाः कामं । क्षणमुक्तानितेक्षणाः ॥ ३ ॥ उग्रसेनतनूजापि । तं प्राप्यन्नववल्लभं ॥ प्राप्योत्कंगाकुला कष्टं । रात्रिं तामत्यवाहयत् ॥ ४ ॥ अथोदिते सहस्रांशौ । कृतस्नानविलेपनः ॥ मंरूितो मुक्तान्नरणैः । शुक्लध्यानलवैरिव ॥ ५ ॥ अवदाताऽऽतपत्रेण । चंद्रेणेव निषेवितः ॥ श्रोतोन्यामिव गंगाया– श्चामरान्यामलंकृतः ॥ ६ ॥ लवणोत्तारणाऽरीण–न्नगिनीकृतमंगलः ॥ पृष्टेऽनुगम्यमानाध्वा । गोविंदाद्यैर्यदून्नमैः ॥ ७ ॥ आरूढः स्यंदनं श्वेत–वाजिनं यदुरंगकृत् ॥ वरः श्रीउग्रसेनस्य । प्राप्तस्तोरणन्नूमिकां ॥ ८ ॥ चतुर्भिः कलापकं ॥ सीमंते बिभ्रतीं मुक्ता–स्तोमं तारावली-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मिव ॥ निन्युर्वातायनं राजी–मतीं सख्यो विचक्षणाः ॥ ९ ॥ तस्याः स्वर्णतुलाकोटि–द्वय-संसेवितौ पदौ ॥ नूनं पत्कजविज्ञानि–राजहंसाश्रिताविव ॥ १० ॥ सुदर्शने अपि स्वच्छे । एते श्रुतिनिरोधके ॥ इतीवास्या दृशौ धात्र्यां–किते कज्जलरेखया ॥ ११ ॥ एषैव जंबूद्वीपेऽस्ति । प्रधानमिति तं श्रितौ ॥ कुंकुमव्याजतः सूर्यौ । कपोलाङ्गलतो विधू ॥ १२ ॥ विमानमिव सा-ऽरूढा । गवाक्षं जालकांतरैः ॥ पपौ लावण्यपीयूषं । नेमेरनिमिषेक्षणा ॥ १३ ॥ तदानीं द-क्षिणे बाहौ । स्पंदमाने च लोचने ॥ दुर्लभं तं वरं मत्वा । विषण्णाऽभून्नृपांगजा ॥ १४ ॥ तां तु म्लानामिवालोक्य । वयस्याः प्राहुराकुलाः ॥ को विषादनिषादस्य । प्रवेशोऽस्त्यधुना सखि ॥ १५ ॥ सापि सत्यमजानिष्ट । निर्भाग्या किं करोम्यहं ॥ यदानंदपदे सख्यो । दुर्नि-मित्तमुपस्थितं ॥ १६ ॥ सखि शांतममांगल्यं । धिगिदं वचनं तव ॥ गोत्रदेव्यः करिष्यंति । सर्वतः कुशलं हि नः ॥ १७ ॥ जलस्थलचरा जीवा । मेलिता भोजभूभुजा ॥ कुर्वतः करु-णाक्रंदं । दृष्टाः श्रीनेमिना तदा ॥ १८ ॥

साश्चर्यमथ पृष्टश्च । सारथिस्तथ्यमब्रवीत् ॥ देव यौष्माकमातिथ्यं । विधातुं संत्यमी

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

धृताः ॥ १९ ॥ धिक्धिक् नीराजकं विश्वं । धिगमून् निःकृपान् जनान् ॥ येदेवमशरण्यानां । पशूनां कुर्वते वधं ॥ २० ॥ इत्युक्त्वा करुणांकूरै—र्वपुः कोरकितं वहन् ॥ रथं संचारयामास । पशुवाटकसंमुखं ॥ २१ ॥ अपश्यन् प्राणिनोऽप्येनं । दीनवक्त्रविलोचनाः ॥ पाहि पाहीति पूच्चक्रुः । स्वामिनं स्वस्वन्नाषया ॥ २२ ॥ आदिश्य सारथिं जीवान् । विमोच्य च नियंत्रणात् ॥ स्यंदनं वालयामास । स्वार्थसिद्धिंप्रति प्रभुः ॥ २३ ॥ अथाऽतिसंन्नमभ्रांताः । समुद्विजयादयः ॥ शिवादयश्च संत्यज्य । रथान्नेमिमुपाययुः ॥ २४ ॥ अथैवमूचतुः पुत्रं । पितरौ साश्रुलोचनौ ॥ कोऽयं महोत्सवारंन्ने । वत्स ते विरसक्रमः ॥ २५ ॥ नंदन कथमस्माक—मकस्मात्क्रंदनोऽन्नवः ॥ तस्मात्त्वं च निवर्त्तेथा । मास्म क्षारं क्षते क्षिप ॥ २६ ॥ सामुद्विरदक्षीरं । तात दृष्ट्वा पशूनहं ॥ इन्नमात्मानमस्मार्षं । कर्मसंचयवेष्टितं ॥ २७ ॥ तस्मात्तन्मोचनायाहं । यतिष्ये संयमाध्वनि ॥ युष्माकं तोषकाः संति । महानेम्यादयः सुताः ॥२८॥

श्रुत्वेति मूर्छामापन्नौ । पितरौ विधुरो हरिः ॥ स्वयमाश्वासयन् धैर्या—दवोचदुचितं वचः ॥ २९ ॥ यथा करुणया ब्रातः । पशूनेतानमोचयः ॥ पितरौ नानुगृह्णासि । तथा किम-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तिदुःखितौ ॥ ३० ॥ नङ्क्तुंकाम एवास्मि । पितरौ दुःखवारिधेः ॥ तत्कृष्ण मा मुधा मुह्य । निस्तारार्थोऽयमुद्यमः ॥ ३१ ॥ नक्त्वेति पित्रोर्व्रात्रोश्च । स्वस्य व्रतमनोरथं ॥ नपेक्ष्य रुदतः सर्वान् । यदून् स्वामी गतो गृहं ॥ ३२ ॥ अथ विज्ञपयामासुः । प्रभुं लोकांतिकाः सुराः ॥ जगज्जीवहिताधार । स्वामिंस्तीर्थं प्रवर्त्तय ॥ ३३ ॥ देवाधीशगिरा स्वर्णै—र्ढौकितैर्जृंभकामरैः ॥ वार्षिकं दातुमारेभे । दानं नेमिर्मनीषितं ॥ ३४ ॥ ततो राजीमती मत्वा । यथेष्टं प्रस्थितं वरं ॥ त्रुटिता हारवल्लीवा—ऽपतद्भुवि विसंस्थुला ॥ ३५ ॥ प्रापिता चेतनां शीतो—पचारेण सखीजनैः ॥ सर्वस्वं लुंटितेवासौ । विललाप मुहुर्मुहुः ॥ ३६ ॥

किमर्थं ससृजे धात्रा । गर्भेतो वा न किं हृता ॥ किमर्थं यौवनं प्राप्ता । दृढा बाल्येऽपि नो मृता ॥ ३७ ॥ मदर्थं चेन्न सृष्टोऽयं । नेमिस्तद्दर्शितः कुतः ॥ निधेरदर्शनं श्रेयो । न चापहृतदुःखता ॥ ३८ ॥ निंदंती स्वमिति प्रेम्णा । स्मरंती च प्रभुं मुहुः ॥ मुमूर्छ च तथाऽऽक्रंद—भूमीपीठे लुलोठ च ॥ ३९ ॥ अथोचुर्दुःखिताः सख्यो । व्यर्थस्तत्र तवाग्रहः ॥ यस्त्वां तत्याज निर्व्याजं । ध्रुवं सखि स नीरसः ॥ ४० ॥ रूपविक्रमसंपन्नाः । संति क्ष्मात्राः सहस्र-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

शः ॥ तद्वरेणाऽनुरूपेण । कुर्वीथाः सफलं जनुं ॥ ४१ ॥ अथ भ्रूकुटीभीमचू–भंगिर्नोजा-त्मजाऽवदत् ॥ आः पापा दूरतो यात । धिग्युष्माकमिदं वचः ॥ ४२ ॥ मनोवाक्कन्यतः स्वै-र–मकार्षं नेमिनं वरं ॥ तत्कथं गजमुत्सृज्या–ऽरोहामि खलु रासभं ॥ ४३ ॥ नेमिना पा-णिना ताव–दहं यद्यपि नाहृता ॥ तथापि जायतां सैष । धर्माचार्योऽप्यतः परं ॥ ४४ ॥ वि-वाहायाऽनुरुंधाना–नुपेक्ष्य स्वजनानसौ ॥ नेमेः प्रतीक्षयामास । दीक्षाकालं पतिव्रता ॥४५॥ नेमेर्वार्षिकदानस्या–ऽनंतरं ज्ञानवेदिनः ॥ समेत्य विदधुः शक्राः । स्नानं तीर्थोदकैः प्रभोः ॥ ॥ ४६ ॥ नाम्नोत्तरकुरां देवै–र्निर्मितां शिबिकां ततः ॥ वाह्यां नृपसहस्रेण । प्रभुरारूढवानिमां ॥४७॥ दधतुश्चामरे शक्रे–शानेंद्रौ परितः प्रभोः ॥ छत्रं सनत्कुमारोऽपि । शेषैः कल्पाष्टमंग-लैः ॥ ४८ ॥ पितृमातृस्वसृभ्रातृ–सुराऽसुरनरेश्वरैः ॥ अन्वीयमानः प्रासादा–दचालीदचला-शयः ॥ ४९ ॥ जगुर्मंगलगीतानि । शिवाद्या गगनदाकरं ॥ नातिक्रामंति मोहाङ्गं । महीयां-सोऽपि कुत्रचित् ॥ ५० ॥ चारित्रलक्ष्मीमुद्वोढुं । यांतं तं वीक्ष्य भोजजा ॥ व्रणावलीव पौर-स्त्य–वायुनाऽजनि दुःखिनी ॥ ५१ ॥ अथ चारुमुखी तस्याः । सखी स्थित्वा प्रभोः पुरः ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स्मारं स्मारं सखीदुःखं । सोपालंभमभाषत ॥ ५२ ॥ लोके हि श्रूयते स्त्रीषु । चलप्रकृतिताऽधिकं ॥ प्रतिज्ञाताऽर्थवैमुख्या–त्त्वय्येवाऽकलयामि तां ॥ ५३ ॥ मुधा राजीमती मुग्धा । त्वयि धूर्त्तेऽनुरज्यते ॥ गृह्णासि संयमं यत्त्वं । रक्तो मुक्तिस्त्रियामथ ॥ ५४ ॥ निगृह्य नूभुजां लक्षं । जरासंधवधे तदा ॥ अहो राजसुतोद्वाहे । जातः सावद्यनीरुकः ॥ ५५ ॥ स्वकर्मढौकितं धूर्त्त । मोचयित्वा पशुव्रजं ॥ अहो कारुणिको दुःख–पाथोधौ तामपातयः ॥ ५६ ॥ कनकैर्वत्सरं याव–द्विश्वं विश्वमतोषयः ॥ दीनां त्वेनां न दृष्ट्यापि । साधु ते दानवीरता ॥ ॥ ५७ ॥ अखमेन्निरुपालंभै–र्ज्ञानत्रितयवानसि ॥ जाने लग्नं च कौटिल्य–मंकशंखप्रसंगतः

इत्यादिनिंदोपालंभैः । स्तुतिभिर्न्नाभितस्तया ॥ अनाकर्णितकेनेव । नेमिरस्खलितो ययौ ॥ ५९ ॥ शिबिकायाः समुत्तीर्य । सहस्राम्रवने प्रभुः ॥ विमुच्याभरणादीनि । कृतषष्टतपोविधिः ॥ ६० ॥ त्रिंशतीप्रमिताब्दायु–श्चित्रानक्षत्रगे विधौ ॥ शुक्लायां नभसः षष्ट्यां । पूर्वाह्णे व्रतमग्रहीत् ॥ ६१ ॥ युग्मं ॥ तदा प्रादुरभूद् ज्ञानं । मनःपर्ययसंज्ञकं ॥ सुखासिका समुत्पेदे । नारकाणामपि क्षणं ॥ ६२ ॥ प्राव्राजिषुः सहस्रं च । नरेंद्राः प्रभुणा सह ॥ कृष्ण-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पांऽवरामाद्या । वंदित्वा स्वगृहं ययुः ॥ ६३ ॥ द्वितीये दिवसे नेमे–र्वरदत्तद्विजौकसि ॥ प-
रमान्नेन संजज्ञे । गोकुले षष्टपारणं ॥ ६४ ॥ वसुधारा पुष्पवृष्टि–श्चेलोत्क्षेपो जयारवः ॥ दुं-
दुभिध्वनिरेतानि । सदने तस्य जज्ञिरे ॥ ६५ ॥ विहृत्य भगवान् भूमौ । चतुःपंचाशतं दि-
नान् ॥ आगाद्वैवतकोपांत्य–सहस्राम्रवने पुनः ॥ ६६ ॥ तत्राष्टमतपाः स्वामी । वेतसद्रुतले
स्थितः ॥ आश्विने दर्शपूर्वाह्ने । प्राप्तश्चित्रासु केवलं ॥ ६७ ॥ तत्रासनप्रकंपेन । समेत्य त्रिद-
शेश्वराः ॥ वप्रत्रयेण समव–सरणाऽरचनां व्यधुः ॥ ६८ ॥ प्रतिशालं धूपघटी–तोरणध्वज-
दीर्घिकाः ॥ देवच्छंदं मध्यशाले । साऽशोकं च सुरा व्यधुः ॥ ६९ ॥ पूर्वद्वारात्सुवर्णाब्ज–दत्तां-
घ्रिः प्राङ्मुखः प्रभुः ॥ सिंहासनमलंचक्रे । तीर्थाय नम नच्चरन् ॥ ७० ॥ सिंहासनत्रयेऽन्य-
स्मिन् । कृते दिक्षु तिसृष्वपि ॥ मूर्त्तित्रयश्च श्रीनेमे–स्तस्थुस्तत्र सन्ना क्रमात् ॥ ७१ ॥

नद्यानपालकास्तत्र । गत्वा विष्णोर्व्यजिज्ञपन् ॥ कोटीर्द्वादश रूप्यस्य । सार्द्धास्तेभ्यो
ददावसौ ॥ ७२ ॥ सर्वर्द्ध्या वंदितुं तीर्थ–करं हरिरुपागमत् ॥ शृंगीव मालतीं राजी–मत्यपि
प्रह्वमानसा ॥ ७३ ॥ भवांधकूपतो रज्जु–देशीयां देशनां प्रभोः ॥ निशम्य प्रार्थयांचक्रे । व-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रदत्तनृपो व्रतं ॥ ७४॥ तं प्रभुर्दीक्षयामास। द्विसहस्रीनृपान्वितं ॥ बहुकन्यान्वितां राजी–मतीं च समहोत्सवं ॥ ७५ ॥ आजन्मस्वामिपादाज–सेवाबद्धमनोरथां ॥ वीक्ष्य राजीमतीं विष्णुः । पृष्ट्वा ज्ञःस्नेहकारणं ॥७६॥ धनदत्तधनदेवौ। यौ पूर्वभवबांधवौ॥ मंत्री विमलबोधश्च । च्युत्वा तेऽप्यपराजितात् ॥ ७७ ॥ जाता नृपास्त्रयोऽप्यत्र । भवान् श्रुत्वा प्रसंगतः ॥ प्रपन्ना जातवैराग्या । दीक्षां प्रभुपदांतिके ॥ ७८ ॥ तैः सार्द्धं वरदत्ताद्या । एकादश गणाधिपाः ॥ स्थापितास्त्रिपदीं प्राप्य । द्वादशांगान्यसूत्रयन् ॥ ७९ ॥ दशार्हैरुग्रसेनेन । प्रद्युम्नाद्यैः सुतैः समं ॥ भेजे श्रावकतां रामः । सम्यक्त्वं पुनरच्युतः ॥ ८० ॥ शिवारोहिणीदेवक्यो । रुक्मिण्यादिस्नुषान्विताः ॥ प्रभोः पार्श्वे विवेकिन्यः। श्राद्धधर्मं प्रपेदिरे ॥८१॥ एवं चतुर्विधे संघे । जातेऽभूदाद्यपौरुषी ॥ द्वितीयस्यां पौरुष्यां च । गणभृद्धर्ममब्रवीत् ॥ ८२ ॥ कृष्णाहृतबलेरर्हं । तत्राऽऽदायि सुरैर्दिवि ॥ अर्हं विज्ञप्य लोकेन । राज्ञा च जगृहे भुवि ॥ ८३ ॥

यक्षो गोमेधनामासौ–त्रिमुखो नरवाहनः ॥ सिंहयाना तु कुष्मांडी । देवी शासनरक्षिका ॥ ८४ ॥ प्रातीहार्यैः कृताश्चर्यै–र्हृद्यैरतिशयैः सह ॥ विजहार हरन्पापं । भगवानव-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नीतले ॥ ८५ ॥ अनार्येष्वपि देशेषु । लोकाऽलोकप्रकाशकः ॥ जगदुज्जीवयन् स्वामी । भ-व्यलोकानबोधयत् ॥ ८६ ॥ अष्टादश सहस्राणि । बभूवुर्व्रतिनां प्रभोः ॥ चत्वारिंशत्सहस्रा-णि । यक्षिण्यादितपोधनाः ॥ ८७ ॥ श्रावकाणामभूल्लक्षं । नवषष्टिसहस्रयुक् ॥ श्राद्धीनां त्रि-लक्ष्येकोन–चत्वारिंशत्सहस्र्यपि ॥ ८८ ॥ सार्द्धं सहस्रमवधि–मतां केवलिनामपि ॥ अ-पि वैक्रियलब्धीनां । संख्यैकैव पृथक् पृथक् ॥ ८९ ॥ चतुःशती चतुर्दश–पूर्विणां वादिनां पुनः ॥ अष्टशती सहस्रं तु । मनःपर्ययिणामभूत् ॥ ९० ॥ पृथ्वीं विहरतो नेमे–राकेवल-दिनावधि ॥ एतावानेव संपन्नः । श्रीमान् संघश्चतुर्विधः ॥ ९१ ॥ विद्यमाने अप्युपेक्ष्य । व्रत-ज्ञानश्रियौ जिनः ॥ श्रीनेमी रैवतेऽन्यागा–द्बुवुर्षुर्मुक्तिवल्लभां ॥ ९२ ॥

तत्रांत्यदेशनां श्रुत्वा । केचित्सम्यक्त्वमैयरुः ॥ प्रव्रज्यां केऽपि केचिच्च । श्राद्धधर्मं प्रपे-दिरे ॥ ९३ ॥ सार्द्धं तत्र मुमुक्षुणां । षट्त्रिंशैः पंचभिः शतैः ॥ पादपोपगमं प्राप । मासं सं-न्यासमास्थितः ॥ ९४ ॥ आषाढधवलाष्टम्यां । स्वामी चित्रागते विधौ ॥ सिद्धिसीमंतिनी-वक्त्रः–स्थलाऽलंकारतामगात् ॥ ९५ ॥ जाताः प्रद्युम्नशांबाद्याः । कुमारा मुक्तिभाजनं ॥ श्री-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नेमेर्भ्रातरः कृष्ण–महिष्योऽन्ये च साधवः ॥ ९६ ॥ राजीमत्यपि मुक्तात्मा । साध्वी गणमहत्तरा ॥ अन्येद नेमिना प्राप । न वंध्यप्रार्थना जिना ॥ ९७ ॥ छाद्मस्थ्ये वत्सरं तस्थौ । गेहे वर्षचतुःशतीं ॥ पंचवर्षशतीं राजी–मती केवलशालिनी ॥ ९८ ॥ चतुर्थं प्रापतुः कल्पं । पितरौ जिननेमिनः ॥ प्रापुर्वैमानिकीं लक्ष्मीं । दशार्हा अपरेऽपि च ॥ ९९ ॥ अब्दानां त्रिशती बाल्ये । छाद्मस्थ्ये केवले पुनः ॥ शतानि सप्त सर्वायुः । सहस्रमिति नेमिनः ॥ १०० ॥ अतीतैः पंचभिर्वर्ष–लक्षैः श्रीनेमिमुक्तितः ॥ जाता श्रीनेमिनः सिद्धि–र्द्वाविंशस्य जिनेशितुः ॥ १ ॥ निर्माय शिबिकां नेमे–र्धनदेन सुरेश्वरः ॥ तत्राभ्यर्च्य जिनस्यांगं । निदधौ विधिवत्स्वयं ॥ २ ॥ गोशीर्षचंदनैः कृत्वा । चितां नैऋत्यमंडले ॥ विमुक्ता शिबिका तत्र । वह्निं वह्निसुरा व्यधुः ॥ ३ ॥ अज्वालयन् वायुसुराः । शमयामासुरब्दपाः ॥ वासवा जगृहुर्दंष्ट्राः । शेषास्थानि सुरव्रजाः ॥ ४ ॥

वस्त्राणि भूमिपैर्न्यस्म । सुजनैराददे प्रभोः ॥ अंतकृत्यं तु साधूनां । शेषाणां निर्मितं सुरैः ॥ ५ ॥ निर्वाणभूमौ श्रीनेमे–श्चक्रे शक्रेण मंरुपः ॥ वज्रेण लिलिखे नाम । शिलायां

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रैवताचले ॥ ६ ॥ इत्थं नारकिणामपि क्षणमहानंदोर्मिनिर्मापकं । कृत्वा नेमिविभोर्यथोक्तविधिना निर्वाणकल्याणकं ॥ सप्तत्याऽष्टदिनानि शाश्वतजिनानभ्यर्च्य नंदीश्वरे । जग्मुः स्वास्पदमादृतप्रभुगुणाः सर्वेऽपि देवेश्वराः ॥ ७ ॥ इत्थं यथा नेमिजिनेन राजी–मतीं विमुच्याऽष्टभवाऽनुरक्तां ॥ अनुत्तरां कोटिमवापि शीलं । तथा विधेयं भविनाऽनुवेलं ॥ ८ ॥

इति श्रीरुद्रपल्लीयगच्छे श्रीसंघतिलकसूरिपट्टावतंसश्रीसोमतिलकसूरिविरचितायां श्रीशीलोपदेशमालावृत्तौ शीलतरंगिण्यां श्रीनेमिचरित्रे राजीमतीपरिहारप्रभुनिर्वाणगमनो नाम चतुर्थः सर्गः समाप्तः ॥ श्रीरस्तु ॥

शीलपालनमेव दृढयन्नाह—

॥ मूलम् ॥—सिरिमल्लिनेमिपमुहा । साहीणसिवावि बंभवयलीणा ॥ जइ ता किमण्णजीवा । सिढिला संसारवसगावि ॥ ४० ॥ व्याख्या—यदि तावत्स्वाधीनशिवा अवश्यं तद्भवमोक्षगामिनोऽपि श्रीमल्लिनेमिप्रमुखा व्रतलीनाः पाणिग्रहणं परित्यज्य ब्रह्मचर्यमेव निषेवितवंतः, तदा संसारवशगा भवव्यापारपरायत्ता अन्यजीवा अपरे सामान्यप्राणिनः किं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

शिथिलाः? शीलपालने किमर्थं दृढादरा न भवंति? तद्भवसिद्धिगामिनोऽपि यदि शीलमनुशीलयंति तदा संसारमग्नैः सामान्यजीवैः सिद्धिफलार्थं विशेषेण शीलं पालनीयमित्यर्थः ॥४०॥ मल्लिरेकोनविंशस्तीर्थंकरः, नेमिस्तु द्वाविंशः, तच्चरित्रं प्रागुक्तमेव. श्रीमल्लिस्तूच्यते, तथाहि—

यदंककलशो दत्ते । कल्याणं दर्शनादपि ॥ नेमुषां भव्यजीवानां । स श्रीमल्लिजिनः श्रिये ॥ १ ॥ प्रत्यग्विदेहे श्रीजंबू—द्वीपस्य महिमानिधेः ॥ विख्यातो जगदूर्जस्वी । विजयः सलिलावती ॥ २ ॥ तत्रास्ति नगरी वीत—शोका कलिमलोज्झिता ॥ यद्देहममणिन्निः शक्र—कार्मुकश्रीर्धृता दिवि ॥ ३ ॥ तत्र शास्ति बलो राजा । राज्यं प्राज्यपराक्रमः ॥ यद्यशःपुरुषं स्रष्टुं । दलिकानीव तारकाः ॥ ४ ॥ तस्यास्ति वल्लभा नाम्ना । धारिणी शीलधारिणी ॥ धरिणीतो गुणैः कैश्चि—द्युक्तं मात्राधिकास्ति या ॥ ५ ॥ तयोः शौर्यशार्दूलः । सूनुर्नाम्ना महाबलः ॥ क्रमेण यौवनं प्राप । विश्वस्त्रैणवशौषधं ॥ ६ ॥ अथ पंचशतीः कन्याः । चतुःषष्टिकलान्विताः ॥ महोत्सवैर्महानंदा—त्स पित्रा पर्यणाय्यत ॥ ७ ॥ वैश्रमणान्निचंद्राख्यौ । धरणः पूरणो वसुः ॥ अचलश्चेति मित्राणि । षडमून्यस्य जज्ञिरे ॥ ८ ॥ तैः सार्द्धमवियुक्तो-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ऽसौ । षट्कायैर्जीवलोकवत् ॥ चिक्रीड नानाक्रीडाभिः । स्वोचिताभिरशंकितः ॥ ए ॥ विनीतविनयः काले । कलाचार्यस्य सन्निधौ ॥ मित्रावल्या समंग्येव । युक्त एवाददे कलाः ॥ ॥ १० ॥ धर्माचार्यस्य सामग्री–मन्यग्रं प्राप्य कर्हिचित् ॥ तपोऽग्निरिव तैरेवा–ऽन्वितः फलवतीं व्यधात् ॥ ११ ॥ क्रीडालोलतया मित्रैः । साई दुर्ललितस्थितिः ॥ विजहार पुरारामवापीषु सरसीषु च ॥ १२ ॥ प्रापद्युद्यानमन्येद्युः । ससैन्यो बलभूपतिः ॥ ज्ञानिनं प्रवराचार्यं । तत्र दृष्ट्वाऽन्यवंदत ॥ १३ ॥

महात्मापि च योग्यं तं । ज्ञात्वा सहजवत्सलः ॥ मेघगंभीरया वाचा । विदधे धर्मदेशनां ॥१४॥ अज्ञानमृगतृष्णांधाः । प्राणिनो भवकानने ॥ भ्रमंति मृगवत्कामं । सुखभ्रांतिपिपासिताः ॥ १५ ॥ धन्यास्तृणवदुत्सृज्य । भवं दुःखसहस्रदं ॥ स्वर्गापवर्गदां जैनीं । दीक्षामाददति मुदा ॥ १६ ॥ श्रुत्वेत्यचिंतयद्राजा । दीक्षां करीकरोम्यहं ॥ किं तु राज्यधुरं धर्त्तुं । न क्षमोऽद्यापि मे सुतः ॥ १७ ॥ इत्यादि चिंतयंतं तं । पुनर्मुनिरुपादिशत् ॥ जैत्रे कर्मबले केयं । चिंता जागर्ति ते हृदि ॥ १८ ॥ शैशवं यौवनं वापि । वृद्धत्वं वा न कारणं ॥ किंतु पू-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वार्जितं कर्म । सुखदुःखफलप्रदं ॥ १९ ॥ तिरश्चामशरण्यानां । रागादिव्याकुलात्मनां ॥ मुक्त्वैकं प्राक्तनं कर्म । कोऽपि नो शरणं वने ॥ २० ॥ तत्त्वापि वृथा चिंता । सूनो राज्यधुरो धृतौ ॥ सर्वेऽपि प्राणिनोऽवश्यं । स्वकृतं कर्म भुंजते ॥ २१ ॥ किंचायुर्वायुसंघ्राम्य–दश्वत्तदलचंचलं ॥ यौवनं विद्युदुर्जस्वि । शरीरं क्षणनश्वरं ॥ २२ ॥ प्रेम दर्भोदकस्थेम । विन्नवा अपि न ध्रुवाः ॥ तस्मादात्महितं कार्यं । कोऽपि न क्वाऽपि कस्यचित् ॥ २३ ॥ ततो वीतविकल्पात्मा । वैराग्यैकतरंगितः ॥ श्रामण्यमुररीचक्रे । द्विधाशिक्षाविचक्षणः ॥ २४ ॥ तपसाऽष्टापि कर्माणि । क्षपयित्वा क्षमापतिः ॥ प्रांते केवलमुत्पाद्य । मुक्तेः शृंगारतामगात् ॥ २५ ॥ सुमुहूर्त्ते ततोऽमात्य–सामंताद्यैर्महाबलः ॥ स्थापितः पैतृके राज्ये । यथावच्च तदन्वशात् ॥ २६ ॥ महाबलमहीपालः । षड्भिर्मित्रैर्बलैरिव ॥ अवियुक्तः प्रजां शास्ति । प्रतापत्रासिताऽहितः ॥ २७ ॥ देवी कमलवत्याख्या । तस्य सर्वांगसुंदरं ॥ असूत समये पुत्रं । प्राचीव रविमंडलं ॥ २८ ॥ महद्ध्यां कारयित्वा च । सूनोर्जन्ममहोत्सवं ॥ द्वादशाहेऽन्निधां तस्य । बलभद्र इति व्यधात् ॥ २९ ॥ स प्राप परमां प्रौढिं । सर्वांगीणश्रिया सह ॥ पांच-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

जन्य इवांभोधौ । पुरुषोत्तमसंश्रयः ॥ ३० ॥ ततः शस्त्रेषु शास्त्रेषु । पारीणः श्रीमहाबलः ॥ यौवराज्ये पदे सूनु–मभिषिक्त महौजसं ॥ ३१ ॥ तस्मिंश्च राज्यकार्येषु । यतमाने नयात्मनि ॥ कृतकृत्यः स्वयं राजा । जिनधर्मोद्यतोऽभवत् ॥ ३२ ॥ दानशीलतपो भाव–शासनोत्सर्पणादिभिः ॥ विदधे सफलं जन्म । धर्मकृत्यैरनारतं ॥ ३३ ॥ अन्येद्युर्विभ्रमभ्रांतैः । सेव्यमानं जडैर्जनैः ॥ दृष्ट्वा पाखंडिनं कंचि–दध्याविति महाबलः ॥ ३४ ॥ धन्याः कर्मैव जानानाः । शुभाऽशुभफलायति ॥ मुनयस्तारयंतीह । स्वं परं च भवांबुधेः ॥ ३५ ॥ धिक् धिक् पाखंडिनो व्याधा । मंत्रतंत्रादिगीतिभिः ॥ भवपाशे मूढजीवान् । पातयंति मृगानिव ॥ ॥ ३६ ॥ निर्विवेकोपकारादि–धर्माभासप्ररूपकाः ॥ मूढाः स्वं वंचयंतीहा–ऽवर्जितो मूढधार्मिकान् ॥ ३७ ॥

इत्यादिभववैराग्यैः । शुद्धधर्मैकबद्धधीः ॥ सोऽन्यषिंचत्सुतं राज्ये । स्वयं संयमकाम्यया ॥ ३८ ॥ पार्श्वे श्रीवीरधर्माख्य–गुरोर्मित्रसमन्वितः ॥ जग्राह दीक्षामक्षीण–भावतः श्रीमहाबलः ॥ ३९ ॥ सप्ताऽपि मुनयस्तेऽथ । भयप्रतिभटा इव ॥ चारित्रं पालयामासुः । क-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

र्माष्टकजिगीषया ॥ ४० ॥ तपोग्निः सर्वतोभद्र–सिंहनिष्क्रीडितादिभिः ॥ कर्माणि क्षपयामासुः । शिवश्रीस्पृहयालवः ॥ ४१ ॥ सुविशिष्टफलाकांक्षी । तपस्वी स महाबलः ॥ तपःप्रांतेऽपि नाऽकार्षी–त्पारणं रोगदंभतः ॥ ४२ ॥ महाबलर्षिः कुर्वाणो । विशिष्टां स तपःक्रियां ॥ बबंध मायया स्त्रीत्व–महो मोहविजृंभितं ॥ ४३ ॥ विंशत्या स्थानकैरर्ह–द्भक्त्याद्यैर्विधिवत्कृतैः ॥ तीर्थंकृन्नामकर्मत्वं । स ओजस्वितयाऽर्जयत् ॥ ४४ ॥ चतुर्भिरधिकाशीति–पूर्वलक्षमितायुषः ॥ विधायाऽनशनं प्रांते । समापि मुनिसत्तमाः ॥४५॥ जातास्ते वैजयंताख्ये । विमानेऽनुत्तरे सुराः ॥ सागराणां त्रयस्त्रिंश–दायुर्देवमिवाऽनयन् ॥ ४६ ॥ युग्मं ॥

इतश्च जंबूद्वीपस्य । केलीगेहे किल श्रियः ॥ दक्षिणे भरते देशो । विदेह इति विश्रुतः ॥ ४७ ॥ तत्र पूरस्ति मिथिला । वीक्ष्य यस्याः समृद्धितां ॥ भवंति शिथिलाः स्वर्ग–वासाय त्रिदशांगनाः ॥ ४८ ॥ भूपः श्रीकुंभनामास्ति । तत्रेक्ष्वाकुकुलोद्भवः ॥ यशःकुंभ इवाऽऽभाति । यस्य व्योम्नि सुधारुचिः ॥ ४९ ॥ प्रभावतीति तस्याऽभू–द्भार्या शीलविभूषिता ॥ यस्या गुणौघसंख्याने । तारा रेखा इवाऽबभुः ॥ ५० ॥ महाबलस्य जीवोऽथ । वैजयंतवि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मानतः ॥ ज्ञानत्रययुतो यत्नन् । सुखं नारकिणामपि ॥ ५१ ॥ अश्विन्यां फाल्गुनश्वेत–चतु-र्थ्यां रजनीत्नरे ॥ राजहंस इवांत्नोजे । देव्याः कुक्षाववातरत् ॥ ५२ ॥ युग्मं ॥ महाबलत्न-वे माया । यत्नच्यधायि तपस्यपि ॥ तेन तीर्थंकरत्वेऽपि । स्त्रीत्वेनासावजायत ॥ ५३ ॥ नि-शांते महिषी वीक्ष्य । महास्वप्नांश्चतुर्दश ॥ उल्लसत्पुलंकाकूरा । निद्रामुद्राममुंचत ॥५४॥ गत्वाख्यत नरेंऽस्य । देव स्वप्नाश्चतुर्दश ॥ गजादयो मया वक्त्रे । प्रविशंतो निरीक्षिताः ॥ ॥ ५५ ॥ फलं कीदृक् तदेतेषां । स्वामिन् त्नावीति कथ्यतां ॥ राजापि मुदितः स्वांते । रा-ज्ञीमित्नमत्नाषत ॥ ५६ ॥ एतैर्देव महास्वप्नै–र्महालात्नो त्नविष्यति ॥ प्रवर्द्धिष्यामहे को-श–कोष्ठागारैः समंततः ॥ ५७ ॥ सुखेन साधयिष्यंते । दुस्साध्या अपि शत्रवः ॥ संत्नाव्यं-ते च त्नाविन्य । त्नत्तरोत्तरसंपदः ॥ ५८ ॥

किं च त्वं समये पूर्णे । शुत्नलक्षणलक्षितं ॥ कुलप्रदीपकं धीर–मपत्यं प्रसविष्यसि ॥ ॥ ५९ ॥ पत्युर्वचनमाकर्ण्य । कर्णपीयूषपारणं ॥ सा निनाय निशाशेषं । धर्मजागरणोद्यता ॥ ६० ॥ त्रिदशैः सततोपास्या । सह त्नर्तृमनोरथैः ॥ बत्नार महिषी गर्भं । निधानमिव मे-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दिनी ॥ ६१ ॥ यदियेष महीपालः । कर्म पुंसवनादिकं ॥ तदा कारयितुं तच्च । चक्रे शक्रादिभिः स्वयं ॥ ६२ ॥ गर्भपोषकरैस्तैस्तै–र्विहाराहारकर्मभिः ॥ देशकालोचितैर्गर्भं । सा पुपोष यथासुखं ॥ ६३ ॥ तृतीये मासि संजातः । शुभगर्भानुभावतः ॥ दोहदो माध्यशय्याया–स्तस्या देवैरपूर्यत ॥ ६४ ॥ अथ मार्गस्य शुभ्रैका–दश्यामश्विनिगे विधौ ॥ तेजोऽपास्तप्रदीपाभां । सर्वांगीणसुलक्षणां ॥ ६५ ॥ तालेऽनीलनीलांगीं । कुंभलांछनलक्षितां ॥ सुषुवे तनयां राज्ञी । प्राच्यर्कप्रतिमामिव ॥ ६६ ॥ युग्मं ॥ क्षणं नारकिजीवाना–मपि जाता सुखासिका ॥ तेजःपुंजैरिवालीढ–मजनिष्ट तदा जगत् ॥ ६७ ॥ प्रकाशतां दिशः प्राप्ता । ववुर्वाताः सुखावहाः ॥ आनंदमेदुरं चाऽभू–द्योगिचित्तमिवाऽखिलं ॥ ६८ ॥

इतश्चाधोनिवासिन्यः । सद्यः प्रचलितासनाः ॥ कुमार्योऽष्टावधिना । ज्ञात्वा जन्म जिनेशितुः ॥ ६९ ॥ सयानाः सपरीवारा । निजकृत्यचिकीर्षया ॥ तत्रागत्य नमश्चक्रु–र्जिनं च जिनमातरं ॥ ७० ॥ युग्मं ॥ जगन्मातर्न भेतव्य–मित्युदीर्य सभक्तिकं ॥ स्वात्मानं ज्ञापयंत्यस्ताः । स्थाने पूर्वोत्तरे स्थिताः ॥ ७१ ॥ विधाय स्तंभसंयुक्तं । प्राङ्मुखं सूतिकागृहं ॥ च-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

कुः संवर्त्तवातेन । शुद्धमायोजनावधि ॥ ७२ ॥ ऊर्ध्वलोकनिवासिन्यो–ऽष्टावाशाकुमारिकाः ॥ समेत्यासनकंपेन । कनकाचलशृंगतः ॥ ७३ ॥ अभिषिच्य सुगंधांबु–वर्षेणाऽऽयोजनावनिं ॥ विधाय पुष्पवृष्टिं च । गुणान् जैनानगासिषुः ॥ ७४ ॥ पौरस्त्यरुचकाङ्स्थिा । अष्टौ दिक्कुमारिकाः ॥ प्राच्यां समंगलारावा–स्तस्थुरादर्शपाणयः ॥ ७५ ॥ अष्टावपाच्यरुचका–दागता दिक्कुमारिकाः ॥ गायंत्यो दक्षिणाशायां । तस्थुर्भृंगारपाणयः ॥ ७६ ॥ प्रत्यगरुचकतोऽप्यष्टौ । एत्य व्यजनपाणयः ॥ पश्चिमे च स्थिता मातु–र्जिनस्य च गुणान् जगुः ॥ ७७ ॥ उदीच्यरुचकाङ्स्था । अष्टावेत्य कुमारिकाः ॥ उत्तरेण स्थिता गेयं । चक्रुश्चामरपाणयः ॥ ७८ ॥ विदिग्रुचकशैलस्था–श्चतस्रश्च कुमारिकाः ॥ गायंत्योऽस्थुर्दीपहस्ता । ईशानादिविदिक्स्थिताः ॥ ७९ ॥ चतस्रो रुचकद्वीपा–दन्येत्याशाकुमारिकाः ॥ धरिण्यां विवरं कृत्वा । नाभिनालं निचिक्षिपुः ॥ ८० ॥ प्राग्दक्षिणोत्तराशासु । जिनजन्मगृहादथ ॥ रंभागृहत्रयं चक्रु–श्चतुःशालविराजितं ॥ ८१ ॥ सिंहासनत्रयं तत्र । प्रत्येकं च विचक्रिरे ॥ अथ क्रमेण ता न्यस्य । जिनं तत्र सहांबया ॥ ८२ ॥ लक्षपाकेन तैलेना–ऽभ्यंनंजुस्तौ सुगंधिना ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नद्वर्त्य स्नपयित्वा चा–ऽमृजन्नंगानि वाससा ॥ ८३ ॥ दूष्ये आमोचयामासु–स्तयोराभरणानि च ॥ गोशीर्षचंदनैरेता । अथो होमं वितेनिरे ॥ ८४ ॥ भस्मना तेन ते चक्रु–रक्षापोट्टलिकां प्रभोः ॥ कर्णौते वादयामासु–राद्यमनौ गोलकौ मिथः ॥ ८५ ॥

इति भक्तिक्रमं कृत्वा । ववल्गुर्ननृतुश्च ताः ॥ जगुर्मंगलगीतानि । गुणांश्च परमेशितुः ॥ ८६ ॥ तदानीं शाश्वतीर्घंटाः । स्वर्गेषु निनदुः समं ॥ हृदयैः सममिंद्राणा–मासनानि चकंपिरे ॥ ८७ ॥ अथो मनः समाधाय । सौधर्माधिपतिः क्षणं ॥ विज्ञायाऽवधिना जन्म । जैनं घंटामवादयत् ॥ ८८ ॥ तन्नादतः सावधानी–भूतास्त्रिदशकोटयः ॥ सेनानीवचसा शक्र–पार्श्वे सर्वेऽप्यमीमिलन् ॥ ८९ ॥ तत्कालं पालकेनापि । क्लृप्तमिन्द्रानुगामुकं ॥ लक्षयोजनविस्तार–मंतर्माणिक्यपीठिकं ॥ ९० ॥ पंचयोजनशत्युच्चं । विमानं पालकाभिधं ॥ आरुरोह हरी रूपं । विधायोत्तरवैक्रियं ॥ ९१ ॥ युग्मं ॥ अदभ्रदुंदुभिध्वान–बधिरीकृतदिङ्मुखः ॥ समं समग्रसामग्र्या । प्रतस्थे मिथिलांप्रति ॥ ९२ ॥ गत्वा द्वीपेऽष्टमे नंदी–श्वरे रतिकराचले ॥ नपक्रमैरिवायुष्कं । विमानं स समक्षिपत् ॥ ९३ ॥ एकोनविंशतीर्थेश–जन्मगेहमथागतः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ परीत्य सूतिकागेहं । त्रिर्ननाम जिनं च सः ॥ ९४ ॥ पुनर्नत्वा सुराधीशो । जिनं च जिनमातरं ॥ देवीं प्रज्ञावतीं मूर्ध्नि । बद्धांजलिरजाषत ॥ ९५ ॥ रत्नकुक्षे जगन्मात—र्नमस्तुभ्यं कृपावति ॥ पुत्रिणीषु धुरीणासि । त्वमेव भुवनत्रये ॥ ९६ ॥

जिनस्यैकोनविंशस्य । जन्मोत्सवविधित्सया ॥ आगतोऽहं न भेतव्यं । भवत्येत्यवदत्तदा ॥ ९७ ॥ देव्याः सपरिवाराया । दत्वाऽवस्वापिनीं हरिः ॥ श्रीमन्मल्लेः प्रतिबिंबं । मातुः पार्श्वे निवेश्य च ॥ ९८ ॥ स्वामिनं सममेवाहं । पंचकल्याणकाश्रयं ॥ सेवामीतीव शक्रेण । पंचधात्मा व्यधीयत ॥ ९९ ॥ युग्मं ॥ गोशीर्षचंदनालिप्ते । जग्राह करसंपुटे ॥ प्रभुमेकेन रूपेण । निधानमिव दुर्गतः ॥ १०० ॥ पृष्टतश्चैकरूपेण । पिंभीकृत्येव तद्यशः ॥ दधार स्वामिनो मूर्ध्नि । श्वेतमातपवारणं ॥ १ ॥ पार्श्वयोर्मूर्त्तियुग्मेन । भुवनेशे स्पृहावती ॥ श्रोतसी इव गंगाया—श्चामरौ दुधुवे हरिः ॥ २ ॥ पुरतः पुनरेकेन । वज्रमुल्लालयन् ययौ ॥ पितुरग्रे विशेषार्थी । कूर्दमान इवार्भकः ॥ ३ ॥ अतिपांडुकंबलायां । शिलायां कनकाचले ॥ निषसाद निजोत्संग—शृंगारीकृततीर्थकृत् ॥ ४ ॥ तथैवासनकंपेन । त्रिषष्टिरपरेऽप्यथ ॥ अच्युताद्याः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सुराधीशाः। समीयुः स्वस्वरूद्धिभिः ॥ ५ ॥ ईश द्वात्रिंशदर्केंदू। विंशतिर्भुवनाधिपाः ॥ दश वैमानिकाः शक्रा–श्चतुःषष्टिरिहाऽमिलन् ॥ ६ ॥ विचित्रैः कलशैस्तीर्थो–दकपूर्णैर्महर्द्धिभिः ॥ नांदीन्निर्वाद्यमानान्नि–र्जिननाथमसिस्नपन् ॥ ७ ॥

विकृत्य पंच रूपाणि । स्वांके जिनमधारयत् ॥ अथेशानस्ततः स्नात्रं । सौधर्माधिपतिर्व्यधात् ॥ ८ ॥ जिनस्नात्रोदकं देवै–र्जगृहे सिद्धचूर्णवत् ॥ लगितं तत्तदंगेषु । महार्थान्नरणादिवत् ॥ ९ ॥ तन्मृज्य गंधकाषाय्या । चंदनाद्यैर्विलिप्य च ॥ दिव्यवासोन्निरन्यर्च्य । मुकुटं मूर्द्धनि व्यधात् ॥ १० ॥ न्यधत्त कर्णयोः स्वर्ण–कुंडले त्रिजगत्पतेः ॥ दिव्यमुक्तालतां कंठ–कंदलेऽग्र न्यवीविशत् ॥११॥ अंगदे भुजयोर्न्यस्ते । वलये मणिबंधयोः ॥ कटीदेशे कटीसूत्रं । न्यधात्किंकिणिकाकुलं ॥ १२ ॥ माणिक्यकटके स्वामि–पादयोर्निहिते तदा ॥ परस्परस्य शोभायै । मंडनान्यभवन् विभोः ॥ १३ ॥ अभ्यर्च्य दामभिः कृत्वा । कल्पद्रुमिव जंगमं ॥ रूप्यलाजैर्मणिपट्टे । लिलेखाग्रेऽष्टमंगलीं ॥ १४ ॥ आरात्रिकमथोत्तार्य । सौधर्मेंद्रः पुरः प्रभोः ॥ नृत्यमानासु देवीषु । स्वयं संगीतकं व्यधात् ॥ १५ ॥ स्तुत्वा च शक्र ईशा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नो–त्संगतो रंगमेदुरः ॥ विकृत्य पंचधात्मानं । जिनं पूर्ववदाददे ॥ १६ ॥ त एव च सुरा-
धीशाः । सर्वेऽपि सपरिच्छदाः ॥ गत्वा नंदीश्वरेऽष्टाह्नीं । विधाय स्वास्पदं ययुः ॥ १७ ॥ सौध-
र्मेशः पुनः सूति–गेहं गत्वा जिनाधिपं ॥ व्यमुंचज्जननीपार्श्वे–स्वापिनीं संजहार च ॥ १८ ॥
दुकूलयुगलं चैकं । प्रन्योरुच्चैर्धकेऽमुचत् ॥ न्यधत्त भक्त्या तत्रैव । रत्नकुंडलयामलं ॥ १९ ॥
विचित्रस्वर्णरत्नाढ्य–मेकं श्रीदामगंडकं ॥ प्रन्योर्नेत्रविनोदाय । विताने निदधौ हरिः ॥ २० ॥
अथो पुरंदरादेशा–द्धनदः कुंभवेश्मनि ॥ ववर्ष हेमरत्नानां । कोटीर्द्वात्रिंशतं पृथक् ॥ २१ ॥
यद्यत्सुदुर्लभं लोके । यच्च सौख्यविधायकं ॥ स्वामिभक्त्या नृपागारे । तत्तत्सर्वमपूपुरत् ॥
॥ २२ ॥ जिनस्य जिनमातुश्च । यो दुष्टं चिंतयिष्यति ॥ तस्याऽर्जकमंजरीव–द्विदलिष्या-
मि मस्तकं ॥ २३ ॥

इत्यमाघोषयद्देवै–र्वज्रपाणिर्जगत्त्रये ॥ जिनजन्तुरथांगुष्ठे । पीयूषं समचारयत् ॥ २४ ॥ ॥१५८॥
क्षीरपानं वपुःस्नानं । मंडनक्रीडने तथा ॥ अंकधात्री च पंचापि । धात्र्यस्तस्थुः सुरांगनाः॥
॥ २५ ॥ ततो नंदीश्वरे प्राच्य–दिशि श्रीअंजनाचले ॥ शाश्वताऽष्टाह्निकां कृत्वा । शक्रोऽग-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

द्यथाऽऽगतः ॥ २६ ॥ दृष्ट्वा विन्नूषितां कन्यां । महिषी हर्षनिर्न्नरा ॥ तं देवेंद्रादिसंपातं । स-
विस्मयतयाऽस्मरत् ॥ २७ ॥ आकर्ण्य कुंन्नन्नूपोऽपि । तत्सर्वं मुदिताशयः ॥ पुत्रेन्योऽप्यधि-
कं तस्या । जन्मोत्सवमचीकरत् ॥ २८ ॥ सप्तांगेष्वपि राज्यस्य । दृष्ट्वा वृद्धिमनुत्तरां ॥ त-
ज्जन्मनि प्रन्नूतानि । तुष्टिदानान्यदापयत् ॥ २९ ॥ न्नवगुप्तेरसावेव । ध्रुवं मुक्तिं करिष्यति
॥ इतीव न्नून्नृतादिष्टः । कारामोक्षस्तदाऽखिलः ॥ ३० ॥ युक्तं कुंन्ननृपोऽकार्षी–न्निर्दंडां पृ-
थ्विीं तदा ॥ यन्मोक्षति वर्द्धमाना । दंडत्रयमसावपि ॥ ३१ ॥ वृद्धिहेतुरसावेव । कन्या स-
कलसंपदां ॥ इतीव सर्वमानानां । वृद्धिमाज्ञापयन्नृपः ॥ ३२ ॥ एषैव मोहनिशायाः । कर्त्री
जागरणक्रियां ॥ इतीव कारयामास । षष्ठीजागरणोत्सवं ॥ ३३ ॥ एकादशाहे सन्मान्य ।
ज्ञातिवर्गं महर्द्धितः ॥ माल्यदोहदतश्चक्रे । तस्या मल्लिरिति प्रथां ॥ ३४ ॥ देवीन्निर्लाल्यमा-
नासौ । मनोवांछितकेलिन्निः ॥ ववृधे कल्पवल्लीव । नंदनोद्यानमध्यगा ॥ ३५ ॥ कर्मक्षयो-
पशमान्या–मुपाध्यायाऽनपेक्षया ॥ आविरासन् कलाः सर्वा–स्तस्या न्यासीकृता इव ॥३६॥
पंचविंशतिचापोच्चा। पुण्यलावण्यनिर्न्नरा॥ श्रीमल्लिः प्राप तारुण्यं। ज्ञानत्रयपवित्रिता ॥३७॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

इतश्च भरतेऽत्रैव । श्रीमत्साकेतपत्तने ॥ वैजयंतादवातारी–ज्जीवः श्रीअचलस्य सः ॥ ॥ ३८ ॥ प्रतिबुद्धिरितिख्यात–स्तत्रैव स नृपोऽजनि ॥ प्रिया पद्मावतीत्यस्ति । तस्य प्रेमवतीतरां ॥ ३९ ॥ अन्यदा नागयात्रायै । गतः क्वापि प्रियायुतः ॥ पुष्पमुद्भरमद्राक्षी–त्पुष्पमंजरिकां च सः ॥ ४० ॥ एतद् द्वयं प्रियां तां च । स निरीक्ष्य मुहुर्मुहुः ॥ रत्नत्रयमिदं लोके । प्रशंसां व्यतनोदिति ॥ ४१ ॥ श्रुत्वा सुबुद्धिनामा त–न्मंत्री नृपतिमब्रवीत् ॥ देव कोऽत्र मदोऽयं ते । बहुरत्ना वसुंधरा ॥ ४२ ॥ यादृशी कुंभभूपस्य । मल्लिसंज्ञास्ति कन्यका ॥ न क्वापि दृश्यते तादृग् । रूपरेखा जगत्त्रये ॥ ४३ ॥ जाने स्वसृष्टेरुत्कर्ष–दिदृक्षायां कुतूहली ॥ वेधाः ससर्ज तामेव । मल्लिं माद्यमिव स्त्रियां ॥ ४४ ॥ श्रुत्वेति प्राग्भवारूढ–जागरूकाऽनुरागतः ॥ प्रजिघाय वरीतुं तां । दूतं कुंभनृपांतिके ॥ ४५ ॥ च्युत्वा धरणजीवोऽपि । वैजयंतविमानतः ॥ बभूव पृष्टचंपायां । चंद्रछायानिधो नृपः ॥ ४६ ॥ श्रेष्टी तत्र नयाभिख्यो । जिनधर्मसुनिश्चलः ॥ वणिज्यायै यानपात्र–मारुरोह स चाऽन्यदा ॥ ४७ ॥ जिनधर्मास्थिरत्वेऽस्य । प्रशंसाऽकारि वज्रिणा ॥ तत्रैकस्त्रिदशस्तस्य । न सेहे तामसूयतः ॥ ४८ ॥ अवती-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

र्य गतोंऽभोधौ । चक्रे तत्पोतमाकुलं ॥ अब्रवीच्च सुरस्तस्य । धर्मस्थैर्यं परीक्षितुं ॥ ४९ ॥ जिनधर्मं परित्यज्य । यदि मां श्रयते ऽनवान् ॥ तारयामि तदा पोतं । पश्यामुं मग्नमन्यथा ॥ ॥ ५० ॥ को नाम गत्वरप्राण–त्राणमात्रकृते सुधीः ॥ जहाति जैनं श्रीधर्मं । परत्रेह च शर्मदं ॥ ५१ ॥

इत्यादिभिः परीक्षाभि–र्दृष्टसत्त्वस्य तस्य सः ॥ प्रत्यक्षीभूय देवेंद्र–श्लाघासंबंधमाख्यत ॥ ५२ ॥ अमोघदर्शना देवा । भवंतीति मुदा वदन् ॥ दिवं गतो वितीर्यास्मै । स कुंडलचतुष्टयं ॥ ५३ ॥ क्षेमेणोत्तीर्य पाथोधिं । नयोऽपि मिथिलां ययौ ॥ प्राभृते तत्र कुंभस्य । कुंडलद्वितयं ददौ ॥५४॥ तदागतायै श्रीमल्लि–कन्यायै च नृपो ददौ ॥ क्रयाणकादि विक्रीय । श्रेष्टी चंपामथासदत् ॥ ५५ ॥ चंद्रछायनृपायाऽदा–ल्लेषं तत्कुंडलद्वयं ॥ पप्रच्छ सोऽपि तच्छ्रुत्वा–वृत्तांतं विस्मिताशयः ॥ ५६ ॥ नयस्ततो यथावृत्त–कथारंभप्रसंगतः ॥ चक्रे कुंभतनूजायाः । श्रीमल्लेः रूपवर्णनं ॥ ५७ ॥ दर्शं दर्शं मया स्वामिं–स्तस्या रूपमनन्यजं ॥ दृष्टव्यदर्शनात्तत्र । नयने सफलीकृते ॥ ५८ ॥ आकर्ण्य प्राक्तनस्नेह–मोहतः सोऽपि सत्वरं ॥ स्वदूतं प्रेष-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यामास । वरीतुं कुंभकन्यकां ॥ ५९ ॥ च्युतः पूरणजीवोऽपि । श्रावस्त्यां वैजयंततः ॥ रु-
क्मिनामाऽभवद्राजा । धारिणी तस्य वल्लभा ॥ ६० ॥ अन्यदा निजकन्याया । रूपमुद्वीक्ष्य
विस्मितः ॥ स कंचुकिनमप्राक्षी–देकं देशांतराऽागतं ॥ ६१ ॥ मत्पुत्र्या यादृशं रूपं । विभू-
तिश्च विलोक्यते ॥ तादृशी क्वापि चेद् दृष्टा । तदा वद ममाग्रतः ॥ ६२ ॥ देव स्वेष्टानुकूल-
त्वे । यथाऽहंदमुदीर्यते ॥ गुणाऽगुणविशेषस्त–न्मध्यस्थैरवबुध्यते ॥ ६३ ॥ मनोरागेण मन्यं-
ते । दोषा अपि गुणा इव ॥ पक्षपातमनादृत्य । चेद्विशेषोऽवधार्यते ॥ ६४ ॥ तदा शृणु म-
हीनाथ । मिथिलायां महापुरि ॥ यादृक् कुंभसुतामल्लि–रूपं न क्वापि तादृशं ॥ ६५ ॥
त्रिभिर्विशेषकं ॥

सौभाग्यादिविभूतिश्च । यादृक् तस्यां विलोक्यते ॥ देवीष्वपि न सा क्वापि । शेषयो-
षासु का कथा ॥ ६६ ॥ श्रुत्वा तत्कालमुत्ताल–प्राक्प्रेमभरनिर्भरा ॥ तदर्थं नृपकुंभांते । स्वं
दूतं विससर्ज सः ॥ ६७ ॥ च्युत्वाऽथ वसुजीवोऽपि । वाराणस्यां महापुरि ॥ शंखनामाऽभ-
वद्भूपः । स्तूपः किल जयश्रियां ॥ ६८ ॥ खलचित्तमिवाऽन्येद्यु–र्भग्ने ते मल्लिकुंडले ॥ ददौ

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सुवर्णकाराय । समारचयितुं नृपः ॥ ६९ ॥ सोऽप्याह देव नो दिव्य–वस्तु संधातुमीश्वरः ॥ ततो निर्वासितो राज्ञा । गतो वाराणसीमसौ ॥ ७० ॥ राजानं द्रष्टुमन्येद्यु–र्मध्ये राजसभां ययौ ॥ देशाश्चर्यकथां पृष्टो । मल्लिरूपमवर्णयत् ॥ ७१ ॥ श्रुत्वा सोऽपि पुराऽन्यस्त–शस्त्रस्नेहवशंवदः ॥ दूतं संप्रेषयामास । तस्या वरणहेतवे ॥ ७२ ॥ जीवो वैश्रमणस्यापि । च्युत्वा श्रीवैजयंततः ॥ अदीनशत्रुनामासी–द्राजा श्रीहस्तिनापुरे ॥ ७३ ॥

एकदा मल्लिसोदर्यो । लघुर्मल्ल इति श्रुतः ॥ वैदेशीयैश्चित्रकृद्भि–श्चित्रशालामचित्रयत् ॥ ७४ ॥ एकश्चित्रकरस्तेषु । देवतावरलब्धिमान् ॥ दृष्ट्वैकदेशं सर्वांग–रूपचित्रक्रियाक्षमः ॥ ॥ ७५ ॥ मल्लोऽपि कर्हिचित्तत्र । प्रविष्टश्चित्रशालिकां ॥ मल्लिं साक्षादिव ज्ञात्वा । व्यावृत्तः सहसा ह्रिया ॥ ७६ ॥ श्रीमल्लेश्वरणांगुष्टं । कदाचिज्जालकांतरे ॥ स दृष्ट्वा चित्रयामास । तद्रूपं च यथास्थितं ॥ ७७ ॥ धात्री सम्यग्निरीक्ष्याथ । निजगाद कुमारकं ॥ चित्रप्रतिकृतौ वत्स । वृथा भ्रांतोऽसि गच्छ तत् ॥ ७८ ॥ कुपितः पाणिं संदंश । छेदयित्वाथ तस्य सः ॥ मल्लश्चित्रकरं स्वीय–देशतो निरवासयत् ॥ ७९ ॥ भ्रमन् देशांतराण्येष । गतः श्रीहस्तिनापुरं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ समये मल्लिरूपं चा–ऽदीनशत्रुपुरोऽवदत् ॥ ८० ॥ तदा पूर्वभवोद्यद्ग–रागमग्नमना नृपः ॥ मल्लिं शल्यमिव ध्यायन् । प्राहिणोद् दूतमात्मनः ॥ ८१ ॥ अभिचंद्रस्य जीवोऽपि । च्युतः श्रीवैजयंततः ॥ जितशत्रुरिति क्ष्मापः । श्रीकांपील्यपुरेऽभवत् ॥ ८२ ॥ कापि पाखंडिनी वक्ति । धर्मं शुद्धांतयोषितां ॥ जिगाय मल्लिकन्या तां । विवादे धर्मगोचरे ॥ ८३ ॥ निर्गता मिथिलातः सा । कांपिल्यनगरेऽगमत् ॥ श्रीमल्ले रूपमाचख्यौ । जितशत्रुनृपाग्रतः ॥ ८४ ॥

पुरातनभवोन्मील–दनुरागतरंगितः ॥ सोऽपि तद्वरणाय स्वं । दूतं प्रैषीत्तदंतिके ॥८५॥ श्रीमन्मल्लिरपि प्राप्य–स्नेहतः प्रार्थनाश्चताः ॥ विज्ञायावधिना तेषां । मित्राणां प्रबुभुत्सुनां ॥ ८६ ॥ स्वसौधमध्यगाऽशोको–द्यानगर्भगृहेऽन्यदा ॥ पीठं निर्मापयामास । रत्नौघरुचितां बरं ॥ ८७ ॥ तत्र हेममयीं स्वस्य । मूर्त्तिं रत्नविकस्वरां ॥ स्वर्णाम्भोजपिधानां च । तालुस्थि-ड्डे न्यधापयत् ॥ ८८ ॥ तादृग्रत्ननिवेशेन । स्पष्टिताऽवयवावली ॥ विज्ञैरपि सजीवेव । ज्ञा-यते या विलोकनात् ॥ ८९ ॥ सौधे च जालकाकीर्णे । कपाटावलिमालितं ॥ श्रीमल्लिः का-रयामास । द्वारषट्कमुदारधीः ॥ ९० ॥ प्रतिमापृष्ठगे कुड्ये । छिद्रं निर्माप्य मेधया ॥ सर्वा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

हारमयीं पिंडीं । तेन द्वारेण नित्यशः ॥ ९१ ॥ प्रक्षिप्य प्रतिमातालु–देशस्थविवरांतरे ॥ स्वर्णांबुजपिधानेन । सा रंध्रं पिदधौ पुनः ॥ ९२ ॥ ॥ युग्मं ॥ षण्णामपि नरेंद्राणां । ते दूताः कुंजनृपतेः ॥ ययाचिरे विवाहाय । तेषां मल्लिं तनूजवां ॥ ९३ ॥ युष्मादृशानां सौ-भाग्यै–र्न हार्यं मत्सुतामनः ॥ इति तेनापि दूतास्ते । निरस्ताः स्वास्पदं ययुः ॥ ९४ ॥ ते-ऽपि दूतोदितं श्रुत्वा । क्रुद्धा मंत्रमिति व्यधुः ॥ प्राग्भवाऽभ्यासतो धाव–त्प्रीतिसौहार्दमेदुराः ॥ ९५ ॥ आस्तां सौभाग्यलावण्य–भाग्योत्कर्षपरंपराः ॥ व्योम्नोऽपि पतिता ताव–त्कन्याऽवश्यं पतिंवरा ॥ ९६ ॥ परमन्यत्र रक्तोऽसौ । नैवास्माकं प्रदित्स्यति ॥ प्रसह्य परिणेष्याम–स्तस्मादेनामितीर्ष्यया ॥ ९७ ॥ सर्वान्निसारैः संभूय । क्रोधद्रूभंगिभंगुराः ॥ मिथिलां रुरु-धुः प्राच्य–कर्माणीव शरीरिणं ॥ ९८ ॥ किं कर्त्तव्यतया मूढ–मथ कुंभमहीपतिं !! प्रत्यु-त्पन्नमतिर्मल्लि–र्बभाण ललितस्वरं ॥ ९९ ॥ तातामीषां नरेंद्राणां । तथाऽऽज्ञापय सांप्रतं ॥ अत्रागच्छंति विश्वस्ताः । सायमेकाकिनो यथा ॥ १०० ॥ आगताश्च प्रवेक्ष्यास्ते । सौवर्णप्रति-मागृहे ॥ युगपत् षट्सु द्वारेषु । षडपि व्याप्तमन्मथाः ॥ १ ॥ तथा कृते समेतास्ते । तत्पा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

णिग्रहणेङ्गया ॥ साक्षान्मल्लिमिवालोक्य । प्रतिमां तां हिरण्मयीं ॥ २ ॥ लोलनेत्रा मुदापूर्णा । यावत्तिष्ठंति विस्मिताः ॥ तावता तालुदेशस्थं । तत्पिधानं व्यपोहितं ॥ ३ ॥

ततो दौर्गंध्यमत्युग्र–मकस्माज्जृंभितं तथा ॥ यथा स्फुटितनासाव–दजायंत पराङ्मुखाः ॥ ४ ॥ तदानीं मल्लिनाथेन । भाषितास्ते महीभुजः ॥ दुर्गंधो हेममय्या अ–प्येतस्या यदजृंभत ॥ ५ ॥ तन्मलाविलदेहायां । मयि वः काऽनुरागिता ॥ किंपाकफलमादातुं । विवेकी कोऽनुमन्यते ॥ ६ ॥ युग्मं ॥ विषया हि विषाकारा–स्ततो वाऽप्यधिका इमे ॥ विषमेकभवं हंति । विषया भवसंततिं ॥ ७ ॥ चलाक्षा स्त्री तु गंत्रीव । पातयेद्भवकानने ॥ शिवाध्वनीनः कस्तस्मा–त्तां बुधो बहुमन्यते ॥ ८ ॥ यौवने पवनोत्ताले । शरीरे व्याधिपंजरे ॥ का नाम विषयाकांक्षा । विज्ञातभवसंविदां ॥ ९ ॥ इत्थं श्रीमल्लिनाथेन । प्राग्भवप्रथनेन च ॥ बोधिताः षडपि प्रापु–स्ते जातिस्मरणं क्षणात् ॥ १० ॥ व्यजिज्ञपंश्च तामेव । त्वमग्रेगा पुरे च नः ॥ भव येन भवोच्छित्यै । प्रतिपद्यामहे व्रतं ॥ ११ ॥ श्रीमन्मल्लिरपि प्राह । संजाते केवले मम ॥ अवश्यं चरणप्राप्ति–र्भविता भवतामपि ॥ १२ ॥ श्रुत्वेति गाढं संविग्न–मन-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स्कास्तु मनोहराः ॥ क्रमयित्वा तदा मल्लिं । जग्मुर्नृपा यथाऽऽगताः ॥ १३ ॥
ततो वर्षशतेऽतीते । जन्मतो मल्लितीर्थपः ॥ लोकांतिकसुरैरेत्य । विज्ञप्तः समयोचितं ॥ १४ ॥ जगज्जनैकजीवातुं । प्रभो तीर्थं प्रवर्त्तय ॥ इत्युक्त्वा पंचमं कल्पं । ययुर्लोकांतिकाऽमराः ॥ १५ ॥ सुरैराढौकितं द्रव्यं । त्रिकराजपथादिगं ॥ तत्सांवत्सरिके दाने । श्रीमन्मल्लिरदापयत् ॥ १६ ॥ शुक्लायां मार्गशीर्षस्यै—कादश्यां दस्रगे विधौ ॥ त्रिशत्या स्त्रीणां राज्ञां च । सहिता संयमार्थिनां ॥ १७ ॥ आताड्यमानैर्वादित्रै—र्गीयमानैश्च गीतकैः ॥ बंदिक्लृप्तजयारावा । दिव्यालंकारभासुरा ॥ १८ ॥ नराऽमरैरुसंवाह्या—मारूढा शिबिकां ततः ध्रियमाणासितच्छत्रा । वीज्यमानप्रकीर्णका ॥ १९ ॥ सहस्राम्रवने गत्वा । श्रीकंकेलीतरोस्तले ॥ शिबिकाया अवारुह्य । विमुच्याऽऽभरणानि च ॥ २० ॥ पूर्वे वयसि पूर्वाह्णे । देवदूष्यपरिग्रहा ॥ कृताऽष्टमतपा मल्लिः । प्राव्राजित्सिद्धसाक्षिकं ॥ २१ ॥ पंचभिः कुलकं ॥ सामायिकपदोच्चार—समनंतरमेव च ॥ मनःपर्ययमुत्पेदे । संकेतितमिव क्षणात् ॥ २२ ॥ निदाघघर्मतप्तस्या—ऽध्वगस्येव पथद्रुमः ॥ जिनदीक्षा सुखायाऽभू—त्क्षणं नारकिणामपि ॥ २३ ॥ तस्मिन्नेव

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दिने घाति–कर्मक्षयसमुद्भवं ॥ उत्पेदे केवलं ज्ञानं । मद्भेस्त्रैलोक्यबोधकं ॥ २४ ॥ अथासनान्यकंपंत । वासवानां समंततः ॥ प्रणेदुः स्वर्गलोकेषु । घंटा दूता इव स्वयं ॥ २५ ॥ सौधर्माधिपतिर्लक्ष–योजनां प्रथितां तनुं ॥ कृत्वैरावणमारुह्य । समेतस्तत्र वेगतः ॥ २६ ॥ अन्येऽपि सपरीवारा । देवेंद्रा अच्युतादयः ॥ अहंपूर्विकयोत्कंठा–निर्जराः समुपाययुः ॥ २७ ॥ भूमिमायोजनं वायु–कुमारा ममृजुस्तदा ॥ गंधांबुवर्षैरासिंचन् । भक्त्या मेघकुमारकाः ॥ ॥ २८ ॥ बबंधुर्वसुधां रत्नै–र्व्यंतराः सत्त्वराशयः ॥ विचक्रुर्मणिमाणिक्यैः । पांचालीस्तोरणानि च ॥ २९ ॥ ध्वजाः श्वेतातपत्राणि । तदधश्चाष्टमंगली ॥ विच्छित्तयः समग्राश्च । तत्र तैरेव चक्रिरे ॥ ३० ॥ आद्यं रत्नमयं वप्रं । तत्र वैमानिका व्यधुः ॥ निर्मितो मणिभिस्तुंगः । कपिशीर्षसमुच्चयः ॥ ३१ ॥ कनकैर्मध्यप्राकारं । ज्योतिष्केंद्रा विनिर्ममुः ॥ रत्नैश्च कपिशीर्षाणि । मुकुटानीव भूश्रियः ॥ ३२ ॥ तृतीयो राजतो वप्रो । विदधे भवनाधिपैः ॥ अंबुजानीव हैमानि । कपिशीर्षाणि तत्र च ॥ ३३ ॥ गोपुराणि च चत्वारि । प्रतिवप्रं चकासिरे ॥ चतुःप्रकारधर्मश्री–विवाहायेव मंडपाः ॥ ३४ ॥ प्रतिद्वारं धूपघट्यो । दीर्घिकाश्च सपंकजाः ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मध्ये समवसरणं। चैत्यद्रुर्यंतरैः कृतः ॥३५॥ तदधो विदधे पीठं। तदूर्ध्वं छंदकं पुनः ॥ मध्ये सिंहासनं तस्य। प्राङ्मुखं स्थापितं प्रभोः ॥ ३६ ॥ रत्नत्रयमिव छत्र–त्रयं तस्योपरि व्यधुः ॥ दध्राते चामरौ तत्र। यक्षाभ्यां पार्श्वयोः पुनः ॥ ३७ ॥

समवसृतेर्द्वारेऽथ। धर्मचक्रं वितेनिरे ॥ द्वितीयवप्रे विश्रांत्यै। देवछंदं प्रभोः पुनः ॥ ॥ ३८ ॥ पादौ न्यस्य पयोजेषु। देवकोटीन्निरावृतः ॥ पूर्वद्वारेण समव–सरणं प्राविशद्विभुः ॥ ३९ ॥ कृत्वा प्रदक्षिणां चैत्य–तरोस्तीर्थं प्रणम्य च ॥ मल्लिः सिंहासनं भेजे। मेरुशृंगमिवांबुदः ॥ ४ ॥ अन्यास्वपि त्रिसंख्यासु। दिक्षु सिंहासनस्थितं ॥ व्यंतरैः स्थापयांचक्रे। प्रतिबिंबत्रयं विभोः ॥ ४१ ॥ भामंडलं शिरः पृष्टे। प्रभोराविर्बभूव च ॥ संगताः प्रभुसेवायै। पुञ्जिता इव तैजसः ॥ ४२ ॥ दध्वान दुंदुभिर्व्योम्नि। प्रतिशब्द इव प्रभोः ॥ एक एव विभुर्विश्व–हितीवोर्ध्वीकृतो ध्वजः ॥ ४३ ॥ जानुदघ्नी पुष्पवृष्टि–र्विचित्रा शुशुभेतरां ॥ त्रस्यत्कंदर्पहस्ताग्र–स्रस्तसायकविभ्रमा ॥ ४४ ॥ आसीनासु यथास्थानं। सन्नासु त्रिदशाधिपः ॥ कृतांजलिपुटः श्रीम–न्मल्लिं स्तोतुं प्रचक्रमे ॥ ४५ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अशरणनरगणशरणदचरण । करणसदनसमयतसमकरण ॥ अमलकमलदलवरकरचरण । जननमरणभवभयचयहरण ॥ ४६ ॥ भवभयकवलनकलकलकदन । नयशततततमशशधरवदन ॥ अमरखचरनतरसमयसमय । तर शमनवरतमभयद सदय ॥ ४७ ॥ अनवममतधर मददवदहन । कपटहननकर शमधनभवन ॥ सकलजगदवन भवगदशमन । सजलजलदरवजयकरवचन ॥ ४८ ॥ अमरणपदरत सततममदन । गणधरनतपद गजवरगमन ॥ मदभरघनतमघनचयपवन । धवलरदन जय जय भयमथन ॥ ४९ ॥ इत्थमेकस्वरस्तुत्या । स्तुत्वा मल्लिजिनेश्वरं ॥ निषसाद सुराधीशो । दत्तदृष्टिर्जिनानने ॥ ५० ॥ प्रतिबुद्ध्यादिभिर्भूपैः । सहितः कुंभभूपतिः ॥ प्रदक्षिणय्य नत्वा च । मल्लिं पुर भपाविशत् ॥ ५१ ॥ श्रीमल्लिरपि सर्वांगि–भाषाऽभिपरिणामिनीं ॥ देशनां प्रभुराचख्यौ । भववैराग्यकारणं ॥ ५२ ॥ प्रबुद्धाः प्रतिबुद्ध्याद्या । नरेंद्रा अभजन् व्रतं ॥ श्रीमान् कुंभनरेंद्रोऽपि । श्राद्धत्वं प्रत्यपद्यत ॥ ॥ ५३ ॥ त्रिपदीं प्राप्य यैंगानि । द्वादशापि क्षणाद्व्यधुः ॥ जाता गणधरास्तेऽष्टा–विंशतिर्भिषगादयः ॥ ५४ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पादेन प्रहरे पूर्णे । श्रीमत्कुंथुनेन भूभुजा ॥ बलिः कलमशालीना–माढकोन्मित आहृतः ॥ ५५ ॥ प्रवाद्यमानैर्वादित्रैः । पूर्वद्वारात्प्रवेशितः ॥ देवमर्त्यैस्त्रिरुत्क्षिप्तो । गगने च विभोः पुरः ॥ ५६ ॥ तस्यार्द्धं जगृहुर्देवा । अप्राप्तं धरणीतले ॥ अर्द्धस्यार्द्धं नृपोऽगृह्णा–च्छेषं सामान्यमानवाः ॥ ५७ ॥ कणमात्रमपि प्राप्तं । बलेरामयनाशकृत् ॥ षण्मासावधि सर्वे ते । तत्संग्रहपरायणाः ॥ ५८ ॥ तद् द्वितीये दिने जातं । परमान्नेन पारणं ॥ विश्वसेनगृहे तत्र । पंच दिव्यानि जज्ञिरे ॥ ५९ ॥ श्रीमन्मल्लिविभोस्तीर्थे । हस्तियानश्चतुर्मुखः ॥ यक्षः कुबेरनामाऽसी–द्भुजाष्टकविभूषितः ॥ ६० ॥ दक्षिणास्तत्र वरदा–ऽभयपर्शुत्रिशूलिनः ॥ वामाश्च मातुलिंगाऽक्ष–सूत्रमुद्गरशक्तिकाः ॥ ६१ ॥ तस्य शासनदेवी च । वैरोट्याख्या चतुर्भुजा ॥ वामे शक्तिमातुलिंगे । दक्षिणे वरमालिके ॥ ६२ ॥ चत्वारिंशत्सहस्राणि । साधवो मल्लिदीक्षिताः ॥ साध्वीनां पंचपंचाश–त्सहस्राणि च संख्यया ॥ ६४ ॥ साष्टषष्टिः सप्तशती । श्रीचतुर्दशपूर्विणां ॥ अवधिज्ञानिसाधूनां । द्वाविंशतिशतानि च ॥ ६५ ॥ शतान्यासन् सप्तदश । सपंचाशन्मनोविदां ॥ शतन्यूना त्रिसहस्री । वैक्रियर्द्धिभृतामपि ॥ ६६ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

चतुर्दश शतानि स्यु–र्वादलब्धिभृतामपि ॥ अशीतिश्च सहस्राणि । लक्षमेकमुपासकाः ॥ ६७ ॥ युक्तं सप्ततिसाहस्र्या । लक्षत्रयमुपासिकाः ॥ सामस्त्येन परीवारो । ज्ञेयः श्रीमल्लिशासने ॥ ६८ ॥ संसेव्यौ देवकोटीभिः । श्रीचतुर्विधसंघयुक् ॥ श्रीमन्मल्लितीर्थेशः । पुनातिस्म वसुंधरां ॥ ६९ ॥ कौमारं व्रतपर्याया–ऽवधि कृत्यव्यवस्थितं ॥ सर्वायुः पंचपंचाश–त्साहस्री शरदामपि ॥ ७० ॥ प्रत्येकं साधुसाध्वीनां । पंचशत्या समन्वितः ॥ मासं यावत्कृतप्रायो । गत्वा संमेतपर्वते ॥ ७१ ॥ नरण्यां फाल्गुनश्वेत–द्वादश्यां शुक्लेश्यया ॥ एकोनविंशस्तीर्थेशः । श्रीमल्लिर्मोक्षमासदत् ॥ ७२ ॥ तत्रैवासनकंपेन । विज्ञायाऽवधिना पुनः ॥ समीयुर्वासवाः सर्वे । मोक्षोत्सवविधित्सया ॥ ७३ ॥ क्षणं नारकिजीवाना–मपि दत्तसुखासिकं ॥ निर्माय मोक्षकल्याणं । ते निर्मायिशिरोमणे ॥ ७४ ॥ दंष्ट्रा दंतास्तथाऽऽदायि । निरुपद्रवताकृते ॥ गत्वा नंदीश्वरे द्वीपे । चक्रुरष्टाह्निकोत्सवं ॥ ७५ ॥ युग्मं ॥

ततः स्वस्वविमानेषु । माणवस्तंभमूर्द्धनि ॥ न्यधुर्वज्रसमुद्गेषु । नर्तुर्दंष्ट्राः शिवार्थिनः ॥ ७६ ॥ सहस्रे वर्षकोटीना–मरतीर्थकृतो गते ॥ श्रीमन्मल्लिजिनेशस्य । मोक्षप्राप्तिरजायत

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ ७७ ॥ स्त्रीत्वेऽप्यहो शेषजिनातिशायि । तीर्थंकरश्रीसुव्रतगंनविष्णु ॥ शीलोज्ज्वलं मल्लिवि-
नोश्चरित्रं । शृण्वंतु साश्चर्यहृदो मुनींद्राः ॥ ७८ ॥ इत्थं यथा शीलमवश्यमोक्षा–ऽन्निगामु-
कोऽपि प्रभुमल्लिनाथः ॥ प्रपालयामास तथाऽविरामं । भव्येन निर्व्याजतया निषेव्यं ॥७९॥
इति श्रीरुद्रपल्लीयगच्छे भट्टारकश्रीसंघतिलकसूरिपट्टाऽवतंसश्रीसोमतिलकसूरिविरचितायां शी-
लोपदेशमालावृत्तौ शीलतरंगिण्यां श्रीमल्लिजिनचरित्रं समाप्तं ॥ श्रीरस्तु ॥

प्रमुखशब्देन येऽन्ये महात्मानो गार्हस्थ्यमनादृत्य प्रथमवयस्येव दीक्षां जगृहुस्ते ग्रा-
ह्याः, गार्हस्थ्ये शीलदृढतादृष्टांतावन्निधाय गृहीतचारित्रस्य तद्दार्ढ्यमाह—

॥ मूलम् ॥—सो जयउ थूलभद्दो । अच्छेरयकारिचरियपरियरिउ ॥ जस्सज्जवि बंभवए
। जयंमि वज्जेइ जसडक्का ॥ ७१ ॥ व्याख्या—आश्चर्यकारि चरितपरिकरितः स स्थूलभद्रो
जयतु, स श्रीआर्यसंभूतिविजयशिष्यः सर्वोत्कर्षेण वर्त्ततां, पूर्वभुक्तकोशावेश्यागृहे षट्विकृत्या-
हारनिरतस्यापि तादृक्शीलपालनरूपं यद् आश्चर्यकारि चरितं चारित्रं, तेन परिकरितः कृता
शोभा यस्य, तस्य श्रीशकडालसूनोरद्यापि बहुसमयाऽतिक्रमेऽपि जगति त्रैलोक्ये ब्रह्मव्रते

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

शीलपालने जयढक्का कंदर्पभूपकटकजयारंभसूचका भेरी वाद्यते शब्दायते कामजेतृत्वात् तत्तादृग्युद्धवीरतया कविभिर्वर्ण्यते. इति गाथासमुदायार्थः, भावार्थः संप्रदायगम्यः, स चायं—

अस्तीह भारते वर्षे । पाटलीपुरपत्तनं ॥ यच्चैत्यकलशा नक्तं । बिभ्रते भानुविभ्रमं ॥१॥ तत्र क्षत्रप्रजानंदो । नंदनामा महीपतिः ॥ यत्कीर्त्तिर्नर्त्तकी तुंग—नववंशेषु नृत्यति ॥ २ ॥ शकडालस्तस्य मंत्री । यन्मतिर्व्रामितो ध्रुवं ॥ वाक्पतिर्भ्राम्यति व्योम्नि । वक्रातीचारविभ्रमैः ॥ ३ ॥ लक्ष्मीवतीति तत्पत्नी । सपत्नीव श्रियो गुणैः ॥ यदार्जवकलाहीणा । इव मृग्यो वनं श्रिताः ॥४॥ तत्कुक्षिशुक्तिमुक्ताभः । स्थूलभद्राभिधः सुतः ॥ द्वितीयः श्रीयकाभिख्यो । नंदचित्ताभिनंदनः ॥ ५ ॥ तत्र कोशाभिधानायां । वेश्यायां काममोहितः ॥ निनाय क्षणवत्स्थूल—भद्रो द्वादशवत्सरीं ॥ ६ ॥ श्रीयको नंदभूभर्तु—रंगरक्षणदक्षिणः ॥ विश्वासभाजनं जज्ञे । स्थाने सेवा हि कामदा ॥ ७ ॥ द्विजो वररुचिस्तत्र । दक्षो वाग्मी महाकविः ॥ काव्यैः स्तौति नृपं शश्व—दष्टोत्तरशतेन सः ॥ ८ ॥ वैधर्मिकत्वात्तं मंत्री । श्लाघते न कदाचन ॥ नृपोऽपि न ददौ किंचि—द्यतः परमुखा नृपा ॥ ९ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अथोपायंविदा तेना–ऽवर्जिता मंत्रिवह्निना ॥ वशाबलेन साध्यंते । गजा अपि मदोत्कटाः ॥ १० ॥ न्यायोक्त्या शकडालोऽपि । तद्गुणनममन्यत ॥ को वा न भ्राम्यते स्त्रीभिः । कराग्रेण घरट्टवत् ॥११॥ काव्यानि पठतोऽन्येद्यु–र्नृपाग्रे च द्विजन्मनः ॥ अहो मधुरता सूक्तेः । प्रशशंसेति धीसखः ॥ १२ ॥ नृपस्ततोऽस्मै दीनारान् । ददावष्टोत्तरं शतं ॥ स्पष्टं परप्रयोज्या हि । तिर्यंच इव भूभुजः ॥ १३ ॥ नित्यं वितीर्यमाणेऽस्मै । दाने मंत्री निराकरोत् ॥ राजाह त्वत्प्रशंसैव । कारणं दानकर्मणि ॥ १४ ॥ मंत्र्यूचे परकाव्येषु । कार्या श्लाघाऽस्य कीदृशी ॥ तदा तु वर्णितः काव्य–गुण एव न चाऽपरः ॥ १५ ॥ राजोवाच दुरात्मायं । निर्माल्येन स्तवीति मां ॥ भज्यंते हि सुखेनैव । नृपा आमघटा इव ॥ १६ ॥ बालिका अप्यधीयाना–स्तदुक्तां काव्यसंततिं ॥ श्रावयिष्यंति ते प्रात–रित्युक्त्वा सचिवाग्रणीः ॥ १७ ॥ एकद्वित्र्यादिवेलायां । श्रुतं काव्यादिकं क्रमात् ॥ समर्थाः पठितुं सप्त । स्वपुत्र्यो बालपंडिताः ॥ १८ ॥ विप्रं पातयितुं जीव–मिव संसारसागरे ॥ स्थापिता नीतय इव । सर्वा यवनिकांतरे ॥ १९ ॥ त्रिभिर्विशेषकं ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यक्षा च यक्षदत्ता च । भूताथो भूतदत्तिका ॥ सेणा वेणा च रेणा च । नामतोऽमूः प्र-
कीर्त्तिताः ॥ २० ॥ विप्रेण भणितां नव्यां । श्रुत्वा काव्यावलीं तदा ॥ यथाज्येष्ठममूः प्रो-
चुः । सरस्वत्य इव स्फुटं ॥ २१ ॥ नृपोऽपि रुष्टो नाऽदत्त । तुष्टिदानं द्विजन्मने ॥ न तथा
सुकरं किंचिद् । घटनं भंजनं यथा ॥ २२ ॥ अथ गंगाजले न्यस्य । द्रव्यग्रंथिं स वाग्भवः ॥
प्रातर्यत्रप्रयोगेण । जग्राह स्तुतिपूर्वकं ॥ २३ ॥ इत्थं च विदधानेन । तेन विस्मापितं जगत्
॥ के के न विप्रतार्यंते । धूर्त्तैर्बाह्यदृशो जनाः ॥ २४ ॥ मंत्री तत्कूटमज्ञासी–च्चरचारप्रयोग-
तः ॥ न सुखं शेरते बुद्धि–मंतः संनिहिते रिपौ ॥ २५ ॥ धनमानाय्य तत्कूटा–दन्येद्युर्धी-
सखः प्रगे ॥ कौतुकं द्रष्टुमुत्सुकं । स निन्ये तत्र भूपतिं ॥ २६ ॥ सिद्धसिंधुमथ स्तुत्वा । धी-
रं वररुचिः कविः ॥ आचकर्ष द्रुतं यंत्रं । नोत्पपात धनं पुनः ॥ २७ ॥ तावता पश्यतां नृ-
णां ॥ जातो वैलक्ष्यभाजनं ॥ प्रवेष्टुमिव पातालं । ह्रिया नम्रशिरा बभौ ॥ २८ ॥ वयं ना-
ऽन्यस्य गृह्णीम–स्तकृहाण धनं निजं ॥ इत्युक्त्वा सचिवस्तस्मै । द्रव्यग्रंथिं च दत्तवान् ॥२९॥
दत्तेन ग्रंथिना सर्व–समक्षं मंत्रिणा तदा ॥ गंगायां मंक्तुमप्यैच्छ–दास्तां प्रत्युत्तरक्रमः ॥३०॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मंत्रिणाऽन्निहिते तस्य । स्वरूपे न्नूपतेः पुरः ॥ साधु साधु त्वया बुद्ध–मित्यमात्यं जगौ नृपः ॥ ३१ ॥ अथ सर्प इव न्निश्च–ऽन्वेषी वररुचिर्द्विजः ॥ तच्चेष्टादिकमप्राक्षी–न्मंत्रिमंदिरचेष्टितं ॥ ३२ ॥ विवाहे प्रस्तुतेऽन्येद्युः । श्रीयकस्य स मंत्रिराट् ॥ असज्जदस्त्रन्नत्रादि । नृपोपायनहेतवे ॥ ३३ ॥ तत् श्रुत्वा मंत्रिदासीतः । शीतार्त्त इव कंबलं ॥ सुखादिकान्निरावर्ज्य । बालकैरित्यघोषयत् ॥ ३४ ॥ न वेत्ति मूढो लोको य–न्नकडालः करिष्यति ॥ हत्वा नंदनृपं राज्ये । श्रीयकं स्थापयिष्यति ॥ ३५ ॥ इति कंदुकवद्बालाः । कूर्द्दमानाः पदे पदे ॥ निःशंकं जुघुषुः काले । शालिक्षेत्रे शुका इव ॥ ३६ ॥ यदाहुर्बालकाः स्वैरं । यद्वदंति च योषितः ॥ आकस्मिकं च यद्वाक्यं । तत्प्रायो न मृषा न्नवेत् ॥ ३७ ॥ विमृश्येति नृपः प्रैषी–त्प्रतीत्यै तद्गृहे चरान् ॥ तेऽप्यागत्य यथादृष्टं । नृपतेः पुरतोऽवदन् ॥ ३८ ॥ श्रुत्वा शस्त्राऽऽतपत्राश्व– सामग्रीं कोपपंकिलः ॥ गुणश्रेणेः प्रमादीव । विश्वस्तेरस्खलन्नृपः ॥ ३९ ॥

ततः प्रातः प्रणामेऽपि । मंत्रिणोऽन्नूत्पराङ्मुखः ॥ ज्ञात्वा तच्चित्तमेषोऽपि । रहः श्रीयकमन्यधात् ॥ ४० ॥ वत्स केनापि दुष्टेन । मयीशः कोपवान् कृतः ॥ तदुत्पातः कुलेऽ-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स्माक–मकस्मादयमुत्थितः ॥ ४१ ॥ तस्माज्जीवाम्यहं याव–त्तावन्नायं निवर्त्तते ॥ नृपं प्रण-
मतस्तन्मे । प्रातश्चेद्यं शिरस्त्वया ॥ ४२ ॥ सोऽवोचदीदृशं कर्म । किं म्लेच्छोऽपि विधित्स-
ति ॥ इत्युदश्रुदृशं सूनुं । कूर्चे स्पृष्ट्वा पुनर्जगौ ॥ ४३ ॥ अधुना जरसालीढं । हत्वा मां कु-
लमुद्धर ॥ वत्स नाशेन काकिण्याः । कोटिं नेच्छति कोऽपि किं ॥ ४४ ॥ जग्ध्वा तालपुटं
वीत–प्राणो नंस्याम्यहं नृपं ॥ शिरश्छित्वा वदेः स्वामिन् । दुष्टस्तातोऽपि नेक्ष्यते ॥ ४५ ॥
कथंचिद् बोधितः पित्रा । तत्तथेति चकार सः ॥ स्वामिञ्छेहीति संभ्रांतान् । सन्यलोकान-
बोधयत् ॥४६॥ तातः पूज्य इति प्रोक्ते । नृपेन पुनराह सः ॥ सुवर्णेनापि किं तेन । कर्णत्रो-
टाय यन्नवेत् ॥ ४७ ॥ समस्तमुज्झव्यापार–मादिशत्तं नृपस्ततः ॥ ज्ञात्वोचितीं मंत्रिसूनु–
रथैवं स व्यजिज्ञपत् ॥ ४८ ॥ देव ज्येष्ठोऽस्ति मे बंधुः । स्थूलभद्राभिधः सुधीः ॥ नदयाऽ-
स्ते न जानाति । सुखो वेश्यागृहे स्थितः ॥ ४९ ॥

सोऽप्याहूय तथैवोक्तो–ऽवददालोचयाम्यहं ॥ नमित्युक्ते स्थूलभद्रो । विवेशाऽशोककाऽ-
ननं ॥ ५० ॥ मुद्रितेंद्रियमेकाग्रं । मन आधाय योगिवत् ॥ विचारयितुमारेभे । किं नियो-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

गितया मम ॥ ५१ ॥ विद्यायामिव शाकिन्यां । यस्यां सत्यां धनाकुलः ॥ निरपेक्षो भवेत् प्राणी । स्वजनेऽन्यजनेऽपि च ॥ ५२ ॥ विहाय कुलकृत्यानि । त्यक्त्वा वै धर्ममप्यहो ॥ यत्र साध्यमनाबाध्यं । स्वामिकार्यं यथा तथा ॥ ५३ ॥ स्त्रियेव दैवदुर्योगा–त्कदाचिच्च विरक्तया ॥ तदुःखं प्राप्यते जीवो । नरकादतिशायि यत् ॥ ५४ ॥ पण्स्त्रीभ्योऽपि तन्निंद्य–तमां हंत नियोगितां ॥ को नामाङ्गियते प्राज्ञः । कृत्याऽकृत्यविचारकः ॥ ५५ ॥ धन्याः किंतु महात्मानो । व्रतसाम्राज्यसुस्थिताः ॥ सुराऽसुरनरैः पूज्याः । स्वं परं तारयंति ये ॥ ५६ ॥ सेवामि तदिमां जैनीं । दीक्षां सर्वार्थसाधनीं ॥ चिंतयित्वेति तत्कालं । चक्रे चिकुरलुंचनं ॥ ॥ ५७ ॥ रत्नकंबलतः क्लृप्त–रजोहरणमंडितः ॥ धर्मलाभोऽस्त्विति प्राह । सन्नामेत्य स भूपतिं ॥ ५८ ॥ साधु स्वालोचितं धीर । साधु मंत्रिपतेः सुत ॥ दुस्साध्यमिदमारेभे । त्वयेत्यभिननंद सः ॥ ५९ ॥ ततो मोहबलं जेतुं । मुनिः सन्नद्धयोधवत् ॥ निस्ससार महाभार समुद्धरणदुर्धरः ॥ ६० ॥ तत्कालं तं च भूपोऽपि । सर्वत्र समताभृतं ॥ सत्कांतयोगसर्वस्व–मिव वीक्ष्य विसिस्मये ॥ ६१ ॥ संभूतविजयाचार्य–चरणांभोजमाश्रितः ॥ तदानीं सर्वसा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वध–विरतो व्रतमग्रहीत् ॥ ६२ ॥

स्थूलभद्रः स भद्रेभ । इव ज्ञानांकुशाद्वशी ॥ विजहार जिनाङ्गैक–सङ्गकीवनमानसः ॥ ६३ ॥ द्वीपांतरे गते भ्रानौ । लक्ष्मीरिव कुमुद्वतीं ॥ समग्रमुज्ञव्यापार–श्रीः श्रीयकमशिश्रयत् ॥ ६४ ॥ शिश्राय श्रीयकः कोशां । पितृवैरस्य संस्मरन् ॥ तादृश्यो हि प्रगल्भंते । बलसाध्येषु वस्तुषु ॥ ६५ ॥ स्थूलभद्रादिसंबज्ञः । कथाः कुर्वन्ननेकशः ॥ टंकणक्षारवज्ञातून् । ज्ञावयामास तन्मनः ॥ ६६ ॥ प्रवासं कारितः स्थूल–भद्रस्तातस्तथा कृतः ॥ इदं वररुचेर्देवि । सर्वं जानीहि चेष्टितं ॥ ६७ ॥ वैरमेतच्च युष्माकं । साहाय्यादेव साध्यते ॥ इत्युक्ते तेन सस्मेरं । कथमित्यन्वयुंक्त सा ॥ ६८ ॥ त्वद्भगिन्या सह स्वैरं । रमते स द्विजः किल ॥ चेदसौ पाय्यते मद्यं । तद्वजावः कृतार्थतां ॥ ६९ ॥ श्रुत्वेति प्रतिपेदे सा । तथैवाऽकारयच्च तं ॥ क्षयकाले कुलाचारं । त्यजंति शुचयोऽपि हि ॥ ७० ॥ श्रीयकोऽपि तदाकर्ण्य । वैरसाधनसोद्यमः ॥ मैत्र्यं चक्रे समं तेन । मार्जारीव सहाखुना ॥ ७१ ॥ नित्यं विप्रोऽपि भूपाल–सद्मामध्ये गतागतं ॥ करोति कृतकृत्यः सन् । भृंगवत्पद्मकानने ॥ ७२ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

राजापि कवितापीत्या । तं मुहुः सममन्यत ॥ जातश्च पूज्यतां नित्यं । गतानुगतिके जने ॥ ७३ ॥ कदाचित्समयं ज्ञात्वा । श्रीयकं विजने नृपः ॥ हरेरिव गुरुर्मंत्री । शकस्यालो बभूव नः ॥७४॥ न मे ज्ञाति विना तेन । सज्ञा रात्रिरिवेंदुना ॥ वायसोक्षायने रत्न–मिवायं नाशितो मुधा ॥ ७५ ॥ उवाच श्रीयकः स्वामिन् । किं कुर्मः स द्विजस्तदा ॥ मद्यपायी मुधा भिंन्नै–स्तमुत्पातमतानयत् ॥ ७६ ॥ विप्रोऽपि किमसौ मद्यं । पिबतीति नृपोदितः ॥ प्रातस्ते दर्शयिष्यामि । स्वामिन्नित्याह मंत्रिसूः ॥ ७७ ॥ सर्वेषां पद्ममेकैकं । मालिकः पूर्वशिक्षितः ॥ यत्तंस्तु मदनफलो–न्मिश्रं विप्राय दत्तवान् ॥७८॥ श्रीयकः पद्ममाघ्राय । वर्णयामास सौरभं ॥ जिघ्रंतिस्म ततः सर्वे । यदात्मप्रत्ययं जगत् ॥ ७९ ॥ द्विजन्मापि तदाघ्राय । सोत्सुकः कमलं निजं ॥ नासारंध्रेण तच्चूर्ण–मादत्तोच्छ्वासवायुना ॥ ८० ॥ उद्भांतमद्यस्तद्गंधा–न्मयकृतो धिक्कृतो जनैः ॥ अनन्यस्तागम इव । सज्ञातो निर्गतो जवात् ॥ ॥ ८१ ॥ सुतप्तत्रपुपानेन । प्रायश्चित्ते विनिर्मिते ॥ सह श्रीयकवैरेण । सोऽगमद्यममंदिरं ॥ ॥ ८२ ॥ स्वीकृत्य नंदराजस्य । सप्तांगानि तु मंत्रिसूः ॥ परार्थस्वार्थराज्यार्था–न्निर्विरोधम-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

साधयत् ॥ ८३ ॥ स्थूलभद्रः पुनः प्राज्ञो । द्वादशांगीमसाधयत् ॥ गुप्तं श्रीयकतः साधुः । स ज्येष्ठत्वमगाहत ॥ ८४ ॥ वर्षाकालागमे साधु–त्रयमेत्य गुरोः पुरः ॥ भवनिग्रहणे दक्षान् । जग्राहाऽभिग्रहानिति ॥ ८५ ॥

एकः प्राह चतुर्मासीं । स्थास्याम्यहमुपोषितः ॥ कायोत्सर्गेण सिंहस्य । गुहाद्वारमधिश्रितः ॥ ८६ ॥ द्वितीयो मुनिराचष्ट । चतुर्मासीमहं पुनः ॥ दृग्विषाहिबिलद्वारे । स्थास्यामि प्रतिमास्थितः ॥ ८७ ॥ तृतीयस्तमथाऽभाणी–त्कृतोत्सर्ग भुपोषितः ॥ चतुर्मासीमहं स्थाता । कूपमंडूकिकोपरि ॥ ८८ ॥ श्रुतज्ञानात्तपःशक्तिं । संभूतविजयस्तदा ॥ ज्ञात्वाऽनुमन्यते याव–त्स्थूलभद्रस्तदाऽवदत् ॥ ८९ ॥ प्रभो कोशागृहेऽहं तु । प्रावृषं षण्मरसाशनः स्थास्यामि चित्रशालाया–मिति मेऽभिग्रहाग्रहः ॥ ९० ॥ ज्ञात्वा तमुपयोगेन । सर्वैर्ऽियवशङ्कमं ॥ संभूतविजयाचार्य–स्तदानीमन्वमन्यत ॥ ९१ ॥ त्रयोऽपि गुर्वनुज्ञाता । यथोक्तं स्थानमासदन् ॥ स्थूलभद्रः पुनः कोशा–सदनं मदनेर्ष्यया ॥ ९२ ॥ चतुष्कमिव कुर्वाणा । कटाक्षनिकराक्षतैः ॥ साऽभ्युत्थायाब्रवीन्नाथ । किमादिशसि मे वद ॥ ९३ ॥ धर्मलाभाशिषं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दत्वा । महात्मा समतानिधिः ॥ कोशाचित्रालये तस्थौ । विंध्याद्रौ स्मरदंतिनः ॥ ९४ ॥ प्राक्स्नेहान्मे गृहेऽन्यागा–दसहिष्णुरसौ व्रतं ॥ इति सा षड्रसाऽऽहारै–स्तं मुनिं प्रत्यलाभ्नयत् ॥ ९५ ॥ नूनं न किंचिदाचष्टे । लज्जयेति विमृश्य सा ॥ शिष्येव दिनतारुण्ये । तदग्रत उपाविशत् ॥ ९६ ॥

अपांगान् दोलयामास । न पुनस्तस्य मानसं ॥ वक्षसः श्लथयामास । वस्त्रं न ध्यानतो मुनिं ॥९७॥ हावभावविलासाद्यैः । केवलं स्वमखेदयत् ॥ रागो लिपिरिवाकाशे । नोन्मिमील मनागपि ॥९८॥ सिद्धयोगायते नूनं । दीक्षाऽसौ यत्प्रभावतः ॥ नवनीतसमोप्येषः । क्षणतो वज्रतामगात् ॥९९॥ विचिंत्येति दृगंभोजै–र्युंजानीव गृह्णती ॥ स्मारं स्मारं चिरस्नेहं । पूर्वभुक्तान्यसीस्मरत् ॥ १०० ॥ मुनिस्तु पद्मिनीपत्र–निर्लेपहृदयोऽभवत् ॥ आलोचनामिवज्ञात्रा–मादादानाममन्यत ॥ १ ॥ प्रहारा इव पानीये । हारा इव विरागिणि ॥ गणिकाया विकारास्ते । तत्र जाता निरर्थकाः ॥ २ ॥ नित्यप्रत्यग्रशृंगारा–स्तद्विकारा महामुनौ ॥ तस्मिन्निरर्थतां नेजुः । सिंहस्फाला गिरावि व ॥ ३ ॥ मुनेस्तदुपसर्गैस्तै–र्ध्यानतेजोऽन्यवर्द्धत ॥ स-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

न्नायामिव विज्ञायां । वाग्मिता प्रतिन्नावतः ॥ ४ ॥ ततः खिन्ना मुनेः पादौ । प्रणिपत्य जगाद सा ॥ पूर्वस्नेहवशेनैवं । यत्कृतं तत्क्षमस्व मे ॥ ५ ॥ सा प्रत्युत मुनेरास्या–द्धर्मं श्रुत्वा सुनिश्चला ॥ श्राद्धत्वमुररीकृत्य । जग्राहान्निग्रहाग्रहं ॥ ६ ॥ अतः परं महीपाल–स्तुष्टो यस्मै प्रयच्छति ॥ तं मुक्त्वा नियमो मेऽन्य–पुरुषे जीवितावधि ॥ ७ ॥

अन्योऽन्यरूपांगीकार–वादे नूनं जितस्मरः ॥ कोशान्निग्रहदंन्नेन । कारितस्तत्प्रतिग्रहं ॥ ८ ॥ संपूर्णान्निग्रहास्तेऽथ । पुरुषार्था इव त्रयः ॥ साधवः सुगुरोः पाद–मूलं जग्मुरनिंदिताः ॥ ९ ॥ प्रत्युन्नाय गुरुः किंचि–त्स्वागतेनाऽभिनंद्य च ॥ तानवोचदिमां वाच–महो दुःकरकारकाः ॥ १० ॥ संमुखीनं समुन्नाय । स्थूलन्नद्रमन्नाषत ॥ साध्वाचारिन् महान्नाग । कृतं दुःकरदुःकरं ॥ ११ ॥ तथोक्ते साधवः साऽन्य–सूया दध्युरिदं त्रयः ॥ अहो मंत्रिसुतत्वेन । विशिष्येदं गुरुर्जगौ ॥ १२ ॥ षड्रसाहारकोऽप्येष । यदि दुःकरदुःकरः ॥ वर्षासु वयमप्येतत् । करिष्यामस्तपः क्रमात् ॥ १३ ॥ इत्यमर्षजुषः कष्ट–मष्टमासीमवाहयन् ॥ जग्राह तमथो सिंह–गुहामुनिरन्निग्रहं ॥ १४ ॥ सस्पर्द्धं स्थूलन्नद्रेण । तं विज्ञायोपयोगतः ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अक्रमं च गुरुः प्राह । मुंचाग्रहममुं मुने ॥ १५ ॥ क्रमस्तस्माद्दते नाऽन्य–ईदृक्कर्तुं तपो मुने ॥ शेषनागंविना कोवा । समुद्धर्तुमलं भुवं ॥ १६ ॥ गुरुन्निर्वार्यमाणोऽपि । तमग्निग्रहमग्रहीत् ॥ प्राप्तः कोशागृहे हस्ति–शालायामिव रासभः ॥ १७ ॥ स्पर्द्धिष्णुं स्थूलभद्रेण । ज्ञात्वा सा तं परीक्षितुं ॥ षड्रसैर्भोजयामास । सरमाजं घृतैरिव ॥ १८ ॥ कृतशृंगारनेपथ्या । विभ्रमैकतरंगिणी ॥ कामस्य कामं कोशेव । कोशाऽभ्यर्णमगान्मुनेः ॥ १९ ॥ तस्या मुखेंदुमालोक्य । क्षुब्धे तच्चित्तसागरे ॥ चित्रं तस्य च कंदर्पो । वाग्वाग्निरिवाऽज्वलत् ॥ २० ॥ ततोऽपहृतचैतन्य । इव कामविषोर्मिभिः ॥ न सस्मार यतित्वं स । न च स्पर्द्धातपःक्रियां ॥ २१ ॥ स्मराऽपस्मारवैधुर्या–त्किंतु कोशामयाचत ॥ साऽप्याहोपाहर द्रव्यं । साधयस्व मनीषितं ॥ २२ ॥ कातराक्षः स्मराऽवेशा–त्पुनराह मुनिब्रुवः ॥ कुतोऽस्माकं धनं भद्रे । त्वरस्वातः प्रसीद मे ॥ २३ ॥ श्रुतजैनोपदेशा सा । तं खेदयितुमाख्यत ॥ यदि भोगविधित्सा त–द्व्रज नेपालमंडलं ॥ २४ ॥

तत्र नेपालभूपालो । देशांतरतपस्विनां ॥ रत्नकंबलमेकैकं । प्रयच्छति कृपानिधिः ॥२५॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ततस्तरलितः काम–वात्यया स तपाऽन्यये ॥ गंत्रीरवेदिदंतीव । नेपालाऽन्निमुखोऽचलत् ॥ ॥ २६ ॥ ततः कंबलमासाद्य । वंशमध्य निधाय च ॥ प्रत्यावृत्तः स्मरन् कोशां । मधुपो मालतीमिव ॥ २७ ॥ लक्ष्मेतोति कोरोक्त्या । चौरास्तं रुरुधुः पथि ॥ दृष्ट्वा न किंचिदस्तीति । मुमुचुः प्रचचाल सः ॥ २८ ॥ लक्ं यातीति कीरेण । पुनः प्रोक्ते समेत्य ते ॥ सत्यं ब्रूहीति पप्रच्छुः । सोऽपि तथ्यमभाषत ॥ २९ ॥ समस्ति वंशमध्येऽत्र । निहितो रत्नकंबलः ॥ कुपया सोऽपि तैर्मुक्तः । कोशायास्तमथाऽर्पयत् ॥ ३० ॥ न्यधत्त सोऽपि पंकांत–स्तं कांतमपि कंबलं ॥ मग्नं रत्नमयं बिंब–मिवाऽगाधजले ह्रदे ॥ ३१ ॥ विमुग्धेऽयं महामूल्यो । दुर्लभो रत्नकंबलः ॥ हेलया कर्दमे क्षिप्तः । किं पटच्चरचीरवत् ॥ ३२ ॥ साऽवोचत्किमयं मूढ । शोच्यते रत्नकंबलः ॥ दुर्लभं व्रतमाणिक्यं । मज्जयन् किं न लज्जसे ॥ ३३ ॥ अल्पमात्रसुखाभास–प्रत्याशाभ्रांतचेतसः ॥ भ्रंशंते शिवसौख्येभ्यो–ऽनंतेभ्यो हा मुधा जनाः ॥ ३४ ॥ इत्यादिबोधितो जात–वैराग्यो मुनिराह तां ॥ तारितः साध्वहं वह्नि–दीप्ते गृह इवाऽर्भकः ॥ ३५ ॥ महानुभावोऽतीचार–दोषाऽालोचनकाम्यया ॥ गुरुपादौ श्रयिष्यामि । धर्मलाभोऽस्तु ते शुभे

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ ३६ ॥ कोशीकृतकरा कोशा । तदानीमृषिमब्रवीत् ॥ आसातना प्रबोधाय । कृता मे क्षम्यतां मुने ॥३७॥ लज्जयाऽधोमुखः प्राप्य । गुरोः पार्श्वं विरक्तधीः ॥ तपांस्यतप्त न्नूयांसि । गृहीतालोचनः पुनः ॥ ३८ ॥

अकामाऽप्यन्यदा कोशा । रथिने न्नूभुजा ददे ॥ तदग्रे स्थूलन्नद्रस्य । प्रशशंस गुणानसौ ॥ ३९ ॥ सोऽन्यदा शयनीयस्थो । विध्वा माकंदलुंबिकां ॥ बाणेन चक्रे सुप्रापां । पुंखपुंखार्पितैः शरैः ॥ ४० ॥ तद्वृंतमर्दचंडेण । छित्वा चादाय पाणिना ॥ ददौ तदानीं कौशायै । रथिकः सुन्नटाग्रणीः ॥ ४१ ॥ युग्मं ॥ दर्शयित्वा स्वकौशल्यं । स तस्या मुखमैक्षत ॥ सापि पुष्पावृतां सूचीं । राशौ विन्यस्य सार्षपे ॥ ४२ ॥ ननर्त्त चारुचारीन्नि–र्दक्षा देवीव निश्चला ॥ सूचीमुखेन नो विद्धा । न च पुष्पाण्यचालयत् ॥ ४३ ॥ युग्मं ॥ रथा तत्कलया तुष्टो–ऽवदत्किं ते ददाम्यहं ॥ सा प्राह किं मया चक्रे । चित्रं येनासि रंजितः ॥ ४४ ॥ नक्तं दिव्यदृशो धूकाः । पक्षिणो व्योमचारिणः ॥ जातिसिद्ध इवाऽन्यस्त–कर्मण्यत्र किमद्भुतं ॥ ४५ ॥ दुःकरं तु तदत्यंतं । स्थूलन्नद्रो महामुनिः ॥ शीलयामास यच्छील–मनन्यस्त-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मजातिकं ॥ ४६ ॥ नवनीतमिवार्कस्य । स्त्रियाः संसर्गतो नरः ॥ द्रवीभावं भजत्येव । व-
ह्निना सीसकं यथा ॥ ४७ ॥ इत्यादि तत्स्वरूपं सा । निगदंती दिवानिशं ॥ रथिकं बोधया-
मास । चंद्रज्योत्स्नेव कैरवं ॥ ४८ ॥ स गुणान् स्थूलभद्रस्य । स्मरन् भद्राभिलाषुकः ॥ दी-
क्षां जग्राह कोशापि । स्थिता स्वाऽभिग्रहे पुनः ॥ ४९ ॥

इतश्च द्वादशाब्दिक्यं । दुष्कालं जलधेस्तटे ॥ व्यतिचक्राम कष्टेन । साधुसंघः सुदुस्तरं
॥ ५० ॥ गुणनादेरसामग्र्या । सिद्धांते विस्मृतिं गते ॥ श्रीसंघः पाटलीपुत्रे । सर्वोऽप्येकत्र
संगतः ॥ ५१ ॥ कुतः कुतोऽपि संगृह्य । सूत्रालापकदंबकं ॥ क्रमेणैकादशांगानि । परिपूर्णा-
नि चक्रिरे ॥ ५२ ॥ ततः पूर्वविदो भद्र–बाहोराह्वाहनेच्छया ॥ प्रजिघाय मुनिद्वंद्वं । संघो वि-
च्छेदभीरुकः ॥ ५३ ॥ तेनाप्युक्तं महाप्राण–ध्यानमारब्धवानहं ॥ ततो नागमनं मेऽस्ति । मु-
नी व्यावृत्त्य चागतौ ॥ ५४ ॥ पूर्वाधारचिकीः संघ–स्तत्र प्रैषीन्मुनी पुनः ॥ श्रीभद्रबाहुं सू-
रींद्रं । वंदित्वा तावथोचतुः ॥ ५५ ॥ संघं न मन्यते योऽत्र । दंडः कस्तस्य जायते ॥ संघ-
बाह्यो ध्रुवं स स्या–दिति तेनोत्तरं ददे ॥ ५६ ॥ त्वामेव भगवंस्तर्हि । तथा संघश्चिकीर्षति ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

श्रुत्वेङ्गमाह सोऽप्येष । यदिङ्गति करोमि तत् ॥ ५७ ॥ परं प्रसत्तिं चेत्संघः । कुरुते मयि तन्मुनीन् ॥ प्राहिणोतु महाप्राज्ञान् । दास्येऽहं सप्त वाचनाः ॥ ५८ ॥ वाचनां तत्र दाताहमेकां निष्क्रात आगतः ॥ द्वितीयां कालवेलायां । तृतीयां च बहिर्भुवि ॥ ५९ ॥ वैकाढ्याऽवसरे तुर्यां । तिस्रस्त्वावर्त्तनक्षणे ॥ निर्विघ्नमिङ्गं संघस्य । मम कार्यं च सेत्स्यति ॥ ६० ॥ इत्यागत्योदिते तार्ज्यां । संघस्तुष्टस्तदंतिके ॥ स्थूलभद्रादिसाधूनां । प्राहिणोद्गतपंचकं ॥६१॥

ददाने वाचनां स्वल्पां । तस्मिन् ध्यानाऽवरोधतः॥ स्थूलभद्रादृते सर्वे । निर्विण्णाः स्वास्पदं ययुः ॥ ६२ ॥ स्थूलभद्रस्त्वनुद्विग्नो । यथाविधिपरायणः ॥ गुरोरावर्जयामास । मानसं विनयादिभिः ॥ ६३ ॥ भद्रबाहुरपि प्राप्त–ध्यानपारो निराकुलः ॥ प्रतीङ्गकस्य तृप्त्यंतां । वाचनां मुदितो ददौ ॥ ६४ ॥ समाधानसुधापान–सुहितस्वांतवैभवः ॥ क्रमाद्दस्तुद्वयोनानि । दश पूर्वाणि सोऽपठत् ॥ ६५ ॥ अथ दीक्षां समादाय । विहरंत्यो महीतलं ॥ स्वसारः स्थूलभद्रस्य । तत्र वंदितुमाययुः ॥ ६६ ॥ ताः पप्रच्छुर्गुरून् स्वामिन् । स्थूलभद्रः क्व सांप्रतं ॥ अत्र देवकुले पूर्वान् । पठन्नस्तीति सोऽवदत् ॥ ६७ ॥ स्थूलभद्रोऽपि साहंयुः । समायां-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तीर्विलोक्य ताः ॥ सैंहीं तनूमथाश्रित्य । तस्थौ कौतुककाम्यया ॥ ६८ ॥ हरिं वीक्ष्य पुरस्ताच्च । व्यावृत्य गुरुमन्यधुः ॥ स्थूलभद्रं विदायैव । प्रभो तत्र स्थितो हरिः ॥ ६९ ॥

सोपयोगं जगौ सोऽपि । ज्ञात्वा तं जातवैकृतं ॥ व्राता सोऽस्त्येव वस्तत्र । वंदध्वं प्रगतो हरिः ॥ ७० ॥ गताश्चमत्कृता वीक्ष्य । स्थूलभद्रमवंदिषुः ॥ पृष्टा धर्मकथां ज्येष्ठा । तेन सानंदमब्रवीत् ॥ ७१ ॥ भगवन् साऽहमस्माभिः । श्रीयकोऽप्यगृहीद् व्रतं ॥ क्षुधा किंतु विधातुं स । नैकाशनमपि क्षमः ॥ ७२ ॥ वर्षपर्वणि मद्वाचा । प्रत्याचष्ट स पौरुषीं ॥ तत्पूर्त्तौ पारणाकामी । मया पुनरभाष्यत ॥ ७३ ॥ क्रियते किं न पूर्वाह्णं । पर्वेदं दुर्लभं यतः ॥ लज्जया सरलात्मासौ । तदपि प्रत्यपद्यत ॥ ७४ ॥ संप्राप्ते पूर्णतां तस्मि–न्नपि नोक्तुमना मुनिः ॥ कारितः पुनरुत्साह्या–ऽपराह्णार्हतपःक्रियां ॥ ७५ ॥ ततोऽपि निश्या रात्रिः । सुखं यातेति बोधितः ॥ कर्मक्षयकृते नक्त–प्रत्याख्यानमकार्यत ॥ ७६ ॥ ततोऽर्हरात्रौ वह्नि-ष्णु–क्षुधाऽऽकुलितविग्रहः ॥ महात्माऽऽराधनापूर्वं । मृत्वा दिवमुपेयिवान् ॥ ७७ ॥ ऋषिघातोद्भवाऽऽतंक–प्रायश्चित्तविधित्सया ॥ पुरः श्रमणसंघस्य । तत्स्वरूपं न्यवेदयं ॥ ७८ ॥ सं-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

घोऽप्युवाच ते प्राय–श्चित्तं नैवापतत्यपि ॥ यतस्तत्तारणायैव । त्वयाऽकार्यत तत्तपः ॥ ७९ ॥ निंदंतो स्वमहं भूयः । संघमिन्नमयाचिषं ॥ चेज्जिनः स्वयमाख्याति । ततः स्यान्मे समाहितिः ॥ ८० ॥ कायोत्सर्गे स्थितः संघ–स्ततः कारुणिकाग्रणीः ॥ तदा शासनदेवी च । संघमिन्नमभाषत ॥ ८१ ॥ इमां सीमंधरोपांते । नीत्वा यावदिहाऽनये ॥ तावदुत्सर्गभंग्यैव । स्थातव्यं श्रेयसे मम ॥ ८२ ॥ महाविदेहे नीताहं । तदानीं क्षणतस्तया ॥ अवंदिषं च हर्षेण । सीमंधरजिनेश्वरं ॥ ८३ ॥ जिनोऽभाषत निर्दोषा । निर्व्याजेयं प्रवर्त्तिनी ॥ चूलिकायुगलं स्वामी । व्याचक्रे च ममाग्रतः ॥ ८४ ॥ देव्या करतले धृत्वा । नीताऽहं भारते पुनः ॥ आर्पयं चूलिकायुग्मं । संघायाथ समागता ॥ ८५ ॥ इत्युक्त्वा सपरीवारा । ययौ यक्षा स्वमाश्रयं ॥ स्थूलभद्रोऽप्यथाचार्यं । वचनार्थमुपागमत् ॥ ८६ ॥ गुरुरूचे न योग्यस्त्वं । वाचनायास्ततो मुनिः ॥ दीक्षादिनादि दीनास्यः । स्वाऽपराधानचिंतयत् ॥ ८७ ॥ स्मृतिमायाति मे ताव–न्न काचिदपराधिता ॥ श्रुत्वेति गुरुरप्याख्य–दाः कृत्वापि न मन्यसे ॥ ८८ ॥ स्मृत्वा ततः पपातायं । गुरुपादसरोजयोः॥ क्षम्यतामेकमागो मे । नेदृग् भूयो विधास्यते ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ ८९ ॥ भूयः कुर्या न कुर्या वा । सांप्रतं कृतवान् पुनः ॥ वाचना तु न ते देया । ज्वरार्त्त-स्येव चिर्भटी ॥ ९० ॥

अथ सोऽन्यर्थयामास । संघं तच्छेषशातये ॥ विना चिंतामणिं को वा । क्षमो दातुं म-नीषितं ॥ ९१ ॥ सूरिः संघमथाऽवोच–द्यथाऽसौ विकृतोऽधुना ॥ विशिष्य विकरिष्यंति । त-थाऽन्येऽतःपरं शठाः ॥ ९२ ॥ ततः पूर्वाणि मय्येवा–ऽवशिष्टानीति वेद्म्यहं ॥ शेषपाठो न देयोऽस्मै । दंडोऽस्य पुनरस्त्विति ॥ ९३ ॥ संघगाढाऽग्रहाद्भूयः । पूर्वच्छेदोऽस्तु मा मयि ॥ सूत्रतो वाचनां सूरि–श्चकार मुनिपुंगवं ॥ ९४ ॥ वाचना शेषपूर्वाणां । न देया भवता पुनः ॥ इत्यादिश्य ददौ तस्मै । वाचनां स यथाविधि ॥ ९५ ॥ सर्वपूर्वधरो भानु–रिव पूर्वधरोद-यी ॥ प्राप्ताऽाचार्यपदो भव्य–चक्रं युक्तमबूबुधत् ॥ ९६ ॥ तप्त्वा तपस्तीव्रतरं तरंगै–रिवा-मृतैस्तत्वपदोपदेशैः ॥ प्रबोध्य भव्यालिमनल्पकालं । श्रीस्थूलभद्रस्त्रिदिवं जगाम ॥ ९७ ॥

॥१९२॥

इति श्रीरुद्रपल्लीयगच्छे भट्टारकश्रीसंघतिलकसूरिपट्टावतंसश्रीसोमतिलकसूरिविरचिता-यां श्रीशीलोपदेशमालावृत्तौ श्रीशीलतरंगिण्यां श्रीस्थूलभद्रचरित्रं समाप्तं ॥ श्रीरस्तु ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

शीलपालनबद्धकक्षस्य लोभेनाऽप्यबाधतामाह—

॥ मूलम् ॥—तं नमह वंयरसामिं । सयंवरा रयणकोडिसुसमिद्धा ॥ अवगणिया जेण तिणंव । सिट्ठिधूया पवररूवा ॥ ४२ ॥ व्याख्या—तं नमत वज्रस्वामिनं, येन महात्मना, स्वयंवरा स्वयं गुणान् श्रुत्वा जातगाढाऽनुरागा रत्नकोटिसुसमृद्धा अनेकधनकोटिशतकलिता प्रवररूपा मनोहराकृतिः श्रेष्ठिदुहिता रुक्मिणीनाम्नी तृणमिवाऽवगणिता, जीर्णतृणमिव रत्नकोटिभिः सह तत्यजे, तमेव प्रणमत? इदृक्समभावा एव च महात्मानो नमस्काराऽर्हाः, समता चेयं—यदुक्तं—न यत्र दुःखं न सुखं न रागो । न द्वेषमोहौ न च काचिदिच्छा ॥ रसः स शांतो विहितो मुनीनां । सर्वेषु भावेषु समः प्रदिष्टः ॥ १ ॥ इति गाथार्थः, भावार्थश्चायं—

इहैव भरताऽर्द्धस्य । ललाटतिलकोपमः ॥ अवंतिरिति देशोऽस्ति । सौवस्तिक इव श्रियां ॥ १ ॥ आस्थानीव श्रियां स्थानं । तत्र तुंबवनाभिधं ॥ मंडितं वांछितप्रीतै—र्जनैः स्वर्गादिव च्युतैः ॥ २ ॥ तत्रेभ्यपुत्रः पूतात्मा । नाम्ना धनगिरिः श्रुतः ॥ बद्धसख्य इवाभाति

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

समृद्ध्या धनदेन यः ॥ ३ ॥ कायेन मनसा वाचा । धर्मकर्मैककर्मठः ॥ क्रमेण यौवनं प्रा-
प । योगीव शमनिर्झरं ॥ ४ ॥ तदुद्वाहकृते कन्यां । गृह्णीतः पितरौ यकां ॥ स तां न्यषेधद्दी-
क्षार्थी । तृप्तो न्नोज्यमिव द्रुतं ॥ ५ ॥ अहं कलत्रमित्रादि । मुक्त्वाऽदास्ये ध्रुवं व्रतं ॥ के-
नाऽपि नानुशेतव्यं । मह्यं दत्वा निजां कनीं ॥ ६ ॥ इति तत्पितरौ धर्मी । तत्वाऽतत्वविम-
र्शधीः ॥ हठान्निषेधयामास । मराल इव नड्वलं ॥ ७ ॥

अथ नाम्ना सुनंदेति। धनपालस्य नंदिनी॥ विना धनगिरिं नाऽन्यं। पतीयामीति निश्च-
यात् ॥ ८ ॥ अनिच्छुनापि तेनाऽसौ । पितृभ्यां पर्यणाय्यत ॥ ऋतुस्नाता च न्नेजे सा ।
न्नोग्यकर्मानुन्नावतः ॥ ९ ॥ तदा त्रिविष्टपाच्च्युत्वा । श्रीदसामानिकः सुरः ॥ मराल इव
पाथोजे । तस्याः कुक्षाववातरत् ॥ १० ॥ ह्रिधा संपन्नसत्त्वां तां । पत्नीं धनगिरिः सुधीः ॥
आपृच्छ्य जगृहे दीक्षां । पार्श्वे सिंहगिरेर्गुरोः ॥ ११ ॥ पत्नीभ्रात्रार्यसमित–सहाध्यायी न्नव-
न्नयं ॥ जग्राह श्रुतसर्वस्वं । भृंगः पुष्परसानिव ॥ १२ ॥ पालयंती सुखं गर्भं । सुनंदा च
शुन्ने दिने ॥ नंदनोर्वीव कल्पद्रुं । प्रासूत सुतमुत्तमं ॥ १३ ॥ जन्ममंगलगीतानि । गायंत्यो

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

योषितस्तदा ॥ स्पर्शे स्पर्शे कुमारांगं । इत्थमालपनं व्यधुः ॥ १४ ॥ नाऽग्रहीष्यत्पुरा तात । प्रव्रज्यां तव चेत्पिता ॥ अन्नविष्यत्तदा नून–मनूनस्ते जनूत्सवः ॥ १५ ॥ विना पुमांसं किं कुर्यु–र्वनिताः सुधना अपि ॥ तैलक्षयेण प्रौढापि । दीपिका दीप्यते कियत् ॥ १६ ॥ श्रुत्वेति बालकोऽप्येष । ऊहापोहपरायणः ॥ जातजातिस्मृतिर्दध्यौ । चारित्रपथपांथतां ॥ १७ ॥ मकुणानंदिता माता । न मां त्यक्ष्यति जातुचित् ॥ अतस्तत्खेदवृद्ध्यर्थं । स रुरोद निरंतरं ॥ ॥ १८ ॥ न दोलांदोलनैर्नैव । मृदूल्लापैर्न गीतकैः ॥ रोदनाद्विररामासौ । रेवतीदृष्टिदुष्टवत् ॥ १९ ॥ षण्मासीमतिचक्राम । तस्येति रुदतः सतः ॥ सुनंदा प्रियपुत्रापि । निर्वेदमगमत्तरां ॥ २० ॥

इतश्च धनगिर्यार्य–समिताऱ्यां पुरस्कृतः ॥ तन्निवेशमनावेशः । श्रीसिंहगिरिरागमत् ॥ २१ ॥ नत्वा धनगिरिस्त्वार्य–समितेन समन्वितः॥ सांसारिकान् वंदापयितु–मापृच्छत गुरुं तदा ॥ २२ ॥ तत्कालं शकुनं किंचि–द्विचार्य विकचाननः ॥ आचार्यः सचमत्कारं । व्याजहार सरस्वतीं ॥ २३ ॥ युवयोरद्य लाभोऽस्ति । महीयानिह गम्यतां ॥ किंत्वचित्तं सचित्तं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वा । निषेध्यं नाद्य नैक्कं ॥ २४ ॥ ततो गृहे सुनंदाया—जग्मतुस्तौ महामुनी ॥ दृष्ट्वा द्वारे वयस्यान्निः । सस्मेरं साऽप्यजाष्यत ॥ २५ ॥ हले धनगिरिः सैषः । समेतः सूनुरर्प्यतां ॥ दृश्यते हि कथंकारं । सूनुं स्थापयति स्वकं ॥ २६ ॥ सुनंदापि सुनिर्विण्णा । तदीयपरिदेवनैः ॥ सुतमादाय पाणिभ्यां । पुरो धनगिरेरभूत् ॥ २७ ॥ इयत्कालमयं बालः । सुदुष्पाल्योऽपि पालितः ॥ सुतरां क्लेशिताऽनेन । निर्विण्णा सांप्रतं त्वहं ॥ २८ ॥ निःस्पृहोऽपि गृहाण त्वं । पितासि ननु वत्सलः ॥ नोपेक्षस्व रुदंतं त—त्पुत्रं निःकृप मामिव ॥ २९ ॥ स्मित्वा धनगिरिः प्राह । स्मृत्वा च गुरुभाषितं ॥ साधु कल्याणि कर्त्तव्य—मवश्यं वचनं तव ॥ ३० ॥ रत्नसेन पुनर्दत्वा । मा भूरनुशयान्विता ॥ स्वहस्तेन वितीर्णं य—त्तद्व्यावृत्य न लभ्यते ॥३१॥

तस्माद्विचारये को वा । परप्रभः स्ववस्तुनि ॥ तथापि खलरोधार्थं । क्रियतामत्र साक्षिणः ॥ ३२ ॥ मुग्धयाऽपि तथा कृत्वा । खिन्नयाथ सुनंदया ॥ ददे तनूजस्तेनापि । विदग्धेन समाददे ॥ ३३ ॥ पात्रबंधे धृतस्तेन । बालस्तत्वोपदेशवत् ॥ निवृत्तो रोदनात्सोऽपि । सद्यः सिद्धमनोरथः ॥ ३४ ॥ तौ गुर्वादेशकर्त्तारौ । सुनंदामंदिरादथ ॥ नैषेधिकीं विधाय द्वा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

कू । प्रविष्टौ पौषधालयं ॥ ३५ ॥ गुरुर्धनगिरिं दृष्ट्वा । ज्ञारज्ञंगुरदोर्लतं ॥ उवाच पात्रबंधं मे । दत्वा विश्राम्यतां क्षणं ॥ ३६ ॥ तावता सोऽपि तिग्मांशु–मांसलत्वविज्ञासुरं ॥ अर्पयामास सानंदं । सुतरत्नं गुरोः करे ॥ ३७ ॥ नूरिणा तस्य ज्ञारेण । गुरोरप्यनमत्करः ॥ स्वतस्तमधिकं तेन । लक्षणेन विवेद च ॥ ३८ ॥ निःशेषलक्षणोपेतं । मूर्त्या पीयूषसत्रिणं ॥ वीक्ष्य तं शिष्यचिंतायां । कृतार्थो गुरुरब्रवीत् ॥ ३९ ॥ नूनमेतेन सारेण । कांत्या च जगतीतले ॥ युगप्रधानो ज्ञाव्येष । जिनशासनमंडनं ॥ ४० ॥ कर्मवारणघातित्वा–दृत्नधारणतस्तथा ॥ कर्त्ता सत्यामसौ सिंह–गिरिरित्यन्निधां मम ॥ ४१ ॥ रक्ष्योऽसावतियत्नेन । संघाधार इति ध्रुवं ॥ कल्याणज्ञक्तयो ज्ञव्या । नियोज्याः पालनेऽस्य तत् ॥ ४२ ॥ वज्रवत्सार इत्यस्य । वज्राख्यां विदधे गुरुः ॥ पालनायाऽर्पितश्चैष । साध्वीनां सूरिन्निः शिशुः ॥ ४३ ॥ तान्निः शय्यातरस्त्रीणां । दक्षाणां वत्सलात्मनां ॥ क्रीडाकौतुकिनीनां स । पालनार्थमथाऽर्प्यत ॥ ४४ ॥ स्पर्द्धयासौ पुरंध्रीन्निः । पाल्यमानो निरंतरं ॥ तारिकास्विव शीतांशु–रंकादंकमचीचरत् ॥ ४५ ॥ सौज्ञाग्यैकसुधाकुंभं । या या क्रीमयतिस्म तं ॥ जनन्यामिव मय्येव ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स्निह्यतीति सकाऽबुधत् ॥ ४६ ॥ क्रीडान्निस्तदनीष्टान्नि–र्बालकास्तमखेलयन् ॥ क्रीमाविशे-
षानन्याऽन्यान् । सोऽपि तेषामदर्शयत् ॥ ४७ ॥ मंमनक्रीडनस्तन्य–पानस्नानविलेपनैः ॥ तं
योषाः पोषयामासु–र्वर्षा इव महीरुहं ॥ ४८ ॥ कंठिका स्वर्णरत्नाढ्या । वज्रकंठे बभौतरां ॥
हृदयांभोजनिर्गच्छ–त्किंजल्ककणिकोपमा ॥ ४९ ॥ धर्म्यान्निरिव क्रीमान्निः । क्रीमन्नुदिनं
सुधीः ॥ भुंजानः प्रासुकं चैष । साध्वीचेतांस्यमोदयत् ॥ ५० ॥

दर्शं दर्शं सुनंदाथ । श्रीविशेषविशोन्नितं ॥ अयं मदंगजन्मेति । श्राविकास्तमयाचत ॥
॥ ५१ ॥ तान्निरुक्तं न जानीमो । युवयोर्घटनामिमां ॥ अस्मासु न्यास एवायं । गुरूणामि-
ति पाठ्यते ॥ ५२ ॥ सेति तान्निरथ प्रोक्ता । शाखान्नष्टेव मर्कटी ॥ दूरस्था तमवैक्षिष्ट । व-
ज्रं वज्रसुकुर्वन्नं ॥५३॥ महोल्लासा पराधीना । सा तेषामेव मंदिरे ॥ कदाचिदेत्य धात्रीव ।
स्तन्यपानमकारयत् ॥ ५४ ॥ इतोऽचलपुरोपांते । नदीयुग्मांतरावनौ ॥ कन्यापूर्णान्निधं ती-
र्थं । तापसैरस्ति सेवितं ॥ ५५ ॥ तेष्वेको लेपकर्मज्ञः । पादुके न्यस्य पादयोः ॥ तापसः स-
लिलेऽचाली–दगाधे हंसलीलया ॥५६॥ तटिनीमुत्तरन्निद्धं । प्रत्यदं लेपयोगतः ॥ जनान् वि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स्मापयामास । कौतुकालोकनोद्यतान् ॥ ५७ ॥ ईदृक्प्रज्ञावः कोऽप्यस्ति । नवतामपि शासने ॥ सस्मितं श्रावकानेवं । स प्राहाऽहंयुताश्रितः ॥ ५८ ॥ विहरन्नन्यदा तत्र । स्वेच्छया वज्रमातुलः ॥ श्रीआर्यसमिताचार्य । आगाद्योगतपोनिधिः ॥ ५९ ॥ श्राद्धास्तत्तापसोपज्ञां । तस्मै निंदां व्यजिज्ञपन् ॥ ज्ञात्वा ज्ञानेन तद्युक्तिं । सोऽपि तानित्थमादिशत् ॥ ६० ॥

तापसे का तपःशक्ति—रज्ञानध्वांतमंदिरे ॥ परं केनापि लेपेन । मूढान् विस्मापयत्यसौ ॥ ६१ ॥ तस्माज्जिनमताऽनिज्ञा । विज्ञानेऽस्मिन्न विस्मयः ॥ धार्यो नवद्भिरादेश—मात्रसाध्यो ह्ययं विधिः ॥ ६२ ॥ तत्पाखंडपरीक्षार्थं । निमंत्रयत तापसं ॥ सपादुकौ चास्य पादौ । प्रक्षाळ्यौ नक्तिदंनतः ॥ ६३ ॥ जैनोपहासनाशाय । मायापि स्यात्सुखावहा ॥ ततो निमंत्रयामासुः । श्राद्ध दंनेन तापसं ॥ ६४ ॥ सोऽपि तन्नक्तिसोऽेक । नत्प्लुत्योत्प्लुत्य नेकवत् ॥ नोजनार्थं समन्यागा—च्छ्राद्धस्यैकस्य मंदिरे ॥ ६५ ॥ द्वारागतस्य तस्याथ । श्राद्धः श्रद्धानरादिव ॥ क्षेममस्मद्गृहे नावि । त्वत्पादक्षालनांबुना ॥ ६६ ॥ इत्युक्त्वाऽक्षालयत्पादौ । स तथोष्णेन वारिणा ॥ यथा न लेपलेशोऽपि । तस्थौ षुष्करपत्रवत् ॥ ६७ ॥ गोशीर्षचंदनेना-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

थ । लिप्तपादस्य तस्य तु ॥ चित्रं हृदयसंतापः । प्रोल्लसासाग्निपाकवत् ॥ ६० ॥ श्राद्धोऽपि षड्रसैरेनं । भोजयामास सादरं ॥ यदि वा स्वार्थसिद्ध्यर्थं । क्रियते मूर्द्धनींधनं ॥ ६९ ॥ पादप्रलेपलोपेन । नद्यां ब्रुडनशंकया ॥ आकुलो भोजनास्वादं । न विवेद ज्वरार्त्तवत् ॥ ७० ॥

अद्यापि कोऽपि लेपांशो । भवितेति स साहसात् ॥ भोजनांते नदीतीरं । जगाम जनतायुतः ॥ ७१ ॥ लोहनौरिव सोऽमज्ज–त्तदानीं यशसा समं ॥ सहस्ततालमुत्तालं । जहास च जनस्ततः ॥ ७२ ॥ कुतोऽपि दंभतः सिंधुं । तरता दंभिनाऽमुना ॥ व्यर्थं जग्धा वयं दध्यु–रिति मिथ्यादृशोऽपि हि ॥ ७३ ॥ तदा भोजनृपादूत–स्तत्र सूरिरुपागमत् ॥ विधातुं जनताऽध्यक्षं । जिनमार्गप्रभावनं ॥ ७४ ॥ नृवाच निम्नगां योग–माहात्म्यवशवार्त्तिनीं ॥ वत्से प्रयच्छ पंथानं । परं पारं व्रजामि ते ॥ ७५ ॥ मित्रयोरिव तत्कालं । तटयोरैक्यमीयुषोः ॥ संघभूपजनैर्युक्तः । सूरिः प्राप परं तटं ॥ ७६ ॥ निरीक्ष्याऽतिशयं तस्य । विगर्वास्तापसास्तदा ॥ दीक्षां जगृहुराचार्य–पदमूले विरागतः ॥ ७७ ॥ ब्रह्मद्वीपयुषां तेषा–मन्वये श्रमणाश्च ये ॥ ब्रह्मद्वैपिकनामान–स्ते ख्यातिं ययुरागमे ॥ ७८ ॥ वज्रे त्रिवार्षिके जाते । वि-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

हरंतोऽस्य साधवः ॥ समीयुर्धनगिर्याद्या–स्तत्र तुंबवनास्पदे ॥ ७९ ॥ चिरमिष्टाऽागते तस्मि-
न् । सुनौ धनगिरौ तदा ॥ सुनंदा तमयाचिष्ट । न्यासीकृतमिवात्मजं ॥ ८० ॥ मास्म वा-
दीर्मुधा मुग्धे । न विमृष्टं तदा तु किं ॥ यतः ससाक्षिकं दत्वा । याचमाना न लज्जसे ॥८१॥
श्रुत्वेत्याह सुनंदापि । मया नाऽमंत्रि गोत्रजैः ॥ अतस्तैरननुज्ञातं । बालकं को जिघृक्षति
॥ ८२ ॥ ज्ञातावपि तथा पक्षौ । तौ विवादविधीत्सया ॥ बालं वज्रं सहादाय । जग्मतुर्नृप-
पर्षदि ॥ ८३ ॥ राज्ञो वामेन पक्षेण । सुनंदा सपरिच्छदा ॥ निषसाद समग्रोऽपि । श्रीसंघो
दक्षिणेन तु ॥ ८४ ॥ द्वयोर्वाक्योत्तरं श्रुत्वा । ज्ञोजज्ञूपोऽप्यथाऽादिशत् ॥ तस्यासौ शिशुरा-
हूतो । यस्य पार्श्वं समेष्यति ॥ ८५ ॥ ज्ञात्याम्यामपि पक्षाभ्यां । न्यायश्चायममन्यत ॥ स्त्री-
पक्षीया अथाचख्यु–र्देवायं बालकश्चिरं ॥ ८६ ॥ ज्ञवास यतिनीमध्ये । ज्ञावी तदनुगस्ततः ॥
तस्मादादौ जनन्येव । वज्रमाह्वातुमर्हति ॥ ८७ ॥

तथेत्युक्ते नरेंद्रेण । सुनंदा पुत्रकांकिता ॥ सुखादिकाक्रीडनानि । न्यस्य चित्राणि तत्पु-
रः ॥ ८८ ॥ शर्करामधुमृद्विका– माधुर्यैककिरा गिरा ॥ रयादाकारयत्पुत्रं । वत्सकं स्वगिरे-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

व गौः ॥ ८९ ॥ एहि वत्स मुदं देहि । ममोत्संगमलंकुरु ॥ गृहाण मोदकशक्रा–मत्स्यं-मीशर्करादिकं ॥ ९० ॥ अयं वाजी गजश्चैष । इदं कंचुकमद्भुतं ॥ इदं शकटमादत्स्व । वत्स यच्च मुदं मम ॥ ९१ ॥ बलिर्न्नवामि ते तात । नेत्रयोर्न्युंछनं तव ॥ आगच्छ वत्स स्वच्छ त्वं । म्रियेऽहं वदनाय ते ॥ ९२ ॥ वत्स मा मुंच दीनां मां । मा हीनां कुरु सर्वथा ॥ अधमर्णोऽसि गर्भादि–पोषात्तदनृणीभव ॥९३॥ ज्ञातं वत्स विरक्तोऽसि । परं तेजोऽभिवृद्धये ॥ एकदालिंगनं देहि । त्वं समेहि ममालयं ॥ ९४ ॥ प्रलोभनमयैश्चाटु–पटुभिस्तद्वचश्चयैः ॥ चचाल न मनस्तस्य । सुमेरुरिव वात्यया ॥ ९५ ॥ माता हि गौरवाधाने । जनकादतिरिच्यते ॥ जानन्नपि तदानीं स । वज्रश्चेतस्यचिंतयत् ॥ ९६ ॥ मातुश्चेद्वचनं कुर्वे । तदा स्यात्संघलंघनं ॥ ततश्च भवपाथोधि–लंघनं दुर्घटं भवेत् ॥ ९७ ॥ इदं त्वाराधयिष्यामि । समकं संघमातरौ ॥ यतोऽल्पकर्मा मातापि । मां विनाऽदास्यति व्रतं ॥ ९८ ॥

इत्यादिदीर्घदर्शी स । बालोऽपि प्रबलाशयः ॥ जनन्यां न ददे दृष्टिं । भवार्थे वीतरागवत् ॥ ९९ ॥ ततो धनगिरिर्भूप–प्रेरितो विकसन्मनाः ॥ हस्ते तत्वमिव क्षिप्रं । रजोहरण-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

माददे ॥ १०० ॥ वत्स यद्यस्ति ते दीक्षा–कक्षीकारे दृढं मनः ॥ तदा शिवश्रियो दूत–ममुं धर्मध्वजं नृज ॥ १ ॥ चिंतारत्नमिव प्राज्ञो । हस्तिपोत इवांबुजं ॥ उत्प्लुत्य वज्रो जग्राह । रजोहरणमादरात् ॥ २ ॥ सनालमिव नालीकं । निर्जित्याऽधोमुखीकृतं ॥ शुशुभे करपद्मेऽस्य । तद्रजोहरणं गुरोः ॥ ३ ॥ हस्तं कपोले विन्यस्य । सुनंदा विधुराशया ॥ क्षणं कृत्वा मनो धीरं । चेतस्येवमचिंतयत् ॥ ४ ॥ भ्राता प्रव्रजितः पूर्वं । वत्सोऽपि तदनु च ॥ पुत्रोऽप्यतःपरं तस्मा–दीक्षैव ह्युचिता मम ॥ ५ ॥ युग्मं ॥ ध्यात्वेति तत उत्थाय । सुनंदा गृहमाययौ ॥ वज्रमादाय च स्वीयो–पाश्रयं साधवोऽगमन् ॥ ६ ॥ स संयममतिर्बालः । स्तन्यपानं ततः परं ॥ न चक्रे यच्च नो चित्रं । चेतना न लघुर्यतः ॥ ७ ॥ व्रतस्याऽन्निमुखीन्नावात् । प्रव्राज्य द्व्यतोऽपि तं ॥ साध्वीनामर्पयामासु–र्गुरवः पुनरप्यमुं ॥ ८ ॥ सुनंदापि सवैराग्य–मानंदोद्रेकमंथरा ॥ दीक्षां सिंहगिरेरेव । पादमूले समाददे ॥ ९ ॥ पदानुसारिप्राज्ञोऽथ । वज्रः साध्वीमुखश्रुतां ॥ एकादशांगीं जग्राह । नदीरिव पयोनिधिः ॥ १० ॥

अन्यदा तं सहादाय । गुरूणामष्टवार्षिकं ॥ अवंतीं जग्मुषां तेषां । ववर्ष जलदोत्तरा ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ ११ ॥ ते चाऽप्कायनिषेधार्थं । तस्थुर्यद्गालये क्वचित् ॥ तदा प्राग्जन्ममित्राणि । वज्रस्य त्रिदिवौकसः ॥ १२ ॥ सत्त्वं परीक्षितुं तस्य । वृष्टिं मंदां विधाय ते ॥ आवासितवणिग्रूपं । कृत्वा सूरिं व्यजिज्ञपन् ॥ १३ ॥ तुषारान् पततो वीक्ष्य । ववले भुजगादिव ॥ निरुद्ध्य वृष्टिं नूयोऽपि । विज्ञप्तः सह तैर्गतः ॥ १४ ॥ युग्मं ॥ गुरोरादेशमासाद्य । वज्रः स्वात्मद्वितीयवान् ॥ विधायाऽवश्यकीं क्रिया–निमित्तं प्रयतोऽचलत् ॥ १५ ॥ तत्र तार्णकुटीरेषु । न्यक्षन्नोज्याद्यनेकशः ॥ मनोज्ञव्यंजनश्रेणी–संकुलं वीक्ष्य विस्मितः ॥ १६ ॥ क्ष्यक्षेत्रादिसामग्रीं । ध्यात्वा तन्मुखमैक्षत ॥ निर्निमेषादि लक्षैश्च । तान् देवानित्यबोधि सः ॥ १७ ॥ अकल्प्यो देवपिंडोऽय–मित्युक्त्वा स न्यवर्त्तत ॥ तेऽपि स्वं रूपमास्थाय । स्वरूपं प्रणिगद्य च ॥ १८ ॥ तस्मै वैक्रियकीं लब्धिं । दत्वा सद्यस्तिरोदधुः ॥ तत् श्रुत्वा गुरवस्तस्य । कर्मणा ते चमत्कृताः ॥ १९ ॥ ज्येष्ठमासेऽन्यदा दातुं । घृतपुरानसौ मुनिः ॥ तैरेव जृंभिकैर्देवै–र्वणिग्रूप निमंत्रितः ॥ २० ॥ देवपिंडमिति ज्ञात्वा । तथैव वलिते पुनः ॥ आकाशगामिनीं विद्यां । तस्मै दत्वा तिरोऽभवन् ॥ २१ ॥ पठन्नयो मुनिवृंदेभ्यः । श्रावं श्रावं स्थिराशयः ॥ व्यधादे-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

कादशांगानि । वज्रो वज्रदृढानि सः ॥ २२ ॥

गुरुन्निः प्रेरितोऽध्येतुं । प्रतिन्नामप्रकाशयन् ॥ तदुक्तमेवाऽन्ववद—दव्यक्तध्वनिगर्भितं ॥ ॥ २३ ॥ अधीयमानानपरान् । साधून् पूर्वगतं श्रुतं ॥ जलौका इव संगृह्णन् । सोऽगृणोन्मसृणाशयः ॥ २४ ॥ न्निष्क्रार्थं साधुन्निः प्राप्तै—र्गुरुन्निश्च बहिर्भुवं ॥ एकदा वज्र एकाकी स्थितः पौषधमंदिरे ॥ २५ ॥ संमील्य वेष्टिकाः सर्वाः । साधूनां न्यस्य च क्रमात् ॥ वाचनां दातुमारेभे । स्वयं गुरुरिव स्थितः ॥ २६ ॥ ध्वनिकोलाहलं तस्य । प्रत्यावृत्ता बहिर्भुवः ॥ आकर्ण्य दूरतो दध्यु—र्गुरवो निजचेतसि ॥ २७ ॥ किमद्य साधवस्तूर्णं । न्निष्क्रातः समुपागताः ॥ स्वाध्यायं विदधाना नः । प्रतीक्षंते क्षमाजुषः ॥ २८ ॥ द्वारदेशमथाऽऽयाता । जज्ञिरे वज्रमेव तं ॥ एकादशांग्याः पूर्वाणां । श्रुत्वाऽऽलापांश्च विस्मिताः ॥ २९ ॥ धन्योऽस्माकमयं गच्छो । यत्रेदृक्पात्रसंन्नवः ॥ मुनिपाठश्रवणेन । निश्चितं पेठिवानसौ ॥ ३० ॥

माऽसौ त्रपां प्रयात्वेवं । ते विचिंत्याऽतिवत्सलाः ॥ गुरवो दीर्घनादेन । तदा नैषेधिकीं व्यधुः ॥ ३१ ॥ संहृत्य सोऽपि वेगाच्च । गुरोः पादानमार्जयत् ॥ आकारमवगुह्याथ । चिंताम-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

णिरिव स्थितः ॥ ३२ ॥ मैनं कोऽप्यवजानातु । बालमप्यमलश्रियं ॥ मृदं न वाह्यते लोके— र्गुढस्थामा गजोऽपि किं ॥ ३३ ॥ विचार्येति तदाचार्या । निकटावसथे स्वयं ॥ दाता वो वाचनां वज्र । इत्यादिश्य प्रतस्थिरे ॥ ३४ ॥ समये शमिनस्तस्य । गुर्वादेशवशंवदाः ॥ वज्रस्याग्रे गुरोर्बुद्ध्या । वाचनार्थमुपाविशन् ॥ ३५ ॥ गुर्वाङ्गां सोऽपि तां ज्ञात्वा । वज्रो वज्रदृढाशयः ॥ तेषां विस्मितचित्तानां । विधिवद्वाचनां ददौ ॥ ३६ ॥ अन्युद्यत्प्रतिभाभारा—देककृत्वो भणत्रयं ॥ लब्ध्याऽवबोधयामास । मुनीन् मंदमतीनपि ॥३७॥ बहिर्ग्रामादथाऽाचार्या । अतीतैः पंचषैर्दिनैः ॥ समीयिवांसो गीतार्थान् । पप्रच्छुर्वाचनासुखं ॥ ३८ ॥ भक्त्या प्रणम्य ते प्रोचुः । साधवो बोधिलब्धिमान् ॥ अस्माकं वाचनाचार्य । एष एवाऽस्तु तत्प्रभो ॥ ॥ ३९ ॥ जंगमः श्रुतकोशोऽय—मवज्ञातोऽस्ति यत्पुरा ॥ मूढत्वेन तदालोच्य—मस्माभिर्नवतां पुरः ॥ ४० ॥

अथ ज्ञाताऽवशिष्टं य—दंगोपांगादिकं श्रुतं ॥ तत्तस्मै पाठयामासु—र्गुरवो गौरवादृताः ॥ ॥ ४१ ॥ ततो वज्रस्य सिद्धांत—स्थैर्यहेतवे ॥ भुत्सारकल्पमाचख्यौ । धर्माचार्यो यथा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

विधि ॥ ४२ ॥ यावांश्च दृष्टिवादादि–स्तत्र सूत्रार्थसंग्रहः ॥ सागरान्न इवागस्ति–स्तत्सर्वं स समग्रहीत् ॥ ४३ ॥ सूरयोऽपि तदा कष्टं । विहरंतस्ततः परं ॥ पुरं दशपुरं प्राप्य । वज्रं सानंदमादिशन् ॥ ४४ ॥ दशपूर्वन्नृतो वत्स । न्नङ्गुप्ताख्यसूरयः ॥ अवंत्यां सांप्रतं संति । विहरंतः समागताः ॥ ४५ ॥ न तस्य कोऽपि शिष्योऽस्ति । न न्नवंतं विना मम ॥ दश पूर्वाणि पूर्णानि । स्वात्मसाद्विदधाति यः ॥ ४६ ॥ तस्माद्गुर्जयिनीं गत्वा–ऽध्येतुं तानि त्वमर्हसि ॥ गजवाह्यं महान्नारं । न वोढुं रासन्नाः क्षमाः ॥ ४७ ॥ अधीयानस्य ते वत्स । दशपूर्वं समाधिना ॥ अन्नितः संनिधास्यंति । ध्रुवं शासनदेवताः ॥ ४८ ॥ नमिति प्रतिपद्याथ । वज्रो यतियुगान्वितः ॥ जिगीषुरिव शौंडीर्य–नयशाली ततोऽचलत् ॥ ४९ ॥ सायमुर्जयिनीं प्राप्तो । रजनीमवसद्बहिः ॥ तदा श्रीन्नङ्गुप्तोऽपि । लेन्ने स्वप्नममूदृशं ॥ ५० ॥ अद्य प्रतीच्छुकः कोऽपि । पयःपूर्णं पतद्गृहं ॥ अस्मत्कराद्गुपादाय । तृप्तिपर्यंतमापपौ ॥ ५१ ॥ अद्य कोऽप्यतिथिः प्रज्ञा–पात्रं साधुः समेष्यति ॥ यो मत्तो दश पूर्वाणि । सूत्रार्थान्यां गृहीष्यति ॥ ५२ ॥ नङन्योऽहं न मत्तो हि । व्युत्पत्तिं दशपूर्व्यसौ ॥ यास्यतीति ततः पात्र–योगो विद्याफलं परं ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ ५३ ॥ पुरस्ताद्व्रतिनामिन्द्रं । गुरुः सुप्तोत्थितो जगौ ॥ प्रातर्नैषेधिकीं कुर्वन् । शीघ्रं वज्रश्च संगतः ॥ ५४ ॥ वज्रमाकृतितेजोऽन्यां । तमेव परिन्नावयन् ॥ जानंश्च योग्यमाचार्य–श्चेतसा मुमुदेतरां ॥ ५५ ॥ पाणिभ्यां यावदादाय । परिरब्धुं समीहते ॥ तावन्ननाम वज्रोऽपि । शीघ्रं तत्पदपंकजे ॥ ५६ ॥ आलिंग्य सोऽपि तद्वक्त्र–ज्योत्स्नातेजो दृशौ दधत् ॥ पप्रच्छ संयमार्थेषु । कुशलं कुशलक्रियः ॥ ५७ ॥ किंच ते वत्स निस्तंद्र–सुखं गुरुपदांबुजं ॥ त्यक्त्वा विहारकरणे । कारणं किमवंतीषु ॥ ५८ ॥

ज्ञक्त्या नम्रीज्ञवन् वज्रो । गौरवाद्गुरुमब्रवीत् ॥ दशपूर्वीमिहाऽध्येतु–मागतोऽहं गुरोर्गिरा ॥ ५९ ॥ तच्च त्वय्येव नाऽन्यत्र । ज्ञानाविव परं महः ॥ तद्दिदृक्षोः कलावृद्धौ । तद्दानेन प्रसीद मे ॥ ६० ॥ वज्रोऽपि गुरुमाहात्म्या–त्सिद्धचूर्णोऽनुज्ञावयन् ॥ चकार दश पूर्वाणि । संपूर्णानि ततोऽज्ञुतं ॥ ६१ ॥ यत्रोद्देशोऽस्ति तत्रैवा–ऽनुज्ञा नूनं प्रवर्त्तते ॥ दृष्टिवादादिसूत्राणा –मेष एव क्रमो ह्यतः ॥ ६२ ॥ ज्ञद्गुप्ताज्ञया वज्रो । दशपूर्वाण्यधीत्य सः ॥ प्राप्तो दशपुरं धर्मा–ऽचार्यपादनिनंसया ॥ ६३ ॥ अथ सिंहगिरिः प्रीतो । वज्रस्य दशपूर्विणः ॥ विततार

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

गुणाऽनुज्ञां । पूर्वानुज्ञापुरस्सरं ॥ ६४ ॥ तस्मिन्महोत्सवे वज्र–सुहृद्भिर्जृम्भकामरैः ॥ लाजा इव दिवो लक्ष्म्या । विसृष्टाः पुष्पवृष्टयः ॥ ६५ ॥ विहितानशनः सिंह–गिरिसूरिस्ततः परं ॥ समाधानाऽधिरोहिण्या–ऽरुरोह स्वर्गवीथिकां ॥६६॥ ततो नवनवाश्चर्य–सज्ञाः श्रीवज्रसूरयः ॥ यतिपंचशतीयुक्ता । विजह्रुर्भूमिमंडलं ॥ ६७ ॥ यत्र यत्र जगाम श्री–वज्रसूरिः कलानिधिः ॥ तत्र तत्र जनाः पूर्णा–श्चर्यमग्ना इवाऽभवन् ॥ ६८ ॥

इतश्च साध्व्यः श्रीवज्र–स्वामिनः पाटलीपुरे ॥ धनाख्यवणिजो यान–शालायां स्थितिमासदन् ॥ ६९ ॥ तस्येभ्यस्य गुणाऽरीणा । सुता नाम्नास्ति रुक्मिणी ॥ कन्यका व्रतिनीसंगा–द्विवेककलिकामधुः ॥ ७० ॥ सा साध्वीमुखतः शील–सौभाग्यादिगुणोच्चयं ॥ श्रीवज्रस्वामिनो नित्यं । विदधे श्रवणाऽतिथिं ॥ ७१ ॥ तत्सौंदर्यसौरभ्यं । निपीय मधुपीव सा ॥ विरागिण्यपि तत्रैव । वज्रे जाताऽनुरागिणी ॥ ७२ ॥ निश्चित्य चेतसा चैवं । प्रतिज्ञामकरोदियं ॥ रोहिण्या इव चंद्रः श्री–वज्र एव वरो मम ॥ ७३ ॥ मुग्धे विरक्ते श्रीवज्रे । मुधा तव मनोरथः ॥ कल्पद्रुमंजरीभोगो । मधुकर्या मरोरिव ॥ ७४ ॥ इति साध्वीभिरा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ख्याता । पुनः प्रत्याह रुक्मिणी ॥ ममापि तत्प्रियस्तर्हि । शरणं चरणक्रमः ॥ ७५ ॥ तच्चित्तवृत्तिः श्रीवज्रे । वज्रलेपे तथाऽलगत् ॥ वर्त्तिकेव यथा तस्मा–त्स्वान्निलाषान्न साऽचलत् ॥ ७६ ॥ अतुल्यवर्यसौंदर्य––मप्येषा धननंदिनी ॥ वज्रार्थिनी काचमिव । न्यञ्चकार न कं वरं ॥ ७७ ॥

अन्यदा पाटलीपुत्रे । श्रुत्वाऽचार्यान् समीयुषः ॥ पौरलोकैर्वृतो राजा । सहर्षं संमुखं ययौ ॥ ७८ ॥ तेजसा सूर्यसंकाशान् । लावण्यजलधीनिव ॥ पाडुके पादुके सर्वान् । मुनीनालोक्य भूपतिः ॥ ७९ ॥ चिरं विमृश्य संशीति–दोलांदोलितमानसः ॥ को युष्मासु गुरुर्वज्रे । इत्यपृच्छत्तपोधनान् ॥ ८० ॥ युग्मं ॥ तेऽप्यूचिरे कुतोऽस्मासु । टिट्टिभप्रकरेष्विव ॥ राजहंसस्य वज्रस्य । राजहंस तव भ्रमः ॥ ८१ ॥ हारावद्यामिवामुष्यां । साधुश्रेणौ महाद्युतिः ॥ यो नायक इवाऽभाति । जानीया वज्रमेव तं ॥ ८२ ॥ अथाऽसमानलावण्य–मागच्छंतं स दूरतः ॥ शीतांशुमिव तारान्नि–र्युतं यतिभिरैक्षत ॥ ८३ ॥ अनिष्टालोकिनीं दृष्टिं । पीयूषैः पारयन्निव ॥ प्रणनाम महीपालः । श्रीवज्रं भक्तिपूर्वकं ॥ ८४ ॥ तत्पादयुगलो-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

न्मील–त्रखन्नाचंदनद्रवैः ॥ सिन्दूचूर्णैरिवाकार्षी–द्ललाटे तिलकक्रियां ॥ ८५ ॥ समग्रपरिवाराढ्यो । वज्राचार्योऽपि तत्क्षणं ॥ पुरीपार्श्वमलंकृत्य । विदधे धर्मदेशनां ॥ ८६ ॥ तद्दंतन्नापयोधारा–प्रक्षालितमनोमलाः ॥ आश्चर्यन्नाजो राजाद्याः । स्थानं निजनिजं ययुः ॥ ८७ ॥ ततोंतःपुरनार्योऽपि । श्रुत्वा तद्रूपवैन्नवं ॥ नरेंद्रेणाऽन्यनुज्ञाताः । सूरिं नंतुं समाययुः ।८८। रुक्मिण्यपि तदा वज्र–प्रभुं द्रष्टुं समुत्सुका ॥ न्नवाच पितरं तात । समेतोऽस्ति स मे वरः ॥ ८९ ॥ असौ भ्रमरवृत्तिश्चे–न्मामनुद्वाह्य यास्यति ॥ कृशानुः शरणीकार्यो । निश्चयेन मया तदा ॥ ९० ॥

रुक्मिणीमथ पुत्रीं स । धनकोटियुतां धनः ॥ दिव्याभरणवस्त्राढ्या–मुपवज्रं निनायतां ॥ ९१ ॥ न्नगवानपि पौरस्त्री–चित्तविक्षोभनोरुकः ॥ सुधीर्ग्रंथमिव स्वीयं । रूपं संक्षिप्य तस्थिवान् ॥ ९२ ॥ अहो विश्वगुरोरस्य । सातिशायिकलाजुषः ॥ गुणानुरूपा रूपश्री–र्न सृष्टा दुष्टवेधसा ॥ ९३ ॥ इति न्नक्तनृणां चित्तं । विज्ञाय ज्ञानचक्षुषा ॥ श्रीवज्रः सहजं रूपं । न्नेजे भुवनचित्रकृत् ॥ ९४ ॥ अध्यास्य कांचनांन्नोजं । विद्युत्पुंज इवोज्ज्वलः ॥ श्री-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

धर्मदेशनां चक्रे । संसारक्लेशनाशिनीं ॥ ९५ ॥ पुनरूचुर्जना अस्य । रूपमेतन्निसर्गजं ॥ संक्षिप्य कृपयाऽस्माकं । प्रकटीकृतवान् पुनः ॥ ९६ ॥ इति प्रज्ञावनाश्चर्यं । पश्यन् संघो मुदं दधौ ॥ मेघगर्जनतः किं वा । न नृत्यंति शिखंडिनः ॥ ९७ ॥ धन्यंमन्यो धनो दध्यौ । धन्येयं कन्यका मम ॥ यया स्वचित्तदीनारे। वज्र एव निवेशितः ॥ ९८ ॥ कन्यादानवरध्यान–जातोऽनन्यमना धनः ॥ नाऽशृणोद्देशनां तस्य । कामी शीलकथामिव ॥ ९९ ॥ देशनांते स चोन्नाय । प्रभुमेवं व्यजिज्ञपत् ॥ चिराच्च रक्ता कन्येयं । माधवीव मधौ त्वयि ॥१००॥ तदस्तु योग्यसंबंधा–त्सृष्टुः सृष्टिः फलेग्रहिः ॥ रूक्मिण्यां खलु जातायां । वज्रस्य घटनोचिता ॥ १ ॥ पतिर्मम विभुर्वज्रः । शरणं वह्निरन्यथा ॥ इतिप्रतिज्ञानिष्णाता–मिमां वृणु दयानिधे ॥ २ ॥ मधुकर्येव कल्पद्रु–मरंदाऽस्वादलुब्धया ॥ वराः कत्यनया युष्म–त्कांक्षया न निराकृताः ॥ ३ ॥ सर्वातिशायिरूपस्त्व–मेषापि रतिजित्वरी ॥ संयोज्य कांचने रत्नं । स्वामिन् प्रीणय मन्मनः ॥ ४ ॥ असंख्यातगुणाधार–हेमकोटीरनेकशः ॥ अहं ते वितरिष्यामि । पुत्र्याः पाणिविमोचने ॥ ५ ॥ वज्रप्रभुरन्नाषिष्ट । किमज्ञान्यऽपि कश्चन ॥ विहाय

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

व्रतसाम्राज्यं । नवाधीनत्वमिच्छति ॥ ६ ॥ नोगा भुजंगनोगाभा । विषं सांसारिकं सुखं ॥ श्रियः स्त्रियश्च तन्मूलं । कथमाश्रियते बुधः ॥ ७ ॥ चातुर्गतिकसंसार–परिभ्रमणहेतुषु ॥ किं-पाकफलतुल्येषु । रज्यते विषयेषु कः ॥ ८ ॥ यदीयं धन ते कन्या । मयि गाढाऽनुरागिणी ॥ मत्प्रियं संयमं तर्हि । समाश्रयतु संप्रति ॥ ९ ॥ किमेभिर्गर्त्वरैः स्वल्पैः । संयोगैर्नवसंन-वैः ॥ शिवार्थं यतनीयं तु । यत्राऽनंतसुखागमः ॥ १० ॥ इत्यादिभिः सा सूरीणां । देशना-मृतसिंचनैः ॥ शांतमोहाग्निरादत्त । रुक्मिणी तत्क्षणं व्रतं ॥ ११ ॥ युक्तं गृहीतुमाकांक्ष—त्करे वज्रं धनात्मजा ॥ अकरिष्यदसौ ह्येदं । मोहाद्यैः कथमन्यथा ॥ १२ ॥ तदा तद्देशना-सारैः । संवेगांकुरभासुराः ॥ नव्यकल्पद्रुमाः के के । प्रापुर्दीक्षाफलानि न ॥ १३ ॥ इतश्च वज्रः संघार्थं । विद्यामाकाशगामिनीं ॥ महापरिज्ञाऽध्ययना–दुदधेः लब्धिसागरः ॥ १४ ॥ वि-द्येयं मानुषक्षेत्रा–ऽवधिसंचरणोर्जिता ॥ कस्मैचन न देयेति । श्रीवज्रः संघमन्यधात् ॥१५॥ तथा च जृंभिकैर्देवै–र्दत्तया विद्ययोद्यतः ॥ वज्राचार्यो महाभाग्यो । जातः संघे प्रज्ञानिधिः ॥ १६ ॥ विहृत्य पूर्वदेशेषु । विद्याब्धिरिव जंगमः ॥ श्रीवज्रः क्रमतः प्राप । उदीचिं दिश-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मन्यदा ॥ १७ ॥ दुर्भिक्षे दारुणे तत्र । जाते संतापितप्रजे ॥ युगप्रधानं श्रीवज्रं । ततः संघो व्यजिज्ञपत् ॥ १८ ॥

अत्र दुर्भिक्षकांतारे । रंकफेरुशताकुले ॥ बुभुक्षाराक्षसीमंत्रो । जागरूकोऽस्ति केवलं ॥ १९ ॥ तन्मंत्रबाधिताः सर्वे । धनिनश्च महाबुधाः ॥ नष्टांचक्रुर्धर्मकर्म–कुलाचारव्यवस्थितीः ॥ २० ॥ योगीव परमात्मीयं । ध्यानं ध्यायंति ही जनाः ॥ परमात्मनि च दृष्टेऽस्मिन् । लभंते न परं मुदं ॥ २१ ॥ भिक्षाचराणां भिक्षासु । दंभैरुत्पाटितैरपि ॥ दधिभांभेषु मार्जारा । इव पेतूरलव्रजाः ॥ २२ ॥ यतिष्वपि समेतेषु । भिक्षार्थं भविकव्रजाः ॥ दापयंति कपाटानि । द्वारेषु स्वर्गतेरपि ॥ २३ ॥ तदीदृक्संकटात्संघ–मुद्धर्तुं नाथ चार्हसि ॥ निधानमसि लब्धीनां । मणीनामिव रोहणः ॥ २४ ॥ विज्ञप्तिमिति संघस्य । तामाकर्ण्य स सूरिराट् ॥ विद्योद्योगो न दोषाय । संघार्थमिति चिंतयन् ॥ २५ ॥ श्रीमान् वज्रस्ततः सूरि–सार्वभौमस्तपोनिधिः ॥ चर्मरत्नमिव प्रोच्चै–र्विचक्रे विकटं पटं ॥२६॥ संघेन सार्द्धं तत्रैव । स्वयमंतर्निविश्य सः ॥ प्रायुंक्त विद्यां व्योमाध्व–गामिनीं गणभृद्वरः ॥ २७ ॥ मूर्त्तो योग इवाऽचाली–

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

त्पटः पवनवर्त्मनि ॥ दर्शयन्निव भव्यानां । मोक्षाध्वन्यध्वनीनतां ॥ २८ ॥
दत्तनामा तदा विप्रः। सूरेः शय्यातराग्रणीः॥ गतो गौचारिकार्येण । तत्कालं गृहमागतः ॥ २९ ॥ श्रीवज्रस्वामिनं वीक्ष्य । ससंघं व्योमचारिणं ॥ केशानुत्पाट्य धर्मज्ञ । ऊर्ध्वदृष्टिरदोऽवदत् ॥ ३० ॥ शय्यातरोऽहं युष्माकं । जातः साधर्मिकोऽधुना ॥ मामनाथमिति त्यक्त्वा । तत्किं यासि यतीश्वर ॥ ३१ ॥ तदालापमथाऽऽकर्ण्य । दृष्ट्वा चोत्खातमूर्जं ॥ इदं सस्मार धीरात्मा । सूत्रार्थं दशपूर्वभृत् ॥ ३२ ॥ ये साधर्मिकवात्सल्य–भृतः स्वाध्यायतत्पराः ॥ प्रज्ञावका व्रतोद्युक्ता–स्ते तार्याः सर्वशक्तिभिः ॥ ३३ ॥ सूरिणापि समारोपि । पट्टे शय्यातरस्ततः ॥ चचाल च तथैवासौ । वायुनेव पयोधरः ॥ ३४ ॥ वंद्यमानः सुरैर्व्योम्नि । प्रीणयन् संघमानसं ॥ पुरं महापुरं प्राप । श्रीवज्रः पट्टवाहनः ॥ ३५ ॥ सुभिक्षमंडले तत्र । संघो निर्विघ्नमीयिवान् ॥ वज्रसूरिप्रसादेन । धर्मकर्माण्यसाधयत् ॥ ३६ ॥ तत्र जैनाश्च बौद्धाश्च । श्रावका धर्मकर्मसु ॥ अन्योऽन्यस्पर्द्धया तस्थु–र्वैधर्म्यं वैरकारणं ॥ ३७ ॥ मिलितैः प्रचुरैर्जैनो–पासकैस्तत्र सौगताः ॥ विजिग्यिरे महापूजा–द्युत्सवैरंजितप्रजैः ॥ ३८ ॥ नृ-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पेण बौद्धभक्तेन । जैनेभ्यः कुसुमार्पणात् ॥ आरामिका न्यवार्यंत । खलेनेव परस्तुतिः ॥ ॥ ३९ ॥ सुलभान्यपि पुष्पाणि । जैनश्राद्धास्ततः परं ॥ कोटीभिरपि न प्रापुः । सामग्रीं भव्यजीववत् ॥ ४० ॥ धनाढ्यास्ते ततो रत्नैः । कर्पूरादिसुगंधिभिः ॥ अर्चां चक्रुः पंचवर्णैः । पुष्पैरिव समाधिना ॥ ४१ ॥

एवं जिताऽरयोऽप्येते । विशेषोत्कर्षलिप्सवः ॥ उपायं चिंतयामासुः । पुष्पाहरणहेतवे ॥ ४२ ॥ अथ श्रीशासनाज्ञीष्टे । सांवत्सरिकपर्वणि ॥ वज्रं विज्ञापयामासुः । पुष्पपूजाविधित्सया ॥ ४३ ॥ कृत्रिमैः कुसुमैः पूजा । कीदृक् सौभाग्यमश्नुते ॥ न हि रत्नमयैर्भोज्यैः । सौहित्यं जायते क्वचित् ॥ ४४ ॥ चेद्दयं नोन्मुदः स्वामिं—स्त्वयि लब्धिनिधौ गुरौ ॥ ध्रुवं गृहमणौ दीप्ते । सौंधकारपराभवः ॥ ४५ ॥ तस्मात्पुष्पाणि संपाद्य । संघं हर्षमुखं कुरु ॥ चेन्नादन्योऽथवा कुर्या—न्मुहुर्तीं कः कुमुहुर्तीं ॥ ४६ ॥ प्रज्ञावनांगमालोच्य । ततः सूरिः खमुद्ययौ ॥ पुरीं माहेश्वरीं प्राप । निमेषेण च पक्षिवत् ॥ ४७ ॥ आरामे वह्निदेवस्य । गतस्तत्र च संगतः ॥ पितुर्धनगिरेर्मित्रं । मालिकस्तमिताभिधः ॥ ४८ ॥ प्राच्यां मित्रभवं मित्र—

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नवं तेज इवोदितं ॥ प्रज्ञाते तं समालोक्य । नक्त्याऽवंदिष्ट मालिकः ॥ ४९ ॥

ऊचे च हर्षवानस्मि । त्वन्मुखप्रेक्षणादहं ॥ परमादिश कृत्यं मे । ततो वज्रोऽप्यभाषत ॥ ५० ॥ गरीयःसंघकार्येऽहं । पुष्पाण्याहर्त्तुमागतः ॥ तेषां दाने क्षमस्त्वं च । रत्नानामिव रोहणः ॥५१॥ पुष्पाणि विंशतिर्लक्षा । नवंत्यत्र निरंतरं ॥ अतः स्वैरं समादाय । मां कृतार्थय संप्रति ॥५२॥ पुष्पाणि सज्जय क्षिप्रं । तमित्यादिश्य सूरिराट् ॥ जगाम क्षुद्धिमव–क्षिरिं स्वयमनाकुलः ॥ ५३ ॥ तत्र शाश्वतचैत्यानि । नत्वा सिद्धगुणैर्युतः ॥ पद्मादेव्या ह्रदं पद्म–खंडमंडितमन्यगात् ॥ ५४ ॥ राजहंसगणाकीर्णे । गुंजद्भृंगालिगीतिके ॥ ददर्श तत्र पद्मायाः । सद्मपद्मं मणीमयं ॥ ५५ ॥ पद्म मेकमथादाय । पद्मदेवार्चनेच्छया ॥ प्रस्थिता वज्रमुद्दीक्ष्य । ननाम विनयान्विता ॥ ५६ ॥ आदिशेति तया प्रोक्ते । दत्ताशीः सूरिरप्यथ ॥ सहस्रपत्रं तत्पाणि–संगतं तामयाचत ॥ ५७ ॥ अर्थश्चेदन्यलक्षाणि । पद्मानामर्पयामि वः ॥ अस्मादिंदवनादिह–मुक्त्वा कमलमार्पयत् ॥५८॥ आदाय कमलापद्मं । निवृत्य मुनिपुंगवः ॥ हुताशनवने तस्मिन् । पुनराजग्मिवानथ ॥ ५९ ॥ विकृत्य हेमरत्नाढ्यं । विमानं देववन्मुनिः ॥ नृ-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

त्वा पुष्पैस्तदंतश्च । श्रियस्तामरसं न्यधात् ॥ ६० ॥

ऊत्रस्येव तले तस्य । स्वयं पद्मस्य तस्थिवान् ॥ ऊचै रराज राजेव । तारामंडलमंडितः ॥ ६१ ॥ तत्कालं स्मृतिसंप्राप्ते–र्नासुरैर्जृंभकामरैः ॥ सेव्यः स्वस्वविमानस्थैः । सुरैरिव सुराधिपः ॥ ६२ ॥ वाद्यमानमहातूर्य–नादैर्बधिरितांबरं ॥ गंधर्वकिन्नराकीर्णं । किंकिणीजालसंकुलं ॥ ६३ ॥ विमानवरमारुह्य । सूरिर्लघु हिमाचलात् ॥ महापुरींप्रति क्षिप्रं । विजहे संघहर्षकृत् ॥ ६४ ॥ विशेषकं ॥ विमानं सौगता रत्न–कांतिविच्छुरितांबरं ॥ वीक्ष्य दध्युर्ध्रुवं बौद्ध–दर्शनानुन्नवो ह्ययं ॥ ६५ ॥ संभूय सर्वसामग्र्या । स्वमहद्भिपुरस्सरं ॥ पश्यंत्यूर्ध्वमुखा याव–त्फलमुच्चतरोरिव ॥ ६६ ॥ तावत्तदर्हतां चैत्ये–ष्वापतत्प्रविलोक्य ते ॥ शाक्यजलङ्वालिप्ता–स्तस्थुरुत्तानितेक्षणाः ॥ ६७ ॥ जैनास्तु प्रोद्यदानंद–मेदुरं समहोत्सवं ॥ चक्रुः पर्युषणापर्व । सुपर्वाश्चर्यदायकं ॥ ६८ ॥ श्रीवज्रसूरिसूरस्य । माहात्म्यं वीक्ष्य तादृशं ॥ घूका इव तदा जाता । बौद्धा वंध्यतमोद्यमाः ॥ ६९ ॥ जिनचैत्येषु पुष्पौघ–सौरभ्यभरतोंबरे ॥ भ्रमंतो भ्रमरा बौद्ध–दुर्यशांसीव रेजिरे ॥ ७० ॥ श्रीवज्रप्रतिभातेजो–ध्वस्ताऽज्ञानतमोभरः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ जैनभक्तस्तदा जज्ञे । राजा सर्वप्रजापि च ॥ ७१ ॥ प्रतीच्छकस्य तत्रैवा–ऽऽर्यरक्षितमहा-
मुनेः ॥ सार्द्धानि नवपूर्वाणि । वज्रः क्षिप्रमपीपठत् ॥ ७२ ॥ इति प्रज्ञावनाचित्रं । विदधानः
पदे पदे ॥ विजहार क्रमेणायं । श्रीवज्रो दक्षिणां दिशं ॥ ७३ ॥ अन्यदाकस्मिकश्लेष्म–बा-
धायां वज्रसूरयः ॥ भोजनोर्ध्वमियं ग्राह्या । कर्णे शुंठीमिति न्यधुः ॥ ७४ ॥ ततश्च विहि-
ताऽऽहाराः । स्वाध्यायध्यानतत्पराः ॥ तथैव श्रवणस्थाष्णुं । सूरयस्तां न सस्मरुः ॥ ७५ ॥

अथावश्यकवेलायां । मुखवस्त्रिकयाऽऽहता ॥ पतिता सा खटत्कार–रवेण निशि स-
स्मरे ॥ ७६ ॥ दध्युश्चामी धिगस्माकं । प्रमादः खलु बाधते ॥ ततः शरीरत्यागेन । साध-
यामः परं भवं ॥ ७७ ॥ इतश्च द्वादशाब्दिक्ये । दुर्भिक्षे वज्रसूरयः॥ वज्रसेनाभिधं शिष्यं ।
ततोऽन्यत्र व्यहारयन् ॥ ७८ ॥ भिक्षामलभमानास्ते । यतयस्तदनंतरं ॥ भुंजते गुरुभिर्दत्तं ।
भिक्षापिंडमपंकिताः ॥ ७९ ॥ श्रीवज्रगुरुभिः प्रोक्ता । गीतार्थयतयोऽन्यदा ॥ द्वादशाब्दा-
नि दुर्भिक्षं । नूनमेतद्भविष्यति ॥ ८० ॥ दग्धदेहकृते तस्मा–दलं संयमबाधया ॥ तीर्थमा-
श्रित्य तत्प्राणां–स्त्यजामोऽनशनादिना ॥ ८१ ॥ इत्थं विमृश्य तत्काले । तत्कालक्षयकृद्भिरिं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ कतिचिद्यतिभिर्युक्ता । जग्मुः श्रीवज्रसूरयः ॥ ८२ ॥ प्रतार्य क्षुल्लकं कंचि–त्समायांतं बलादपि ॥ विमुच्य कृपया ग्रामे । स्वयमारुरुहुर्गिरिं ॥ ८३ ॥ असमाधिर्गुरोर्मा भू–दिरूध्वं गते मयि ॥ इत्यधः क्षुल्लकस्तस्थौ । गृहीताऽनशनः स्वयं ॥ ८४ ॥ तपनातपसंतप्तः । सोऽगलन्नवनीतवत् ॥ वशीकृतेंद्रियग्रामो । जगाम त्रिदशालयं ॥ ८५ ॥ सुरानागच्छतो वीक्ष्य । तद्वपुःसंस्क्रियाकृते ॥ पृष्टो मुनिभिराचष्ट । गुरुः शिष्यपरासुतां ॥ ८६ ॥

तमन्यनंदन्मुनयः । साधुरस्य शिशोर्मतिः ॥ यदेष पश्चान्मुक्तोऽपि । जातोऽस्मासु पुरस्सरः ॥ ८७ ॥ किमद्यापि प्रमादं त–त्कुर्महे शर्महेतुषु ॥ वयमित्यशनत्यागं । चक्रुस्ते गुरुणा सह ॥ ८८ ॥ श्राविकीभूय मिथ्यात्वि–देवता व्रतिनां तदा ॥ मोदकान् दर्शयामास । क्रियतां पारणामिति ॥ ८९ ॥ देव्यवग्रहसंबंधा–त्तं विहाय धराधरं ॥ जगामान्यगिरेः शृंगे । ततो धनगिरेः सुतः ॥ ९० ॥ तत्र सम्यग्दृशो देव्या । अवग्रहसमाधिना ॥ प्रपाद्याऽनशनं सर्वे । साधवः स्वर्गमैयरुः ॥ ९१ ॥ तैरेव ख्यापितोदंत–स्तत्रागत्य द्रुतं हरिः ॥ शैलं प्रदक्षिणीचक्रे । रथारूढः समंततः ॥ ९२ ॥ तत्राद्यापि रथाघात–भुग्नाः संति महीरुहः ॥ रथावर्त्त

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

इति ख्यात–स्तदादि च स नूधरः ॥ ९३ ॥ तदंतकृत्यमाधाय । स्वयं च विबुधाधिपः ॥ चितासु स्थापयामास । स्तूपश्रेणीं हिरण्मयीं ॥ ९४ ॥ श्रीवज्रस्वामिनो मूर्त्तिं । पूजयित्वा सुमादिभिः ॥ स्तुत्वा च तकुणध्यान–निर्न्नरो दिवमासदत् ॥ ९५ ॥ इतश्च वज्रसेनोऽपि । श्रुतसागरपारगः ॥ सोपारपत्तनं प्राप । गुरुशिक्षावशंवदः ॥ ९६ ॥ तत्रास्ति जिनदत्ताख्यः । श्रेष्टी श्राद्धशिरोमणिः ॥ ईश्वरी वल्लभा तस्य । जिनधर्मविशारदा ॥ ९७ ॥ तयोस्तनूजाश्चत्वार–श्चतुरा धर्मकर्मसु ॥ चंद्रेद्देशिकनागेंद्र–विद्याभृत इति श्रुताः ॥ ९८ ॥ सर्वे विवेकिनः शस्या–ऽन्नावाद्दुर्मृत्युशंकया ॥ विषेणाराधनापूर्वं । प्राणत्यागं चिकीर्षवः ॥ ९९ ॥ लक्षमूल्येन संसाध्य । पायसस्थालिकाममी ॥ विषमक्षिप्यदुर्भिक्ष–क्षीणा यावत्क्षिपंति न ॥ ॥३००॥तावन्निक्षागतो वज्र–शिक्षापीयूषनिर्न्नरः॥ श्रीवज्रसेनस्तत्राऽागात् । तत्कर्मन्निरिवाहृतः ॥ १ ॥ ईश्वरी तत्पुरोन्नूय । धन्यंमन्या मुनिं जगौ ॥ साधु साधु महाभाग्यैः । समये त्वमिहागतः ॥ २ ॥ यावदद्यापि नो लिप्तं । विषेण खलु पायसं ॥ तावदेतत्प्रतिगृह्य । तारयाऽस्मान् भवांबुधेः ॥ ३ ॥ ततः स्मृत्वा महात्माऽपि । वज्रशिक्षामदोऽवदत् ॥ मा म्रिय-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ध्वं मुधा यस्मा–त्सुन्निक्रयं न्नविता प्रगे ॥ ४ ॥ इदमेव सुन्निक्रस्य । ध्रुवमादिश्य लक्रणं ॥ प्रेषितोऽहं तदा वज्र–सूरिन्निर्ज्ञानराशिन्निः ॥ ५ ॥ इति तद्वचसा तस्मा–न्निवृत्ता अपमृत्युतः ॥ प्रातर्देशांतराज्ञस्य–पोताः प्राप्ताश्च नूरिशः ॥ ६ ॥ जातं सुन्निक्रं श्रीश्रेष्टि–सूनवोऽथ प्रबुद्ध्य ते ॥ चत्वारोऽपि चतुर्थार्थं–लिप्सया जगृहुर्व्रतं ॥ ७ ॥ चत्वारः स्थापिता गन्ना–स्तत्रान्ना प्रथिताश्च ते ॥ अतोऽसौ वज्रसेनाख्या । शाखाद्यापि प्रवर्त्तते ॥८॥ इन्नं प्रन्नावकशिरोमुकुटायमाने । वज्रे सुरास्पदमुपेयुषि लब्धिसिंधौ ॥ विन्नेदमापदिह संहननं चतुर्थं । क्रेत्रे तदादिदिवसादृशमं च पूर्वं ॥ ९ ॥

॥ इति श्रीरुद्रपल्लीयगन्ने श्रीसंघतिलकसूरिपट्टावतंससोमतिलकसूरिविरचितायां श्रीशीलोपदेशमालावृत्तौ शीलतरंगिण्यां श्रीवज्रसूरिचरितं समाप्तं ॥ श्रीरस्तु ॥

शीलपालनसामर्थ्यात्स्त्रियोपि पूज्यतामुपदिशन्नाह—

॥ मूजम् ॥—पालंती नियसीलं । गवंती सुरुधम्ममग्गंमि ॥ रहनेमिं मुणिंपि जए। पुज्जा राईमई अज्जा ॥ ४३ ॥ व्याख्या—निजं शीलं पालयंती, श्रीनेमेर्दीक्राकक्षीकारानंतर-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मपरनररतिरहिता अब्रह्मसेवाचतुरचाटुशतमुखरमुखं श्रीनेमिलघुबांधवं प्रबोध्य व्रतदार्ढ्ये नियुंजाना जगति संसारे आर्या तपोधना राजीमती श्रीउग्रसेनात्मजा शीलपालनमेव च स्त्रीणां प्राधान्यं कलयति. यदुक्तं—शीले जीवति जीवंति । कुलं लोकद्वयं यशः ॥ शीलरक्षा ह्यतः स्त्रीणां । प्राणेभ्योऽप्यधिका मता ॥१॥ इति गाथार्थः, कथानकं प्रागेवोक्तमित्यत्र नोच्यते.

गृहस्थानामपि शीलैकशीलनात्परमोत्कर्षतामाह—

॥ मूलम् ॥—ते धन्ना गिहिणोवि हु । महरिसिमज्झंमि जे उदाहरणं ॥ निरुवमसीलविचारे । पावंति पसिद्धिमाहप्पा ॥ ४४ ॥ व्याख्या—खलु निश्चयेन ते गृहिणोऽपि धन्याः, गृहवासे वसंतोऽपि कृतार्था एव. निरुपमशीलविचारे निरतीचारब्रह्मव्रतपरीक्षायां प्रसिद्धमाहात्म्याः ख्यातप्रज्ञावाः संतो महर्षिमध्ये उदाहरणं दृष्टांतं प्राप्नुवंति, महामुनिव्रतदार्ढ्यप्रशंसावसरे श्लाघ्यंते, तदेव हि परमं विभूषणं प्राणिनां. उक्तं च—ऐश्वर्यस्य विभूषणं मधुरता शौर्यस्य वाक्संयमो । रूपस्योपशमः श्रुतस्य विनयो वित्तस्य पात्रे व्ययः ॥ अक्रोधस्तपसः क्षमा प्रभवतो धर्मस्य निर्व्याजता । सर्वेषामपि सर्वकालनियतं शीलं परं भूषणं ॥ इति गा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

आऽवयवार्थः ॥ तमेवार्थं दृष्टांतेन दृढयन्नाह—

॥मूलम्॥—सीलपन्नावपन्नाविय—सुदंसणं तं सुदंसणं सद्धं ॥ कविलानिवदेवीहिं । अखोहियं नमह निच्चंपि ॥४५॥ व्याख्या—शीलप्रज्ञावितसुदर्शनं शीलमाहात्म्योद्योतितजिनशासनं तं सुदर्शनश्राद्धं कपिलानृपदेवीन्यामक्षोभितं चालयितुमशक्यं नित्यं नमत? गृहस्थस्यापि यतिवद् दृढव्रतत्वान्निरंतरं नमस्कारयोग्यतेति गाथार्थः, भावार्थः कथानकगम्यः, स चायं तथाहि—अस्त्यंगविषयक्षोणी—वेणीचूडामणीयिता ॥ पुरी चंपेति विख्याता । शंपेव व्योमनीरदे ॥ १ ॥ तां शास्ति स्वर्गशास्तेव । राजा श्रीदधिवाहनः ॥ मथनाऽगोचरं यस्य । यशो क्षुधाब्धिक्षुधवत् ॥ २ ॥ अभया वल्लभा तस्य । यस्या लावण्यनीरधिः ॥ चित्रं रक्तांतरं चक्रे । राजानं यशसोज्ज्वलं ॥ ३ ॥ अभूद् वृषभदासाख्य—स्तस्यां पुर्यामुपासकः ॥ अर्हद्दासी प्रिया तस्य । जिनधर्मैकवत्सला ॥ ४ ॥ तस्यास्ति महिषीपालः । सुभगाख्यः शुभाशयतिः ॥ श्रेष्ठिनो महिषीर्वन्य—भूमौ चारयतिस्म सः ॥ ५ ॥ माघमासेऽन्यदा सायं । निवृत्तः स गृहंप्रति ॥ प्रतिमास्थितमशङ्की—न्मुनिमप्रावृतं पथि !! ६ ॥ गृहप्राप्तोऽपि तं साधुं । हि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मानीवर्षऽःस्थितं ॥ ध्यायन्सकरुणः कष्टं । रजनीं तामवाहयत् ॥ ७ ॥ ततः सवेलमुत्थाय । पुरस्कृत्य स सैरिभीः ॥ गत्वंस्तथैव प्रैक्षिष्ट । कायोत्सर्गस्थितं मुनिं ॥ ८ ॥ आसांचक्रे क-
णं नत्वा । तत्रैव मुनिसन्निधौ ॥ उदियाय सहस्रांशु–स्तावत्तत्पुण्यबीजवत् ॥ ९ ॥ चारण-
र्षिस्ततस्तीव्र–तेजा रविरिवाऽपरः ॥ ज्ञाम्रमो अरिहंताण–मित्युक्त्वा दिवमुद्ययौ ॥ १० ॥ त-
न्मंत्रमिव विद्याया । व्योमगाया विदन्नयं ॥ निदधौ हृदये हार–मिव निर्मलमौक्तिकं ॥ ११ ॥
दिवारात्रौ चलंस्तिष्टन् । स्वपन् जागृज्गृहे बहिः ॥ तेदेव दध्यौ कामीव । सुन्नगः सुन्नगान्नि-
धां ॥ १२ ॥ अपृच्छदन्यदा श्रेष्टी । पदमेतत्त्वया कुतः ॥ आसादितं दरिद्रेण । निधानमिव दु-
र्लन्नं ॥ १३ ॥ विद्याया व्योमगामिन्या । एव मंत्रो मयाप्यत ॥ इत्युक्ते तेन तल्लाभो–दंते
श्रेष्टी जगाद तं ॥ १४ ॥

न केवलमियं विद्या । नन्नसो गमने पटुः ॥ कारणं किंतु जानीया । अपि स्वर्गापवर्ग-
योः ॥ १५ ॥ यदि वा दुर्लन्नं किंचि–दस्ति भुवनत्रये ॥ तदस्मात्सुलन्नं नावि । कामधेनो-
रिवाऽखिलं ॥ १६ ॥ यथार्थं सुन्नगं तत्त्वां । वयं संप्रति मन्महे ॥ परं न जप्या विद्येय–मु-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

त्सृष्टेन सता त्वया ॥ १७ ॥ इत्याश्वास्य नमस्कारं । सकलं तमपाठयत् ॥ निःस्वो निधिमिव प्राप्य । सुगृहीतं च तं व्यधात् ॥ १८ ॥ तस्याऽजस्रं नमस्कार–परावर्त्तनशीलिनः ॥ कालः प्रवासिनां वर्षा–कालः क्रमत आपतत् ॥ १९ ॥ धरामेकार्णवां धारा–धरे कुर्वति सर्वतः ॥ गृहीत्वा महिषीः क्षिप्रं । सुन्नगोऽपि ययौ वनं ॥ २० ॥ तीर्त्वा तूर्णं नदीं ताश्च । परक्षेत्रे तदाऽविशन् ॥ मत्स्वामिन नृपालंत्रो । मायासीरिति चिंतयन् ॥ २१ ॥ व्योमविद्या-धिया ध्याय–न्नमस्कारं तदंतरे ॥ पपात दत्तऊंपोऽयं । कीलविद्धो ममार च ॥ २२ ॥ युग्मं ॥ नमस्कारप्रभावेण । मानसे राजहंसवत् ॥ सुस्वप्नसूचितः श्रेष्ठि–नार्याकुक्षाववातरत् ॥ ॥ २३ ॥ अर्हन्के गर्भमापन्ने । तस्मिन्मासि तृतीयके ॥ पत्न्या धर्ममयान् श्रेष्ठी । दोहदान् पर्यपूरयत् ॥ २४ ॥

समयेऽसूत सा पुत्रं । सर्वांगशुभलक्षणं ॥ नाम चोत्सवतः श्रेष्ठी । सुदर्शन इति व्य-धात् ॥ २५ ॥ ववृधे पुण्यजा ऋद्धिः । सह पित्रोर्मनोरथैः ॥ पूर्वाभ्यस्ता इवाग्राहीत् । क्षि-प्रं स सकलाः कलाः ॥२६॥ क्रमेण यौवनं प्राप्त–वता तेन विवेकिना ॥ कन्यां मनोरमां ना-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

म्रीं । जनकः पर्यणाययत् ॥२७॥ सर्वानंदो द्वितीयस्याः । शशीव स सुदर्शनः ॥ जने च राजवर्गे च । मान्यतामगमत्तरां ॥ २८ ॥ इतश्च कपिलाख्येन । समं राजपुरोधसा ॥ स्मरेणेव वसंतस्य । तस्य प्रीतिरजायत ॥ २९ ॥ नित्यगोष्ठीसुधावृष्टि–प्रीणितांतरयोस्तयोः ॥ सुखेन दिवसा यांति । रामलक्ष्मणयोरिव ॥ ३३ ॥ अन्येद्युः कपिला नाम्नी । भार्याऽपृच्छत्पुरोधसं ॥ किमद्यकल्ये ते स्वामिन् । शैथिल्यं सर्वकर्मसु ॥ ३१ ॥ ऊचे सुदर्शनाख्योऽस्ति । मित्रं प्राणप्रियं मम ॥ तद्गोष्ठीसुखनिर्मग्नो । न स्मरामि किमप्यहं ॥ ३२ ॥ कोऽसौ कीदृगिति प्रोक्ते । तयाऽसौ पुनराह च ॥ पुत्रो ऋषभदासस्य । श्रेष्ठिनोऽसौ महामतिः ॥ ३३ ॥ रूपलावण्यसौजन्य–दाक्षिण्यप्रमुखा गुणाः ॥ कियंतस्तस्य वर्ण्यंते । गगने तारका इव ॥ ॥ ३४ ॥ व्यर्थजन्मासि भद्रे त्वं । ययाऽसौ गुणसेवधिः ॥ न दृष्टो न श्रुतो वापि । पद्मिन्येव सुधारुचिः ॥ ३५ ॥

शुभ्रैरपि गुणैस्तस्य । श्रुतै रक्तांतरा द्रुतं ॥ उपायांश्चिंतयामास । कपिला तद्दिदृक्षया ॥ ३६ ॥ गूढं राजाज्ञयाऽन्येद्यु–र्गते ग्रामं पुरोहिते ॥ सुदर्शनगृहेऽभ्यागा–त्कपिला कामवि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ह्वला ॥ ३७ ॥ ऊचे च सुहृदस्तेऽद्य । न वपुःपाटवं तथा ॥ सुदर्शन सुधादृष्ट्या । तत्तमागत्य तोषय ॥ ३८ ॥ मित्रप्रीत्या द्रुतं सोऽपि । गतस्तन्मंदिरे तदा ॥ क्व मे मित्रमिति प्रोक्ते । निर्वांतेऽस्तीति साऽवदत् ॥ ३९ ॥ निगोदेषु प्रमादीव । तयानीतो गृहांतरे ॥ कामुकी कामयामास । विभ्रमैस्तमथो रहः ॥ ४० ॥ द्वारं दत्वा श्लथश्रोणि–बंधा निस्त्रपमालपत् ॥ प्रत्युत्पन्नमतिः सोऽपि । तामिदं प्राह सस्मितं ॥ ४१ ॥ इदमेव फलं यूनां । संसारे सारतोष्रिते ॥ किं त्वहं षंढभावेन । भद्रे धात्रा विडंबितः ॥ ४२ ॥ तन्नामिनि वृथा भ्रांता । मयि पुंरूपधारिणि ॥ क्षुधाक्रांतस्तालफला–ऽभिलाषी पथिको यथा ॥ ४३ ॥ वीक्षापन्ना ततो गच्छ–गच्छेत्युक्त्वा द्विजांगना ॥ द्वारमुन्मुच्यामास । सह श्रेष्ठिमनोरथैः ॥ ४४ ॥ ततो जीव इवोन्निन्न–ग्रंथिर्निर्गत्य स द्रुतं ॥ भवं तृणमिव ध्यायन् । ययौ सरलवर्त्मना ॥ ४५ ॥ राक्षसीभ्य इव स्त्रीभ्य–स्ततो भीरुः सुदर्शनः ॥ परगेहे न गंतव्यं । निश्चिकायेत्यतःपरं ॥ ४६ ॥ मूर्त्तो योग इवाऽजस्रं । धर्मध्यानपरस्ततः ॥ सर्वकर्माणि वश्यात्मा । निरवद्यतयाऽाचरत् ॥ ॥ ४७ ॥ अथान्यदा सहादाय । सुदर्शनं पुरोधसा ॥ ययौ क्रीडितुमुद्यानं । राजा श्रीदधि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वाहनः ॥ ४८ ॥ ततः कपिलया सार्द्धं । शचीव सुरनायकं ॥ यानारूढाऽन्नया राज्ञी । दधि-
वाहनमन्वगात् ॥ ४९ ॥ इतः सुदर्शनस्यापि । जाया षड्भिः सुतैर्युता ॥ गुणैः साम्राज्यल-
क्ष्मीव–त्संचचार तदा पथि ॥ ५० ॥ दृष्ट्वा तां कपिलाऽपृच्छत् । पट्टराज्ञीं सविस्मयं ॥ केयं
षड्भिः सुतैर्युक्ता । रसैरिव पुरांगना ॥ ५१ ॥ अन्नयाऽाह न जानासि । कथमेनामपि द्विजे
॥ सुदर्शनस्य भार्येयं । गेहलक्ष्मीरिवांगिनी ॥ ५२ ॥ पुनः सस्मितमप्राक्षी–द्यदीयं तस्य व-
ल्लभा ॥ इक्षोरिव फलप्राप्तिः । कुतोऽस्यास्तनयास्ततः ॥ ५३ ॥ तयोचे किमसंबद्धं । जल्पा-
के ननु जल्पसि ॥ साधारणं हि पुत्रादि–लक्षणं राजरंकयोः ॥ ५४ ॥ न तस्य पुंस्त्वम-
स्तीति । तयोक्तेऽन्नययौच्यत ॥ नूनं कुत्रापि दृष्टोऽस्ति । चपले सत्यमुच्यतां ॥ ५५ ॥ पृष्टे-
ति तस्य षंढत्व–वृत्तांतं मूलतोऽवदत् ॥ ततोऽन्नयाऽप्यभाषिष्ट । त्वं मूढे वंचिता ध्रुवं ॥५६॥
धर्मी सोऽयं परस्त्रीषु । षंढो न निजयोषिति ॥ संकोचयन् पद्मिनीं किं । दुष्यः कुमुदिनीप-
तिः ॥ ५७ ॥ कपिला कपिपत्नीव । तयोपहसिता ततः ॥ सवैलक्ष्या समंदाक्षं । मंदाक्षरम-
भाषत ॥ ५८ ॥ मूढाऽहं वंचिता ताव–त्तेन षंढत्वदंभतः ॥ तवापि वेद्मि वैदग्ध्यं । रमसे चे-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

त्सुदर्शनं ॥ ५९ ॥

सगर्वमुररीकृत्य । तद्वचो महिषी जगौ ॥ हले सहेलं तर्ह्येनं । जानीहि क्रीडितं मया ॥ ६० ॥ यतोऽनेकनराधीश–कन्यादुर्ललितोऽप्यसौ ॥ नरेंद्रो व्रूलताक्षेपा–द्भ्राम्यते कपिबालवत् ॥ ६१ ॥ रमणीभिररम्यंत । नीरसा अपि तापसाः ॥ किं वाच्यमस्य तु स्वैरं । सदा कांतानुषंगिणः ॥ ६२ ॥ एकाक्षा अपि पुष्पंति । स्त्रीकटाक्षादिभिर्द्रुमाः ॥ पंचेंद्रियस्य दक्षस्य । क्षोभणेऽस्य कियान् श्रमः ॥ ६३ ॥ यद्यहं न रमे चैनं । तद्विशामि हुताशनं ॥ प्रतिज्ञामिति कुर्वाणा । संप्राप्तोद्यानभूमिकां ॥ ६४ ॥ चिरमारामसंपत्तिं । सफलीकृत्य ते ततः ॥ अन्नयाकपिले सायं । स्वंस्वं गृहमुपेयतुः ॥ ६५ ॥ अथ प्रतिज्ञामात्मीयां । राज्ञी त्वनन्यमानसा ॥ तदैव पंडितानाम्न्या । निजधात्र्याः पुरोऽवदत् ॥ ६६ ॥ प्रोचे तयापि हा पुत्रि । न त्वया साधु मंत्रितं ॥ धैर्यशक्तिं न जानासि । यतोऽद्यापि महात्मनां ॥ ६७ ॥ सामान्योऽपि जिनश्राद्धः । परस्त्रीषु सहोदरः ॥ सुदर्शनस्य तु व्यक्तं । सत्त्वसीमैव निःसमा ॥ ६८ ॥ स हि नित्यं गुरूपास्ति–धर्मध्यानैकतानधीः ॥ आनेतुमप्यशक्योऽत्र । दूराऽपास्तं च क्रीडनं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ ६९ ॥ कः प्रतिशृणुते पातुं । मृगतृष्णाजलं सुधीः ॥ शशशृंगजिघृक्षायै । कः पर्यटति कानने ॥ ७० ॥

तथा सुदर्शनस्यास्य । शीलोल्लंघनकर्मणि ॥ रूपसौभाग्यगर्वेण । कः प्रयत्नं चिकीर्षति ॥ ७१ ॥ पुनः साग्रहमाहस्म । देवी मातः कथंचन ॥ तमानयैकदा त्वं त्वां । नियोक्ष्ये नान्यकर्मणि ॥ ७२ ॥ विचिंत्य पंडिताप्यूचे । यद्येष तव निश्चयः ॥ नृपायश्चिंतितो ह्यस्ति । तत्तदानयने मया ॥ ७३ ॥ पर्वाह्णे यदसौ कायो–त्सर्गं शून्यगृहादिषु ॥ धत्ते तदैव नेतव्यो । नान्यथा तस्य संगमः ॥ ७४ ॥ साधु साधु यथार्थासि । पंडिते मतिमंडिते ॥ कर्त्तव्योऽयमुपायस्त–त्त्वया सोमित्युवाच च ॥ ७५ ॥ सुदर्शनप्रमाणेन । कामस्य प्रतिमां ततः ॥ आनयंती नयंती च । विश्वस्तान् यामिकान् व्यधात् ॥ ७६ ॥ इतश्च कौमुदीपर्व–क्रीडार्थंविपिने प्रजाः । नृनृदाह्वाययामास । पटहोद्घोषपूर्वकं ॥ ७७ ॥ गृह एव तदा श्रेष्ठी । चतुर्मासिकपर्वणि ॥ विज्ञप्य नृभुजं तस्थौ । धर्मकृत्यचिकीर्षया ॥ ७८ ॥ पंडिताऽपि तदा राज्ञी–मुवाचाद्य त्वया वने ॥ न गंतव्यं यथा तेऽद्य । प्रतिज्ञा सफलीभवेत् ॥ ७९ ॥ अद्य मां बा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

धते शीर्ष–वेदनेति मिषादसौ ॥ आपृच्छय नृपतिं तस्थौ । सद्योमतिबलाः स्त्रियः ॥७०॥ सुद-
र्शनोऽपि निर्माय । देवार्चादिविधीन् दिने ॥ संगृह्य पौषधं शून्य–गृहेऽस्थात्प्रतिमां निशि ॥
॥ ७१ ॥ पंडितापि ततो न्यस्य । याने जन्नं सुदर्शनं ॥ अस्खल्यमाना द्वारस्थै–रन्नयायै स-
मार्पयत् ॥ ७२ ॥ धृतशृंगारतूणीरा–ऽाकृष्टभ्रूवल्लिकार्मुका ॥ सज्जिताऽपांगनाराचा । सा ल-
क्ष्यं श्रेष्ठिनं व्यधात् ॥ ७३ ॥ हुं जन्न फलितं तेऽद्य । तपस्तप्तं सुदुस्तपं ॥ मुंच कष्टमिदं धृ-
ष्ट । हृष्टश्रेष्ठमथाचर ॥ ७४ ॥

इत्थं सनर्म जल्पंती । कल्पिताऽनल्पविक्रिया ॥ स्तनोपपीडं सर्वांग–मालिलिंग स्म-
रातुरा ॥ ७५ ॥ विशिष्य ध्यानमध्यास्त । तदानीं श्रीसुदर्शनः ॥ प्रलयोत्तालवातेन । सुमेरुः
किमु कंपते ॥ ७६ ॥ पुनः साह कियद्भूर्त्तं । पुरो मे नाटयिष्यति ॥ काममातंगन्नीताऽहं ।
त्वामस्मि शरणंगता ॥ ७७ ॥ तस्मान्मा मामुपेक्षस्व । चिरं खिन्नां कृते तव ॥ मूढोऽपि
को सुधा लब्धां । सुधां परिजिहीर्षति ॥ ७८ ॥ सोऽपि दध्यौ धिया धीरो । मुच्ये चेत्संक-
टादतः ॥ पारयामि तदोत्सर्ग–मन्यथाऽनशनं पुनः ॥ ७९ ॥ सहेलं हीलिता तेन । तथा

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

साऽन्यर्थ्ययंत्यपि ॥ जातकोपाथ चंद्रोव । तं ज्ञापयितुमुद्यता ॥ ९० ॥ धिक् ते ज्ञानं न जानासि । मां सुधां माऽवमानय ॥ पीयूषं मानिनी तुष्टा । रुष्टा विषमवेहि च ॥ ९१ ॥ यमदूती ध्रुवं तेऽहं । जाता तीव्रतयाऽनया ॥ इत्यादि भ्रूकुटीभीमा । भामिनी तमज्ञापयत् ॥ ॥ ९२ ॥ स पुनर्ध्यानसीमान–मारुरोह विशेषतः ॥ शंभुनेत्राग्निसंगेन । सुधाधामैव चंद्रमाः ॥ ९३ ॥ विलक्षाथ विज्ञातायां । विज्ञावर्यां नृपांगना ॥ पूच्चकार नखैः स्वांगं । विलिखंती रुषाकुला ॥ ९४ ॥ ततः प्राहरिकाः क्षिप्रं । समीयुस्तत्र संभ्रमात् ॥ ददृशुः केवलं शांतं । प्रतिमास्थं सुदर्शनं ॥ ९५ ॥

अस्मिन्नसंभवत्येत–द्भशिनीव विषोर्मयः ॥ ध्रुतं तैरिति विज्ञप्तो । नृपः स्वयमुपागमत् ॥ ९६ ॥ सबाष्पमभया भूपं । स्खलदक्षरमाख्यत ॥ युष्मानापृच्छय देवाहं । यावदत्र समागता ॥ ९७ ॥ तावताऽकांडकुष्मांड–मिवाऽदर्शममुं पुरः ॥ पटुचाटुभिराचष्ट । ध्रुष्टो मां च रिरंसया ॥ ९८ ॥ अनिच्छंतीं बलात्कारं । कुर्वन्मां व्यलिखन्नखैः ॥ पूच्चक्रे च मया किं वा । । बलं स्यादबलाजने ॥ ९९ ॥ पूतरा इव ध्रुग्धेऽस्मि–न्नसंभाव्यमिदं खलु ॥ मत्वेति भूपः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पप्रच्छ । किमेतदिति तं मुहुः ॥ १०० ॥ अन्नयाकृपया किंचि–न्न चोवाच सुदर्शनः ॥ पीड्य-
मानोऽपीक्षुदंडो । मधु प्रोक्षिरते यतः ॥ १ ॥ पारदारिकचौराणां । मौनमेव हि लक्षणं ॥ वि-
मृश्येति महीभर्त्ता । तस्मिन् दोषमन्नावयत् ॥ २ ॥ अथादिदेश कोपेना–ऽरक्षकानिति भू-
पतिः ॥ विडंब्य दोषं व्याख्याप्य । पुरे चैष निगृह्यतां ॥ ३ ॥ तैरथाऽऽकृष्य केशेषु । नीतो
बहिरुरज्जवत् ॥ यदुक्तं यौवनेऽवश्यं । भवंत्येव विडंबनाः ॥ ४ ॥ मौलौ स्रक् कर्णवीराणां ।
कंठे क्षिप्ता च निंबजा ॥ मष्याऽमंकि मुखं रक्त–चांदनैश्च रसैर्वपुः ॥ ५ ॥ सूर्पभृत्रीकृतशि-
राः । खरपृष्ठेऽधिरोपितः ॥ चक्रेऽस्य वध्यनेपथ्यं । डिंडिमध्वनिपूर्वकं ॥ ६ ॥ कृताऽपराधः शु-
द्धांते । वध्यतेऽसौ सुदर्शनः ॥ इत्याघोषणयाऽरेभे । पुरे भ्रामयितुं भटैः ॥ ७ ॥ न साधु वि-
दधे राज्ञा । न युक्तमिदमीदृशे ॥ न कुशीलोऽयमेतस्य । वदनं नाऽपराधिनः ॥ ८ ॥ किं वा
शून्यगृहे शेते । दैवमत्रापराध्यति ॥ जीवन् किं मोक्ष्यते ह्यै–रपि सर्वैः कथंचन ॥ ९ ॥
इत्थं ब्रुवाणे पुर्लोके । हाहाकारपरायणे ॥ रुदद्भिः सुजनैश्चाय–मग्रेऽगान्निजवेश्मनः ॥ १० ॥
दृष्ट्वा मनोरमा रामा–शिरोरत्नं महासती ॥ चेतस्यचिंतयन्नेद––मुचितं मत्प्रभोर्हहा ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ ११ ॥ यतः—

अंगारवृष्टिश्चेच्चंश–ज्जायते चांबु वह्नितः ॥ अपाच्यामुदयी भानु–स्तथाप्यस्य न दुष्टता ॥ १२ ॥ इति सा चिंतयाऽचांता । गत्वा गर्भगृहांतरे ॥ पूजयित्वा जिनं चक्रे । कायोत्सर्गं महासती ॥ १३ ॥ अचिंतयच्च शृण्वंतु । श्रीजिनशासनदेवताः ॥ उत्पातो निष्कलंकस्य । श्राद्धस्यायमुपस्थितः ॥ १४ ॥ चेत्करिष्यथ सांनिध्यं । तदा पारयितास्म्यहं ॥ कायोत्सर्गम-मुं नो वा–ऽनशनं मे कुलस्त्रियः ॥ १५ ॥ निर्वेदं मा कृथा वत्से । संनिधास्यामहे वयं ॥ इ-त्थं दिव्यामियं वाणी–मशृणोत्प्रतिमास्थिता ॥ १६ ॥ इतश्च भ्रामयित्वा ते । शूलिकायां सुद-र्शनं ॥ न्यधुरारक्षकाः स्वर्णा–नोजासनमभूच्च तत् ॥ १७ ॥ वधाय पुनरेतैश्च । प्रयुक्ताः ख-ड्गयष्टयः ॥ हारलीलायितं नेजुः । कंठे मौलौ च मौलितां ॥ १८ ॥ कर्णयोः कुंडलीभावं । बाह्वोः केयूरतामगुः ॥ पादयोर्हस्तयोश्चैव । प्रोद्यत्कटकतां च ते ॥ १९ ॥

तदाश्चर्यं नरेंद्राय । ज्ञापयामासुराशु ते ॥ आगात्करेणुमारुह्य । सोऽप्युपश्रीसुदर्शनं ॥ ॥ २० ॥ साऽनुतापं तमाश्लिष्या–ऽभाषिष्ट पृथिवीपतिः ॥ श्रेष्ठिन् दिष्ट्याद्य दृष्टोऽसि । जी-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वन् स्वस्य प्रज्ञावतः ॥ २१ ॥ जागरूकास्ति यस्यांग–रक्षणे धर्मवासना ॥ दिव्यास्त्रमपि कुं-
ठेत । स नरः पुरुषोत्तमः ॥ २२ ॥ स्त्रीणां वचसि विश्वासं । निर्विवेकी करोति यः ॥ संता-
पज्ञाजनं स स्या–दधिवाहनवद्भुवि ॥ २३ ॥ परवाचाऽपराद्धं य–त्तन्मे क्षम्यमितीरिणा ॥ रा-
ज्ञा करिष्यामारोप्य । स्वसौधेऽनायि सोत्सवं ॥ २४ ॥ हर्षोत्कर्षवशाल्लोकै–स्तदेत्यूचे मनो-
रमा ॥ वर्द्धयसे मंगलैः कायो–त्सर्गं पारय पारय ॥ २५ ॥ सस्नेहमथ सत्कृत्य । वस्त्रमाढ्या-
नुलेपनैः ॥ पृष्टो राज्ञा यथावृत्तं । सोऽपि तथ्यमचीकथत् ॥ २६ ॥ त्वमेवाऽचीकरस्तर्हि ।
ममाऽकृत्यान्निषेधनं ॥ नाऽवोचः किमपि श्रेष्ठिं–स्तथा पृष्टोऽपि यत्तदा ॥ २७ ॥ अन्ययानिग्र-
हे कुरु–मथ भूपं सुदर्शनः ॥ ययाचेऽन्नयमेतस्या । मौलिमालिंग्यः पादयोः ॥ २८ ॥ इत्थं
सुदर्शनोपज्ञ–जिनधर्मप्रज्ञावनां ॥ ज्ञात्वा तदादि जैनेंद्र–मते राजा त्वरज्यत ॥ २९ ॥ अ-
श्वेनस्कंधमारोप्य । वृत्तं लोकैरनेकशः ॥ राजा सुदर्शनं प्रैषी–त्तस्य हर्षेण मंदिरं ॥ ३० ॥

तं वृत्तमन्नया ज्ञात्वा । स्वमुद्बद्ध्य व्यपद्यत ॥ स्वयं कृतानि पापानि । स्वात्मन्येव प-
तंति यत् ॥ ३१ ॥ पंडिता पाटलीपुत्रे । देवदत्तांतिकेऽगमत् ॥ तादृशानां हि पात्राणां । यु-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ज्येत स्थानमीदृशं ॥ ३२ ॥ सुदर्शनस्य शीलं सा । वर्णयामास तत्पुरः ॥ साऽप्याह जाने तच्छीलं । दृष्टो ज्ञवति चेद् दृशा ॥ ३३ ॥ सुदर्शनोऽपि संसार–विरक्तो व्रतमग्रहीत् ॥ विहरन् पाटलीपुत्रे । दृष्टः पंडितयाऽन्यदा ॥ ३४ ॥ श्राविकीज्रूय वंदित्वा । साग्रहं पारणामिषात् ॥ गणिकाया गृहेऽनैषीत् । ऋजवो यतयो यतः ॥ ३५ ॥ द्वारं नियंत्र्य बध्ध्वा तं । मुनिमेषाऽकदर्थयत् ॥ ध्यानाच्चचाल नैषस्तु । रत्नदीप इवाऽनिलैः ॥ ३६ ॥ सायं विमुक्तो निर्गत्य । विरक्तात्मा वने गतः ॥ तस्थौ प्रतिमया मध्ये–स्मशानं प्रतिमां वहन् ॥ ३७ ॥ तत्राऽपि व्यंतरीज्रूता–ऽज्ञया दृष्ट्वाऽकुपत्पुनः ॥ स्वयमन्येन वा जातं । वैरं क्लेशस्य कारणं ॥३८॥ सोपाऽवदमुं रोषा–दुपसर्गैरनिर्गलैः ॥ महात्माऽपि शुज्रध्याना–त्केवलज्ञानमासदत् ॥३९॥ तत्कालं केवलज्ञान–महिम्नि त्रिदशैः कृते ॥ सहस्रपत्रमध्यास्य । देशनां निर्ममे मुनिः ॥ ॥ ४० ॥ मोक्षैककारणे साधु–श्राऽधर्मे प्ररूपिते ॥ यतित्वं श्रावकत्वं च । बहवः प्रतिपेदिरे ॥ ४१ ॥ श्राऽत्वमुररीचक्रे । व्यंतर्यप्यज्ञया तदा ॥ गणिका देवदत्ता च । पंडिता च तदाऽबुधत् ॥ ४२ ॥ इत्थं सुदर्शनमुनिर्विहरन् पृथिव्या–मुद्धृत्य ज्रव्यनिवहान् ज्रवनीरराशेः ॥ शी-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

लप्रभावमतुलं भुवने निवेश्य । मोक्षश्रियः शिरसि शेखरता बभूव ॥ ४५ ॥

॥ इति श्रीरुद्रपल्लीयगच्छे श्रीसिंहतिलकसूरिपट्टावतंसश्रीसोमतिलकसूरिविरचितायां श्रीशीलोपदेशमालायां शीलतरंगिण्यां श्रीसुदर्शनश्रेष्ठिकथा संपूर्णा ॥ श्रीरस्तु ॥

चौरस्यापि शीलगुणप्रतिपालनेन सुगतिभाजनतामाह—

॥ मूलम् ॥—जो अन्नायरओवि हु । निवभज्जापत्थिओवि न विखुब्भे ॥ सीलनियमाणुकूलो । स वंकचूलो गिही जयउ ॥ ४६ ॥ व्याख्या—स वंकचूलो गृहस्थो जयतु, सुगतिफलेन सोत्कर्षो वर्त्तताम्, यः शीलनियमानुकूलः शीलाभिग्रहप्रतिपालनबद्धकक्षः सन् खु निश्चितं अन्यायरतोऽपि चौरकर्मानुजीव्यपि नृपभार्याप्रार्थितोऽपि न क्षुब्धः, चौर्यार्थं प्रविष्टोऽपि राज्ञा सह विप्रतिपन्नां कामयमानामपि पट्टराज्ञीं नियममनुसृत्य तृणवदुष्प्रांचकारेति संक्षेपार्थः, विस्तरार्थः पुनरयं—

महर्द्धिभिर्जनैः सेव्यं । पुण्यबीजांकुरैरिव ॥ अत्रास्ति रथनूपुर—चक्रवालाभिधं पुरं ॥ ॥ १ ॥ राजास्ति विमलयशा—स्तत्र शात्रवतापनः ॥ सूर्यः कण इवाभाति । यत्प्रापविभाव-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सोः ॥ २ ॥ शक्रस्येव शची सर्व–मंगलेव च धूर्जटेः ॥ देवी सुमंगला तस्य । मांगल्यैकक-
लालया ॥३॥ तत्कुक्षिसंभवा पुत्री । वंकचूलाभिधाऽभवत् ॥ सुतस्तु वंकचूलाख्यो । वह्नेः की-
लेव दुर्नयः ॥ ४ ॥ आरूढयौवनः पित्रा । शशांक इव रोहिणीं ॥ भदवाह्यत राजेंद्र–कन्यां
रूपगुणान्वितां ॥ ५ ॥ संतापकारी दुःशीलो । न्यायमार्गाऽनभिज्ञधीः ॥ अयं निर्वासितो गे-
हात् । पित्रा यश इवाऽगुणैः ॥ ६ ॥ सुतापि बालवैधव्य–दग्धा बांधवमोहतः ॥ निर्गता स-
ह तेनैव । दुर्नयेनेव पापधीः ॥ ७ ॥ अंगावलगकैः कैश्चि–ज्जायया च समन्वितः ॥ राजेव
भूपतेः पुत्रो । वंकचूलश्चचाल सः ॥ ८ ॥ गतः कांचिदरण्यानी–मज्ञानीव विडंबनां ॥ य-
मदूतानिवाऽपश्य–न्निम्बान् भिल्लधनुष्मतः ॥ ९ ॥ आकृत्या तं प्रभुं ज्ञात्वा । नमस्कृत्य च
सादरं ॥ पप्रच्छुः कुमरं भिल्ला–स्तत्रागमनकारणं ॥ १० ॥ तदुदंतं समाकर्ण्य । सहर्षं शब-
रा जगुः ॥ पल्लिस्वामी मृतोऽस्माकं । तत्त्वं पल्लीपतिर्भव ॥ ११ ॥ तद्वचः प्रतिपद्याथ । ग-
तः सोऽपि तदास्पदं ॥ जातः पल्लीपतिर्वंक–चूलो भिल्लचमूनतः ॥ १२ ॥ पापकर्मोदयैः सा-
र्द्धं । भिल्लैर्लुंटन् महीतलं ॥ प्रसिद्धिं परमां प्राप । वंकचूलः पराक्रमैः ॥ १३ ॥ कदाचिद-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

न्यदा चंड–यशःसूरिर्भ्रमन्महीं ॥ आत्मना सप्तमः सार्थ–ब्रष्टस्तं देशमागतः ॥ १४ ॥ इतः प्रवासिनां काले । वर्षाकाले समीयुषि ॥ पयोधरन्नरक्रांता । यूनीव द्यौरशोभत ॥ १५ ॥

जज्ञगार धरांकूरान् । अपराधान् खला इव ॥ कार्मुका इव पंथानः । सजीवाः परितोऽभवन् ॥ १६ ॥ विहाराऽयोग्यतां ज्ञात्वा । सूरयः पत्तिमागताः ॥ राजपुत्रोऽपि सानंद–मवंदिष्ट महात्मनः ॥ १७ ॥ धर्मलाभाशिषं दत्वा । वसतिं तं ययाचिरे ॥ तेनाऽप्यज्ञाणि गृह्णीत । स्थानं स्वैरं च तिष्ठत ॥ १८ ॥ किं त्वेकं मद्वचः कार्यं । प्रसद्य परमार्हताः ॥ नैव धर्मकथा कथ्या । पुरोऽस्माकं कथंचन ॥१९॥ हिंसया रहितो धर्मो । युष्मान्निरुपदिश्यते ॥ सैव चाऽजीविकाऽस्माक–मन्वहं पापचारिणां ॥ २० ॥ तथेति प्रतिपद्याथ । तद्वत्तवसतौ स्थिताः ॥ स्वाध्यायादिसमाधानै–श्चतुर्मासीमपूरयन् ॥ २१ ॥ प्रस्थिताः सूरयो राज–पुत्रमापृच्छ्य ते ततः ॥ यदुक्तकारिताहृष्टः । सोऽपि सीमांतमन्वगात् ॥ २२ ॥ अथ व्यावर्त्तमानं तं । सूरयो मधुराक्षरं ॥ जगुस्त्वदीयसाहाय्या–दियत्कालं सुखं स्थिताः ॥ २३ ॥ किंचिद्दयमपि प्रीत्या । तस्माद्युपचिकीर्षवः ॥ इहाऽमुत्र शुभोदर्कान् । दित्सामो नियमांस्तत ॥ २४ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तेनोक्तं भगवन्मह्यं । निर्वर्ण्यंते कथं नु ते ॥ सूरिणोचे यथाशक्त्या । ग्राह्यास्तेऽपि न न चाग्रहः ॥ २५ ॥ यदा जीववधं कर्त्तुं । त्वमुद्यतसि कर्हिचित् ॥ तदा सप्तपदीं पश्चा–द्व्या-वृत्त्य स्वैरमाचरेः ॥ २६ ॥ यस्य नाम न जानासि । न तद्भक्ष्यं फलं त्वया ॥ राज्ञः पट्टम-हादेवी । गणनीया च मातृवत् ॥ २७ ॥ न भक्षणीयं मांसं च । काकस्य क्वचिदप्यहो ॥ सु-पाल्या नियमा एते । पालनीयाः प्रयत्नतः ॥ २८ ॥ महाप्रसाद इत्युक्त्वा । तेनापि प्रतिपे-दिरे ॥ विहारं व्यधुरन्यत्र । सूरयो गुणभूरयः ॥ २९ ॥ संप्राप्तेऽथ निदाघर्त्तौ–वन्यदा पल्लि-नायकः ॥ भिल्लसेनावृतः कंचि–द्ग्रामं हंतुं ततोऽचलत् ॥ ३० ॥ पूर्वमेव गतः क्वापि । ग्रा-मश्च प्रपलाय्य सः ॥ ते च तृष्णाक्षुधाक्रांता । निवृत्ता दिनयौवने ॥ ३१ ॥ ततो निषण्णा दी-नास्या । अधस्तात्कस्यचित्तरोः ॥ अटव्यां पर्यटंतिस्म । केचित्तृष्णाक्षुधाकुलाः ॥३२॥ ददृशु-श्च फलैर्नम्रं । किंपाकतरुमुच्चकैः ॥ अजानानाः परीणाम–मादंश्च तत्फलानि ते ॥ ३३ ॥ न-पनीतानि सैन्यैस्तै–र्वंकचूलाय तान्यथ ॥ स्मृत्वाऽभिग्रहमप्राक्षी–त्किं नाम किमिदं फलं ॥ ॥ ३४ ॥ तैरूचे देव नो विद्मः । किं तु मिष्टत्वमद्भुतं ॥ नाश्नामि फलमज्ञात–मित्यवोचच्च

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

राजसूः ॥ ३५ ॥ शबरा ऊचिरे सौख्ये । क्रियतेऽन्निग्रहाग्रहः ॥ सांप्रतं प्राणसंदेहे । देव न-क्षितुमर्हसि ॥ ३६ ॥ जीवतां नियमा यस्मा–न्नविष्यंति मुहुर्मुहुः ॥ सधैर्यमुक्तं तेनापि । न वक्तव्यमिदं यतः ॥ ३७ ॥ प्रयातु प्रलयं लक्ष्मी–र्यांतु प्राणा अपि क्षयं ॥ वचसा प्रतिपन्नं तु । स्थिरं नवतु केवलं ॥ ३८ ॥ सर्वेऽपि नक्षयित्वा ते । तानि स्वैरमशेरत ॥ दासस्त्वेकः कुमारस्य । दाक्षिण्येन न भुक्तवान् ॥ ३९ ॥

शयित्वाथ जजागार । निशीथे कुमरस्ततः ॥ उत्थाप्य नृत्यमित्यूचे । सर्वान् जागरय ढुतं ॥ ४० ॥ यावदुत्थापिताः सर्वे । नोत्तिष्ठंति कथंचन ॥ तावता मुखमुद्घाट्य । सर्वे दृष्टाः परासवः ॥ ४१ ॥ निवेदितं कुमारस्य । सोऽपि श्रुत्वा सविस्मयं ॥ समं हर्षविषादाभ्यां । खड्गहस्तस्ततोऽचलत् ॥ ४२ ॥ गतो गेहे कपाटस्य । ढिङ् दीपप्रभाभरैः ॥ सुप्तां सह नरेणे-क्ष्य । निजजायां चुकोप च ॥४३॥ तत आकृष्य निस्त्रिंशं । प्रविष्टो मंदिरांतरे ॥ जिघांसुरु-भयं याव–त्प्रहर्त्तुमुपचक्रमे ॥ ४४ ॥ तावता नियमं स्मृत्वा । सप्तपादानि सत्वरं ॥ पश्चा-दयावृत्तमानस्य । द्वारे खड्गोऽभिघट्टितः ॥ ४५ ॥ खटत्कारेण खड्गस्य । वंकचूला विनिर्गता

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ नष्टाय सहसाऽज्ञाणी–त्कस्त्वं नोः कस्त्वमत्र नोः ॥ ४६ ॥ स्वरं ज्ञगिन्या विज्ञाय । स्व-
कं संहृत्य पृष्टवान् ॥ पुंवेषरचना केयं । साऽप्यज्ञाषिष्ट शिष्टधीः ॥ ४७ ॥ मंखाः सायमि-
हागच्छं–स्ते च तेऽवसरार्थिनः ॥ अतः सज्ञायां पुंवेष–धारिण्यहमुपाविशं ॥ ४८ ॥ यतोऽमी-
ज्निर्गतैः क्वापि । शून्या पल्लिरितीरिते ॥ मा त्वद्द्विषोऽज्निषज्येर–ज्नितीयं रचना कृता ॥४९॥
विसृज्य प्रेक्षणीयं त–च्चिरं गृहमुपागता ॥ तथैवाऽस्वपमालस्या–त्सहाहं ज्नातृजायया ॥५०॥
वंकचूलोऽप्यज्नाषिष्ट । धन्यास्ते गुरवः स्वसः ॥ यैरिमे नियमा दत्ता । मम निस्तारणेच्छया
॥ ५१ ॥ अज्ञातफलसंत्यागा–ज्जीवन्नुद्धृतवानहं ॥ अनुसप्तांह्रिघाताच्च । प्रियाज्नगिन्यघातकृ-
त् ॥ ५२ ॥ अत एव महात्मानो । ह्यमी स्वपरतारकाः ॥ धिगस्मान्निस्तदा तेषां । नित्यं
वाचो न शीलिताः ॥ ५८ ॥

अथाऽसहायमात्मानं । साऽपायं परिकल्प्य सः ॥ पुरीमुज्जयिनीं प्राप । मुक्त्वा पल्लीं
पलालवत् ॥ ५४ ॥ श्रेष्ठिनः कस्यचिद्गेहे । स्वसृज्नार्ये विमुच्य सः ॥ स्वयं तु चौरवृत्त्यैव ।
विलिलास यथेप्सितं ॥ ५५ ॥ वंकचूलोऽतिदक्षोऽयं । क्वापि केनाऽप्यलक्षितः ॥ गेहेषु धनि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नां नित्य–मेव खात्राण्यपातयत् ॥ ५६ ॥ अन्यदा चिंतयामास । धिग् धन्यं व्यवहारिणं ॥ ये कपर्दीव्ययभ्रांत्या । विनिघ्नंति सुतानपि ॥ ५७ ॥ परद्रव्यार्थिनो विप्रा । अप्युपेक्ष्या हि न्निक्कवः ॥ के च ते स्वर्णकारा ये । लवमाददते लवात् ॥ ५८ ॥ द्रव्यं किं खलु वेश्यानां । या द्वेष्या शिष्टचारिणां ॥ धनदानिव पश्यंती । कुष्ठिनोऽपि धनेहया ॥ ५९ ॥ चौर्यमाचर्यते चेत्त–द्धलुप्यते खलु न्नूपतिः ॥ फलते धनमक्षीण–मन्यथापि चिरं यशः ॥ ६० ॥

वर्षाकाले विचिंत्येति । गोधामादाय काननात् ॥ तत्पुच्छलग्नः सौधाग्र–मारुरोह स न्नूभुजः ॥ ६१ ॥ विवेश वासन्नवने । न्नूपतेः पंचमे क्षणे ॥ कस्त्वं तमिति पप्रच्छ । तत्र काचिद्वरांगना ॥ ६२ ॥ चौरोऽहमिति तेनोक्ते । साऽप्यूचे किं जिघृक्षसि ॥ स प्राह मणिरत्नादि । रूपक्षुब्धाऽथ साऽब्रवीत् ॥ ६३ ॥ अन्य एव हि ते चौरा । ये रत्नादीनि गृह्णते ॥ मच्चित्तचौरकत्वेन । त्वं पुनः पश्यतोहरः ॥ ६४ ॥ मदुक्तं चेद्विधत्से त–त्पूरयामि मनोरथान् ॥ का त्वमित्यनुयुक्ता सा । प्राहाहं राजवल्लभा ॥ ६५ ॥ अथ सौभाग्यगर्वेण । रोषितोऽस्ति मया नृपः ॥ तत्त्वं सफलयात्मानं । निधिलब्ध्येव निर्धनः ॥ ६६ ॥ राजपत्नी न न्नोग्येति ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स्मृत्वाऽन्निग्रहमब्रवीत् ॥ सर्वथा मम माता त्वं । स्मार्त्तैरपि यदूचिरे ॥ ६७ ॥ राजपत्नी गु-
रोः पत्नी । मित्रपत्नी तथैव च ॥ पत्नीमाता स्वमाता च । पंचैते मातरः स्मृताः ॥ ६८ ॥
मोपेक्षस्व मुधा मूर्ख । मामायांतीं वशंवदां ॥ इत्याद्युक्तोऽपि धीरात्मा । न चुक्षोन्न मना-
गपि ॥ ६९ ॥ पुनः स्मरार्त्ता सक्रोध–माह मां यदि नेच्छसि ॥ तर्हि तेऽद्य यमो रुष्ट–श्चिंत-
य क्षिप्रमुत्तरं ॥ ७० ॥ तत्सर्वं स्वयमश्रौषीत् । सुप्तोऽधोन्नूमिकां नृपः ॥ नखैर्विदार्य स्वं दे-
हं । अथ देव्यापि पूत्कृतं ॥ ७१ ॥ हंहो कोऽपि दुरात्मायं । चौरो जारोऽथवाऽविशत् ॥ श्रु-
त्वेत्यारक्षकाः क्षिप्रं । खड्गहस्ताः समाययुः ॥ ७२ ॥ रे रे गृह्णीत गृह्णीत । कुत्र कुत्रेति न्ना-
षिणः ॥ कोलाहलपरान् राजा । न्नटानित्यादिशन्नदा ॥ ७३ ॥ न मार्योऽसौ महासत्त्वो ।
गुप्तौ धार्यो नियंत्र्य च ॥ नृपोऽपि चिंतयन् देवी–वृत्तं रात्रिमवाहयत् ॥ ७४ ॥ आसीनः
प्रातरास्थानीं । चौरमानाय्य न्नूपतिः ॥ मोचितो बंधनात्सोऽपि । नत्वा पुर नृपाविशत् ॥
॥ ७५ ॥ दृष्टः सौम्यदृशा राज्ञा । पृष्टश्च कथमत्र न्नोः ॥ सौधे मम समारूढो । मानुषा-
णामगोचरे ॥ ७६ ॥ चौरवीरोऽवदद्देव । निर्विण्णः खात्रपाततः ॥ गोधालांगूललग्नोऽह–मा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रोहं क्ष्यमोहतः ॥ ७७ ॥

दृष्टस्तत्र महादेव्या । मार्जार्येव पयः प्रभो ॥ निग्रहः कार्यतां स्वैरं । स्वार्जिते को नु विग्रहः ॥ ७८ ॥ धरित्रीवल्लभः प्राह । तुष्टोऽहं साहसेन ते ॥ मया प्रसादिता तुभ्य–मेषाऽग्रमहिषी ह्यतः ॥ ७९ ॥ देव या पट्टराज्ञी ते । सा ध्रुवं जननी मम ॥ तेनेत्युक्ते नृपो रोषा–दिवाऽरक्षकमादिशत् ॥ ८० ॥ एष प्रदाय शूलायां । दुश्चौरो मार्यतामिति ॥ तथापि नाऽचलद्धीरः । सम्यक्त्वी दुर्नयैरिव ॥ ८१ ॥ रक्षणोयो ध्रुवं ह्येष । चौरः साहसिकाग्रणीः ॥ आचष्ट भूपतिर्गुप्त–मित्यारक्षकनायकं ॥ ८२ ॥ तेनापि दूषणोद्घोष–पूर्वं बंभ्रम्य पत्तने ॥ नीत्वा वध्यभुवं शूला । सज्जिता च तदग्रतः ॥ ८३ ॥ तथापि दृढसत्त्वात्मा । संस्मरन् गुर्वभिग्रहं ॥ नाऽकांक्षत्पट्टराज्ञीं त–त्पुनर्नीतो नृपांतिकं ॥ ८४ ॥ पुत्रीकृत्य च तेनापि । यौवराज्ये न्यवेशयत ॥ भार्याभगिनीयुक् तत्र । तिष्ठतिस्म यथासुखं ॥ ८५ ॥ अचिंतयच्च धन्योऽहं । सफलं नरजन्म मे ॥ पुनः पश्यामि चेत्सूरी–नाश्रिये धर्ममुत्तमं ॥ ८६ ॥ एवं विमृश्यतोऽन्येद्यु–राययुस्तत्र सूरयः ॥ भावसारमवंद्यंत । तेन धर्मश्च शुश्रुवे ॥ ८७ ॥ ततः प्रपेदे-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ऽर्हन् देवो । गुरवश्च सुसाधवः ॥ तत्त्वं जीवदया चेति । श्राद्धधर्मे स शुद्धधीः ॥ ८८ ॥ गीतार्थश्रावको जातो । वंकचूलस्ततः परं ॥ साधु साधर्मिकादीनां । भक्तो देवार्चनापरः ॥८९॥

इतश्चोज्जयिनीपार्श्वे । शालिग्रामे कृतस्थितिः ॥ श्रावको जिनदासाख्य–स्तस्याऽभूत्परमः सुहृत् ॥ ९० ॥ अन्यदा वंकचूलोऽपि । पल्लीशमतिदुर्धरं ॥ रणे निहत्य शस्त्रौघ–जर्जरो गृहमागमत् ॥ ९१ ॥ गाढं तद्व्यथयाऽार्त्तोऽभू–त्प्रतीकारैःकृतैरपि ॥ काकमांसमथादिक्षन् । निषजो रोगघातकं ॥ ९२ ॥ राज्ञाऽाज्ञप्तं मारयित्वा । काकमानीयतां पलं ॥ तेनोक्तं सर्वथा मांस–भक्षणेऽहं निवृत्तिमान् ॥ ९३ ॥ जीवतो नियमा वत्स । भविष्यंति पुनः पुनः ॥ मृतौ सत्यां पुनः सर्वे । यांति तद्भक्ष्यतामिदं ॥ ९४ ॥ राज्ञोक्तमिदमाकर्ण्य । कुमारः स्पष्टमूचिवान् ॥ याति चेज्जीवितं यातु । न चाऽकृत्यं करोम्यहं ॥ ९५ ॥ ततस्तन्मित्रमाह्वातुं । राजा प्रैषीन्निजं नरं ॥ शालिग्रामे ततः सोऽपि । प्रतस्थे मित्रवत्सलः ॥ ९६ ॥ रुदतीः सुदतीर्दिव्या । वीक्ष्य मार्गे तरोरधः ॥ पप्रच्छ जिनदासोऽपि । हेतुः को रोदनेऽत्र वः ॥ ९७ ॥ देव्यो वयं हि सौधर्म–वासिन्यो भर्तृवर्जिताः ॥ अनभ्भन् काकमांसं नो । वंकचूलो भवेत्पतिः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ ९८ ॥ स चेत्त्वद्वचसा ऽनइ । मांसमभाति संप्रति ॥ स्थास्यामस्तत्कथं नाथ–वर्जिता इ-
ति रुद्यते ॥ ९९ ॥ न चाहं काकमांसस्यो–पदेष्टेति विबोध्य ताः ॥ जगामोज्जयिनीं वंक–चू-
लस्याऽमिलदादरात् ॥ १०० ॥

दृष्ट्वा शरीरं तेनापि । राजोचे सर्वसाक्षिकं ॥ धर्म एवौषधं युक्त–मस्येति न विलंब्यते
॥ १ ॥ तत आराधनां कृत्वा । ऽऽयं साधर्मिकादिषु ॥ व्यापार्य धर्मतत्वज्ञो । वंकचूलः स-
माधिना ॥ २ ॥ पुण्यानुमोदनां कुर्वन् । निंदन् दुःकृतमंजसा ॥ जीवेषु क्षामणापूर्व–मायुः-
पर्यंतमासदत् ॥ ३ ॥ अच्युते द्वादशे कल्पे । द्वाविंशत्यर्णवायुषि ॥ जातः सुरोत्तमो वंक–
चूलो धर्मानुकूलधीः ॥ ४ ॥ तस्योर्ध्वदेहिकं कृत्वा । जिनदासो गृहे व्रजन् ॥ तथैव रुदती-
र्दिव्या । युवतीर्वीक्ष्य पृष्टवान् ॥ ५ ॥ मया तावत्काकमांसं । न दत्तं राजसूनवे ॥ तदद्यापि
किमर्थं वः । परिदेवनचेष्टितं ॥ ६ ॥ तान्निरूचे तथा चक्रे । ऽनवता तत्र जग्मुषा ॥ यथाऽस्मा-
न् स व्यतीत्याऽगा–त्कल्पं द्वादशमुत्तमं ॥ ७ ॥ तदादि जिनदासोऽपि । जिनधर्मे दृढाशयः ॥
प्रज्ञः को वा सुदृष्टेऽर्थे । साक्षिणो मुखमीक्षते ॥ ८ ॥ नरेंऽपत्न्यामविपन्नशील–प्रपालनप्रा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

समहासमृद्धिः ॥ इहाऽपरत्रापि सुखैकभोगी । जातो गृहस्थोऽपि स वंकचूलः ॥ ९ ॥

इति श्रीरुद्रपल्लीयगच्छे श्रीसंघतिलकसूरिपट्टावतंसश्रीसोमतिलकसूरिविरचितायां श्रीशीलोपदेशमालावृत्तौ श्रीशीलतरंगिण्यां वंकचूलकथानकं समाप्तं ॥ श्रीरस्तु ॥

अथ गृहस्थभावे महासतीनां शीलप्रभावमभिधित्सुस्तासामेव गुणश्लाघां गाथाचतुष्टयेनाह—

॥ मूलम् ॥—अक्खलियसीलविमला । महिला धवलेइ तिन्निवि कुलाइं ॥ इह परलोएसु तहा । जसमसमसुहं च पावेइ ॥ ४७ ॥ व्याख्या—अस्खलितशीलविमला निरतीचारचारुचतुर्थव्रतपालननिर्मला महिला त्रीण्यपि कुलानि धवलयति, पितृमातृश्वसुराणां गोत्राणि प्रकटयति, तथा न केवलं कुलान्येव श्लाघां नयति, इहपरलोकयोर्यशः कीर्त्तिं च असमसुखमसामान्यं सौख्यं च प्राप्नोति, यद्देह लोके यशः शीलमाहात्म्यदर्शनेन जनश्लाघां, परलोके च तत्पालनसामर्थ्यादेव स्वर्गमोक्षादिसौख्यप्राप्तिर्भवति, प्राकृतत्वाद् द्विवचनस्य बहुवचनमिति गाथार्थः ॥ ४७ ॥ तासामेव स्वरूपप्रतिपादनसहचरीं श्लाघामाह—

॥ मूलम् ॥—जा नियकंतं मुत्तुं । सुवणेवि न ईहए नरं अन्नं ॥ आबालबंभयारी य ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सा रिसीणंपि अवणिज्जा ॥ ४८ ॥ व्याख्या—या स्त्री निजकांतं मुक्त्वा स्ववल्लभं परित्यज्य स्वप्नेऽप्यन्यं नरं नेहते नाऽाकांक्षति, आजन्म मनोवचनकायशुद्ध्या निजभर्त्तारमेव या ध्यायति सा महासती आबालब्रह्मचारिणां महर्षीणामपि स्तवनीया, आजन्मब्रह्मचारिणो महात्मानोऽपि तासां निरतिचारशीलगुणस्तवं कुर्वंतीति द्वितीयगाथार्थः ॥ ४८ ॥ तासामेव व्यतिरेकमाह—

॥ मूलम् ॥—परपुरिससेवणीउ । कुलरमणीउ हवंति जइ लोए ॥ ता वेसादासीणं । पढमा रेहा कुलवहूसु ॥ ४९ ॥ व्याख्या—यदि लोके जगति कुलरमण्यः कुलांगनाः परपुरुषसेविन्यो भवंति, इत्वर्यो जायंते, तदा वेश्यादासीनां कुलवधूषु प्रथमा रेखा, गणिकाचेट्योऽपि कुलवध्व एव, स्वैरचारितया अविशेषादिति तृतीयगाथार्थः ॥ ४९ ॥ सहजनिंद्यानामपि स्त्रीणां प्रशंसाकारणमाह—

॥ मूलम् ॥—तुच्छावि रमणीजाइ । पसंसणिज्जा सुरासुरनराणं ॥ विहिया महासईहिं । काहिंवि अइविमलसीलाहिं ॥ ५० ॥ व्याख्या—अतिविमलशीलाभिः काभिरपि म-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

हासतीन्निस्तुन्नाऽप्यगंन्नीरापि रमणीजातिः स्त्रीजातिः सुराऽसुरनराणां देवदानवमानवानां प्रशंसनीया वर्णनीया विहिता. महासत्यो हि शीलपरीक्षाक्षणजनितचमत्काराः स्त्रीजातिं त्रिजगतोऽपि वर्णनीयां चक्रुः, तुन्नत्वं च तासां जगत्प्रसिद्धं. यदागमः—तुन्ना गारवबहुला। चलिंदिया तहय दुब्बलधिआ य ॥ अइसेसभयणाउ। नूआवाउ अ नो थीणं ॥१॥ इति चतुर्थगाथार्थः ॥ ५० ॥ तासामेव कासांचिद् दृष्टांतमभिधित्सुराह—

॥ मूलम् ॥—नियसीलमहामंतेण । पबलजलणं जलं कुणंतीए ॥ सीलग्घोसणपटहो । अज्जवि ऊणहणइ सीयाए ॥ ५१ ॥ व्याख्या—निजशीलमहामंत्रेण प्रबलज्वलनं सुदूतहुताशनं जलं कुर्वत्या सीताया महासत्या जनकराजतनूजायाः शीलोद्घोषणपटहोऽद्यापि ध्वनद्ध्वनति प्रतिशब्दैरिव शीलढक्का शब्दायते, यद्वा 'ऊणहणइत्ति' सानुकरणं वचनं. श्रीरामेण दशकंधरे पंचत्वमुपनीते जानकी शीलभंगाशंकाऽपनोदाय सुराऽसुरनरसमक्षं ज्वलत्खदिरांगारखातिकां प्रविश्य तत्कालं शीलप्रभावप्रादुर्भूतजलपूरोपरिप्लवमानकनकनलिनकर्णिकासीना जयजयारावैर्जगत्कुक्षिंभरियशाः समजनिष्टेति गाथासमासार्थः, व्या-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सार्थस्तु पुरो वक्ष्यमाणश्रीरावणचरित्रे व्याकरिष्यते ॥५१॥ तन्माहात्म्यचमत्कारांतरमाह—

॥ मूलम् ॥—चालणिधरियजलाए । संघमुहुघाडणं कुणंतीए ॥ चंपादारुग्घाडण—मिसेण नंदउ सुन्नहा सा ॥ ५२ ॥ व्याख्या—चालणीधृतजलया यया चंपाद्वारोद्घाटनमिषेण संघमुखोद्घाटनं कृतं, सूत्रतंतुबद्धचालन्या कूपोदकमादाय या महासती जलेनाब्धेश्च चंपाप्रतोलीरुद्घाट्य श्रीजिनशासनप्रभावनां चकार, सा सुन्नशा जिनदत्तपुत्री नंदतु, चिरायुर्भवतु ? तादृक् प्रभावनाविधानान्नंदतात्, कविर्जीवंतीमिव तामभिनंदतीति संक्षेपार्थः, विस्तरार्थस्त्वयं, तथाहि—

वसंतपुरमित्यस्ति । पत्तनं भूमिमंडनं ॥ यत्र पुण्यांकुरालीव । जिनचैत्यावली बभौ ॥ ॥ १ ॥ जितशत्रुर्नृपो रूप—दर्पकः शास्ति तां पुरं ॥ व्योम यत्खङ्गलेखेव । तारास्तत्र सुमस्रजः ॥ २ ॥ तत्रास्ति जिनदासाख्यः । श्रावकः ख्यातवैभवः ॥ न कस्य हृदये यस्य । गुणाः खेलंति हारवत् ॥ ३ ॥ तस्यास्ति वल्लभा जैन—धर्मवाल्लभ्यसेवधिः ॥ नाम्ना जिनमतिस्तत्व—मालिनी शीलशालिनी ॥ ४ ॥ सुता तयोः सुन्नशाख्या । शक्रामधुरगीर्ध्रुवं ॥ लाव-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

एयस्पर्द्धयाऽमुष्या । अपेयोऽभूत्सरित्पतिः ॥ ५ ॥ श्रिता धर्मगुणैर्बाला। मरालैरिव पद्मिनी ॥ क्रमेण यौवनं प्राप । युवमानसमोहनं ॥ ६ ॥ नैकेषां याचमानाना–मपि यौवनशालिनां ॥ नाऽदान्मिथ्यादृशां श्रेष्टी । काकानामिव पायसं ॥ ७ ॥ अन्यदा तत्र चंपाया । बुद्धदासा-न्निधो वणिक् ॥ आगतो व्यवसायार्थं । बुद्धधर्मविशारदः ॥ ८ ॥ सोऽपि श्रेष्टिगृहेऽन्येद्यु–रा-गतः क्वापि कर्मणि ॥ सुभद्रां भद्रनेपथ्यां । चकार नयनातिथिं ॥ ९ ॥ सोऽपि तस्या वि-वाहार्थी । ज्ञात्वोपायं जनादथ्र ॥ भेजे जैनमुनीन् दंभा–दभ्रार्थीवांबुधेस्तटं ॥ १० ॥ श्रद्धां विनापि साधूनां । तन्वानः पर्युपासनां ॥ संसर्गाद्बोधिमापासौ । जातेर्गंधं तिला इव ॥ ११ ॥ ततः श्रीवीतरागार्चा–वंदनाऽवश्यकादिकं ॥ धर्मज्ञः सोऽनिशं चक्रे । रत्नाप्तौ कः प्रमाद्य-ति ॥ १२ ॥ तस्मै साधर्मिकायाथ्र । जिनदासोऽपि रंगतः ॥ ददौ पुत्रीं विनीताय । शिष्या-येव गुरुः श्रुतं ॥ १३ ॥ शुभे मुहूर्ते सर्वर्द्ध्या । रोहिणीशशिनोरिव ॥ नंदितान्निजनं जज्ञे । तयोर्विवाहमंगलं ॥ १४ ॥ तत्रैव तिष्ठतोः स्वैरं । मोदमेदुरयोस्तयोः ॥ कियानपि गतः का-लः । सुखं युगलिनोरिव ॥ १५ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अन्यदोपार्जिते द्रव्ये । बुद्धदासो गृहोत्सुकः ॥ आपृच्छत प्रयाणार्थी । श्वसुरं विनयान्वितः ॥ १६ ॥ जिनदासोऽपि तत्वज्ञ–स्तमाह मधुराक्षरं ॥ साधूक्तं वत्स ते पुत्राः । पित्रोर्नतिपराश्च ये ॥ १७ ॥ वत्स वैधर्मिकौ तौ तु । सुन्नशं जिनधर्मिणीं ॥ सहिष्येते कथंकारं । वरुवां महिषाविव ॥ १८ ॥ तेनाप्यूचे पृथग्गेहे । स्थापयिष्यामि तामहं ॥ तज्जात्यकनकस्येव । कं दोषं तौ तु दास्यतः ॥ १९ ॥ ततस्तस्य निदेशेन । सुन्नशसहितोऽचलत् ॥ क्रमेण प्राप चंपां स । त्रिदशावासजित्वरीं ॥ २० ॥ स्वयं जगाम गेहे तां । धृत्वा पृथगुपाश्रये ॥ ङिं ददृशतुस्तस्या–स्ततः श्वश्रूननांदरौ ॥ २१ ॥ चक्रे सुन्नश निश्चय–वृत्त्या श्रीधर्ममार्हतं ॥ तच्चेहे साधवोऽप्येयु–र्नक्तपानादिहेतवे ॥ २२ ॥ स्वच्छंदा यतिनिर्वत्स । रमते त्वच्छधूरहः ॥ बुद्धदासमिति स्वसृ–प्रमुखाः प्रत्यहं जगुः ॥ २३ ॥ सोऽप्याह शीलवत्येषा । न चेदं वक्तुमर्हसि ॥ किं जायेत मलं स्वर्णे । युगांतेऽपि कदाचन ॥ २४ ॥ ततो विशिष्य दुष्टात्मा । मिषांतरमलोकयत् ॥ अन्यदा क्षपकश्चास्या । गृहे भिक्षार्थमागमत् ॥ २५ ॥ पपात नयने तस्य । पवनांदोलितं तृणं ॥ सोऽपि नाऽपनयामासा–प्रतिकर्मवपुःस्थितिः ॥ २६ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ततो निद्रां प्रयत्नंती । व्यश्रामाशंक्य चक्षुषि ॥ तृणमुत्सारयामास । जिह्वालाघवतः सतीं ॥ २७ ॥ तदा सीमंततो लग्नं । कुंकुमं कृपकालके ॥ तच्चक्रमपि चित्रं य–त्पश्चात्कर्त्ता विरक्ततां ॥ २८ ॥ नाले कालेयलेशांकं । दर्शयंती मुनिं तदा ॥ बुद्धदासं जनन्याह । पश्य वत्स वधूं सतीं ॥ २९ ॥ अन्निज्ञानबलाद्बुद्ध–दासोऽपि प्रतिपद्य तत् ॥ नेजे विरागतां तस्यां । स्त्रीन्निर्वा को न खंडितः ॥ ३० ॥ यद्येषाऽपि महान्नागा । व्यवस्यति जुगुप्सितं ॥ निराधारा गुणास्तर्हि । यांतु पातालमाकुलाः ॥ ३१ ॥ पतिं विमृश्य निःस्नेहं । दध्याविति महासती ॥ गार्हस्थ्ये दोषमूलेऽस्मिन् । न चित्राय कलंकिना ॥ ३२ ॥ किंतु सदा सुधाशुद्धे । श्रीमज्जैनेंद्रशासने ॥ आकस्मिकोऽपवादोऽयं । विषादाय हृदो मम ॥ ३३ ॥ यावन्नासनमालिन्य–मिदं नोत्सारयिष्यते ॥ तावन्न पारयाम्येनं । कायोत्सर्गमहं खलु ॥ ३४ ॥ संध्यायामित्यनुध्याय । पूजां कृत्वा जिनेशितुः ॥ कायोत्सर्गे स्थितैकांते । ध्यात्वा सा शासनामरीं ॥ ३५ ॥ युग्मं ॥

स्थितवत्यां तथा तस्या–मेकाग्रहृदि तत्क्षणात् ॥ प्रादुर्भूय बभाषे तां । सुस्पष्टं शास-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नामरी ॥ ३६ ॥ त्वत्सत्त्वप्रेरिता वत्से । तपसेव सुरावली ॥ समेताहं द्रुतं ब्रूहि । यत्ते कुर्वे समीहितं ॥ ३७ ॥ कायोत्सर्गं पारयित्वा । सुन्नश मुदिता सती ॥ नत्वा प्राह कलंकोऽयं । शासनस्याऽपनीयतां ॥ ३८ ॥ पुनराह सतीं देवी । वत्से मा खेदमुद्वह ॥ प्रातस्तव समं शुद्ध्या । कुर्वे धर्मप्रभावनां ॥ ३९ ॥ इत्थमादिश्य तां देवी । शासनस्य तिरोऽभवत् ॥ कृपामक्षिपदेषापि । शेषां धर्मैकमानसा ॥ ४० ॥ प्रातराकृष्यमाणानि । द्वारपालैर्बलादपि ॥ प्रतोलीद्वाःकपाटानि । नोद्घटंते कथंचन ॥ ४१ ॥ क्रंदच्चतुष्पदे व्यग्रे । निखिलेऽपि पुरीजने ॥ नृपोऽपि व्याकुलस्वांत–स्तन्मेने कर्म दैवतं ॥ ४२ ॥ धौतपोतः शुचीभूतो । धूपोद्ग्राहण-पूर्वकं ॥ प्रांजलिः प्राह भूपालः । श्रूयतां देवदानवाः ॥ ४४ ॥ यः कोऽपि कुपितोऽत्रास्ति । स मे शीघ्रं प्रसीदतु ॥ इत्युक्ते नभसि प्रादु–र्बभूव प्रकटं वचः !! ४५ ॥ जलमुद्धृत्य चालि-न्याः । कूपतस्तंतुबद्धया ॥ काचिन्महासती पुर्याः । कपाटांश्चुलुकैस्त्रिभिः ॥ ४६ ॥ आज्ञो-टयतु चेन्निद्यं । द्वारैः कार्यमपावृतैः ॥ आकर्ण्येत्यभवन् सज्ञा–स्तदा ताः पौरनायकाः ।४७। ब्राह्मणी क्षत्रिया वैश्या । शौद्री चापि न साऽभवत् ॥ चालिन्या वारि गृह्णाना । या न प्रा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्ता विलक्षतां ॥ ४८ ॥ काचिद्वंधेन सूत्रस्य । चालिन्याः कापि चालने ॥ कूपे क्षिपंती काचिच्च । विगुप्ता तत्र नायका ॥ ४९ ॥ श्वश्रूमथ विनीतात्मा । सुन्नद्धा मधुरं जगौ ॥ चेदादिशसि तन्मातः । स्वमप्यालोकयेऽधुना ॥ ५० ॥ श्वश्रूराख्यत्सोपहासं । सतीत्वं ज्ञातमेव ते ॥ पुराऽस्माज्जिरिदानीं तु । मा विगुप्याः पुरीजने ॥ ५१ ॥ एताः सत्योऽपि पूर्द्वारं । नैवोद्घाटयितुं क्षमाः ॥ सत्यं त्वमीशिषे नित्यं । या जैनमुनिसेविका ॥ ५२ ॥ युक्तमुक्तमिदं मातः । सत्त्वं संप्रति दुर्घटं ॥ तथापि पंचाचारेण । करिष्ये स्वपरीक्षणं ॥ ५३ ॥ ब्रुवाणेति सुन्नद्धा तु । हास्यमाना ननांदृभिः ॥ शुचिर्धौतपरीधाना । स्मृतपंचनमस्कृतिः ॥ ५४ ॥ विधाय तंतुना बद्धां । चालनीं च गुणैरिव ॥ चिक्षेप कूपे साश्चर्यं । वीक्ष्यमाणा जनव्रजैः ॥ ॥ ५५ ॥ युग्मं ॥ ददधार ततः कूपा–च्चालनीं जलसंभृतां ॥ शिक्षणि रुरुधुः सिक्ष । इव कौतुककांक्षिणः ॥ ५६ ॥ तावतो नारतोऽप्याशु । रक्षिताः सूत्रतंतवः ॥ तच्छीलसिक्तचूर्णेन । वज्रदार्ढ्यमिता इव ॥ ५७ ॥

तत्रैत्य सपरीवारः । प्रांजलिः प्राह भूपतिः ॥ साधु साधु सति क्षिप्रं । पुरीद्वाराण्यपा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वृणु ॥ ५८ ॥ मंत्रिसामंतनृपाल–पौरलोकपुरस्कृता ॥ जगज्जैत्रं यंत्रमिव । सांनस्तत्र च विन्नती ॥ ५९ ॥ सुन्नशा नन्हस्तींड–गामिनी विकसन्मुखी ॥ बंदिक्लृप्तजयारावा । प्राप सा पूर्वगोपुरं ॥ ६० ॥ युग्मं ॥ परमेष्टिनमस्कार–मुच्चरंती महासती ॥ द्वारमाघोटयामास । तदंनश्चुलुकैस्त्रिभिः ॥ ६१ ॥ नेत्रे श्व विषार्तस्य । जांगुलीमंत्रजापतः ॥ कपाटावुद्घटेतेस्म । कर्णावपि दुरात्मनां ॥ ६२ ॥ नेडुर्दुंदुनयो व्योम्नि । तुष्टुवुस्तां पुरीजनाः ॥ देवैश्च जिनधर्मस्य । चक्रे जयजयारवः ॥ ६३ ॥ नन्मुद्य दक्षिणप्रत्यक्–प्रतोळ्यावपि सा तथा ॥ श्वश्रूननांदृप्रमुख–दुर्जनास्यान्यमुश्यत् ॥ ६४ ॥ नदग्गोपुरमासाद्य । साह याऽप्यपरांगना ॥ सतीगर्वं वहेत्सैतद् । द्वारमुद्घाटयिष्यति ॥ ६५ ॥ सुन्नशाया महसत्याः । शीलाऽतिशयसूचचकं ॥ नदग्गोपुरमद्यापि । चंपायामस्ति मुद्रितं ॥ ६६ ॥

अपूर्वः शीलदीपोऽयं । सुन्नशाया भुवस्तले ॥ यो वाऽरिपूरसंसर्गा–ददीपिष्ट विशेषतः ॥ ॥ ६७ ॥ स्वस्य त्रिवर्गसंसिद्धिं । दर्शयंतीव हस्तगां ॥ श्रीसुन्नशसती पुर्या । द्वारत्रयमपावृणोत् ॥ ६८ ॥ गीयमानगुणव्राता । सा सती तत्पुरोजनैः ॥ चक्रे चैत्यपरीपाटीं । पौरलो-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

कनृपान्विता ॥ ६९ ॥ सोत्सवं प्रापयामास । सदनं नृपतिः सतीं ॥ जिनधर्ममथादिक्षत् । सुन्नडा सर्वसाक्षिकं ॥ ७० ॥ तमादृत्य नरेंद्रोऽपि । सतीं स्तुत्वा गृहेऽगमत् ॥ साश्चर्याः सर्वलोकाश्च । जग्मुर्निजनिजं गृहं ॥ ७१ ॥ पश्चात्तापपरेणाथ । कुटुंबेनापि मानिता ॥ अन्यनंद्यत चागत्य । पितृन्यां तत्र सा सती ॥ ७२ ॥ सा बुद्धदासेन निपत्य दासवत् । पदाब्जयुग्मे क्षमिता महासती ॥ गृहस्थधर्मं प्रतिपाद्य संयमं । प्रपद्य चांते सुगतिं समन्वभूत् ॥ ७३ ॥ इति श्रीरुद्रपल्लीयगच्छे श्रीसंघतिलकसूरिपट्टावतंसश्रीसोमतिलकसूरिविरचितायां श्रीशीलतरंगिण्यां सुन्नडासतीकथा समाप्ता ॥ श्रीरस्तु ॥

शीलरक्षायै महासतीनां राज्यादिसुखेष्वलुब्धतामाह—

॥ मूलम् ॥—नियसीलरक्खणट्ठं । तणं व रज्जं च परिहरंतीए ॥ सयलसईणं मज्झे । इह रेहा मयणरेहाए ॥ ७३ ॥ व्याख्या—निजशीलरक्षणार्थं तृणमिव राज्यमपि परिहरंत्या इह जगति सकलसतीनां मध्ये मदनरेखाया युगबाहुयुवराजभार्यायां रेखा मर्यादा, शीलपालने सतीषु तस्या एवोत्कर्षः, इति गाथार्थः, भावार्थं दृष्टांतेनाह—

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अस्त्यवंतीषु देशेषु । नगरं श्रीसुदर्शनं ॥ निर्माल्यकुसुमानीव । भोगिनां यत्र तारकाः ॥ १ ॥ राजा मणिरथस्तत्र । धर्मसत्रं महारथी ॥ यशःपिंड इवाभाति । यस्य व्योम्नि सुधारुचिः ॥ २ ॥ युवराजो युगबाहु–नामा तस्याऽनुजोऽभवत् ॥ प्रिया मदनरेखाख्या । तस्यास्ति प्रथिता सती ॥ ३ ॥ दृष्ट्वा तद्रूपसंपत्तिं । स्वात्मन्येव स्मरोऽज्वलत् ॥ वृथा पुनः प्रवादोऽयं । लोके दग्धो हरेण यत् ॥ ४ ॥ अथो मणिरथः क्वापि । विलोक्यानुजवल्लभां ॥ कंदर्पेण हतः पंच–बाणैश्चेतस्यचिंतयत् ॥ ५ ॥ आवर्ज्या कथमप्येषा । मया मन्मथजीवितं ॥ इति तस्याःकृतेऽजस्रं । प्राहिणोत्प्राभृतं नृपः ॥ ६ ॥ यदुक्तं–तं तोषयाऽभिषेण प्राक् । यं वशीकर्तुमिच्छसि ॥ तत्स्वादलुब्धो यत्प्राणी । कार्याऽकार्यं न विंदति ॥ ७ ॥ सापि तत्प्रेषितं पुष्प–तांबूलादि कृतादरं ॥ ज्येष्ठप्रसाद इत्येत–त्संजग्राह महासती ॥ ८ ॥ अथ भूपतिनाऽन्येद्यु–र्दूती प्रैषि तदंतिके ॥ साऽप्याह त्वद्गुणै रक्तो । भद्रे राजा वदत्यदः ॥ ९ ॥ यदाप्रभृति दृष्टा त्वं । मया वातायनस्थिता ॥ तदादि घटिका सुभ्रु । मम वर्षमिताऽगमत् ॥ १० ॥ तस्मान्मां पतिमादृत्य । साम्राज्यस्वामिनी भव ॥ श्रुत्वा मदनरेखेति । धर्मज्ञा तामभाषत

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥११॥ केषांचित्सत्पुरुषाणां । न मनोऽपि परस्त्रियां ॥ आः प्रवर्त्तितुमीहंते । स्नुषायामपि केचन ॥ १२ ॥ जगत्प्रसिद्धो नारीषु । शीलनामा महागुणः ॥ तस्मिन् लुप्ते वृथा सर्वं । गते जीव इवांगिनः ॥ १३ ॥ यस्य त्वं बांधवो ज्येष्ठ–स्तत्पत्नीत्वेन मेऽन्वहं ॥ राज्यस्वामित्वमस्त्येव । माऽस्तु वा तेन किं मम ॥ १४ ॥ किं च दूति त्वया वाच्यो । ज्येष्ठो मद्वचसा ह्यदः ॥ वदन्निति निजादस्मा–द्वंधोरपि न लज्जसे ॥ १५ ॥ तयाऽप्येत्य तथैवोक्तो । राजा तद्गलोलुपः ॥ न चाऽग्रहान्न्यवर्त्तिष्ट । सुराया इव मद्यपः ॥ १६ ॥ बंधुर्जीवत्यसौ तस्मा–न्न ध्रुवं मामपेक्षते ॥ इत्येष तद्वधोपायं । दध्यौ चौर इव क्षपां ॥ १७ ॥ अथ चूतांकुरोन्मत्त–कोकिलस्वरसूचितः ॥ ऋतुराजोऽवतीर्णो ज्ञाक्। कंदर्पयुवराजयुक् ॥ १८ ॥ वृक्षवल्लीनिकुंजेषु । तन्निर्दिष्टः पुमानिव ॥ सर्वत्र परिबभ्राम । चतुरो मलयाऽनिलः ॥ १९ ॥ गायंतो गीतमुन्मत्त–भ्रमराऽरवपूत्कृतैः ॥ नृत्यंतः पल्लवोल्लासै–र्हस्तकैरिव हर्षतः ॥ २० ॥ नव्यैर्नित्र संपुष्प–त्फुल्लकोरकपुष्पकैः ॥ नपहारमिवाऽसज्जद् । ऋतुराजस्य शाखिनः ॥ २१ ॥ ॥ युग्मं ॥ रक्तप्रसूनसंवीत–कौसुंभ्रवसनोत्तमा ॥ श्वेतपुष्पावलीहारा । वनलक्ष्मीरुपाययौ

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ २२ ॥ शय्या शक्र इवोद्यानं । युतो मदनरेखया ॥ गतः श्रीयुगबाहुस्त—त्साफल्याय म-
धुश्रियः ॥ २३ ॥ पुष्पोच्चयादिकां क्रीडां । विधाय सकलं दिनं ॥ निश्चिंतं कदलीगेहे । सु-
ष्वाप निशि सप्रियः ॥ २४ ॥ राजाऽप्यवसरं ज्ञात्वा । अन्नं तुङ्गपरिच्छदः ॥ सनिस्त्रिंशः स
निस्त्रिंशः । प्राविशत्कदलीगृहं ॥ २५ ॥ विहाय कुलमर्यादा—यशोधर्मत्रपादिकं ॥ खड्गेन बं-
धुमाजघ्ने । ग्रीवायां हा स्मरोदयः ॥ २६ ॥ ततो मदनरेखापि । पूच्चक्रे करुणस्वरं ॥ मिलि-
ता यामिकाः शीघ्रं । नृपोऽपि स्वगृहं गतः ॥ २७ ॥

अथ प्रहारं विज्ञाय । सती प्राणापहारिणं ॥ कर्णमूलमुपेत्याशु । युगबाहुमजल्पत ॥
॥ २८ ॥ त्वं वृथा मा कृथाः खेदं । महाभाग मनागपि ॥ सर्वत्र प्राक्कृतं कर्म । प्राणिना-
मपराध्यति ॥ २९ ॥ अथ प्रद्वेषं मा धत्से । प्राणैः कंठगतैरपि ॥ असमर्थतया व्यर्थं । भ्र-
श्यसे परलोकतः ॥ ३० ॥ तस्मान्मनः समाधेहि । विधेहि शरणं जिनं ॥ ममत्वं मुंच मै-
त्रीं च । कुरु सर्वेषु जंतुषु ॥३१॥ अर्हन् देवो गुरुः साधुः । प्रमाणं जिनभाषितं ॥ ममेह प-
रलोकेऽपि । भूयादिति विचिंतय । ३२ । निंदतां निजदुश्चीर्णं । सर्वं सिद्धादिसाक्षिकं ॥ सर्वत्र मोह-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मुद्भूय । स्मर पंचनमस्कृतिं ॥ ३३ ॥ प्राणा यस्य नमस्कारं । स्मरंतो यांति निर्मलाः ॥ न याति यदि मोक्षं स । ध्रुवं वैमानिको भवेत् ॥ ३४ ॥ शिक्षाव्रतानि चत्वारि । पंचैवाऽणुव्रतानि च ॥ गुणास्त्रयश्चेत्यादत्स्व । श्रावकद्वादशव्रतीं ॥ ३५ ॥ मित्रपुत्रकलत्रादि—र्नैकोऽपि शरणं भुवि ॥ धर्म एव परित्राणं । परत्रेह च देहिनां ॥ ३६ ॥ भूयोऽपि दुर्लभां मत्वा । सामग्रीं नृभवादिकां ॥ गृहाण तत्फलं तस्मा—न्मा प्रमादीर्महामते ॥ ३७ ॥ इति तद्वचसा शांतकोपः सर्वं प्रपद्य तत् ॥ संवेगनिर्भरं मृत्वा । ब्रह्मलोकेऽभवत्सुरः ॥ ३८ ॥

सती मदनरेखा च । पुत्रे चंद्रयशोऽन्विते ॥ परिच्छदे च सर्वस्मिन् । हाहाकारं रुदत्यपि ॥ ३९ ॥ ध्यायतीद्यमहं किं न । गर्भतो विलयं गता ॥ विडंबनैकसाफल्यं । रूपं यस्या हहाऽभवत् ॥ ४० ॥ यतोऽहमेव निर्द्वंद्व—चित्तस्य प्रेयसोऽधुना ॥ विनाशकारणं जज्ञे । चंदनस्येव सौरभं ॥ ४१ ॥ मन्निमित्तं च येनायं । हतो बंधुर्दुरात्मना ॥ शीलं मे स विलोप्ताऽभ—स्तद्वध्यं यत्नतो मया ॥ ४२ ॥ ध्यात्वेति सर्वं पुत्रादि । विमुच्य तृणवत्तदा ॥ धारयंत्युदरे गर्भं । सा निर्द्येव पलायिता ॥ ४३ ॥ प्राच्यां व्रजंती पादाधः—कर्करादिकबाधया ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

करङ्काऽटवीमेकां । प्राप्ता घोरां महासती ॥ ४४ ॥ ततो रात्रिरतिक्रांता । मध्याह्नसमये पुनः ॥ फलाद्यभुंक्त डुस्सह्याः । क्षुत्पिपासादयो यतः ॥ ४५ ॥ प्रत्याख्यानमथाख्याय । सागारं खेदशांतये ॥ सुप्ता लतागृहे कस्मिन् । स्मृतपंचनमस्कृतिः ॥ ४६ ॥ निशि शार्दूलसिंहादि–शब्दत्रस्ता महासती ॥ सुतं प्रासूत तत्रैव । सर्वांगवरलक्षणं ॥ ४७ ॥ बालं कंबलरत्नेन । वेष्टयित्वा करेऽस्य च ॥ चिक्षेप मुद्गरत्नं सा । भर्तृनामांकितं सती ॥ ४८ ॥ वस्त्रादिक्षालनं कर्तुं । विशंती सरसि स्वयं ॥ आदाय गगने क्षिप्ता । करेण जलहस्तिना ॥४९॥

अथ नंदीश्वरं द्वीपं । जग्मुषा गगने तदा ॥ जगृहे खेचरेंद्रेण । सा श्येनेनेव वर्त्तिका ॥ ५० ॥ रुदंती तमिति प्राह । शृणु भो काननेऽत्र मे ॥ जातमात्रोऽस्ति बालो हि । श्वापदैर्भक्षयिष्यते ॥ ५१ ॥ स्तन्यपानं विना यद्वा । स्वयमेव विपत्स्यते ॥ कृपया नय मां तत्र समानय तमत्र वा ॥ ५२ ॥ सोऽपि प्राह करोमीदं । यदि मां मन्यसे पतिं ॥ ध्रुवं तवैव भाग्येन । प्राप्तोऽहं गगनेऽधुना ॥ ५३ ॥ यदहं मणिचूडस्य । विद्याभृच्चक्रवर्त्तिनः ॥ पुत्रो मणिप्रभो नामा । विद्याधरचमूपतिः ॥ ५४ ॥ सोऽहमात्तचरित्रस्य । पितुः पादनिनंसया ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्रस्थितस्त्वामिहाऽऽह्वं । ज्ञाकामिव शुकः शुन्ने ॥ ५५ ॥ तन्मां प्रपद्य रम्यास्ये । खेचर-स्वामिनी ज्ञव ॥ कापि कल्पद्रुमासाद्य । किं मानिनि विमानयेत् ॥ ५६ ॥ शूकलाश्वहृतेन श्री–मिथिलानगरेशिना ॥ श्रीपद्मरथज्ञूपेन । जगृहे तनयस्तव ॥ ५७ ॥ पाल्यमानः सुत-त्वेन । तत्पत्न्या पुष्पमालया ॥ सुखमस्तीति ज्ञऽे मे । प्रज्ञप्त्येदमुदीरितं ॥ ५८ ॥ युग्मं ॥ तस्माद्विषादं मुक्त्वा मां । ज्ञज तेनेत्युदाहृता ॥ दध्यौ मदनरेखापि । विखिन्नाऽतितरां हृदि ॥ ५९ ॥ प्राप्ता शीलस्य रक्षायै । ज्ञूमिमेतावतीमहं ॥ तज्ञंगस्तदवस्थोऽय–महो पुनरुपस्थि-तः ॥ ६० ॥ निश्चयेन तु शीलं मे । मया रक्ष्यं यथा तथा !! स्मरार्त्तश्चैष तत्काल–विक्षेपः खलु युज्यते ॥ ६१ ॥ ततः साह महाज्ञाग । पूर्वं नंदीश्वरे मम ॥ यात्रां कारय तत्रेऽहं । यतिष्ये कामपूरणे ॥ ६२ ॥ ततस्तुष्टेन तेनासौ । नीता नंदीश्वरं द्रुतं ॥ तत्राऽवंदत चैत्येषु । द्वापंचाशतितीर्थपान् ॥ ६३ ॥

ततो द्वावपि वंदेते । मणिचूडाज्ञिधं मुनिं ॥ चतुर्ज्ञानी महात्मापि । ज्ञात्वा ज्ञावं तनूरु-हः ॥ ६४ ॥ तथा देशनयाऽकार्षी–त्सवैराग्यं मणिप्रज्ञं ॥ यथोद्ज्ञाय महासत्त्वै । सोऽनमज्ञ-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

गिनीधिया ॥ ६५ ॥ युग्मं ॥ पृष्टश्च सुतवृत्तांतं । मुनिर्मदनरेखया ॥ कतिचित्प्राग्भवैर्युक्तं ।
तथैवाऽयमभाषत ॥ ६६ ॥ इतो व्योम्नोऽवतीर्णः श्री–तिग्मभानुरिवाऽपरः ॥ त्यक्त्वा विमा-
नं देवीभि–र्गीयमानगुणोच्चयः ॥ ६७ ॥ सुरोत्तमो विनम्रांगो । विधाय त्रिप्रदक्षिणां ॥ सत्या
मदनरेखाया । निपपात पदांबुजे ॥ ६८ ॥ युग्मं ॥ प्रणम्य च ततः साधून् । यथास्थानमु-
पाविशत् ॥ तदयुक्तमिति ध्यात्वा । सुरं प्राह मणिप्रभः ॥ ६९ ॥ चतुर्ज्ञानिनमुल्लंघ्य । प्र-
थमं नमसि स्त्रियं ॥ भवादृशोऽपि न्यायं चे–दुल्लंघति किमुच्यते ॥ ७० ॥ श्रुत्वेति यावज्जी-
वाणो । गृणाति खेचरेश्वरं ॥ चारणश्रमणस्ताव–न्मणिप्रभमभाषत ॥ ७१ ॥ नाऽर्हत्येष न-
पालंभं । कृतज्ञस्त्रिदशोत्तमः ॥ यतः पूर्वभवेऽमुष्य । खड्गघातेन ताम्यतः ॥ ७२ ॥ भार्यैषा
मदनरेखा । जिनधर्मसुधामयैः ॥ शुद्धोपदेशगंडूषैः । सांत्वयामास मानसं ॥ ७३ ॥ युग्मं ॥

प्रवर्द्धमानसंवेगः । पर्याप्य स्वायुरेष च ॥ बभूव पंचमे कल्पे । ब्रह्मलोके सुरोत्तमः ॥
॥ ७४ ॥ धर्माचार्यमनुस्मृत्य । तूर्णमत्रेयिवानयं ॥ युक्तं मुनीन् विहायादौ । ननामैनां म-
हासतीं ॥ ७५ ॥ यतः–यतिना श्रावकेणाथ । योऽर्हद्धर्मे स्थिरीकृतः ॥ स एव तस्य जायेत

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

। धर्माचार्यो न संशयः ॥ ७६ ॥ सम्यक्त्वं भवने सारं । सम्यक्त्वं सर्वदुर्लभं ॥ सम्यक्त्वं दद-
ता तस्मा–दत्तं किं नेह देहिनां ॥ ७७ ॥ श्रुत्वेति खेचरेंद्रोऽपि । क्रमयामास तं सुरं ॥ किं
तेऽभीष्टं करोमीति । देवोऽप्याह महासतीं ॥ ७८ ॥ सा प्राह मिथिलापुर्यां । नय मां यत्र
सोंगजः ॥ ततः क्षणेन नीतासौ । सुरेण गगनाध्वना ॥ ७९ ॥ याऽस्ति जन्मव्रतक्षानै–र्न-
मिमल्लिजिनेशयोः ॥ पवित्रा तत्र चैत्यानि । नेमतुस्तावुभावपि ॥ ८० ॥ गत्वा प्रवर्त्तिनी-
पार्श्वे । धर्मं शुश्रुवतुस्ततः ॥ सुरेणोचे समेहि त्वं । दापयामि यथा सुतं ॥ ८१ ॥ तयोचे-
ऽनादिसंसारे । पुत्रः कस्यापि कोऽपि किं ॥ आर्यिकाचरणौ मेऽतः । शरणं चरणेक्षया ॥८२॥
ततः प्रवर्त्तिनीं नत्वा । साध्वीं चापि महासतीं ॥ गतः सुरो यथास्थानं । सा च दीक्षामुपा-
ददे ॥ ८३ ॥ श्रीपद्मरथराजस्य । नताः सर्वे महीभुजः ॥ शिशोः प्रभावादित्याख्या । न-
मिरित्यस्य निर्ममे ॥ ८४ ॥ क्रमेण यौवनं प्राप्तः । कलापौरुषजीवनं ॥ अष्टोत्तरं शतं कन्याः
। स पित्रा पर्यणाय्यत ॥ ८५ ॥ अथो निवेश्य राज्ये तं । स्वयं पद्मरथो नृपः ॥ अनुपाल्य
सुखं दीक्षा–पूर्वकं मोक्षमासदत् ॥ ८६ ॥ इतो मणिरथो यस्यां । रजन्यां बांधवो हतः ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तस्यां कृष्णाहिना दष्टो । रौद्रध्यानपरो मृतः ॥ ८७ ॥ चतुर्थनरकावन्या—मुत्पन्नो मंत्रिभि-स्ततः ॥ युगबाहुसुतश्चंद्र—यशा राज्येऽन्यषिच्यत ॥ ८८ ॥

अन्यदा नमिन्नूनर्त्तुः । पट्टहस्ती सितद्युविः ॥ आलानस्तंभमुन्मूल्य । गतो विंध्याचलं स्मरन् ॥ ८९ ॥ श्रीचंद्रयशसा राज्ञा । मार्गेऽग्राहि स कुंजरः ॥ चरैर्ज्ञात्वाऽथ दूतेन । मा-र्गयामास तं नमिः ॥ ९० ॥ प्राह चंद्रयशा दुतं । न नीतिज्ञो ध्रुवं नमिः ॥ परहस्तगतं व-स्तु । मुधैव किमु लभ्यते ॥ ९१ ॥ इत्यादि दूतमाक्षिप्य । विससर्ज महीपतिः ॥ सबलो न-मिराजापि । तंप्रति त्वभ्यषेणयत् ॥ ९२ ॥ तदाऽभिमुखमागच्छ—त्रपि चंद्रयशा नृपः ॥ वारि-तः शकुनैस्तस्थौ । स्थान एव चमूवृतः ॥ ९३ ॥ नमिश्च तत्रोपागत्य । रुध्वा तस्य पुरीं स्थितः ॥ श्रुतो नमिजनन्याथ । वृत्तांतश्चायमार्यया ॥ ९४ ॥ कृत्वा जनक्षयं मामू । नरके व्रजतामिति ॥ प्रवर्त्तिन्याज्ञया साध्वी । नमेः पार्श्वमियाय सा ॥ ९५ ॥ तेनापि कृत्वाऽभ्यु-त्थानं । स्थापिता साऽासने वरे ॥ चिरेणाभ्यंतरप्रीति—रथवा किमु लुप्यते ॥ ९६ ॥ साध्वी बभाण राजेंद्र । लक्ष्मीः कल्लोलचंचला ॥ तत्कृते समरारंभः । केवलं नरकायतिः ॥ ९७ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तत्रापि ते विशेषेण । समं ज्येष्ठेन बंधुना ॥ क्वयैककारणं कर्तुं । न युक्तो दारुणो रणः ॥ ॥ ९८ ॥ विस्मितो नमिरप्राक्षी–त्कोऽत्र मे ज्येष्ठबांधवः ॥ तयोचेऽसौ चंद्रयशा–स्ततः क-थमुदीरिते ॥ ९९ ॥ नवाच सर्वसंबंधं । साध्वी श्रुत्वाथ नृपतिः ॥ नग्नयाऽवस्थया तस्थौ । दृष्टांत इव साऽन्वयः ॥ १०० ॥

मुक्त रत्नकंबले च । पृष्टया पुष्पमालया ॥ दर्शितेऽस्य विशेषेण । प्रतीतिरुदपद्यत ॥१॥ बंधौ स प्रेमबंधोऽयं । रणाल्लघु न्यवर्त्तत ॥ मन्यंते तृणवत्प्राणा–नपि यद्वा मनस्विनः ॥२॥ आर्यिकापि ततश्चंद्र–यशःपार्श्वे समीयुषी ॥ सर्वैरभ्युत्थितं तत्र । वेलयेव शशीकृणात् ॥ ३ ॥ प्रणम्य जननीं भक्त्या । हर्षोदश्रुविलोचनः ॥ सर्वं व्यतिकरं मातु–र्मुखादाकर्णयन्नृपः ॥४॥ मत्वा नमिनृपं बंधुं । श्रीमच्चंद्रयशास्ततः ॥ कामं जहर्ष केकीव । श्रुत्वा जलदगर्जितं ॥५॥ गतो महाविभूत्या च । सन्मुखं तस्य सादरं ॥ श्रुत्वाऽयांतं च तं सोऽपि । हर्षात्संमुखमा-ययौ ॥ ६ ॥ मिलितौ द्वावपि प्रीत्या । सूर्यचंद्रमसाविव ॥ प्रविष्टौ च पुरे तत्र । नरनारा-यणाविव ॥ ७ ॥ अथ चंद्रयशाः प्राह । पितुर्मृत्योरनंतरं ॥ दीक्षाजिघृक्षया वत्स । न राज्ये-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ऽप्यादरो मम ॥ ८ ॥ तत्त्वं प्रपद्य साम्राज्यं । सांप्रतं मां कृतार्थय ॥ इत्यादि बोधयित्वा स । नमिं राज्येऽन्यषिंचत ॥९॥ स्वयं चंद्रयशा दीक्षां । प्रपद्य स्वमसाधयत् ॥ नमिश्च नामि-तारातौ । राज्यद्वयमखंमितं ॥ १० ॥

अन्यदा नमिदेहेऽभू—त्पूर्वकर्मोपढौकितः॥ षाण्मासिको महातापः। सीमेवोष्णस्य कर्म-णः ॥ ११ ॥ तस्योपशांतये हस्त—क्वणत्कंकणनूपुराः ॥ गौशीर्षचंदनं सर्वा । घर्षंत्यंतःपुरां-गनाः ॥ १२ ॥ अग्निनालिंगितस्येव । दाहोद्विग्नस्य तस्य तु ॥ सुखाचक्रे न वलय—ध्वनिर्वी-णेव शोकिनः ॥ १३ ॥ ततस्तद्वचसैकैकं । मुंचंत्यो वलयं स्त्रियः ॥ एकैकं धारयामासुः । खटत्कारनिवृत्तये ॥ १४ ॥ इतश्च तस्य चारित्रा—वारके कर्मबंधने ॥ त्रुटितेऽध्यवसायोऽय—मुदपादि शुन्नायतिः ॥ १५ ॥ वलयावलिदृष्टांता—ज्जीवो बहुपरिग्रही ॥ दुःखं वेदयते नूनं । वरमेकाकिता ततः ॥१६॥ इत्येकाकिविहारं स । ध्यायन् दाहोपशांतये ॥ स्वप्ने मेरूपरि श्वे-त—गजारूढं स्वमीक्षते ॥ १७ ॥ प्रातर्विमुक्तो दाहेन । जातजातिस्मृतिर्नृपः स्थापयित्वा सु-तं राज्ये । स्वयं दीक्षामुपाददे ॥ १८ ॥ नगरीदेवतादत्त—लिंगो निर्गतवानयं ॥ ममत्ववर्जि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तो दृष्टः । शक्रेणाऽवधिना तदा ॥ १९ ॥

अद्भुतप्रतिबोधेन । रंजितस्तस्य देवराट् ॥ ब्राह्मणाकृतिमाधाय । परीक्षार्थमुपागतः ॥ ॥ २० ॥ ऊचे च तावत्प्रव्रज्या । दयामूला प्रकीर्त्यते ॥ त्वद्व्रतग्रहणेनैषा । दुःखादाक्रंदति प्रजा ॥ २१ ॥ पूर्वापरविरुद्धं ते । महाभाग व्रतं ततः ॥ पूर्वं सौख्यं विधायैवं । व्रतं चरितुमर्हसि ॥ २२ ॥ नमिराह न मे कश्चि–न्न चाहमपि कस्यचित् ॥ न दुःखाक्रियते कोऽपि । न मदर्थं च दुःख्यपि ॥ २३ ॥ स्वार्थाय यतते सर्व–स्तं विना दुःखमश्नुते ॥ मयापि साध्यते स्वार्थ–स्तस्मान्निर्ममचेतसा ॥ २४ ॥ इत्युक्तियुक्तिप्रत्युक्ती–र्वदन्नथ महामुनिः ॥ विप्रं निरुत्तरीचक्रे । स्वनिर्ममतया तया ॥ २५ ॥ ततः स्वरूपमास्थाय । शक्रो भक्त्या प्रणम्य तं ॥ जगाम स्वास्पदं साधु–रपि मोक्षमसाधयत् ॥ २६ ॥ अथ विविधतपोऽग्निः क्षालयित्वा स्वकर्म । प्रबलमलकलंकं साम्यसंबद्धबुद्धिः ॥ स्वपरहितविधात्रीं प्राप्य शीले च रेखा–मजनि मदनरेखा भाजनं मोक्षलक्ष्म्याः ॥ २७ ॥

॥ इति श्रीरुद्रपल्लीयगच्छे श्रीसंघतिलकसूरिपट्टावतंसश्रीसोमतिलकसूरिविरचितायां

॥ २७१ ॥ ॥ २७१ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

श्रीशीलतरंगिण्यां मदनरेखाचरित्रं समाप्तं ॥ श्रीरस्तु ॥

शीलस्य जीवातूनेतान्महासतीदृष्टांतानाह—

॥ मूलम् ॥—नंदन सीलानंदिय–जणविंदा सुंदरी महान्नागा ॥ अंजणसुंदरिनम्मया–सुंदरिरइसुंदरीन्न य ॥ ५४ ॥ व्याख्या—शीलान्नंदितजनवृंदा प्रमोदितविश्वा महान्नागा निष्कलंका सुंदरी नंदतु ऋषन्नदेवसुता चिरं जयतात्, न केवलं सुंदरी, अंजनासुंदरी नर्मदासुंदरी रतिसुंदरी च, एता अपि तद्रूपचारित्वान्नंदंत्वित्यर्थः, महान्नागालक्षणं चेदं–सा महान्नागा यस्या न कुरपवादोपहतं जन्म, आजन्म मरणांतं हि । यस्या वाच्यं न जायते ॥ सुसूक्ष्मं सा महान्नागा । विज्ञेया क्षितिमंडले ॥ १ ॥ इति गाथार्थः, न्नावार्थस्तु कथानकेभ्योऽवसेयः, तत्रादौ सुंदरीदृष्टांतस्तथाहि—

अस्यामेवाऽवसर्पिण्यां—मादौ श्रीऋषन्नप्रभुः ॥ श्रीनान्नितनयो राज्यं । विनीतायामपालयत् ॥ १ ॥ सुमंगलासुनंदाख्ये । न्नार्ये तस्य बन्नूवतुः ॥ चतुर्दशमहास्वप्ना–नादिमा वीक्षतेऽन्यदा ॥ २ ॥ सापि तान्न कथयामास । स्वामिने ज्ञानशालिने ॥ सोऽप्यन्नाषत न्ना-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वी ते । चक्रवर्त्ती ध्रुवं सुतः ॥ ३ ॥ अतिक्रांतेषु षट्पूर्व–लक्षेषु जन्मतः प्रभोः ॥ सुषुवे भर-
तब्राह्मी–युग्ममादौ सुमंगला ॥ ४ ॥ सुनंदापि बाहुबलि–सुंदर्यौ सुंदराकृती ॥ असूत स-
कुरूपात्त–विज्ञे विज्ञानवासने ॥ ५ ॥ पुनरेकोनपंचाश–त्पुत्रयुग्मान्यजीजनत् ॥ सुमंगला
मणिखानि–रिव रत्नपरंपरां ॥ ६ ॥ अवर्धंत च विंध्याद्रौ । कलभा इव ते क्रमात् ॥ यूथना-
थ इव स्वामी । वेष्टितस्तैरराजत ॥ ७ ॥ भक्त्वा शिल्पशतं लोक–व्यवहारप्रवृत्तये ॥ भरतं
पाठयामास । स्वामी द्वासप्ततिकलाः ॥ ८ ॥ सोदराणामथाऽन्येषां । सोऽपि ता अध्यजी-
गपत् ॥ भिद्यते शतधा विद्या । सत्पात्रे शालिबीजवत् ॥ ९ ॥ ततः स पुंस्त्रीहस्त्यश्व–ल-
क्षणान्यखिलान्यपि ॥ भेदैरनेकशो बाहु–बलिनोऽज्ञापयत्प्रभुः ॥ १० ॥ अष्टादश लिपीर्ब्राह्म्-
म्या । अपसव्येन पाणिना ॥ सुंदर्याः शिक्षयामास । वामेन गणितं पुनः ॥ ११ ॥ क्षीणे
भोगफले कर्म–ण्यथ नाभितनूभवः ॥ दध्यौ संसारवैराग्यं । विगलन्मोहबंधनः ॥ १२ ॥ ता-
वल्लोकांतिका देवाः । प्रभुमेत्य व्यजिज्ञपन् ॥ स्वामिन् लोकव्यवस्थाव–द्धर्मतीर्थं प्रवर्त्तय ॥
॥ १३ ॥ वितीर्य भरतायाथ । प्रभुः साम्राज्यसंपदं ॥ ददौ विभज्य विषयां–स्तनयेभ्यो य-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

थोचितं ॥ १४ ॥ आर्याऽनार्येषु देशेषु । विहरन्मौनवान् विभुः ॥ वर्षेणेक्षुरसैश्चक्रे । पारणं पाणिपात्रजृत् ॥ १५ ॥

श्रेयांसोपइ एवाऽयं । दानधर्मस्तदाद्यजूत् ॥ प्रजानामृषभोपज्ञा । यथा सर्वनयस्थितिः ॥ १६ ॥ ब्रह्मस्थमुख्या सर्व–देशेषु विहरन् प्रभुः ॥ सहस्रमेकं वर्षाणां । व्यतिचक्राम लीलया ॥ १७ ॥ गत्वा पुरिमताल्याख्य–मयोध्योपपुरं पुरं ॥ प्रविष्टः शकटमुख–मुद्यानमृषभप्रभुः ॥ १८ ॥ कृताष्टमस्य न्यग्रोध–तलासीनस्य तावता ॥ उत्पन्नं केवलं ज्ञानं । तत्र श्रीत्रिजगद्गुरोः ॥ १९ ॥ चक्रे समवसरण–रचना वासवैस्ततः ॥ इतश्च शासतो राज्यं । भरतस्य नरेशितुः ॥ २० ॥ नाम्ना यमकशमकौ । समकं पुरुषावुभौ ॥ सन्नामुपेयतुर्दूता–विवेहाऽमुष्मिकश्रियोः ॥ २१ ॥ केवलोत्पत्तिमाचख्यौ । तत्रैकः प्रथमेशितुः ॥ द्वितीयस्त्वायुधागारे । चक्ररत्नसमुद्भवं ॥ २२ ॥ उपेद्य प्राणिघातैक–हेतुं चक्रार्चनाविधिं ॥ त्रैलोक्याऽभरतं नाथं । नंतुं तूर्णं ततोऽचलत् ॥ २४ ॥ उदग्द्वारेण समव–सरणं सपरिच्छदः ॥ प्रविश्य भरतस्तीर्थ्य–नाथं सानंदमानमत् ॥ २५ ॥ इंशार्धासनमासीने । भरते योजितांजलौ ॥ सर्व-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

भाषास्पृशा वाण्या । चक्रे स्वाम्यपि देशनां ॥ २६ ॥

जराधिव्याधिदौर्गत्य–नक्रचक्रकुलाकुले ॥ किं सुखं प्राणिनामत्र । संसारक्षारसागरे ॥ ॥ २७ ॥ दूराऽपास्तसुखे नित्यं । दुःखलक्षशताकुले ॥ रतिं बध्नाति संसारे । मरुस्थल इवात्र कः ॥ २८ ॥ क्रूरावसाना नियतं । विषयाः खलवाक्यवत् ॥ पक्वं फलमिव प्रेम । पतनांतं शरीरिणां ॥ २९ ॥ चातुर्गतिकसंसारं । दुःखरूपं विचार्य तत् ॥ यतध्वं खलु मोक्षाय । सर्वथा नो मनीषिणः ॥ ३० ॥ स पुनर्दुर्लभनः सर्व–सावद्यविरतिं विना ॥ दीयतां सर्वदुःखेभ्य–स्तामादाय जलांजलिः ॥ ३१ ॥ आकर्ण्य देशनामिन्द्रं । पुत्राणां पंचभिः शतैः ॥ भरतस्याददे दीक्षा । पौत्रसप्तशतीयुतैः ॥ ३२ ॥ आज्ञप्ता भरतेशेन । बाहूम्यपि व्रतमाददे ॥ सुधाकुंभं समासाद्य ! को वा तृष्णान् विलंबते ॥ ३३ ॥ विसृष्टा बाहुबलिना। सुंदरी चरणार्थिनी ॥ निषिद्धा भरतेशेन । श्राविका प्रथमाऽभवत् ॥ ३४ ॥ सुंदरीं सुंदरज्ञायां । लावण्यैकतरंगिणीं ॥ भरतः स्थापयामास । तदा स्त्रीरत्नकाम्यया ॥ ३५ ॥ भरतोऽपि श्रावकत्व–मादाय स्वामिपादयोः ॥ तत्र पूजार्चिकीः शीघ्र–मायुधागारमागमत् ॥ ३६ ॥ विष्वक् प्रदक्षि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

णीकृत्य । चक्रं राजा नमोऽकरोत् ॥ कृत्वा चाऽष्टाह्निकीं राजा । प्रतस्थे दिग्जयंप्रति ॥३७॥ सदा षोडशभिर्यक्ष–सहस्रैः परिवेष्टितः ॥ षट्खंडं भारतं क्षेत्रं । साधयामास चक्रभृत् ।३८। चक्रं छत्रमसिर्दंडो । रत्नान्यायुधमंदिरे ॥ एकेंद्रियाणि चत्वारि । तस्य जातानि चक्रिणः ।३९। काकिणीचर्ममणय–स्तस्य लक्ष्मीगृहेऽभवन् ॥ ज्ञानदर्शनचारित्रा–णीव त्रीणि महात्मनि ॥ ४० ॥ सेनापतिर्गृहपतिः । पुरोधा वर्द्धकी तथा ॥ विनीतापुरि चत्वारि । नररत्नानि जज्ञिरे ॥ ४१ ॥ गजाश्वरत्ने वैताढ्य–शैलमूले बभूवतुः ॥ उदग्विद्याधरश्रेण्यां । स्त्रीरत्नं तूदपद्यत जंबूद्वीप इव स्वर्ग–सिंधुप्रभृतिसिंधुभिः ॥ स चतुर्दशभिश्चक्री । महारत्नैरशोभत ॥ ॥ ४३ ॥ षष्ट्या सहस्रैर्वर्षाणां । समग्रैश्वर्यसंयुतः ॥ आजगाम विनीतायां । चक्री श्रीभरताधिपः ॥ ४४ ॥ ततो द्वादशवार्षिक्या–ऽभिषेकसमनंतरं ॥ दर्शनोत्कंठितश्चक्री । स्मर्तुं प्रवृते स्वकान् ॥ ४५ ॥ ततो हिमानीसंपात–दीनां कमलिनीमिव ॥ कदलीमिव संशुष्कां । दिवा चंद्रकलामिव ॥ ४६ ॥ प्रम्लानरूपलावण्या–मस्थिशेषतनूलतां ॥ नियुक्तैर्दर्श्यमानां स । तदा प्रैक्षिष्ट सुंदरीं ॥ ४७ ॥ युग्मं ॥ कृशां भवांतरायाता–मिवाऽन्यादृशविग्रहां ॥ निरीक्ष्य

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सुंदरीं राजा । नियुक्तानित्यभाषत ॥ ४८ ॥ किं रे मम गृहे शस्य–संपत्तिस्तादृशी न हि ॥ बीजसूरपि निर्बीजा । तर्हि संभवति ध्रुवं ॥ ४९ ॥ न भोक्तुं लभते स्वैरं । कोऽपि कार्पण्यतोऽत्र वा ॥ क्षारे श्रद्धालवस्तर्हि । क्षारोदधिगृहा अपि ॥ ५० ॥

किममी सूपकारा वा । स्वकर्मसु न कर्मठाः॥ वृत्तिस्तेनतया तर्हि । दूरापास्या अमी अपि ॥ ५१ ॥ खर्जूरोत्तंतिकाशाक्षा–नालिकेरफलादिका ॥ सुखादिका न किं संति । दरिद्रस्येव सद्मनि ॥ ५२ ॥ फलवंध्या बभूवुस्ते । किमुद्यानेषु पादपाः ॥ प्रार्थनाविमुखाः कल्प–वृक्षास्तदिह जज्ञिरे ॥ ५३ ॥ यद्वा न प्रस्रवंतिस्म । कलशोघ्नोऽपि धेनवः ॥ सिंधुगंगादयस्तर्हि । ग्रीष्मग्रीष्मोष्मणाऽशुषन् ॥ ५४ ॥ अथ भोज्यादिसामग्र्यां । सत्यामपि हि सुंदरी ॥ असौ न किंचिदश्नाति । तद्रोगः कोऽपि बाधते ॥ ५५ ॥ तथा च तत्प्रतीकार–दक्षाः सर्वे भिषग्वराः ॥ किं बभूवुः कथाशेषाः । कुब्या इव मरुस्थले ॥ ५६ ॥ अथास्मन्मंदिरे दिव्यौ–षधयो न हि लेभिरे ॥ ध्रुवं तदौषधीवंध्यो । जातः सोऽपि हिमाचलः ॥ ५७ ॥ अहो नु कथमाजन्म–दुःखदग्धेव दुर्बला ॥ सौनिकागारबद्धेव । बागीवाऽजनि सुंदरी ॥ ५८ ॥ नियोगिनोऽ-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पि भरत–प्रभुं नत्वेवमूचिरे ॥ न दुर्लभं किमप्यत्र । कल्पद्रुमिव ते गृहे ॥ ५९ ॥ परं यदा-
दि युष्मान्निः । प्रतस्थे दिग्जयंप्रति ॥ तदादि कुरुते नित्य–माचाम्लानि च सुंदरी ॥ ६० ॥
प्रव्रजंती यदैवासौ । न्यषिध्यत सती त्वया ॥ तस्थौ प्रवर्त्तिनीवासौ । तदाप्रभृति भावतः ॥
॥ ६१ ॥ कल्याणि तातपादांते । प्रव्रज्यां किं जिघृक्षसि ॥ पृष्टेति सुंदरी राज्ञा । तथेति प्र-
त्यवोचत ॥ ६२ ॥

भरतः पुनराचष्ट । प्रमादान्मौग्ध्यतोऽथवा ॥ इयत्कालं महासत्या । व्रतविघ्नमकारयं
॥ ६३ ॥ तदिदानीमपि स्वेष्टं । साधयंती महासती ॥ अवश्यं तातपादानां । सत्यमेषैव सुं-
दरी ॥ ६४ ॥ धिग्वयं विषयासक्ताः । प्रोन्मत्ता इव हेलया ॥ हिताऽहितमजानाना । मूर्ख-
मो राज्यसंपदि ॥ ६५ ॥ गत्वरेणामुना मोक्षः । साध्यते वपुषैव हि ॥ भोगिभिर्भोगवांछेव
। पुष्पैर्नश्वरसौरभैः ॥ ६६ ॥ आधिव्याधिकृशन्मूत्र–मलस्वेदात्मजं वपुः ॥ न शक्यं सुरभी-
कर्त्तुं । पलांडुशकलं यथा ॥ ६७ ॥ तत्साधु वपुषानेन । गृह्यते चरणं फलं ॥ निपुणा एव
गृह्णंति । रेणोः स्वर्णलवानिव ॥ ६८ ॥ मुदितेनाथ भूपेन । व्रतायाऽनुमता सती ॥ तपःकृ-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

शापि हर्षेण । वन्नौ मेदस्विनीव सा ॥ ६९ ॥ इतश्च विहरन् स्वामी । नान्नेयोऽष्टापदं गिरिं
॥ समियाय निदाघोष्म–तप्तानामिव वारिदः ॥ ७० ॥ तत्र स्वामिनमायातं । कुर्वाणं धर्म-
देशनां ॥ चक्रिणे ज्ञापयामासु–र्द्रुतमुद्यानपालकाः ॥ ७१ ॥ तेषां कोटीः सुवर्णस्य । सार्द्ध
द्वादश भूपतिः ॥ ददौ दधानो भरतो । जयादप्यधिकां मुदं ॥ ७२ ॥ ऊचे च सुंदरीं स्वा-
मी । त्वन्मनोरथसिद्ध्ये ॥ स्वातिमेघ इव क्षेत्रे । नूनमागाज्जगद्गुरुः ॥ ७३ ॥ अथ श्रीभरता-
देशा–दंतःपुरपुरंध्रयः ॥ सुंदर्याः कारयामासु–र्दीक्षादानाभिषेचनं ॥ ७४ ॥ अथो विलेपनं
कृत्वा । सुंदरी शीलसुंदरी ॥ संदधावंशुके शुभ्रे । द्यौरिवाभ्राणि शारदी ॥ ७५ ॥ तदानीं त-
त्तनौ दिव्य–रत्नालंकारराशयः ॥ अनर्घ्या निर्मलाः शीला–ऽलंकारा इव रेजिरे ॥ ७६ ॥ सुं-
दर्या रूपसौंदर्य–पुरतः किंकरीव सा ॥ स्त्रीरत्नं तु सुभद्राख्या । तदानीं प्रत्यभासत ॥ ७७ ॥
ततो भाःप्रदीनेव । मेघमाला यथेप्सितं ॥ दानं ददाना दीनेभ्यः । शिबिकामारुरोह सा ॥ ७८ ॥

अथ श्वेतातपत्रेण । शोभिता धूतचामरा ॥ स्तूयमानगुणग्रामा । वाढं मंगलपाठकैः ॥
॥ ७९ ॥ अंतःपुरपरीवार–सैन्यराजन्यराजिता ॥ अनुयाता नरेंद्रेण । मोदमेदस्विचेतसा ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ ८० ॥ युग्मं ॥ ज्ञगीतमंगला भ्रातृ–जायाभिर्ज्ञक्तिपूर्वकं ॥ ज्ञत्तार्यमाणलवणा । वरस्त्रीभिः पदेपदे ॥ ८१ ॥ प्रवाद्यद्भुयतातोद्य–नादैर्बधिरितांबरा ॥ प्रापदष्टापदं तात–पादपूतं महासती ॥८२॥ कलापकं ॥ ततो ज्ञरतसुंदर्यौ । वैराग्यालापपेशलौ ॥ प्राप्तौ समवसरणं । शरणं ज्ञवज्ञीजुषां ॥ ८३ ॥ चक्रवर्त्त्यनमद्धर्म–चक्रवर्त्तिनमादरात् ॥ नत्वा कृतांजलिः प्राह । सुंदर्यपि सगद्गदं ॥ ८४ ॥ चिरं प्रत्यक्ष एवाऽज्ञू–र्मनसा त्रिजगत्पते ॥ दिष्ट्या दृष्ट्याद्य दृष्टोऽसि । बहुज्ञिः पुण्यसंचयैः ॥ ८५ ॥

मयका यदियत्कालं । ज्ञरतेशोपरोधतः ॥ नाऽग्राहि चरणं तेन । स्वयमेवास्मि वंचिता ॥ ८६ ॥ ज्ञगिनी स्वामिनी ब्राह्मी । भ्रातृव्यास्तत्सुताश्च ते ॥ धन्याः सर्वेऽपि ये नाथ । तव मार्गं प्रपेदिरे ॥ ८७ ॥ विश्ववत्सल दीक्षां मे । दत्वा तारय तारय ॥ जगत्प्रकाशकः सूर्यः । किं गृहं न प्रकाशयेत् ॥ ८८ ॥ महाज्ञागे महासत्त्वे । साधु साध्वित्युदीरयन् ॥ ददौ तस्यै विभुर्दीक्षां । ज्ञवांभोधितरीनिज्ञां ॥ ८९ ॥ ततोऽनुशिष्टिसंबद्धं । धर्मारामैकसारणिं ॥ तस्यै पीयूषदेशीयां । विदधे देशनां विभुः ॥ ९० ॥ कृतकृत्यमिवात्मानं । मन्यमानाथ

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सुंदरी ॥ तपोधना गणमध्ये । निषसाद यथाक्रमं ॥ ९१ ॥ देशनांते प्रभुं साधून् । साध्वी-श्चापि प्रणम्य सः ॥ प्रमोदमेदुरोऽगच्छ–दयोध्यां नरतेश्वरः ॥ ९२ ॥ सुंदर्यपि द्विधा शिक्षा–मादाय मतिमद्वरा ॥ चारित्रं निरतीचारं । विधिवत्पर्यपालयत् ॥ ९३ ॥ निहत्य घातिक-र्माणि । निरवद्यतपःक्रमैः ॥ अवाप केवलज्ञानं । स्वातौ शुक्तिर्व मौक्तिकं ॥ ९४ ॥ अतुल्य शीलोज्ज्वलतासमुच्च–मापाद्य कैवल्यमनल्पकालं ॥ अष्टापदे शैलवरे प्रपेदे । श्रीसुंदरी मो-क्षमनंतसौख्यं ॥ ९५ ॥

॥ इति श्रीरुद्रपल्लीयगच्छे भट्टारकश्रीसंघतिलकसूरिपट्टावतंसश्रीसोमतिलकसूरि-विरचितायां श्रीशीलोपदेशमालावृत्तौ शीलतरंगिण्यां सुंदरीकथा समाप्ता ॥

अथांजनासुंदरीदृष्टांतमाह—

अत्रैव जंबूद्वीपेऽस्ति । शाश्वतस्वस्तिमंदिरं ॥ वैताढ्यपर्वते विद्या–धरश्रेणियुगांकितं ॥ ॥ १ ॥ पुरं प्रह्लादनं तत्र । प्रसिद्धं सिद्धभूमिवत् ॥ जेतुं स्वर्गमिवोर्ध्वोर्ध्व–चंद्रशालासमा-कुलं ॥ २ ॥ प्रह्लादो नाम भूभीड–स्तत्र शात्रवशातनः ॥ सहस्ररश्मिराकाशे । यत्प्रताप इ-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वांगवान् ॥ ३ ॥ राज्ञी पद्मावतीत्यस्ति । गुणमाणिक्यखानिका ॥ गुणैर्जयकुमारो वा । तत्पुत्रः पवनंजयः ॥ ४ ॥ क्रीडाकाननवापीषु । विनोदखुरलीश्रमैः ॥ मित्रैरृषभदत्तायैः । समं चिक्रीड कौतुकी ॥ ५ ॥ श्रेष्यामितश्च तत्रैव । पुरमंजनसंज्ञकं ॥ नृपालोंजनकेतुस्त-त्पालयामास वज्रिवत् ॥ ६ ॥ आसीदंजनवत्याख्या । राज्ञी मान्या मनीषिणां ॥ अंजनासुंदरी कन्या । तयोर्नेत्राऽमृतांजनं ॥ ७ ॥ रूपसौंदर्यसीमेव । साऽऽ पित्रोर्मनोरथैः ॥ सर्वांगीणगुणा साथ । प्राप कामसुखं वयः ॥ ८ ॥ अहंपूर्वमनेकेषां । राज्ञां स्थानेषु तत्कथा ॥ प्रससार सरित्पूर । इव वर्षासु सर्वतः ॥ ९ ॥ आत्मात्मीयकुमाराणां । माराणामिव नृपवाः ॥ लेखं लेखं पटे रूपं । प्रैषुः सचिवपाणिना ॥ १० ॥

ततो रूपकुलैश्वर्य–विद्याशीलपराक्रमान् ॥ पर्यालोचयतोः पित्रो–र्गुणान् वज्रमणेरिव ॥ ११ ॥ नविष्यद्दत्तपवनं–जययोरन्यदा पटः ॥ अमात्यहस्ते युगप–त्कामादेश इवाऽगमत् ॥ १२ ॥ युग्मं ॥ त्यक्त्वा सर्वकुमाराणां । तुषानिव पटानथ ॥ परीक्षाकुशलो राजा । पटद्वयमधारयत् ॥ १३ ॥ तयोर्वरगुणान् ज्ञात्वा । समानंजनकेतनः ॥ पप्रच्छ सचिवं नृपो ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

विशेषं रूपवेषयोः ॥ १४ ॥ सचिवः प्राह देवायं । भविष्यद्दत्तनामकः ॥ जन्मतोऽष्टादशे व-
र्षे । मुक्तिगामी जिनोदितः ॥ १५ ॥ कन्यां भविष्यद्दत्तस्य । गुणाधिकतया नृपः ॥ प्रदित्सु-
रपि चाल्पायु–रित्याशंक्य न दत्तवान् ॥ १६ ॥ यात्रायां शाश्वतक्षेत्रे । द्वीपे नंदीश्वरे तदा ॥
विद्याधरसहस्राणि । महर्द्ध्या सममीमिलन् ॥ १७ ॥ तत्रांजनसुराधीशः । प्रल्हादननृपांग-
जं ॥ पवनंजयमालोक्य । योग्यं कन्यां ददौ मुदा ॥ १८ ॥ दत्तं नैमित्तिकैर्लग्नं । सद्यः स्तो-
कदिनांतरे ॥ योग्यसंघट्टनाप्रीतौ । तौ स्वगेहमुपेयतुः ॥ १९ ॥ समृद्धेरनुसारेणां–जनकेतुर्म-
हीपतिः ॥ चक्रे विवाहसामग्रीं । साटोपां महदुत्सवात् ॥ २० ॥ ससमग्रपरीवारः । संरंभे-
ण महीयसा ॥ समेत्य वर्तुले तस्थौ । श्रीमानससरोवरे ॥२१ ॥

श्रीप्रह्लादनरेंद्राय । महाविह्वर्दकाम्यया ॥ विस्तरेण समागंतुं । प्राहिणोल्लग्नपत्रिकां ॥
॥ २२ ॥ आह्वास्त स्वजनान् सोऽपि । जन्ययात्रार्थमादरात् ॥ सत्यां समृद्धौ पुत्रादि–का-
र्ये के के न सोद्यमाः ॥ २३ ॥ इतश्चर्षभदत्तोऽपि । बभाण पवनंजयं ॥ मित्र मैत्रीभवं प्रे-
म । पत्नीप्रेम्णा तिरोत्स्यते ॥ २४ ॥ कुमारः प्राह सस्मेरं । सखे कौतुकमस्ति मे ॥ गत्वा

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

विलोकयावस्तां । नक्तं केनाप्यलक्षिता ॥ २५ ॥ सद्यो व्योम्ना विमानेन । गत्वा मानससीमनि ॥ प्रविष्टौ श्वसुरागार–मुन्नौ नीलपटावृतौ ॥ २६ ॥ अंजनासुंदरी यत्र । सखीभिः परिवारिता ॥ मिथःकथाऽनुरक्ताऽस्ति । तत्र तावपि जग्मतुः ॥ २७ ॥ तदा कापि सखी प्राह । यो भवत्याः कृते वरः ॥ पूर्वं सखि विमृष्टोऽभूत् । स आसन्नशिवाध्वगः ॥ २८ ॥ अतः किं प्रवरेणापि । तेन गत्वरजन्मना ॥ तृप्तिं विनापि विच्छेद–दुःखं खलु सुदुस्सहं ॥ २९ ॥ अंजनासुंदरी प्राह । सखि किं चर्चयाऽनया ॥ घटापि किल दुःप्रापा । सुधाया इति न श्रुतं ॥ ३० ॥ श्रुत्वेति तार्जितः सिंह । इव कोपाऽरुणेक्षणः ॥ दधावे खड्गमुद्यम्य । हंतुं तां पवनंजयः ॥ ३१ ॥ भवाचर्षभदत्तोऽथ । खड्गमाच्छिद्य पाणिना ॥ कोऽयमप्रस्तुतारंभो–ऽनुचितः शिष्टकर्मणां ॥ ॥ ३२ ॥ एकं परगृहे रात्रा–वागमोऽन्यत्कनीवधः ॥ अनूढां च परकीये–त्यपि हंतुं न चाऽर्हसि ॥ ३३ ॥ इत्थं निवारितः कोशे । करवालं निधाय सः ॥ विरक्तचित्तः स्वं धाम । जगाम विमनायितः ॥ ३४ ॥ मिलिताऽनेकहस्त्यश्व–रथपादातिसंकुलाः ॥ प्रस्थिता जन्ययात्रार्थं । निरूपितदिनेऽथ ते ॥ ३५ ॥ मंगलध्वनिमिश्रेषु । मृदंगेष्वाहतेष्वथ ॥ मंमुनाय कुमारस्य ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सुवासिन्यः समाययुः ॥ ३६ ॥

कुमारस्ताः समालोक्य । ससंरंभमुपागताः ॥ स्वाऽभीष्टं ज्ञापयंस्तासां । मित्रमाचष्ट पार्श्वगं ॥ ३७ ॥ किमपेक्ष्याऽयमारंभो । न तावदहमीदृशं ॥ विवाहं कर्त्तुमिच्छामि । दुर्गोष्टीमिव सज्जनः ॥ ३८ ॥ विलक्षास्ता इति श्रुत्वा । तन्मातुस्तन्न्यवेदयन् ॥ समेत्य सोत्सुकं सापि । साशीर्वादमदोऽवदत् ॥ ३९ ॥ वत्स सामान्यलोकाना–मप्याशाः पूरितास्त्वया ॥ किं मातरमपीदानीं । निराशीकर्त्तुमर्हसि ॥ ४० ॥ स्फुर्त्या विवाहसामग्री–मेलनव्याकुलाशयः ॥ तदाकर्ण्य नरेंद्रोऽपि । कुमारं त्वरमागमत् ॥ ४१ ॥ किमिदं श्रूयते लज्ज–नीयं नीचजनोचितं ॥ किमस्मदाहृतं कार्यं । क्वापि शैथिल्यन्नागून्नेवत् ॥ ४२ ॥ अस्मासु किमु जीवत्सु। तामन्यः परिणेष्यति ॥ खंडं चंडमिव स्थाणु–नाहृतं कोऽपि मुक्तवान् ॥ ४३ ॥ नक्त्वा सरोषाहंकार–मिति प्रह्लादनो नृपः ॥ कुमारं पाणिनाकृष्या–ऽरोहयामास वाहनं ॥ ॥ ४४ ॥ लज्जयापि कुलीनाः किं । क्वापि पूज्यवचोऽन्यथा ॥ कुर्वंतीति प्रतस्थे झाक् । कुमारो गूढरोषवान् ॥ ४५ ॥ सुवासिनीभिस्तत्कालं । विहितोत्तममंगलः ॥ किरीटहारकेयूर–

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

महार्घाभरणावृतः ॥ ४६ ॥ चंद्रमंडलवत्श्वेत–विधृतातपवारणः ॥ गंगातरंगवत्पार्श्व–लोल-चामरचारिमः ॥ ४७ ॥ जाग्रज्जयजयाकीर्ण–दानप्रीणितमार्गणः ॥ दृशा संज्ञापयन् सर्वा–स्तांबूलसुप्रसन्नाननः ॥ ४८ ॥ अग्रगो जन्ययात्रायाः । कुमारः पवनंजयः ॥ षण्मुखो देवसे-नाया । इवाऽद्योतिष्ट निर्झरं ॥ ४९ ॥ कलापकं ॥

कन्यासंबंधिभिर्बाढं । प्रौढैः संमुखमागतैः ॥ महोत्सवमयी भूमि–र्बलिराज्य इवाभवत् ॥ ५० ॥ दानभोजनसन्मान–परिधापनिकाक्रमैः ॥ राजहर्षप्रकर्षे च । वृत्तं विवाहमंगलं ॥ ५१ ॥ अनुरूपवयोरूपौ । तौ तदानीं वधूवरौ ॥ श्लाघ्यतां प्रापतुर्लोके । रोहिणीशशिना-विव ॥ ५२ ॥ प्रह्लादननृपेणापि । स्वकीयगृहमीयुषा ॥ विसृष्टाः स्वजनास्तुष्टि–दानैर्जग्मुर्य-थाऽऽगताः ॥ ५३ ॥ अंजनासुंदरी शुद्ध–कुलाचारपरायणा ॥ स्वगुणैः प्रीणयामास । कमले-व कुटुंबकं ॥ ५४ ॥ केवलं प्राच्यदुःकर्म–परतंत्रतया पतिः ॥ श्वपचीमिव गेहेऽपि । न प-स्पर्श दृशापि तां ॥ ५५ ॥ पतिभक्तापि रक्तापि । महासत्यपि सांजना ॥ बभूव न मुदे प-त्यु–र्घृतभुक्तिरिवामये ॥ ५६ ॥ अलंघयंती सा भक्तिं । जानाना कर्मवैकृतं ॥ नातिचक्राम

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मर्यादां । वेलामिव महोदधिः ॥ ५७ ॥ इतश्च रावणेन श्री–लंकातः प्रतिविष्णुना ॥ अन्य-मित्रीणतां कर्त्तुं–कामेन वरुणंप्रति ॥ ५८ ॥ युद्धे साहाय्यदानाय । प्रह्लादननरेश्वरं ॥ आह्वा-तुं प्रेषितो राजा–देशस्तत्र समाययौ ॥ ५९ ॥ युग्मं ॥

अथ प्रह्लादनो भूप–स्तत्क्षणं रणकौतुकी ॥ सैन्यसंहननाकर्त्री । जयढक्कामवीवदत् ॥ ॥ ६० ॥ कुमारोऽपि तदाकर्ण्य । ज्ञात्वा रणमुपस्थितं ॥ पिता प्रस्थास्यते योद्धुं । तद्युक्तं न मयि स्थिते ॥ ६१ ॥ नत्वा पितरमन्यर्थ्यं । स्वयं जग्राह बीटकं ॥ यतो धुरंधरः पुत्रो । न पित्राऽऽयाससासहिः ॥ ६२ ॥ अथ मातरमापृच्छुं । गंतुकामं पतिं सती ॥ अंजनासुंदरी ज्ञा-त्वा । श्वश्रूसदनमासदत् ॥ ६३ ॥ तयाऽप्यऽविहितालापा। दुर्मनायितमानसा ॥ तस्थौ स्तं-भमवष्टभ्य । पतिदृष्टिमपीप्सती ॥ ६४ ॥ कुमारोऽप्यथ सन्नह्य । प्रेष्य सैन्यं पुरोऽध्वनि ॥ स्वयमाशिषमादातुं । जगाम जननीगृहे ॥ ६५ ॥ पपात पादयोर्मातुः । साऽप्याशिषमुदाह-रत् ॥ दत्वा पुत्रोचितां शिक्षां । विससर्ज सुतं युधि ॥ ६६ ॥ स्तंभलग्ना निश्चलांगी । प-तिदृष्टिमपीप्सती ॥ पांचालिकेव रूपाढ्या । सांजनासंदरी बभौ ॥ ६७ ॥ निर्ययौ जननीगे-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

हा–त्कुमारः सपरिच्छदः ॥ सतीमुदासीन इव । न पस्पर्श दृशापि तां ॥ ६८ ॥ सिंचंतीव भुवं नेत्रा–श्रुन्निः सततवाहिन्निः ॥ शून्यचित्ता पुनः प्राप–दंजनासुंदरी गृहं ॥ ६९ ॥ प्र-स्थितः सन् कुमारोऽपि । श्रीमानससरस्तटे ॥ सैन्यमावासयामास । सुखमाद्यप्रयाणके ॥ ॥ ७० ॥ रजन्यां तत्र पर्यंते । सरसः क्रंदनाकुलां ॥ निरीक्ष्य कोकीं पप्रच्छ । कुमारो मि-त्र किं न्विदं ॥ ७१ ॥

स प्राह देव दैवस्य । वशात्कोकयुगं दिने ॥ संयुज्यते निशायां तु । नित्यमेव वियुज्य-ते ॥ ७२ ॥ तेनासौ विरहात्पत्युः । क्रंदत्यश्रूणि मुंचति ॥ ब्रातर्जीवन्मृता प्रातः । पत्युः सं-योगमेत्स्यति ॥ ७३ ॥ इतश्च कर्मणि क्षीणे । तस्या भोगांतरायके ॥ सोऽप्यूचे द्वादशाब्दा-नि । मत्यक्ता कथमस्ति सा ॥ ७४ ॥ तत्सखे गंतुमिच्छामि । संगत्य पुनरेष्यते ॥ व्रजेत्युक्ते च तेनापि । तत्क्षणं तद्गृहेऽन्यगात् ॥ ७५ ॥ क्षणं द्वारि स्थितो दृष्ट्वा । ताम्यंतीं तां महा-सतीं ॥ पुनरागतमात्मानं । वदन् द्वारमपावृणोत् ॥ ७६ ॥ भोजे तद्दिवसस्नातां । सांतर्वत्नी बभूव च ॥ स्वांगुलियमभिज्ञानं । दत्वा सैन्यं पुनर्ययौ ॥ ७७ ॥ पतिसंभावनाहृष्टा । वि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स्मृत्य प्राच्यकुदेशां ॥ मेने सफलमात्मान–माशा हि परमं सुखं ॥ ७८ ॥ अथो मासि तृतीयेऽस्या । गर्भ्रः प्रादुरभून्मनाक् ॥ असतीमिति तां चित्ते । श्वसुरः समभावयत् ॥ ७९ ॥ यथायथैधते गर्भ्र–स्तस्या मोदोदयावहः ॥ चंद्रबिंब इवैतस्यां । कलंकोऽपि तथा तथा ॥ ॥ ८० ॥ प्रवर्द्धमानगर्भ्रांश्च । पृष्टा परिजनैस्तदा ॥ तदंगुलीयकं पत्युः । सती श्वश्रूमदर्शयत् ॥ ८१ ॥ साऽप्याह त्वां न दृष्ट्वापि । मत्पुत्रः समभावयत् ॥ पुनरागत्य भेजे त्वां । कथं मन्यामहे वचः ॥ ८२ ॥ इत्थमारोपिताऽलीक–कलंकाधिकृता तया ॥ निष्कासिता च दोषे हि । विरलः पक्षपातकृत् ॥ ८३ ॥ बद्धप्रेम्णा बालसख्या । सममेकाकिनी सती ॥ निराधारा पितुर्गेह–वर्त्मनि दुःखिताऽचलत् ॥ ८४ ॥ गता पितृगृहं ज्ञातो–दंतैः पित्रादिभिः पुनः ॥ निराकृता च दोषे हि । न कोऽपि निजकः खलु ॥ ८५ ॥

विशिष्य स्वजनोपक्षा–ऽपमानत्रपया सती ॥ निरपेक्षा जीवितेऽपि । निस्ससाराऽश्रुवर्षिणी ॥ ८६ ॥ ग्रामादौ क्वाप्यगच्छंती । सा सती निजलज्जया ॥ काननेष्वेव बभ्राम । शुद्धशीलेन रक्षिता ॥ ८७ ॥ कंदमूलफलाहारा । निर्झरोदकपायिनी ॥ एकदासीसहायापि ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सा तस्थावकुतोभया ॥ ८८ ॥ पूर्णगर्भावधिः क्वापि । सुषुवे गहने सती ॥ उद्यदर्कसमं पुत्रं । वज्रं वैदुर्यभूरिव ॥ ८९ ॥ सिंहव्याघ्रगजद्वीपि–चौरनीराऽनलादिभिः ॥ शीलास्त्रेणैव निर्भीका । संचचार वनाद्वनं ॥ ९० ॥ एकदा नीरमन्वेष्टुं । दासीं प्रैषीद्वनांतरे ॥ एकस्मिन्नपि चेतोऽनु–गामुके किमु दुष्करं ॥ ९१ ॥ कृतार्था सा समभ्येत्य । महासत्यै व्यजिज्ञपत् ॥ प्रतिमास्थो गिरेः शृंगे । मयैको मुनिरैक्षत ॥ ९२ ॥ सद्यः पिपासां विस्मृत्य । सती प्रमुदिताशया ॥ सार्भका गिरिमारुह्य । भक्त्या मुनिमवंदत ॥ ९३ ॥ पारयित्वा मुनिः कायो–त्सर्गं धर्माशिषाऽधिनोत् ॥ प्रतिलेखितभूभागु–पविश्योपदिदेश च ॥ ९४ ॥ महानुभावे संसारे । बहुदुःखौघसंकुले ॥ न शरण्यं विना धर्म–माशाधीनस्य देहिनः ॥ ९५ ॥

संयोगा विप्रयोगाश्च । कर्मायत्तप्रवृत्तयः ॥ व्यर्थं मोहवशः प्राणी । परं दूषयते रुषा ॥ ॥ ९६ ॥ भोग्यं कर्म च केनापि । न शक्यं कर्त्तुमन्यथा ॥ स्वार्जितं वेदयित्वैव । जीवो वांछितमश्नुते ॥ ९७ ॥ अन्यच्च अकृताऽखंड–धर्मणां पूर्वजन्मनि ॥ सापदः परिपच्यंते । गरीयस्योऽपि संपदः ॥ ९८ ॥ धर्मश्च द्विविधः श्राद्ध–यतिभेदेन संमतः ॥ स्वर्गापवर्गसंसर्ग–का-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रणं दुःखवारणः ॥ ९९ ॥ श्रुत्वेति जातवैराग्या । सती श्रीधर्ममार्हतं ॥ जग्राहाऽन्निग्रहैः सार्द्धं । सम्यक्त्वप्राप्तिन्नाविन्निः ॥ १०० ॥ नपदेशादथ ज्ञात्वा । मुनिं ज्ञानातिशायिनं ॥ पप्रच्छ न्नगवन् दुःखं । जातं मे केन कर्मणा ॥ १ ॥ मुनिराह पुरा न्नद्रे । त्वमासीरिन्यवल्लन्ना ॥ सपत्नी च त्वदीयाऽनू–ज्जिनधर्मेण न्नाविता ॥ २ ॥ गृहीतान्निग्रहा सा तु । प्रतिमां श्रीजिनेशितुः ॥ पुष्पधूपोपहारार्घै–रर्चयामास नित्यशः ॥ ३ ॥ त्वं च मिथ्यान्निनिवेशा–दसहिष्णुरसूयया ॥ प्रतिमां तामवकरे–ऽन्यदा न्यस्तवती रुषा ॥ ४ ॥

श्राविकायाः सपत्न्यास्तु । जिनबिंबार्चनं विना ॥ अनश्नंत्यास्त्वया दत्ता । प्रतिमा द्वादशक्रणैः ॥ ५ ॥ तत्कर्मणो विपाकोऽयं । जातस्ते द्वादशाब्दिकः ॥ परिणामविशेषस्तु । किंचिदेवाऽवशिष्यते ॥ ६ ॥ पुनः पतिव्रता प्राह । न्नक्त्या विरचितांजलिः ॥ स्वामिन् मदनुगा दासी । कर्मणा केन पीड्यते ॥ ७ ॥ प्रतिमां गोपयंत्यास्ते । धर्मशीले तदाऽनया ॥ दृश्यतेऽत्र प्रदेशेऽसा–वित्यूचे च मुहुर्मुहुः ॥ ८ ॥ तस्यास्तु वाचा प्रतिमा । विशिष्य स्थगिता त्वया ॥ एषापि कर्मणा तेन । वराकी क्लेशमन्वन्नूत् ॥ ९ ॥ श्रुत्वेति विस्मयस्मेरा । सां-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

जनासुंदरी सती ॥ सर्वत्र कर्मप्रामाण्यं । मेने स्वसुखदुःखयोः ॥ १० ॥ पुनः पप्रच्छ भग-
वन् । शुभकर्मोदयो मम ॥ कदा भविष्यते संगो । भविताऽत्र भवे न वा ॥ ११ ॥ मुनि-
नोचे महासत्त्वे । कर्म जीर्णमिवास्ति ते ॥ अत्रैव खलु तिष्ठंत्या । मिलिष्यति च मातुलः
॥ १२ ॥ स्वपितुर्गेहवत्तस्य । स्थितायाः सदने तव ॥ मिलनोपक्रमः पत्युः । स्वयमेव भवि-
ष्यति ॥ १३ ॥ इत्याश्वासनया साधु–पर्युपास्तिपरायणा ॥ तस्थौ महासती सत्त्व–मालंब्य
शिखरे गिरेः ॥ १४ ॥ इतस्तन्मातुलः सूर्य–केतुनामा नभश्चरः ॥ कृत्वा नंदीश्वरे यात्रां । प्र-
तस्थे स्वगृहंप्रति ॥ १५ ॥ चारणश्रमणस्याथ । प्रभावेण पटीयसा ॥ विमानं स्तंभितं त-
स्य । तीर्थं लंघ्यं न हि क्वचित् ॥ १६ ॥ खेचरोऽपि गिरेः शृंग–मवतीर्य मुनिं मुदा ॥ व-
वंदे धन्यमात्मानं । मन्वानः पुण्यलाभतः ॥ १७ ॥ साधर्मिकवंदनायां । स्वररूपानुसारतः
॥ भागिनेयीमुपालक्ष्य । मुमुदे खेचराधिपः ॥ १८ ॥

तद्वृत्तांतमथाकर्ण्य । दयापरिणताशयः ॥ अंजनासुंदरीं साऽ–मादाय प्राचलत्तदा ॥१९॥
भागिनेयीसुतं बालं । लालयन्मन्मनोक्तिभिः ॥ ययौ विमानमारुह्य । सूर्यकेतुर्नभःपथः ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ २० ॥ रणत्किंकिणिकाजाल–कलनादप्रहर्षुलः ॥ दत्तकर्णः शिशुस्तस्थौ । ध्यानस्थ इव योगवित् ॥ २१ ॥ एकदा बाल्यचापल्य–लीलया मातुलांकतः ॥ विमानकिंकिणीं कर्षन् । पाणिना पतितो भुवि ॥ २२ ॥ हा दैव तादृशं दुःखं । दत्वा न खलु तृप्तवान् ॥ यत्पुत्रवदनप्रेक्षा–सुखं न क्षमसे मम ॥ २३ ॥ हा हतास्मि हतं व्योम–यानं सह सुखाशया ॥ नूनं मे चूर्णितो बालः । शिलया दृषदाऽथवा ॥ २४ ॥ नागिनेय्यामिति प्रौच्चैः । क्रंदंत्यां खेचराधिपः द्रुतं विमानादुत्प्लुत्य । तं प्रदेशमवातरत् ॥ २५ ॥ ददर्श च तदीयेन । वज्रसारेण वर्ष्मणा ॥ संचूरितशिलाचूर्ण–मध्यस्थायिनमर्भकं ॥ २६ ॥ शिरसाघ्राय सस्नेहं । थूत्कृत्य परितो भुवं ॥ कराभ्यामाददे बालं । माणिक्यमिव पंकतः ॥ २७ ॥ करपंकेरुहाभ्यां तं । मरालमिव लालयन् ॥ अर्पयामास जामेय्या । नपायनमिवार्भकं ॥२८॥ अक्षताऽवयवं सूनु–मालोक्य मुदिताशया !! सती प्राप्तनिधानेव । तं पस्पर्श मुहुर्मुहुः ॥ २९ ॥

शिशुनाऽप्यमुना चित्रं । शिला संचूर्णिता यतः ॥ तं शिलाचूर इत्याह । तदाप्रभृति मातुलः ॥ ३० ॥ सोत्सवं खेचरो निन्ये । नागिनेयीं निजं गृहं ॥ स्वजने चिरदृष्टे हि । प्रा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यो हृष्टाः कुटुंबिनः ॥ ३१ ॥ अत्रसा तत्र सा दीना–ऽनाथेभ्यो दानतत्परा ॥ दिनानि गमयामास । सुखं सद्धर्मकर्मभिः ॥ ३२ ॥ कुमारः सुकुमारात्मा । मातामहगृहे वसन् ॥ करात्करं संचचार । तारकास्विव चंद्रमाः ॥ ३३ ॥ तयोरेव कथा तत्र । पुरे जनपदेऽपि च ॥ गंधो मृगमदस्येव । प्रससार समंततः ॥ ३४ ॥

इतश्च वरुणं जित्वा । कुमारः पवनंजयः ॥ जितकाशी निजागारं । समहोत्सवमागमत् ॥ ३५ ॥ प्रणिपत्य पितुः पादौ । मातुरादाय चाशिषं ॥ सुवासिन्याशिषो गृह्णन् । वाचा संज्ञावयन् जनं ॥ ३६ ॥ उत्सवेषूत्सवप्रायो । जायामुखदिदृक्षया ॥ स्ववासभवनं प्राप । वशास्थानमिव द्विषः ॥३७॥ देवालयं देवशून्य–मिव जायाविवर्जितं ॥ कुमारो गृहमालोक्य बभूव विरहाकुलः ॥३८॥ ज्वालामिव चित्रशाला–मलातमिव मंदिरं ॥ राज्यं पलालवत्प्राणान् । स मन्वानस्तृणानिव ॥ ३९ ॥ हा कांते क्व गता शांते । निशांते संगता तदा ॥ न न्यवेद्यत केनापि । मातुर्वत्सलतानिधेः ॥४०॥ धात्र्या ममाऽथवा गेहा–न्निर्गच्छंती न रक्षिता ॥ सुविचारैरपि मंत्रि–प्रमुखैर्न निवारिता ॥ ४१ ॥ जातौ तदापदि क्षुद्रौ । त्वन्मातापितरावपि ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

हा मदागमनं याव–त्र तान्यामप्यमन्यत ॥ ४२ ॥ नूनं मृता श्वापदैर्वा । न्नक्षिता सा न्न-
विष्यति ॥ क्व रत्नं तादृशं नष्ट–मन्नाग्यैः पुनराप्यते ॥ ४३ ॥ हा न्नडे रूपनिस्तंडे । सर्वां-
गीणगुणोदधे ॥ न न्नवाम्यनृणो जीवन् । स्नेहतस्तव सुंदरि ॥ ४४ ॥ विलपन्निति शोकार्त्तः
। कुमारः पवनंजयः ॥ चितामारचयामास । सद्यश्चांदनदारुन्निः ॥ ४५ ॥ कुलकं ॥ विविधै-
र्वचनैर्माता–पितृन्यां बोधितोऽपि हि ॥ वियोगज्वरवेगार्त्तो । नाऽमुंचन्मरणाग्रहं ॥ ४६ ॥

इतश्च रुषन्नदत्तो । मित्रमालिंग्य साग्रहं ॥ कालक्षेपचिकीस्तस्मा–द्दिनत्रयमयाचत ॥
॥ ४७ ॥ नूनं शीलप्रन्नावेण । जीवंती सा न्नविष्यति ॥ तत्प्रतीक्षस्व येनाहं । तत्प्रवृत्तिमु-
पानये ॥ ४८ ॥ इति प्रतिज्ञामाधाय । विमानमधिरुह्य च ॥ चचालर्षन्नदत्तो शाकू । व्योम-
मार्गेण तार्क्ष्यवत् ॥ ४९ ॥ पत्तनोपवनग्राम–नगरादिषु बंन्नमन् ॥ स्त्रीबालकादिगोष्टीषु ।
कथाः शृण्वन्ननेकशः ॥ ५० ॥ तृतीयदिवसे सूर्य–पुरस्योपवने गतः ॥ स्त्रीगोष्ट्यामिति शु-
श्राव । सुन्नगत्वमहो शिशोः ॥ ५१ ॥ शकुनानामानुकूल्य–प्रमाणेन वितर्कये ॥ अंजना-
सुंदरी बालं। सुषुवे तत्कथा इमाः ॥ ५२ ॥ चिंतयन्निन्नमृषन्न–दत्तस्तन्निकटस्थितः ॥ शुश्राव

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तत्कथाः सर्वा । आमातुलगृहागमं ॥ ५३ ॥ मुदितः श्रीसूर्यकेतु–न्नूनर्तुः पर्षदं गतः ॥ तत्रासीनामंजनां च । ददर्शोत्संगितार्भकां ॥ ५४ ॥ दृष्टमात्रमुपालक्ष्य । सा नर्तुर्मित्रमागतं ॥ सलज्जाऽऽसनमुत्सृज्य । समुत्तस्थौ ससंभ्रमा ॥ ५५ ॥ ज्ञापयित्वा च वृत्तांतं । मातुलाय महासती ॥ तस्मै विस्मेरचित्ताय । सा स्वागतमचीकरत् ॥ ५६ ॥

तदाहृतमनादृत्य । स्नानपानाऽशनादिकं ॥ अवादीद्दृष्टनष्टदत्तः । प्रमोदान्नोगमेदुरः ।५७। अंजनासुंदरीसत्याः । सपुत्राया विलोकनात् ॥ श्रमो मे सर्वथाऽतीतः । कः क्लेशः सफलात्मनः ॥ ५८ ॥ विजित्य किंतु वरुणं । कुमारः पवनंजयः ॥ सोत्सवं गृहमायातः । समं स्नेहमनोरथैः ॥ ५९ ॥ सनाथमेतया गेह–मनालोक्य समाकुलः ॥ चितां प्रवेष्टुकामोऽपि । मयाऽधारि दिनत्रयं ॥ ६० ॥ तद् द्रुतं प्रेष्यतामेषा । क्षेममस्तून्नयोर्गृहे ॥ चिरं तवोपकारोऽयं । शतशाखाः प्रवर्द्धतां ॥ ६१ ॥ समयज्ञस्तदा सोऽपि । जामातुः सुहृदा समं ॥ जामेयीं प्रेषयामास । सपुत्रां श्वसुरालये ॥ ६२ ॥ विमाने तामथारोप्य । प्रमोदावेगसत्वरः ॥ प्रह्लादनपुरोद्याने–ऽवस्थाप्य पुरतो ययौ ॥ ६३ ॥ अंजनायाः सपुत्रायाः । समागमनकौतुकैः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वर्द्धयामास भुर्मीड्डं । सपुत्रं समनोरथैः ॥ ६४ ॥ सर्वे प्रमुदिता हर्षो–त्कर्षिसंभ्रममानसाः ॥ वाणीमृषन्नदत्तस्य । मेनिरे जीवनौषधं ॥ ६५ ॥ नवोदितं चंद्रमिव । पवनंजयसंभवं ॥ प्रत्युज्जग्मुस्तदा दृष्टुं । नागराः सागरा इव ॥ ६६ ॥ वाद्यमानेषु तूर्येषु । गीयमानेरुमंगलं ॥ चलच्चेलांचलं लोल–वेल्लद्वंदनमालिकं ॥ ६७ ॥ श्रीप्रह्लादनभूमींड्रो । विद्वर्देन महीयसा ॥ वधूं प्रवेशयामास । सपुत्रां निजपत्तनं ॥ ६८ ॥ युग्मं ॥ विशिष्य प्रीतितः श्वश्रू–रपि पर्याप्तचेतसा ॥ परीक्षितगुणोत्कर्षां । तां वधूं बह्वमन्यत ॥ ६९ ॥ प्रतिव्रतांजना श्लाघ्य–नंदना कस्य नो मुदे ॥ सुप्रगा कल्पवल्लीव । संजाता फलशालिनी ॥ ७० ॥ अंजनासुंदरी शुद्ध–वैराग्यैकतरंगिणी ॥ आचचाराईतं धर्मं । स्मरंती पूर्वजन्मनः ॥ ७१ ॥ पवनंजयसूनोश्च । शिलाचूरस्य संमदात् ॥ हनूमानिति नामास्य । चक्रे संबंधिसज्जनैः ॥ ७२ ॥ प्रह्लादनृपः पुण्य–सामग्रीं प्राप्य निर्मलां ॥ सौवराज्ये सुतं न्यस्य । स्वयं दीक्षामुपाददे ॥७३॥ पवनंजयभूपालः । पृथिवीमेकलीलया ॥ पालयन् परमां प्राप । प्रौढिं प्रौढपराक्रमः ॥ ७४ ॥ जानकीव दाशरथेः । शचीव त्रिदशेशितुः ॥ अंजनासुंदरी तस्य । पट्टराज्ञीपदेऽन्वत् ॥७५॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

त्रिवर्गसारं साम्राज्य–सुखमक्षीणपुण्यतः ॥ अंजनासुंदरी सम्य–गन्वभूदद्भुतस्थितिः ॥ ७६ ॥ हनुमानपि तारुण्य–पुण्यांगोपांगचारिमः ॥ औदार्यशौर्यगांभीर्य–गुणैः सममवर्द्धत ॥ ७७ ॥ विंशस्य तीर्थाधिपते–र्मुनिसुव्रतसंज्ञिनः ॥ तीर्थे केचिदथाचार्या । विजह्रुस्तत्र पत्तने ॥ ७८ ॥ श्रुत्वा तद्देशनां जाग–रूकसंवेगदीपिका ॥ पतिमन्यर्थयामास । दीक्षाहेतोः पतिव्रता ॥ ७९ ॥ सुबहूक्तापि सा याव–त्कथंचिन्नावतिष्ठते ॥ पवनंजयभूपालः । प्रेमस्थेमपरस्तदा ॥ ८० ॥ अभंगरणवीरस्य । राज्यं दत्वा हनूमतः ॥ स्वयं संयमसाम्राज्यं । स्वीचकार प्रियासखः ॥ ८१ ॥ अंजनोपपदसुंदरी सती–चित्रकृच्चरितचारुचंदनं ॥ संनिधाय हृदि संतु भाविनः । शीलवाससुरभीकृताशयाः ॥ ८२ ॥

॥ इति श्रीरुद्रपल्लीयगच्छशृंगारहारश्रीसंघतिलकसूरिपट्टावतंसश्रीसोमतिलकसूरिविरचितायां श्रीशीलतरंगिण्यां अंजनासुंदरीमहासतीकथानकं संपूर्णं ॥ श्रीरस्तु ॥

अथ श्रीनर्मदापतिव्रतोदाहरणमुदाहीयते ॥ तथाहि—

अस्तीह वर्द्धमानश्री–वर्द्धमानाभिधं पुरं ॥ यच्चैत्यकेतुभिर्लक्ष्म्या । तर्ज्यते सुरपूरिव ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ १ ॥ तत्र श्रीसंप्रतिर्नृपो । रूपकंदर्पदर्पहृत् ॥ यद्द्विषामपकीर्त्यैव । जज्ञे श्यामलितं नभः ॥ २ ॥ अन्नूदषन्नसेनाह्वः । सार्थेशस्तस्य पत्तने ॥ भार्या वीरमती तस्य । धर्मस्यैव पराकृतिः ॥ ३ ॥ सहदेववीरदासौ । सनयावनयोः सुतौ ॥ कन्या च ऋषिदत्ताख्या । लावण्यैकमहोदधिः ॥ ४ ॥ नैकेषां याचमानाना–मपि मिथ्यादृशामसौ ॥ न ददौ तनयां को वा–मयस्योपनयेन्मधु ॥ ५ ॥ महर्द्धिकोऽन्यदा रुद्र–दत्तनामा वणिक्सुतः ॥ रूपचंडपुरात्तत्र । । वाणिज्यार्थमुपागमत् ॥ ६ ॥ स्थितः कुबेरदत्तस्य । सुहृदो मंदिरे सकः ॥ कुर्वाणो व्यवसायं च । स्वैरमास्ते स्वगेहवत् ॥ ७ ॥ मत्तवारणमासीन । एष वीथीमुपस्थितां ॥ सख्यान्वितामथैक्षिष्ट । ऋषिदत्तां सुरीमिव ॥ ८ ॥ पयोधरोन्नतिमतीं । राजहंसगतिप्रथां ॥ एनामेव चिरं पश्यं–स्तस्थौ द्यामिव चातकः ॥ ९ ॥ कुबेरदत्तान्मत्वाऽस्याः । स्वरूपमखिलं ततः ॥ मिथ्यादृगपि तल्लोभा–ज्जिनधर्ममशिक्षत ॥ १० ॥ मायिनापि विवेकेना–ऽमुष्य श्रेष्ठी हताशयः ॥ कन्यामदत्त दंभो हि । धूर्त्तानां कल्पपादपः ॥ ११ ॥ सविस्तरमुपायंस्त । ऋषिदत्तां शुभेऽहनि ॥ मेने स्वं कृतकृत्यं च । कुल्येव क्षेत्रसिंचनात् ॥ १२ ॥ अतीतैः कति-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

न्निर्मासै—रापृच्छय श्वसुरं ततः ॥ स्मरो रत्येव संयुक्तः । कांतया स्वपुरं गतः ॥ १३ ॥

तत्राभिनंदितः पित्रा । सहैव ऋषिदत्तया ॥ रुद्दत्तोऽत्यजज्जैन—धर्मं रत्नमिवार्नकः ॥ ॥ १४ ॥ ऋषिदत्तापि मिथ्यात्वं । तस्य संसर्गतोऽन्नजत् ॥ शबेन मिलितो वायु—र्दौर्गंध्यं किं मु नाश्नुते ॥ १५ ॥ मत्वेति शुद्धजैनाऱ्यां । तत्पितृऱ्यामसौ ततः ॥ पुत्रजन्मविवाहादौ । दूरापास्ता व्यधीयत ॥ १६ ॥ सा महेश्वरदत्ताख्यं । क्रमेण सुषुवे सुतं ॥ समये यौवनं प्राप । सोऽपि सर्वकलायुतः ॥ १७ ॥ इतश्च सहदेवस्य । ऋषिदत्ताग्रजन्मनः ॥ दयिता सुंदरी गर्भं । दध्रे सुस्वप्नसूचितं ॥ १८ ॥ तस्याश्च नर्मदानद्यां । संजाते स्नानदोहदे ॥ सहदेवः स्वसार्थे चा—नैषीत्तत्रैव तामतः ॥ १९ ॥ शुभेऽह्नि जायया सार्द्ध—मर्चयित्या यथाविधि ॥ प्रविश्य नर्मदामध्यं । जलकेलिमसूत्रयत् ॥ २० ॥ तत्रैव सहदेवोऽपि । व्यवसायसुखे स्थितः ॥ नगरं स्थापयामास । नर्मदापुरसंज्ञकं ॥ २१ ॥ जिनमंदिरमातेने । तत्र तुंगं सुमेरुवत् ॥ सम्यक्त्वपिंडपोषाय । पुण्यपिंडमिवात्मनः ॥ २२ ॥

स्वस्वस्थानानि संत्यज्य । ज्ञातयोऽपि व्यवहारिणः ॥ तत्रागत्य स्थितिं चक्रुः । सरोजे भ्र-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मरा इव ॥ २३ ॥ वैडूर्यन्नूमिर्वैमूर्य–शलाकामिव सुंदरी ॥ असूत समये साधु–लक्षणां तनयामथ ॥ २४ ॥ पुत्रजन्मवदेतस्याः । कृत्वा जन्मोत्सवो पिता ॥ नर्मदासुंदरी तस्या । नामधेयमथान्यधात् ॥ २५ ॥ पूर्वान्यस्ता इवैषापि । प्रपद्य सकलाः कलाः ॥ चंद्रोदयमिव प्रौढं । पूर्णिमा प्राप यौवनं ॥ २६ ॥ नर्मदासुंदरीरूप–मथाकर्ण्यातिशायि सा ॥ ऋषिदत्ता स्वपुत्राय । चिंतयामास याचितुं ॥ २७ ॥ धिग्धिग् मां स्वजनैर्दूरी–कृतां शटितपत्रवत् ॥ जैनं धर्मं त्यजंत्या वा । बहु सोढव्यमस्ति मे ॥ २८ ॥ संन्नावयंत्यपि च ये । न मां पर्वतिथिष्वपि ॥ कथं ते मम पुत्राय । दास्यंति तनयां निजां ॥ २९ ॥ रुदंतीति तदा पृष्टा । रुदत्तेन साऽवदत् ॥ स्वरूपमखिलं तच्च । पुत्रः श्रुत्वेत्यभाषत ॥ ३० ॥ प्रेष्यतां तत्र तातेह–मावर्ज्य स्वजनान् यथा ॥ उद्वाह्य मातुलसुतां । मातुर्मुदमुपानये ॥ ३१ ॥ तन्महेश्वरदत्तोऽपि । प्रस्थितः पितुराज्ञया ॥ प्रापदल्पदिनैरेव । नर्मदापुरपत्तनं ॥ ३२ ॥ मातामहादयोऽप्येनं । स्वजना जनलज्जया ॥ सच्चक्रुरुचिताचारो । वर्जितो न जिनैरपि ॥ ३३ ॥ सोऽपि तान् धैर्यगांभीर्यौ–दार्यवर्यैर्निजैर्गुणैः ॥ तोषयामासिवांश्चारु–गीतैर्व्याधो मृगानिव ॥ ३४ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मातामहस्तमन्येद्यु–राख्यदुत्संगसंगिनं ॥ वत्साऽस्मच्चित्तमावर्जि । जांगुल्याऽहिरिव त्वया ॥ ३५ ॥ तत्ते मनोषितं दत्वा । किं वयं सुखमास्महे ॥ इत्युक्तः सोऽप्ययाचिष्ट । नर्मदासुंदरीकनीं ॥ ३६ ॥ मातामहोऽप्यज्ञाषिष्ट । वत्स युक्तमुदाहृतं ॥ कुलं कुदृष्टिसीमा ते । तेन मे शंकते मनः ॥ ३७ ॥ आर्षदत्तोऽन्यधादास्तां । कुलं किं तस्य चर्चया ॥ किमुत्पत्तिं परीक्ष्यं तत् । कुर्वाणा मूर्ध्नि पंकजं ॥ ३८ ॥ अहं तु जिनधर्म्येव । ज्ञेयः सर्वपरीक्षणैः ॥ इति प्रत्याययामास । शपथैरपि तादृशैः ॥ ३९ ॥

अथ प्रीत्या हृदाश्लिष्य । सहदेवं सगौरवं ॥ ददौ मातामहस्तस्मै । नर्मदासुंदरीं मुदा ॥ ॥ ४० ॥ सोऽप्यथैनां करे कृत्वा । चित्रवल्लीमिवांगिनीं ॥ गतो मनोरथग्रंथि–घंटापथपथीनतां ॥ ४१ ॥ नर्मदासुंदरी तस्य । मनो मत्तमिव द्विपं ॥ धर्मोपदेशसृणिभि–श्चक्रे सन्मार्गगामुकं ॥ ४२ ॥ कियत्यपि गते काले । श्वसुरादेरनुज्ञया ॥ ज्ञार्यायुक्तो गतो गेहं । विंध्याचलमिव द्विपः ॥ ४३ ॥ नर्मदासुंदरीमंके । निवेश्य पदयोर्नतां ॥ ऋषिदत्ता मुदं ज्ञेजे । वर्षास्विव वनस्थली ॥ ४४ ॥ नर्मदासुंदरी स्वर्ग–गंगेव सुकृतांज्ञसा ॥ चक्रे विधूतमिथ्यात्व–

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

जंबालं श्वसुरालयं ॥ ४५ ॥ नर्मदासुंदरी पत्यु–र्धर्मोत्सवतरंगिणी ॥ सर्वस्वजनसन्मान–सु-
खं समयमत्यगात् ॥ ४६ ॥ गवाक्षमन्यदाऽऽ–रूढा । पश्यंती दर्पणे मुखं ॥ आस्वादयंती
तांबूल–मास्ते विभ्रमलीलया ॥ ४७ ॥ तदानीं संचचारैक–स्तत्राधः साधुरध्वनि ॥ तत्यक्त-
मथ तांबूलं । पपात मुनिमूर्द्धनि ॥ ४८ ॥ दृष्ट्वाह ज्ञानवानेष । सकोप इव तां मुनिः ॥ इत्त-
माशातयेद्यस्मा–त्साहि पत्या वियुज्यते ॥ ४९ ॥ वातायनादथोत्तीर्य । सहसा खिन्नमानसा
॥ नर्मदासुंदरी साधोः । पपात चरणद्वये ॥ ५० ॥ व्यजिज्ञपच्च दग्धाहं । निर्भाग्यास्मि दु-
रात्मिका ॥ श्रीजिनोपासिकाऽपीत्त–मकार्षमविनीततां ॥ ५१ ॥

तद्धिश्ववत्सलाः पुण्य–कारुण्यरससिंधवः ॥ महात्मानो भवंतीति । क्षम्यतां तन्ममा-
पदः ॥ ७२ ॥ शत्रुभ्योऽपि न कुप्यंति । न मुह्यंति स्वकेष्वपि ॥ न शपंति स्वनाशेऽपि । मु-
नयः समदृष्टयः ॥५३॥ तस्माददुष्टभावायां । मयि शापो निवर्त्यतां । सौरभ्यमुज्झेद्यस्मा–
च्छिद्यमानेऽपि चंदने ॥ ५४ ॥ मुनिराह शृणु श्राद्धे । वत्से मा खिद्यतां वृथा ॥ न क्वापि मु-
नयो जैनाः । कुर्वते शापनिग्रहौ ॥ ५५ ॥ स्वरूपमात्रमेवेदं । मयाऽकस्मादुदीरितं ॥ किं को-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ऽपि कष्टमाधत्ते। निंद्यः कटुरितीरिते ॥५६॥ वियोगः प्रेयसा सार्द्धं। भावी ते कर्मदोषतः॥ स्वार्जितं कर्म भुंजानः। को विज्ञो दुर्मनायते ॥ ५७ ॥ प्रबोध्येति गतः साधुः। स्वमार्गे प्रणतोऽनया ॥ रुदती स्थापिताऽश्वास्य। पत्या गृहमिमाय च ॥ ५८ ॥ निराबाधं वितन्वाना। जिनधर्ममनारतं ॥ सुखं निर्गमयामास। कालं किंचिन्महासती ॥ ५९ ॥ अन्येद्युरार्षदत्तोऽपि । व्यवसायचिकीर्षया ॥ प्रतस्थे यवनद्वीपं । तद्देशोचितभांडयुक् ॥ ६० ॥ पत्या सा स्थाप्यमानापि। गृहे गाढं कदाग्रहात् ॥ चचाल सह पलाश–पत्रश्रेणीव वात्यया ॥ ६१ ॥ यावत्पोतमथारुह्य। याति मध्यं पयोनिधेः ॥ गीतं केनापि दूरेण। गीयमानं तदाऽशृणोत् ॥ ६२ ॥ नर्मदासुंदरी ताव–त्स्वरलक्षणदक्षिणा ॥ निशीथे तं निशम्याह। पतिमावर्जतः सतः ॥ ६३ ॥ स्वामिन् योऽस्त्येष गीतानि। गायन्मधुरया गिरा। श्यामांगः स्थूलपाण्यंहि–केशो ज्ञेयः स सत्त्ववान् ॥ ६४ ॥ गुह्येऽस्य मशकः श्रोणौ। दक्षिणे लांछनं तथा॥ द्वात्रिंशद्वर्षदर्शीयः। पृथुवक्षाः स विद्यते ॥ ६५ ॥

आर्षदत्तोऽप्यथ दध्यौ। नूनमेषा मदंगना ॥ स्निग्धास्ति सार्द्धमेतेन। कौशिकेनेव मे-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

निका ॥ ६६ ॥ अन्यथा कथमेतस्य । वेत्स्यसौ देहलक्षणं ॥ पीयूषवर्षुकं रूपं । शशांकस्येव पद्मिनी ॥ ६७ ॥ आज्ञाशिषमियत्काल–महमेनां महासतीं ॥ सांप्रतं तु कुलद्वैत–कालके-तुमवैम्यहो ॥ ६८ ॥ को वा प्रत्येति योषासु । शाकिनीष्विव बुद्धिमान् ॥ पुत्रादिकमपि स्वा-र्थे । तृणवल्लणयंति याः ॥ ६९ ॥ निष्टयूतमिव पाथोधौ । पातयाम्यधुनैव किं ॥ इमां वा ख-ड्गदंडेना–ऽङ्घिनघ्नि कदलीमिव ॥ ७० ॥ यावदिन्नमदुष्टायां । तस्यां किंचिद्विचेष्टते ॥ ताव-न्निर्यामकः क्रूर–स्थितः प्रोच्चैरवोचत ॥ ७१ ॥ पोतं स्थापयत क्षिप्रं । वस्त्रं पातयत त्वधः ॥ नावर्गला आददीध्वं । रक्षोद्वीपोऽयमाययौ ॥ ७२ ॥ जलेंधनादिसामग्रीं । संगृह्णीध्वं जवा-दितः ॥ श्रुत्वेति तत्तथा सर्वं । विदधुः पोतवाहकाः ॥ ७३ ॥ द्वीपे तत्रार्षदत्तोऽपि । मायया गूढमत्सरः ॥ नर्मदासुंदरीं रंतु–मनयत्कानने क्वचित् ॥ ७४ ॥ धूर्त्तेन सह सा मुग्धा । ग्रा-मं ग्रामं वनाद्वनं ॥ सरस्तीरेऽस्वपत्क्वापि । वानीरगहने श्रमात् ॥ ७५ ॥ पूर्वोपार्जितदुः-कर्म–दूत्येव समुपेतया ॥ मुद्रिते लोचने तस्या–स्तदानीं निद्रया रयात् ॥ ७६ ॥ खड्गादि-निहता स्वीय–मपराधं न ज्ञोत्स्यते ॥ स्मारं स्मारं स्वापराध–मित्थं तु म्रियतामिति ॥७७॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मुक्त्वा तां भुजगभ्रांत्या । पुष्पमालामिवांधलः ॥ चंचया शालिकेदारा–क्रांतः शुक इवाऽनशत् ॥ ७८ ॥ स पलाय्यागतः पोतं । पृष्टः सांयात्रिकैर्जगौ ॥ न्नक्षिता दयिता हंत । रक्षसा कानने मम ॥ ७९ ॥ प्रणष्टोऽहं तु हंतुं त–मायांतं वीक्ष्य सत्वरं ॥ तस्मात्पोतोऽतिवेगेन । न्नवज्रिरपि पूर्यतां ॥ ८० ॥ न्नीतास्तेऽपि तथा चक्रुः । कस्य चात्मा न वल्लभः ॥ सोऽपि पोतमथाऽारोह–दन्निन्नन्निव मायया ॥ ८१ ॥ दध्यौ च विदधे साधु । मयाद्य धिषणावता ॥ त्यजे स्वैरिणी लोका–ऽपवादोऽपि च रक्षितः ॥ ८२ ॥ न वेत्ति किंतु मूढात्मा । यद्दृढं विधिना हतः ॥ सार्थिकास्तं वियोगार्त्त–मिव पत्न्या व्यबोधयन् ॥ ८३ ॥ क्रमेण यवनद्वीपं । प्राप्तो लाऽन्नयुतस्ततः ॥ प्राप्तः स्वनगरं पित्रो–स्तथैवाख्यत् प्रियां हतां ॥ ८४ ॥ स्नुषायाः प्रेतकार्याणि । कृत्वा तावपि दुःखितौ ॥ सुतेनान्यां पर्यणायि–षातां कन्यामिमौ ततः ॥ ८५ ॥ इतश्च नर्मदा शर्म–दात्रीं पंचनमस्कृतिं ॥ स्मरंती यावदुत्तस्थौ । तावन्नो वीक्षते पतिं ॥ ८६ ॥ नर्मदा नर्म मन्वाना । पत्युः सस्मितमाख्यत ॥ एह्येहि नाथ नेदृक्षं । हास्यं सोढुमहं क्षमा ॥ ८७ ॥ शंकिता चेतसैवाथ । स्वयमुन्नाय सत्वरं ॥ गतं रत्नमिवैक्षिष्ट । तीरे तीरे त-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रौ तरौ ॥ ८८ ॥ अदृष्ट्वा क्वापि बाष्पोष्म–शुष्ककंठा रुरोद सा ॥ स्थितैः कारुण्यतः पार्श्वे । वीक्ष्यमाणा मृगव्रजैः ॥ ८९ ॥

आकर्ण्य दूरतश्चासौ । स्वप्रलापप्रतिध्वनिं ॥ अन्वधावत शोकार्त्ता । मृगीव मृगतृष्णिकां ॥ ९० ॥ न तद्वनं न ते वृक्षा । न तद्गुल्मं न सा गुहा ॥ यत्र सा न हि बभ्राम । सतारं न रुरोद वा ॥ ९१ ॥ तल्लोकादिव तिग्मांशौ । द्वीपांतरमुपेयुषि ॥ सुखीकर्त्तुमिव सतीं । विधिः प्रैषीत्सुधाकरं ॥ ९२ ॥ पतिदुःखेन तेनाऽप्य–ग्निकुंडेनेव तापिता ॥ निशाचरादिवैतस्मा–न्नीताऽविशल्लतागृहं ॥ ९३ ॥ संवत्सरशतमयी–मिय रात्रिमतीत्य सा ॥ रुरोद रोदसीपूरं । पत्युः स्मृत्वा गुणान् प्रगे ॥ ९४ ॥ हा नाथ दीनामेकांत–प्रेमस्थेमसुधामयीं ॥ सुप्तां क्व नु गतो मुक्त्वा । चंडः कुमुदिनीमिव ॥ ९५ ॥ इत्थं रुदंती पथिकान् । रोदयंती च सा सती ॥ पत्युर्वार्त्तां मार्गयंती । पंचाह्नीमत्यवाहयत् ॥ ९६ ॥ विलंबितमनूद्यत्र । यानं तीरे पयोनिधेः ॥ षष्टे दिने गता तत्र । स्थानं शून्यमवैक्षत ॥ ९७ ॥ ततो निराशा संपन्न–विवेका तन्मुनेर्वचः ॥ अनुल्लंघ्यमनुस्मृत्य । शोकं स्तोकं चकार सा ॥ ९८ ॥ पूर्वार्जितं निजं कर्म ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

भुज्यतां मा विषीद रे ॥ आत्मानमात्मनैवेत्थं । प्रतिबोध्य महासती ॥ ९९ ॥ स्नात्वा सरो-वरे देवान् । वंदित्वा च वनांतरे ॥ फलाहारं विदधाना । तापसीव बभूव सा ॥ १०० ॥ नि-र्माय मृन्मयं क्वापि । गह्वरे बिंबमार्हतं ॥ नैश्चल्याय दृशोरग्रे । स्थापयामास सा सती ॥ ॥ १ ॥ अभ्यर्च्य फलपुष्पाद्यै–र्नीवारैश्च जिनं सती ॥ दीपानदीपयत्तैलै–रिंगुद्यास्तत्पुरः सु-धीः ॥ २ ॥ तदग्रे प्रातरुत्थाय । स्वाध्यायस्तवनादिभिः ॥ एकाग्रचित्ता तत्रापि । कृतार्थानकरो-दिनान् ॥ ३ ॥ अन्यदा व्रतमादातुं । सद्गतेः साधनेतया ॥ श्येष भरते गंतुं । राजहंसवीव मानसं ॥ ४ ॥

इतश्च वीरदासाख्यः । पितृव्योऽस्या विवेकधीः ॥ व्रजन् बर्बरकूलं स । तं प्रदेशमुपा-गमत् ॥ ५ ॥ दर्शं दर्शं स्वपादातै–र्वृतस्तस्याः पदावलीं ॥ नपशैलं गतस्तत्र । शुश्राव श्री-जिनस्तुतिं ॥ ६ ॥ अथ ध्वनेरनिज्ञाना–न्नर्मदामिति भावयन् ॥ गुहां प्रविष्टः साश्चर्य–म-पश्यत्तां दृगुत्सवां ॥ ७ ॥ पितृव्यं साऽप्युपालक्ष्य । कंठमासज्य चाऽरुदत् ॥ शोकानंदाश्रु-संभ्रमः । सोऽपि स्नेहादजायत ॥ ८ ॥ कथमेकाकिनी वत्से । कुतश्चात्र तवागमः ॥ पृष्टा

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तेन स्ववृत्तांत--मसौ सर्वं न्यवेदयत् ॥ ९ ॥ निंदन दैवमथादाय । नर्मदासुंदरीमसौ ॥ संप्राप्य बर्बरं कूलं । बहिः सार्थमवासयत् ॥ १० ॥ महासतीं निवेश्याथ । प्रत्यग्रे वस्त्रमंपेनपायनमुपादाय । स्वयं राजसभां ययौ ॥ ११ ॥ अर्हशुल्कादिनिर्मुक्त्या । नरेंद्रेणापि सत्कृतः ॥ चक्रे क्रयाणकादीनां । देयादेयव्यवस्थितिं ॥ १२ ॥ इतोऽस्ति हरिणीनाम--गणिका तत्र विश्रुता ॥ प्रसादपात्रं भूपस्य । सत्रं सौभाग्यसंपदः ॥ १३ ॥ आदत्ते सापि दीनारा--नष्टोत्तरसहस्रकं ॥ सांयात्रिकेऽन्यस्तत्रेति । व्यवस्था भूभुजा कृता ॥ १४ ॥ वीरदासमथाह्वातु--मेषा प्रैषीत्स्वचेटिकां ॥ स्वदारतुष्टा वयमि--त्येषोऽप्येनां निराकरोत् ॥ १५ ॥ अथोक्तायां स्थितौ सैष--धनं तस्यै तदार्पयत् ॥ हरिणैषा सापि तत्सर्वं । गत्वा दत्तवती मुदा ॥ १६ ॥ गणिकाह किमेभिर्मे । धनैस्तं त्वमिहानय ॥ इत्यमुं पुनराहूय । सा तत्पार्श्वमनीनयत् ॥ १७ ॥ चेट्यथाह श्रुतौ वेश्यां । याऽस्य गेहेऽस्ति काचन ॥ भार्या स्वसा वा पुत्री वा । रूपाऽपास्तसुरांगना ॥ १८ ॥ यदि सा हरिणाक्षी स्या--त्तवादेशवशंवदा ॥ तदाऽवतीर्णां जानीहि । स्वगृहे कल्पवल्लरीं ॥ १९ ॥ प्रत्युत्पन्नमतिः सापि । हरिणी कपटादथ ॥ प्रतिभूंदाय जग्रा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ह । वीरदासस्य मुद्रिकां ॥ २० ॥

कर्णे किंचिदथादिश्य । तां दत्वा प्रेषिता ततः ॥ चेटी कूटपटुर्गत्वा । नर्मदामिदमब्रवीत् ॥ २१ ॥ गृहेऽस्माकं स्थितः श्रेष्टी । त्वामाह्वयति शोभने ॥ मुद्रिकेयमभिज्ञाने । द्रुतमागम्यतां ततः ॥ २२ ॥ नामांकामूर्मिकां वीर–दासस्यालोक्य नर्मदा ॥ सार्द्धं तयैव निश्चक्रमा । गणिकाया गृहेऽगमत् ॥ २३ ॥ तां प्रवेश्येतरद्वारा । द्रुतं भूमिगृहेऽक्षिपत् ॥ कृतकृत्योर्मिकां चैषा । श्रेष्ठिनः पुनरार्पयत् ॥ २४ ॥ अखंडितव्रतः सोऽपि । ततः स्वगृहमागमत् ॥ अप्रेक्ष्य नर्मदां तत्र । क्षुब्धः पप्रच्छ सेवकान् ॥ २५ ॥ न लेभे तत्प्रवृत्तिं स । क्वाप्युपायैः कृतैरपि ॥ सुगुप्तधूर्त्तकृत्यस्य । कोऽपि पारं किमु व्रजेत् ॥ २६ ॥ योऽपजह्रे सतीमेतां । निर्मायां मायया ध्रुवं ॥ स कथं विद्यमानेऽत्र । मयि प्रकटयिष्यति ॥ २७ ॥ चिंतयित्वेति भांडानि । गृहीत्वा स्वपुरंप्रति ॥ प्रतस्थे नृपमापृच्छ्य । पोतान् संपूर्य वस्तुभिः ॥ २८ ॥ भृगुकच्छमथागत्य । वीरदासो विशुद्धधीः ॥ जिनदासान्तिकं मित्र–मुपायज्ञमुपासकं ॥ २९ ॥ नत्वा स्वरूपं निःशेषं । प्रेषयामास सत्वरं ॥ सोऽपि बर्बरकूलेऽगात् । सामग्र्या नर्मदाकृते ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ ३० ॥ युग्मं ॥

इतश्च गणिका वीर–दासे प्रचलिते ततः ॥ नर्मदासुंदरीमाह । हिरण्यार्थं हताशया ॥ ॥ ३१ ॥ अहे वेश्यात्वमादृत्य । स्वजन्म सफलीकुरु ॥ उर्वशीव महेंद्रस्य । मान्या अव महीभुजः ॥ ३२ ॥ हस्तौ तद्वाक्यदग्धेव । धुनाना नर्मदाऽवदत् ॥ जीवंत्याः शीलमाणिक्यं । कोऽयं मे हर्तुमिच्छति ॥ ३३ ॥ वेश्याह सफलं जन्मा–ऽस्माकमेव महीतले ॥ इहस्था अपि याः स्वैरं । भोगान् भुंजीमहे वयं ॥ ३४ ॥ नर्मदाह सुखैरेभिः । कः स्वं वंचयते शिवात् ॥ कुर्वंति बालका एव । माणिक्यैश्चणककयं ॥३५॥ इति तद्वचसा कोप–मापन्ना हरिणी रयात् ॥ तमाजघ्ने वांछिताप्त्यै । जडश्चिंतामणिमिव ॥ ३६ ॥ ताड्यमाना च साऽस्मार्षी– च्चित्ते पंचनमस्कृतिं ॥ अकस्मात्तत्प्रभावाच्च । वेश्या प्राणैरमुच्यत ॥३७॥ अथ मंत्री नृपादेशा– द्वेश्यामृत्योरनंतरं ॥ तत्पदे स्थापनायालं । प्रार्थयामास नर्मदां ॥ ३८ ॥ प्रभुत्वे स्वेछया ज्ञात्वा । निर्गमोपायमात्मनः ॥ सती तद्वचनं मेने । स्त्रीत्वं हरिरिवात्मनः ॥ ३९ ॥ अथ मंत्रिमुखात् श्रुत्वा । तत्सौंदर्यं नरेश्वरः ॥ एनामानेतुमुत्सुक्तः । प्रजिघाय सुखासनं ॥ ४० ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नृपनृत्या महानृत्या । समारोप्य सुखासने ॥ पुरमध्ये घृतछत्रां । यावत्तूर्णं नयंति तां ॥ ॥ ४१ ॥ तावता शीलरक्षायै । ज्ञात्वा वैकक्ष्यमौषधं ॥ विशाले नगरखाले । दृषत्पातमिवाऽपतत् ॥ ४२ ॥ यक्षकर्दमलेपोऽय—मपूर्व इति वादिनी ॥ लौहेन कवचेनेव । पंकेनालिप्य विग्रहं ॥ ४३ ॥ समक्षं सर्वलोकानां । विषयप्रतिवादिनी ॥ सा पत्राणीव वस्त्राणि । पाटयामास विग्रहात् ॥ ४४ ॥ सा मंत्रवादिनीवाथ । शीलजीवविनाशिनां ॥ वित्रासाय भुजंगानां । संमुखं रेणुमक्षिपत् ॥ ४५ ॥ दुर्वार्यमंत्रेणैवैषा । गृहीता नीषणाकृतिः ॥ स्वशौर्यवर्णनापूर्व—मातेने नृत्यमद्भुतं ॥ ४६ ॥ तत्स्वरूपमथाकर्ण्य । नृभुजा प्रहितान्निजान् ॥ मांत्रिकांस्ताडयामास । साऽश्मनिर्न्नेषणानिव ॥ ४७ ॥ दूरे त्यक्ताथ सा वृष्टि—रिव तैः करकाश्मनां ॥ बन्नाम पुरि वात्येव । बालैः पत्रैरिवाऽवृता ॥ ४८ ॥

अन्यदा जिनदासेन । गायंती जिनरासकान् ॥ ददृशे शिशुनिर्युक्ता । सा पटच्चरचीवरा ॥ ४९ ॥ सोऽपि तस्याः पुरोनूय । करुणार्द्रोऽन्यधत्त तां ॥ का त्वं नो व्यंतराधीशे । जिनभक्तोऽस्मि शंस मे ॥ ५० ॥ साऽप्यूचे यदि जैनोऽसि । पृष्टव्याहं तदा रहः ॥ सांप्रतं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तन्नवङ्ग–वैरस्यं मा कृथा वृथा ॥ ५१ ॥ परेद्युर्दूरमुत्रास्य । बालान् वात्येव पल्लवान् ॥ देवानवंदत स्वैरं । वनमाश्रित्य किंचन ॥ ५२ ॥ तत्पृष्टे जिनदासोऽपि । गतस्तत्रान्निवंद्य तां ॥ योजितांजलिरप्राक्षी–त्का त्वं धर्मैकमानसा ॥ ५३ ॥ सापि तं श्रावकं मत्वा । सर्वं खोदंतमाख्यत ॥ तत् श्रुत्वा सोऽप्यन्नाणीत्तां । साधु साध्वि त्वमीक्षिता ॥ ५४ ॥ यतस्त्वदर्थमेवाहं । वत्सेऽत्र समुपागमं ॥ प्रेषितो वीरदासेन । सुहृदा नृगुकन्नतः ॥ ५५ ॥ तस्मान्मा खिद्यथाः सर्वं । साधु संघटयिष्यते ॥ समये सुप्रयुक्तायाः । किमसाध्यं यतो मतेः ॥ ५६ ॥ परमद्य करिष्येव । त्वया सर्वान्निसारतः ॥ नंजंत्या घटन्नांडादि । प्रसर्त्तव्यं नृपाध्वनि ॥ ॥ ५७ ॥ संकेत्येति पुरस्तस्थौ । गता सापि तथाऽकरोत् ॥ नृपः सकृपमाहस्म । जिनदासमिहांतरे ॥ ५८ ॥ ग्रहिलीन्नूतया न्नूत–रूपया हा स्त्रियाऽनया ॥ नद्यानमिव वानर्या । पुरमेतदुपद्रुतं ॥ ५९ ॥ तस्मादस्माकमेताव–दुपरोधादनर्थदां ॥ क्षिपैनां जलधेः पारे । चित्रिणीमिव दूरतः ॥ ६० ॥

नृपादेशान्मुदापन्नो । जिनदासोऽथ नर्मदां ॥ नियंत्र्य निगमैर्निन्ये । साऽहं दिव्यौषधी-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मिव ॥ ६१ ॥ प्राप्यैनामथ दुःप्रापां । पंकाच्चिंतामणीमिव ॥ स्नापयित्वा दुकूलानि । सानंदं पर्यधापयत् ॥ ६२ ॥ महार्थमिव भांडं तां । पोतमारोप्य सत्वरं ॥ नर्मदापुरमानिन्ये । जिनदासः सुहृत्प्रियः ॥ ६३ ॥ तामायांतीमथ ज्ञात्वो–पाजग्मुर्जनकादयः ॥ नत्वा कंठमथालंब्य । सापि तारं रुरोद च ॥ ६४ ॥ हृष्टा श्रुषेणसेनाद्या । जीवंतीमाप्य तां ततः ॥ पुनर्जन्मोत्सवं चक्रु–र्मंगलाचारपूर्वकं ॥ ६५ ॥ तथा जैनविहारेषु । महापूजापुरस्सरं ॥ साधर्मिकादिवात्सल्य–धर्मकर्माणि तेनिरे ॥ ६६ ॥ सगौरवं जिनदासो–ऽप्युषित्वा कतिचिद्दिनान् ॥ वीरदासमथापृच्छ्य । जगाम नृगुपत्तनं ॥ ६७ ॥ इतश्चार्यसुहस्त्याख्य–सूरयो दशपूर्विणः ॥ विहरंतः समाजग्मु–रन्यदा नर्मदापुरं ॥ ६८ ॥ नर्मदासुंदरीमातृ–पितृव्यपितृसंयुता ॥ जगाम वंदितुं सूरीन् । दूरीकृतभवानथ ॥ ६९ ॥ धर्मलाभाशिषं दत्वा । गुरुर्धर्ममुपादिशत् ॥ देशनांते वीरदासो । गुरुं नत्वा व्यजिज्ञपत् ॥ ७० ॥ नर्मदासुंदरी कर्म । किं चक्रे पूर्वजन्मनि ॥ निर्दोषापि प्रभो येन । जातासौ दुःखभाजनं ॥ ७१ ॥ अथ श्रुतोपयोगेन । ज्ञात्वा गुरुरभाषत ॥ अस्ति भूमेर्मानदंभ । इव विंध्यशिलोच्चयः ॥ ७२ ॥ तन्निर्गता तटिन्येषा । न-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मेदा दोमवज्जुवः ॥ मिथ्यादृग्नर्मदानामा–धिष्ठात्र्यस्याः सुरी पुनः ॥ ७३ ॥ प्रतिमां तस्थु-
षोऽन्येद्यु–स्तीरे धर्मरुचेर्मुनेः ॥ उपसर्गानसौ चक्रे । जातद्वेषा महात्मनः ॥ ७४ ॥ एषा-
पि मुनिनैश्चल्या–त्सम्यग्दृष्टिरजायत ॥ सेयं च्युत्वा भवत्पुत्री । नर्मदासुंदरीत्यभूत् ॥७५॥
पूर्वाभ्यासादियं रेवा–स्नानदोहदवर्द्धिता ॥ साधूपसर्गदुःकर्मो–दयतोऽजनि दुःखिनी ॥७६॥
नर्मदोपाददे दीक्षां । जातजातिस्मृतिस्ततः ॥ तपस्यंती सती प्राप–दवधिज्ञानमुज्ज्वलं ॥
॥ ७७ ॥ प्रवर्त्तिनीपदं प्राप्य । रूपचंद्रपुरं गता ॥ कालाऽत्ययात्तपःकष्ट–कार्श्याच्चाऽनुपलक्षि-
ता ॥ ७८ ॥ नर्मदासुंदरी साध्वी । व्रतिनीवृंदमंडिता ॥ ऋषिदत्तावितीर्णस्वो–पाश्रये तस्थु-
षी चिरं ॥ ७९ ॥

तत्रादिदेश सा धर्मं । कर्ममर्माविधं सुधीः ॥ तं महेश्वरदत्तोऽपि । ऋषिदत्तायुतोऽशृ-
णोत् ॥ ८० ॥ महेश्वरस्य संवेगा–वेगसंजननौषधं ॥ अन्यदा नर्मदाऽपाठी–दखिलं स्वरल-
क्षणं ॥ ८१ ॥ श्रुत्वा महेश्वरोऽप्येत–त्पश्चात्तापपरोऽवदत् ॥ स्वरलक्षणमन्यूनं । सापि नून-
मतोऽबुधत् ॥ ८२ ॥ धिग्मामधर्ममधन–मविवेककलंकितं ॥ कांता कांता सती येना–ऽमुच्य-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तैकाकिनी वने ॥७३॥ तस्मादैवहतो हंत । दुष्योऽहं सत्वशालिनां ॥ मत्तो हि नापरः कोऽपि । पापी तापीव विष्टपे ॥७४॥ इत्याद्यनुशयानं तं । कृपयाह प्रवर्तिनी ॥ सैवाहं नर्मदा नद्द। त्वत्पुरस्तद्विषीद मा ॥ ७५ ॥ सर्वोऽपि चेष्टते प्राणी । प्रेरितः पूर्वकर्मभिः ॥ न कोऽपि कस्यचिद्दोष–पोषो वा प्रेमनिर्मितिः ॥ ७६ ॥ सोऽपि तां क्रमयित्वाथ । स्फुरद्वैराग्यभासुरः॥ गुरोरार्यसुहस्त्याख्या–दादत्त व्रतमुत्तमं ॥७७॥ ऋषिदत्तापि संविग्ना । चारित्रं प्रत्यपद्यत॥ उभावपि तपस्तप्त्वा । प्रापतुः स्वर्गसंपदं ॥ ७८ ॥ नर्मदाऽप्यवधिज्ञाना–दायुःपर्यंतमात्मनः ॥ ज्ञात्वा संलेखनापूर्वं । प्रपेदेऽनशनं सुधीः ॥ ७९ ॥ उत्पद्य देवेषु ततो विदेहे । भुक्त्वा नरेंद्रश्रियमाप्य दीक्षां ॥ हत्वाऽष्ट कर्माणि च नर्मदा सा । प्राप्ता शिवं निर्मलशीलयोगात् ।८०।

॥ इति श्रीरुद्रपल्लीयगच्छे श्रीसंघतिलकसूरिपट्टावतंसश्रीसोमतिलकसूरिविरचितायां श्रीशीलतरंगिण्यां नर्मदासुंदरीकथा समाप्ता ॥ श्रीरस्तु ॥

अथ रतिसुंदरीकथा प्रारभ्यते—

पुरं साकेतमित्यस्ति । संकेतमिव संपदां ॥ यत्रान्यस्त्रीमुखेंदूनां । निर्माल्यं मृगलांछनः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ १ ॥ केसरीवाऽरिनागानां । राजास्ति नरकेसरी ॥ यत्खड्गहतवैरीभ्र–मौक्तिकानीव तारकाः ॥ २ ॥ देवीव भूगता तस्य । देवी कमलसुंदरी ॥ कल्याणगोत्रराजश्री–विलासैकधृतादरा ॥ ३ ॥ तयोः पुत्री पवित्रात्मा । नाम्नास्ति रतिसुंदरी ॥ धात्रा स्वसृष्टिसौंदर्य–श्रीरिवैकत्र पिंडिता ॥ ४ ॥ ताराभिश्चंद्रलेखेव । सखीभिः परिवारिता ॥ नाम्ना गुणश्रीमन्येद्युः । सा ववंदे प्रवर्त्तिनीं ॥ ५ ॥ गणिन्यपि तदा तस्याः । सुधामधुरया गिरा ॥ धर्मोपदेशमाचष्ट । हारयष्टिमिवोज्ज्वलं ॥ ६ ॥ मेरुं रोर इव प्राप्य । दुर्लभं मानुषं जनुः ॥ ग्राह्यं धर्मफलं रत्न–मिव बुद्धिमता ततः ॥ ७ ॥ रत्नपूर्णे निधौ प्राप्त । इव बालो वराटिकां ॥ मूढो मोक्षफले भोगा–नीहते मर्त्यजन्मनि ॥ ८ ॥ तस्माद्गृहाण सम्यक्त्वं । प्रतिपद्यस्व संयमं ॥ निर्मलं च तपस्तप्त्वा । भवपर्यंतमाप्नुहि ॥ ९ ॥ तपःकृशानुना तप्तः । शीलोज्ज्वलजलोक्षितः ॥ जीवः कर्ममलं मुंच–त्यग्निशौचमिवांबरं ॥ १० ॥ शरीरं विशरारुश्रि । फलं तस्य तपःक्रिया ॥ यावज्जीवं राजपुत्रि । जिनधर्मे यतस्व तत् ॥ ११ ॥ इति प्रवर्त्तिनीवक्त्र–मृगांकाद्वचनामृतं ॥ निपीय सोल्लसद्ज्ञान–दृष्टिर्मधुरमाख्यत ॥ १२ ॥ साधु साध्वि त्वयादि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ष्ट–मनवद्यमिदं मम ॥ परं नित्यप्रमत्तत्वा–न्नाहं व्रतविधौ क्षमा ॥ १३ ॥ तद्गृहस्थोचितं ध-
र्मं । ज्ञवपाताऽवलंबनं ॥ प्रसद्य देहि मे ज्ञार–मिव दम्यस्य युक्तितः ॥ १४ ॥ सम्यक्त्वरत्न-
मेतस्या–स्ततो दत्त्वा प्रवर्त्तिनी ॥ ज्ञवाच वत्से शीलं हि । परो धर्मो मृगीदृशां ॥ १५ ॥
स्वयं निवृत्यते पापा–त्परश्चापि निवर्त्तते ॥ इति शीलव्रतं पाल्य–मन्यपुंवर्जनात्मकं ॥१६॥
इत एवार्कचंडांतं । कीर्त्तिर्नृत्यति ज्ञूतले ॥ इत एव च कल्याण–स्थानं मुक्तिरवाप्यते
॥ १७ ॥ कुलांगनानामत्रैव [ज्ञवे सर्वमनोरथाः ॥ एतत्प्रज्ञावाज्ञायंते । मेघादिव लतांकु-
राः ॥ १८ ॥ परलोके च संसारे । दुःखदौर्गत्यज्ञूभृतां ॥ चिरं वज्रायुधीज्ञूय । पारंपर्येण मु-
क्तिदं ॥ १९ ॥ श्रुत्वेत्यमंदानंदेन । प्रोल्लसत्पुलकोदया ॥ नियमं प्रतिपेदे तं । सादरं रतिसुं-
दरी ॥ २० ॥ इतश्च नंदनाज्ञिख्ये । नगरे चंडज्ञूभुजा ॥ स्वकार्ये प्रहितो दूतः श्रीसाकेता-
त्समागमत् ॥ २१ ॥ देशस्वरूपकथना–ऽवसरे दूततो नृपः ॥ शुश्राव रतिसुंदर्या । रूपाति-
शयसंपदं ॥ २२ ॥ ततोऽनुरागसंज्ञार–निस्तंद्रश्चंद्रज्ञूपतिः ॥ तदर्थं मंत्रिणं प्रैषी–न्नरकेसरि-
ज्ञूपतेः ॥ २३ ॥ ततो योग्याज्ञिसंबंधं । मत्वा साकेतनायकः ॥ रोहिणीमिव चंद्राय । दक्ष-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

श्वंडाय तां ददौ ॥ २४ ॥ शुन्नेऽह्नि प्रेषिता राज्ञा । महर्द्ध्या नंदने पुरे ॥ लक्ष्मीरिव मुकुंदा-
य । तस्मै जाता स्वयंवरा ॥ २५ ॥ सुमुहूर्ते तयोर्वृत्ते । धन्ये वीवाहमंगले ॥ जातो वर्द्धप-
नोत्साहः । श्रीमन्नंदनपत्तने ॥ २६ ॥ देवी वा खेचरी वाथ । किंवा पातालकन्यका ॥ सौंद-
र्यै रतिसुंदर्या । दृष्ट्वेति जगदुर्जनाः ॥ २७ ॥ ज्योत्स्नयेव तया चंडः । प्रिययालंकृतो नृपः ॥
सर्वोपरिस्थितिं लेने । क्षत्रनक्षत्रनायकः ॥ २८ ॥

महेंडसिंहभूपालो–ऽन्यदा कुरुपतिर्बली !! चंडं दूतमुखेनाह । मृगारिर्वा मृगाधिपं ॥
॥ २९ ॥ देव त्वया सहास्माकं । पूर्वपूर्वक्रमागता ॥ पद्मानामिव सूर्येण । प्रीतिरासीदिय-
च्चिरं ॥ ३० ॥ कुलोद्योतकराः पुत्रा–स्त एव महिमास्पदं ॥ संबंधं पूर्वजाचीर्णं । ये न लुंप-
ति सात्त्विकाः ॥ ३१ ॥ सौजन्यपांचजन्यं त–दखंडं बिभ्रता त्वया ॥ निजं प्रयोजनं मत्तः ।
सर्वं साध्यमसंशयं ॥ ३२ ॥ किंचान्यत्प्रीतिवृद्ध्यर्थं । नवोढा रतिसुंदरी ॥ अस्मन्यं प्राभृते
प्रेष्या । सत्कुर्मो येन तां वयं ॥ ३३ ॥ प्रीतिर्येन समं तस्य । गौरवाय प्रियापि हि ॥ न मा-
न्याऽरुंधती कस्य । वसिष्ठेनादृता ततः ॥ ३४ ॥ श्रुत्वा दूतवचश्चंड । ईषत् स्मित्वा समाल-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पत् ॥ सुजनाः कस्य नाऽभीष्टा । ज्योत्स्नेवामृतदीधितेः ॥३५॥ परोपकारो मैत्री च । दाक्षिण्यं प्रियभाषणं ॥ सौशील्यं विनयस्त्यागः । सज्जनानां गुणा अमी ॥ ३६ ॥ तद्दूत तव भूपेन । साधूदितमिदं मम ॥ न हि लुंपंति मर्यादां । कुल्याः कुल्यापतिर्यथा ॥ ३७ ॥ अस्माभिरपि वक्तव्य—मुचितं ज्ञापयिष्यते ॥ जीवितस्येव देव्यास्तु । याञ्चा न प्रीतिलक्षणं ॥ ३८ ॥ दूतः प्राहाऽन्यथाकर्तुं । न युक्तं तद्वचस्तव ॥ न हि माईवसाध्येऽर्थे । कठोरत्वं विवेकिता ॥ ३९ ॥ मर्यादां लुंपमानो हि । ध्रियते केन वारिधिः ॥ विधातुं सेतुबंधं वा । क्षुब्धे तस्मिन्नलं हि कः ॥ ४० ॥ तथा सोऽपि रणक्षोणी—भीषणः केन सह्यते ॥ अतः साम प्रयोक्तव्यं । तस्मिन् स्वहितहेतवे ॥ ४१ ॥ अथ रोषारुणश्चंडः प्राह रे दूत साध्वसौ ॥ कुलीनोऽन्यकलत्राणि । याचमानो नृपस्तव ॥ ४२ ॥ प्रहिणोति निजां भार्यां । कोऽपि किं परमंदिरे ॥ गृह्यते केन रत्नं हि । जीवतः पन्नगेशितुः ॥ ४३ ॥ दूतः पुनरभाषिष्ट । भूप तत्ववचः शृणु ॥ रक्ष्यो यथात्मैव । राजनीतिमिति स्मर ॥ ४४ ॥ भृत्यैर्धनानि तान्यां तु । रक्षणीया हि वल्लभा ॥ दासऽन्यकलत्रैस्तु । रक्षणीयं स्वजीवितं ॥ ४५ ॥ इत्यादि निगदन् दूतो । नृपभृत्येन पर्षदः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ दत्वार्द्धचंडं विक्षिप्तः । कृपणेनेव निक्षुकः ॥ ४६ ॥ गत्वा तथैव दूतेन। प्रोक्ते मर्यादयोज्झितः ॥ महेंद्रसिंहः प्राचाली–त्समुद्र इव सैन्ययुक् ॥ ४७ ॥ श्रुत्वा चंडनरेंद्रोऽपि । तमायांतं रुषाकुलः ॥ बभूव संमुखश्चंद्र । इव रात्रितमस्ततेः ॥ ४८ ॥ क्रमाद्युत्क्रमतश्चैवं । सैन्येऽन्योऽन्यं पलायिते ॥ जातमायोधनं नीमं । तयोः केसरिणोरिव ॥ ४९ ॥

अथो महेंद्रसिंहेन। राहुणेव विधेर्वशात्॥ आक्रम्य चंडो जीवंश्च। बध्ध्वा मंत्रिकरेऽर्पितः ॥ ५० ॥ स्वयं च चंडसैन्येषु । नश्यत्सु हरिणेष्विव ॥ नष्टां मृगीमिव व्याधो । जग्राह रतिसुंदरीं ॥ ५१ ॥ विमोच्य चंडं तद्भान्न–तुष्टः स्वपुरमाप्य च ॥ हतः कामकिरातेन । जगाद रतिसुंदरीं ॥ ५२ ॥ यदापन्नृति दूतास्या–त्वं मया सुभ्रु शुश्रुवे ॥ मालत्यामिव भृंगस्यो–त्कंठितं मे तदादि हृत् ॥ ५३ ॥ नडे त्वदर्थमेवाय–मारंभो मम सांप्रतं ॥ तत्कुरुस्वामिनीभूय । प्रसद्य सफलीकुरु ॥ ५४ ॥ अथ चंडप्रिया दध्यौ । धिग्मे रूपमिदं परं ॥ नर्त्तेदृग्दुर्दशां प्राप्तः । फलाढ्य इव पादपः ॥ ५५ ॥ असौ कामी दुराचारो । द्यूतकार इवोत्सुकः ॥ अपर्यालोच्य मच्चित्तं । धिगीदृशमचेष्टत ॥ ५६ ॥ तस्मान्मया कथंकारं । शीलं रक्ष्य-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मतःपरं ॥ शौनिकापणबद्धेन । गगेनेवात्मजीवितं ॥ ५७ ॥ यद्वा कालविलंबो हि । श्रेयसे प्राणसंकटे ॥ नीतिवाक्यमिति स्मृत्वा । सा साध्वेव तमालपत् ॥ ५८ ॥ गाढाऽनुरागिता ज्ञाता । तव श्रीनृपकुंजर ॥ अतोऽर्थयामि किंचित्त्वां । निष्फलीकुरुषे न चेत् ॥ ५९ ॥ नृपोऽभाषत रंभोरु । किमिदं प्रार्थनावचः ॥ त्वदर्थं व्यापृता ह्येते । प्राणा अपि तृणाय मे ॥६०॥ यो ददाति शिरः सुभ्रु । ततः किं चक्षुरर्थ्यते ॥ अतोऽतिदुर्लभमपि । प्रार्थ्यतां पूरयामि ते ॥ ६१ ॥ अवाचि रतिसुंदर्या । पर्याप्तमपरेण मे ॥ मा कुर्या ब्रह्मभंगं मे । यावन्मासचतुष्टयं ॥ ६२ ॥ नृपोऽवदद्वज्रपाता-दपीदं दारुणं वचः ॥ तथापि नान्यथा कार्या । तवाज्ञेति वरानने ॥ ६३ ॥ दुःखाब्धिमग्ना सा द्वीप-मिवैतत्प्राप्य तद्वचः ॥ तुष्टा घर्मांशुसंतप्त-श्छायां प्राप्य तरोरिव ॥ ६४ ॥ मदायत्तैव पश्चाद-प्यसाविति महीपतिः ॥ भूमिन्यस्ते इव्य इव । रंकश्चेतसि हृष्टवान् ॥६५॥ आचामाम्लोपवासादि-तपःकृत्यैरनारतं ॥ स्वं शोषयंती स्नानांग-रागभूषणवर्जिता ॥ ६६ ॥ जातपर्यस्तवक्षोजा । प्रम्लानमुखपंकजा ॥ शुष्कासृग्मांसनासाग्र-श्रोणिः परुषकुंतला ॥ ६७ ॥ मलश्यामलिताऽशेष-कायाऽकृत्यैव भीषणा ॥ हिम-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्लुष्टा पद्मिनीव । सा दृष्टा नूनृतान्यदा ॥ ६८ ॥ विशेषकं ॥

नणिता च कुरंगाक्षि । किमवस्था तवेदृशी ॥ किं कोऽपि रोगो दुःखं वा । चित्ते जागर्त्ति तेऽन्वहं ॥ ६९ ॥ साऽप्याह देव वैराग्या–द्व्रतमेतन्मया धृतं ॥ विज्ञायं तेन मे कायं । फाल्गुने काननं यथा ॥ ७० ॥ परिपूर्णं मया कार्यं । व्रतं चेदं यथा तथा ॥ व्रतभंगो महाराज । यतो नरककारणं ॥ ७१ ॥ पप्रच्छ नूपो वैराग्य–हेतुः कस्ते यदीदृशं ॥ नोगयोग्यं वपुः क्षिप्तं । तपोऽग्नौ पुष्पदामवत् ॥ ७२ ॥ पतिव्रताह राजेंद्र । पश्य दोषशताकुलं ॥ शरीरमेव तत्रादौ । वैराग्यैकनिबंधनं ॥ ७३ ॥ वसासृग्मांसमेदोऽस्थि–पित्तविण्मूत्रश्लेष्मभिः ॥ स्रवत्येतद्वपुर्द्वारै–र्नवभिः पूतिगंधतां ॥ ७४ ॥ मुहुर्विलेपनस्नान–धूपनादिभिरप्यदः ॥ सुसंस्कृतं स्वदौर्गंध्यं । न मुंचति कथंचन ॥ ७५ ॥ अंतर्बहिश्च नोगांगं । यद्यदस्योपनीयते ॥ नपकारः खलस्येव । तत्तद्वैरूप्यमश्नुते ॥ ७६ ॥ अशुचीनां निधीनूतं । दृश्यमानं मनोहरं ॥ वैराग्यं कस्य नो कुर्या–त्खरस्येव सकृद्वपुः ॥ ७७ ॥ अन्योऽप्यस्य महादोषो । हतदेहस्य दृश्यते ॥ किंपाकफलवद्यत्र । मुह्यंति गुणिनोऽपि हि ॥७८॥ इत्थं वैराग्यवत्यापि । तस्या देश-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नया नृपः ॥ न ज्ञाविते मुज्झशैल । श्व वारिदवर्षणैः ॥ ७९ ॥ दध्यौ चैषा तपःक्लिष्टा । तथापि परिकर्मिता ॥ समाप्ते नियमे स्वस्था–ऽवस्थतां पुनरेष्यति ॥ ८० ॥ मा खिद्यथा मुधा मुग्धे । पूर्यतां नियमस्तव ॥ इत्युक्त्वा स्मितलिप्तास्यो । राजा प्रतिगतः पुनः ॥ ८१ ॥ पूर्णेऽवधौ पारणांते । पुनरूचे महीभुजा ॥ अद्य ते संगमे ज्ञद्रे । बाढमुत्कंठितोऽस्म्यहं ॥ ॥ ८२ ॥ सत्याह देव सर्वत्र । स्वार्थो हि बलवत्तरः ॥ अद्यैव सुव्रहोः काला–त्स्निग्धं भुक्तं मया खलु ॥ ८३ ॥ तेन मे सांप्रतं सर्वं । वर्त्तते वपुराकुलं ॥ शीर्षं स्फुटति शूलादि–र्हृदि त्रुट्यंति संधयः ॥ ८४ ॥

इत्युक्तवत्या मदन–फलं क्षिप्त्वा मुखे रहः ॥ भुक्तं वांतं तया सर्वं । कृतघ्नेनेव मर्मधीः ॥ ८५ ॥ ज्ञचे च पश्य राजेंद्र । कृतघ्नत्वमहो तनोः ॥ तादृग्मनोज्ञं ज्ञोज्यं य–त्क्षणादेवाऽशुचीकृतं ॥ ८६ ॥ वांतं च सुज्ञगंमन्यः । क्षुधितोऽपि हि कोऽपि किं ॥ विमुच्य बालिशं युष्मा–दृशं ज्ञोक्तुं समीहते ॥ ८७ ॥ कथमित्यनुयुक्तेऽथ । पुनराह महासती ॥ किमत्र प्रकटे ज्ञावे । लक्षणीयं विचक्षण ॥ ८८ ॥ पुरोपभुक्तदारेज्यः । किमन्यदपि गर्हितं ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तत्त्वं वांछन्नभूद्दक्षो–पालंभार्हः कथं न हि ॥ ८९ ॥ भूपेनोक्तमिदं सत्यं । सर्वं जानामि सुंदरि ॥ रागातिरेकतः किंतु । लुब्धोऽहं तव संगमे ॥ ९० ॥ महासत्याह हीनेऽस्मिन् । को रागोऽद्यापि मेंगके ॥ नीलीरागानुरागेण । भूयोऽवदन्महीपतिः ॥ ९१ ॥ तपःशुष्केऽपि देहेऽस्मि–न्निदं ते नयनद्वयं ॥ जीर्णभांडगतं रत्न–मिवाऽनर्घ्यं जगत्त्रये ॥ ९२ ॥ अनन्यं शीलरक्षार्थ–मुपायं जानती सती ॥ उत्पाट्य लोचनद्वंद्वं । भूभुजः सहसाऽर्पयत् ॥ ९३ ॥ दृष्ट्वा चमत्कृतो मुक्त–रागोऽथायं महीपतिः ॥ प्रवृद्धाऽतुच्छसंवेगः । सतीमाह ससंभ्रमं ॥९४॥ किमिदं दारुणं कर्म । कृशोदरि कृतं त्वया ॥ ममात्मनश्च दुःखैक–कारणं दुःकरं हहा ॥ ॥ ९५ ॥ साहस्म देव सौख्यैक–कारणं त्वावयोरिदं ॥ तिक्तौषधमिवात्युग्र–रोगिणोर्ज्ञायतामिति ॥ ९६ ॥ अथ देशनया चक्रे । तया धर्मे स्थिरो नृपः ॥ सोऽपि वैराग्यमापन्नः । क्षमयामास तां सतीं ॥ ९७ ॥ ततः शीलप्रभावेणा–ऽमुष्याः श्रीशासनामरी ॥ चकार नयने शोभा–ऽतिरेकेण मनोहरे ॥ ९८ ॥ राजापि मंत्रिभिः सार्द्धं । प्रैषीत्तां नंदने पुरे ॥ चंद्रस्याऽज्ञापयच्चैषा । स्वसेयं मे सहोदरी ॥ ९९ ॥ श्रीचंद्रभूमीपतिनाभिनंदिता । श्रीशीलध-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

र्मं प्रतिपाद्य निर्मलं ॥ श्रीमोक्षसौख्याऽतिथितां क्रमादसौ । संप्राप्स्यति श्रीरतिसुंदरी सती ॥ १०० ॥ इति श्रीरुद्रपल्लीयगच्छे श्रीसंघतिलकसूरिपट्टावतंसश्रीसोमतिलकसूरिविरचितायां श्रीशीलतरंगिण्यां रतिसुंदरीकथा समाप्ता ॥ श्रीरस्तु ॥

पतिपरिहतानामपि महासतीनां शीलमाहात्म्यमाह—

॥ मूलम् ॥—रिसिदत्ता दवदंती । कमला य कलावई विमलसीला ॥ नामग्गहणजलेण वि । कलिमलपक्खालणं कुणह ॥ १ ॥ व्याख्या—ऋषिदत्ता तथा दवदंती तथा कमला तथा कलावती च, एताश्चतस्रोऽपि विमलशीलाः, प्रत्येकं परीक्षितनैर्मल्या नंदंत्विति संबंधः, माहात्म्यमाह—आस्तां स्तुत्यभिवादनादिकं, तासां नामग्रहणजलेनापि कलिमलप्रक्षालनं कुरुत ? हे भव्या इत्यध्याहारः, अयं गाथासमासार्थः, व्यासार्थस्तु कथानकेभ्योऽवगंतव्यः, तत्रादौ ऋषिदत्ताकथा, तथाहि—

अत्रैव मध्यदेशेऽस्ति । पुरं श्रीरथमर्दनं ॥ वणिक्पुत्र इवाभाति । श्रीदो यत्रेभ्यसद्मसु ॥ १ ॥ तत्र हेमरथो राजा । यस्य निस्त्रिंशवल्लरी ॥ नृष्णैरप्यरिनारीणां । ववृधे नेत्रवारि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ज्ञिः ॥ ३ ॥ वल्लभा सुयशा नाम्नी । तस्य यत्रेत्रनिर्जिता ॥ नूनं श्रिताऽप्यरण्यानीं । मार्ग-मासेवते मृगी ॥ ३ ॥ नाम्नास्ति कनकरथ–स्तयोः पुत्रो महास्थः ॥ यत्कीर्त्तिकांता बाला-पि । सहेलं क्रमते नभ्रः ॥ ४ ॥ इतः पुर्यस्ति कौबेरी । कवरीवाऽवनिश्रियः ॥ नृपः सुंदर-पाणिस्तां । शास्ति शौंडीर्यवज्रभृत् ॥ ५ ॥ अपांसुलालालामेव । वासुला तस्य वल्लभा ॥ मेरुभूरिव साऽसूत । रुक्मिणीं कल्पवल्लरीं ॥ ६ ॥ अथ यौवनमारूढां । तां ज्ञात्वा योग्यसं-गमात् ॥ अदत्त कनकरथ–कुमाराय नरेश्वरः ॥ ७ ॥ तामुद्वोढुमथाऽचालीत् । कुमारः पि-तुराज्ञया ॥ कुर्वाणः पथि सोमाल–भूपान् स्वाज्ञावशंवदान् ॥ ८ ॥ असूर्यंपश्यां भूपाल–वल्लभामिव स क्रमात् ॥ प्रापेदेकामरण्यानीं । उन्नामुन्नतपादपैः ॥ ९ ॥

अथ पाथोदिदृक्षायै । प्राक्प्रस्थापितसेवकाः ॥ कुमारमूचुरागत्य । समासीनं तरोस्त-ले ॥ १० ॥ देव युष्माकमादेशाद् । दूरभूमिं गता वयं ॥ क्षमामुखमिवाऽऽक्रमः । सरः पं-कजसंकुलं ॥ ११ ॥ यावद्व्रजामस्तत्तीरं । तावत्तत्र वनाश्रमे ॥ अपश्यामः कनीं कांचि–द्दो-लाखेलनलालसां ॥ १२ ॥ सहसाऽस्मानथालोक्य । सापि दूरं पलायिता ॥ अलक्षिता खेच-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रीव । तरुपाट्यामलीयत ॥ १३ ॥ गवेषितापि ह्यस्माभिः । कानने सा शुभानना ॥ नैवाऽदर्शि पुनश्चित्र–वल्लरीव दरिद्रिभिः ॥ १४ ॥ तदाकर्ण्य कुमारोऽपि । शिखीव घनगर्जितं ॥ प्रहृष्टः सह तैरेवा–ऽचलत्तद्दर्शिताध्वना ॥ १५ ॥ प्राप्तश्चूतवनं लीन–स्तदंतश्च कुरंगवत् ॥ कुमारो विस्मयस्मेर–स्तरलाक्षीं ददर्श तां ॥ १६ ॥ मुनिशापपरिभ्रष्टा । नूनमेषा सुरांगना ॥ मरौ कल्पलतेवेदृक् । स्त्रीरत्नं भूतले कुतः ॥ १७ ॥

इत्थं तद्रूपमूढात्मा । यावदास्ते नृपांगभूः ॥ तावदाकर्ण्य सा सैन्य–तुमुलं प्रपलायिता ॥ १८ ॥ सैन्यमावास्य तत्रैव । सरस्तीरे द्रुमालिषु ॥ कुमारोऽपि स्मरावेश–परो बभ्राम तद्वनं ॥ १९ ॥ तामपश्यन् गतो दूरं । कुमारस्तरलाशयः ॥ चैत्यमेकमथैक्षिष्ट । पुरस्तात्तुंगतोरणं ॥ २० ॥ नूनमस्मिन् कुरंगाक्षी । सापि रम्या भविष्यति ॥ ध्यात्वेति नृपतेः सूनुः । प्रविवेश तदंतरे ॥२१॥ नाभेयप्रतिमां तत्र । धन्यंमन्यो विलोक्य सः ॥ अचिंतितफलं वन्य–पुष्पैर्यावदपूजयत् ॥ २२ ॥ ज्योत्स्नयेव शशी ताव–त्तया बालिकया युतः ॥ तत्र स्फारजटाभारो । वृक्षे मुनिरुपागमत् ॥ २३ ॥ इंदोऽसौ किमु वा चंद्रः । साक्षादथ मनोभवः ॥ निध्या-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यंती राजसूनु–मिति दध्यौ मुनेः सुता ॥ २४ ॥ कुमारोऽपि नमस्कृत्य । जिनं विस्मितमानसः ॥ नमश्चक्रे मुनिं सोऽपि । चिरं जीवेत्यथाशिषत् ॥ २५ ॥ पप्रच्छ च कुलं किं ते । नाम चाख्याहि मत्पुरः ॥ मागधोऽथ कुमारस्य । सर्वमस्मै न्यवेदयत् ॥ २६ ॥ कुमारोऽपि दृशौ कन्या–मुखचंद्रे चकोरवत् ॥ मुनिमाह कनी केयं । किं चैत्यं को ज्ञवानिह ॥२७॥ मुनिरूचे ततो वत्स । महतीयं कथानिका ॥ पूजां कृत्वा यावदेमि । तावत्तिष्ठ त्वमत्र ज्ञोः ॥ २८ ॥ तथेत्युक्त्वा समासीने । कुमारे मंडपांतरे ॥ तया सह प्रविश्यांत–र्देवपूजां व्यधान्मुनिः ॥ २९ ॥ कुमारस्तां कुमारी तं । वलितग्रीवमुत्सुकं ॥ धवलैर्लोचनैर्लोलै–रीक्षांचक्रे मुहुर्मुहुः ॥ ३० ॥ विहारस्योत्तरेणाथ । मुनिर्नीत्वा निजोटजे ॥ कुमारमर्घपाद्याद्यै–रर्चित्वा चेन्नमाख्यत ॥ ३१ ॥ वत्सास्ते नगरी रम्या । संज्ञिता मंत्रितावती ॥ पालयामास तां श्रीमान् । हरिषेणो धराधवः ॥ ३२ ॥ तस्य चाऽन्वयथार्थाख्या । वल्लभा प्रियदर्शना ॥ अन्वदजितसेनाख्यः । पुत्रस्तत्कुक्षिसंभवः ॥ ३३ ॥

वाहालीतोऽन्यदा ज्ञूमि–जानिः शूकलवाजिना ॥ आनिन्ये काननावन्या–ममुष्यामप-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

हत्य सः ॥ ३४ ॥ अतिदक्षतया प्लक्ष–प्रालंबं प्रावलंब्य सः ॥ गच्छतोऽपि सुते वाहा–च्छनमे-
तदवातरत् ॥ ३५ ॥ पुरस्सरेऽत्र कासारे । प्रक्षालितमुखो नृपः ॥ ननाम तापसं विश्व–भू-
तिनामकमुच्चकैः ॥ ३६ ॥ सोऽपि कच्छमहाकच्छ–वंशकेतुर्महामुनिः ॥ श्रिये जिनस्ते नाभेय
। इत्याशिषमवोचत ॥ ३७ ॥ अन्योऽन्यं कुशलोदंतं । यावत्तावूचतुः सुखं ॥ तावदाविर्बभूवे-
ह । वने सांराविणं महत् ॥ ३८ ॥ किमेतदिति साकूत–मूचुराश्रमवासिनः ॥ ममानुपद-
मार्गेण । नूनं मत्सैन्यमागमत् ॥ ३९ ॥ ज्ञात्वेति भूभृदुच्चाय । सांत्वयामास वाहिनीं ॥ त-
स्थौ च मासमेकं स । तत्रैवाराधयन्मुनीन् ॥ ४० ॥ तेनेदं कारयांचक्रे । पुण्यपाथोधिचंद्र-
माः ॥ श्रीनाभेयजिनेंद्रस्य । चैत्यमुद्दामतोरणं ॥ ४१ ॥ अथो निजपुरीं भूमि–भुजे स्वैरं
ययासवे ॥ ददौ कुलपतिस्तस्मै । मंत्रमेकं विषापहं ॥ ४२ ॥ राज्यं पालयतस्तस्या–ऽन्यदा-
सीनस्य पर्षदि ॥ राज्यदौवारिकः कश्चि–त्तमुपेत्य व्यजिज्ञपत् ॥ ४३ ॥

देवास्ति नगरी स्वस्ति–मती श्रीमंगलावती ॥ तां शशास महौजस्कः । क्षोणींद्रः प्रि-
यदर्शनः ॥ ४४ ॥ तस्य विद्युत्प्रभा जाया । यशा विद्युत्तमित्वतः ॥ तत्कुक्षिजा प्रीतिमती ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पुत्री गुणपवित्रिता ॥ ४५ ॥ दृष्टा दुष्टाऽहिना साद्य । तव ज्ञापयितुं ततः॥ प्रैषीदस्मान् दु-
तं श्रीमान् । प्रियदर्शनन्नूधनः ॥ ४६ ॥ वेगिन्निः करन्नैस्तत्र । ततो गत्वोपकारधीः ॥ च-
कार निर्विषां राज–तनयां वैनतेयवत् ॥ ४७ ॥ तामेव दत्तां तत्पित्रा । परिणीय धराधवः ॥
आगान्निजपुरीं पौर–वक्त्रवंदनमालिकां ॥ ४८ ॥ कियत्यपि गते काले । यौवनस्थं तदात्मजं
॥ निवेश्य राज्ये न्नेजाते । दंपती तापसव्रतं ॥ ४९ ॥ विश्वन्नूत्यन्निधानस्य । पार्श्वोपांते तप-
स्विनः ॥ तावाररावधतू राधा–वेधसव्रह्मकं व्रतं ॥ ५० ॥ अथास्याः पंचमे मासे। प्रीतिमत्या-
स्त्वपाकरः ॥ स्त्रीमंत्र इव तत्कालं । गर्न्नः प्रादुरन्नून्मनाक् ॥ ५१ ॥ अथो सहचरीं राजा ।
पप्रच्छावनतानन: ॥ किं ते विलोक्यते न्नङ्गे–ऽनुचितं कुलशीलयोः ॥ ५२ ॥ तयोचे पूर्वमेवा-
सी–त्तपस्यायाः परं मया ॥ नोपालक्षि कृणं लेखा । चंड्स्येवान्नमध्यगा ॥ ५३ ॥ आवामि-
हस्थौ धिक्कार्यौ । न्नविष्यावस्तपस्विषु ॥ प्रातरन्यत्र गंतव्यं । चिंतयित्वेति दंपती ॥ ५४ ॥
कपोलपालीनिऽलु–वामहस्तौ विहस्तितौ ॥ चिंताचांततमस्वांतौ । निन्यतुस्तां निशामिमौ
॥५५॥ दुष्टव्यंतरनिर्मूलो–न्मूलितागारिगेहवत् ॥ प्रातस्तपस्विन्निः शून्यं । तमाश्रममपश्यतां

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥५६॥ततो विलक्षतां प्राप्तौ । तौ विक्रीताऽवशेषवत् ॥ इतस्ततश्चिक्षिपतु–र्दंपती चपले दृशौ ॥ ५७ ॥ शीर्णपर्णं द्रुमं त्यक्त्वा । विहंगममिवाश्रमं ॥ यांतं मंदपदं वृद्धं । मुनिमेकमथैक्षत ॥ ५८ ॥ हरिषेणमुनिर्गत्वा । प्रांजलिस्तमवोचत ॥ ममाख्याहि कुतो हेतोः । शून्यमेतत्तपोवनं ॥ ५९ ॥ तेनोक्तं युवयोर्वत्स । दृष्ट्वेदं कर्म गर्हितं ॥ कुष्टिसंगमिव त्यक्त्वा । सर्वैर्जग्मे वनांतरे ॥ ६० ॥ इत्याख्याय मुनिः शीघ्रं । स जगाम यथेप्सितं ॥ हरिषेणो विषण्णात्मा । पुनराप निजोटजं ॥ ६१ ॥ निंदंतौ दंपती कर्म । निजं यतिरिव श्रियं ॥ अतीयतुश्चतुर्मासीं । तौ वत्सरशतोपमां ॥ ६२ ॥ अथ पूर्णेऽवधौ प्रीति–मती प्रसुषुवे सुतां ॥ कल्पवल्लिरिवाऽनीष्ट–फलदायकसंपदं ॥ ६३ ॥ ऋषिप्रसादात्प्राप्तेय–मिति तत्पितरौ तदा ॥ चक्रातेऋषिदत्तेति । नामधेयं सदन्वयं ॥ ६४ ॥ तन्मातरि यमातिथ्यं । प्राप्तायां सूतिरोगतः ॥ पालयित्वा पिताऽकार्षी–दष्टवर्षामिमां ततः ॥ ६५ ॥ इमां रूपवतीं मा स्मो–पश्यंतु वनेचराः ॥ पितेत्यदृश्यताहेतु । चकाराऽस्या दृगंजनं ॥ ६६ ॥ सोऽहं कुमार दाक्षिण्य–सारः सेयं च कन्यका ॥ अलक्षिता वनेऽमुष्मिं–स्तवैवाऽदत्त दर्शनं ॥ ६७ ॥ परस्परस्य पश्यंता–वृषिदत्ता-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नृपांगजौ ॥ अन्योऽन्यं दत्तवंतौ तौ । स्वात्मानं स्निग्धया दृशा ॥ ६८ ॥

विज्ञाव्याऽथ तयोर्ज्ञातं । मुनिः कुमरमन्यधात् ॥ आतिथेयमियं कन्या । तुभ्यं योग्याय जायतां ॥ ६९ ॥ प्रतिपद्य कुमारोऽपि । तथेति सुकुमारगीः ॥ सोत्सवं तामुपायंस्त । दक्षजामिव शंकरः ॥ ७० ॥ दिनानि कतिचित्तत्र । तया सार्द्धं नवोढया ॥ मालत्यामिव रोलंबः । सुखं तस्थौ नृपात्मजः ॥ ७१ ॥ जाता कुमारसंसर्गात् । सा मुग्धापि विचक्षणा ॥ पाटलावासिता मृत्सा । सौरभ्यं किमुनाश्नुते ॥ ७२ ॥ आपृच्छय स्वसुताजामातरौ वैराग्यतत्परः ॥ विवेशाग्निं मुनिः पंच–परमेष्ठिस्तुतिं स्मरन् ॥ ७३ ॥ ततो विलुठ्य भूपीठे । रुदंतीं पितृदुःखतः ॥ वल्गुभ्रां बोधयामास । कुमारोऽमृतमंजुगीः ॥ ७४ ॥ प्रतस्थे नृपपुत्रोऽसौ । यामुद्वोढुं पुरा पुरात् ॥ तां विधूय तया सार्द्धं । व्यावृत्तः स्वगृहंप्रति ॥ ७५ ॥ हरिवर्षसमानीत–बीजेन मुनिकन्यका ॥ जवाप पथि वृक्षालीं । सर्वर्तुफलशालिनीं ॥ ७६ ॥ दिनैः कतिपयैरेवं । पित्रा कलृप्तागमोत्सवः ॥ प्रविवेश विशालाक्षो । रथमर्हनपत्तनं ॥ ७७ ॥ पतिमान्या सदाचारा । विनयप्रमुखैर्गुणैः ॥ चेतांस्यावर्जयामास । सर्वेषामृषिनंदिनी ॥७८॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यौवराज्यमथाऽवाप्य । दोगुंदक इवामरः ॥ अभुंक्त विषयान् दैवं । कुमारो विदुराशयः ॥
॥ ७९ ॥ श्रीकौबेर्यामथाऽश्रावि । राज्ञा सुंदरपाणिना ॥ व्यावर्त्तत कुमारो य—त्परिणीय
ऋषेः सुतां ॥ ८० ॥ रुक्मिण्यपि तदाकर्ण्य । यौवनोन्माददुर्मदा ॥ नृपायांश्चिंतयामास । वृ-
षस्यंती नृपांगजे ॥ ८१ ॥ तयाथ मंत्रतंत्रज्ञा । कूटकोटिपटीयसी ॥ पापिनी योगिनी का-
चि—दर्थिता सुलसान्निधा ॥ ८२ ॥ कलंकमृषिदत्तायै । देहि मह्यं च तं पतिं ॥ साप्यंगीकृ-
त्य तद्वाक्यं । प्राप्ता श्रीरथमर्दनं ॥ ८३ ॥ सर्पिणीव द्विजिह्वा सा । राक्षसीव दुराशया ॥
महांधकारमासाद्य । सुलसाऽनलसाशया ॥ ८४ ॥ दत्वाऽवस्वापिनीं तत्र । निहत्यैकं च मा-
नवं ॥ कुमारमंदिरेऽन्यागा—दुष्टवृत्तिरिवांगिनी ॥ ८५ ॥ वक्त्राब्जमृषिदत्तायाः । सुप्तायाः प-
त्युरंतिके ॥ शोणितेनाऽरुणं चक्रे । धिगू दुष्टाया दुरात्मतां ॥ ८६ ॥ तस्याश्चोत्तीर्षके न्यस्य ।
मांसपिंडकरंभिकां ॥ संहृत्य स्वापिनीं राज—पुत्रसौधात्पलायिता ॥ ८७ ॥ प्रातर्विपन्नमालो-
क्य । नरं तस्य परिच्छदः ॥ चक्रे कोलाहलं तेन । कुमारोऽपि व्यबुध्यत ॥ ८८ ॥ ज्ञातोदंत-
स्तदा वीक्ष्य । प्रियां रक्तारुणाननां ॥ मांसपिंडोपधानां च । चित्ते शंकामिति व्यधात् ॥८९॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

परासुः श्रूयते कश्चि–दीदृगेषापि दृश्यते ॥ हहा किं राक्षसी प्राण–क्लेशना मम संज्ञ-
वेत् ॥ ९० ॥ नेदृक् संज्ञाख्यतेऽमुष्या–मिदं चात्र विलोक्यते ॥ विलोक्येति प्रियां सद्यो ।
जीजागरदनल्पधीः ॥ ९१ ॥ सुप्तोत्थितामथोवाच । देवि पृच्छामि किंचन ॥ गोपायसि न चे-
त्कांते । तयोक्तं श्रुतमुच्यतां ॥ ९२ ॥ प्रियेऽत्र पुरुषो रात्रौ । श्रूयते मारितोऽधुना ॥ उपधा-
नं समांसं ते । मुखं चाऽसृग्विगर्हितं ॥ ९३ ॥ तत्त्वं किं राक्षसी नेऽहे । ज्ञात्वापि मुनिपुत्रि-
का ॥ इत्थं प्रत्यक्षमालोक्य । कोऽपि ज्ञानमुदीक्षते ॥ ९४ ॥ सापि पत्युर्वचः श्रुत्वा । स्वं च
दृष्ट्वा तथाविधं ॥ ज्ञातज्ञाता कातराक्षी । कुमारमिदमाख्यत ॥ ९५ ॥ एतत्पुनरसंज्ञाख्यं ।
वक्तुं वाचापि न क्षमा ॥ केनचिद्वैरिणाऽचेष्टि । पूर्वकर्मानुज्ञावतः ॥ ९६ ॥ यदि वा स्वा-
मिपादाना–मप्रतीतिः प्रगल्भते ॥ तदा निगृह्यतां शीघ्रं । सर्पदष्टप्रतीकवत् ॥ ९७ ॥ कुमारो-
ऽपि कृपांभोधि–र्विवेकी तामथाख्यत ॥ नेऽहे जानामि निर्दोषां । ह्रितीयेंदुकलामिव ॥ ९८ ॥
वदन्निति खलास्यानां । मुद्गणाय नृपांगजः ॥ तन्मुखं क्षालयामास । स्वयं पीयूषवर्षि सः ॥
॥ ९९ ॥ प्रत्यहं सेन्नमाधत्ते । कुमारश्च व्यपोहति ॥ सद्यः प्राज्ञातिको वायु–रवदद्यायकणा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

निव ॥ १ ॥ अन्यदा तदुर्दंतश्चः । सकोपः प्राह भूधवः ॥ रे रे दुर्मंत्रिणश्चिंता । युष्माभिर्न विधीयते ॥ २ ॥ नित्यं नरैकसंहारो । भवद्भयमुपेक्षितः ॥ वर्द्धमानो व्याधिरिव । ज्ञेयः सर्वैकषः खलु ॥ ३ ॥ तैरूचे विहिता एव । वयं वर्त्तामहे परं ॥ न मारिर्मानवी देव । त्वत्पुरे मांत्रिकी यदि ॥ ४ ॥ न साऽस्मज्ञोचरे किं तु । पुरात्पाखंडिनोऽखिलाः ॥ निर्वास्यंतामितो नूनं । शांतिः संज्ञाव्यते ततः ॥ ५ ॥

इति तैः प्रेरितो राजा । सर्वदर्शिननः पुरात् ॥ मुक्त्वा जैनमुनीन् दूरं । निर्वासयितुमादिशत् ॥ ६ ॥ अत्रांतरे दुराचारा । सुलसा कलुशाशया ॥ नरेंऽमिदमाचष्ट । सा विद्वन्मानिनी रहः ॥ ७ ॥ देवाद्य कश्चिदस्वप्नः । स्वप्ने मामिदमाख्यत ॥ यदद्य नृपतिः पाखंमिनो निर्वासयिष्यति ॥ ८ ॥ तन्नेषां भवती गत्वा । निरागस्त्वं निवेदयेः ॥ पीते पयसि मार्जार्या । किं ताड्यः सैरिभार्भकः ॥ ९ ॥ वनाहताया राक्षस्या । वध्वा एव नरेशितुः ॥ इदं च चेष्टितं ज्ञेय—मित्यादिश्य तिरोऽभवत् ॥ १० ॥ यदि चास्मिन्नसंज्ञाव्ये । संशयेत्पृथिवीपतिः ॥ तदद्य कौतुकमिदं । स्वयमेव विज्ञाव्यतां ॥ ११ ॥ ततो विसृज्य तां राजा । तस्यां

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

निशि निजांतिके ॥ स्वीयमाशाययत्पुत्रं । चराश्चोपवधूं न्यधात् ॥ १२ ॥ दध्यौ कुमारोऽनु-
न्मील–न्निद्रमुन्मुद्रिताऽरतिः ॥ अद्य मद्वल्लभादोषो । ध्रुवमाविर्भविष्यति ॥ १३ ॥ एकतो ज-
नकादेशो–ऽनुल्लंघ्योऽयं ममापतत् ॥ अन्यतश्च प्रियादुःखं । तदिदं संकटं महत् ॥ १४ ॥ इ-
तश्च सुलसा चित्त–कालुष्या तत्तथाऽकरोत् ॥ चरैः प्रातस्तथाभूतां । वधूं राजा ददर्श च ॥
॥ १५ ॥ अथ निर्भर्त्सयामास । सुतं कोपपरो नृपः ॥ जानन्नपि प्रियां जातु–धानीं धाम्नि
दधासि रे ॥ १६ ॥ रे रे क्रूर दुराचार । मुंचाग्रं राक्षसीपते ॥ त्वया कुंदेंदुसंकाशं । कलं-
कितमिदं कुलं ॥ १७ ॥ नत्वा प्राह कुमारोऽपि । तस्यामिदमसंभवि ॥ मा कुपः किंतु दु-
ष्टस्य । कृत्यं जानीहि कस्यचित् ॥ १८ ॥ कोपाटोपस्फटाभीमो । भूभुजंगोऽब्रवीत्पुनः ॥
यदि प्रत्येषि नो मूढ । तदा गत्वा विलोकय ॥ १९ ॥ कुमारोऽपि नृपादेशा–न्मंदीभूतमुख-
श्रविः ॥ गत्वा म्लानमुखीं भार्यां । दृष्ट्वा मधुरमब्रवीत् ॥ २० ॥ कर्मण्युपस्थिते प्राच्ये । सु-
वाणि करवाणि किं ॥ त्वामाह राक्षसीं काचि–द्योगिनी नृपतेः पुरः ॥ २१ ॥ स्वयं च तादृ-
शीं प्रात–रद्य त्वां दृष्टवांश्चरैः ॥ न जाने किमतः कर्म–वशतस्ते भविष्यति ॥ २२ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अथो महीपतिर्दूरं । मत्सरव्याप्तमानसः ॥ निहंतुं वधकेन्यस्तां । केशैराकृष्य दत्तवान् ॥ २३ ॥ आदिदेश च दुष्टैषा । भ्रामं भ्रामं पुरेऽखिले ॥ नीत्वा पितृवने मार्या । व्याघ्रिर्दुष्ट-राक्षसी ॥ २४ ॥ नृपात्मजोऽपि तद्दुःखा-न्निर्मिमाणः स्वघातितां ॥ नियंत्र्य स्थापितः पि-त्रा । गलद्बाष्पविलोचनः ॥ २५ ॥ अथ दंभसमालंबि-सूर्पखंभातपत्रिणीं ॥ लुप्तकेशशिखो-पांत-बद्धश्रीफलमालिकां ॥ २६ ॥ लंबमानाऽरिष्टपत्र-स्रगालिंगितकंधरां ॥ मषीलिप्तमुखां चूर्ण-चित्रांगीं खरवाहिनीं ॥२७॥ पुरस्ताद्वाद्यमानोरु-काहलाशृंगझिंझिमां ॥ तां सतीं व्या-मयामासुः । पुरांतर्दंडपाशिकाः ॥ २८ ॥ कुलकं ॥ पौरैर्हाहारवैः कैश्चि-दन्यैर्बुंबारवोद्भुरैः ॥ विलोक्यमानां तां निन्यु-र्दुष्टाः पितृवनावलीं ॥ ३० ॥ वारुणीसंगतः क्लीव । इव मुक्तांबरे रवौ ॥ पतिते जलधौ ध्वांतैः । खलैरिव वितस्तरे ॥ ३१ ॥ एकस्तेषु घृणामुक्तः । स्मर क्रू-रे स्वदैवतं ॥ ब्रुवन्नित्यसिना याव-त्प्राहरत्तां सतींप्रति ॥ ३२ ॥ तावन्नयन्नवाऽतुङ्ग-मूर्ज्जया पतितां क्षितौ ॥ मत्वा मृतामिति त्यक्त्वा । सत्वरं स्वगृहं ययुः ॥ ३३ ॥ बोधिता पवनैः शीतैः । दृष्ट्वा शून्यं तदास्पदं ॥ साऽनेशद्वागुरामुक्त-मृगीनाशं चलेक्षणा ॥ ३४ ॥ विन्ध्यती-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तस्ततो वीक्ष्य । विजनं प्रातरंगमा ॥ रुरोद रोदसीकुक्षिं । पूरयंती प्रतिस्वनैः ॥ ३४ ॥ हा तात चेत्तदानीं त्वां । नाऽमुंचं हंत दुर्मतिः ॥ अज्ञविष्यं कथंकारं । तदेतदुःखन्नाजनं ॥३५॥ यत्कृतं दुःकृतं कर्म । ज्ञवता पूर्वजन्मनि ॥ रे जीव तद्विपाकेन । कलंकोऽयं तवाऽज्ञवत् ॥ ॥३६॥ हा ज्ञर्त्तर्दुःखगर्त्तातः–पतितां वृरुगामिव ॥ पाहि साहसधीर स्वां । वल्लज्ञां प्रियवत्सल ॥३७॥ विलप्येति तनूकृत्य । शोकं सा दक्षिणोन्मुखी ॥ चचाल मंदचारेण । पितुराश्रमसंमुखं ॥ ३८ ॥ स्वहस्तोप्ततरुश्रेणी–दर्शिताध्वा तपोवनं ॥ पितुर्जगाम दर्ज्ञाग्र–पाद्यमानपदा सती ॥ ३९ ॥ स्मशानं पितुरालोक्य । स्मृत्वा स्नेहं रुरोद च ॥ हा तात क्वासि दुःखिन्या । देहि मे निजदर्शनं ॥ ४० ॥ पुरा पुरमिवेदं मे । पितुरासीत्तपोवनं ॥ सांप्रतं दुःखदग्धाया । जातं तद्दहनोपमं ॥ ४१ ॥ अथ सा मानसे शोकं । स्तोकीकृत्य तदैव च ॥ तपस्विनीव तत्राऽस्था–त्कंदमूलफलाहृतिः ॥ ४२ ॥ पतिव्रताऽन्यदा दध्या–वहमेकाकिनी वने ॥ कथं स्थाता सुखं मार्ग–कर्कंधुरिव सर्वदा ॥ ४३ ॥ शीलं च योषितामत्र । परलोके च सिद्धिदं ॥ केनोपायेन तत्पाल्य–मम्लानं माल्यवन्मया ॥ ४४ ॥ आ ज्ञातं विद्यते तात–दर्शिता परमौष-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

धी ॥ यत्प्रभावववशान्नारी । नररूपत्वमभुते ॥ ४५ ॥ कर्णे पवित्रिकां क्षिप्त्वा । तया च पुं-
स्त्वमाप्य सा ॥ पूजयंती जिनं तस्थौ । सुखेन मुनिवेषभाक् ॥ ४६ ॥ संयतात्मा कुमारोऽ-
पि । वल्लभाविरहाकुलः ॥ अस्थान्मुषितसर्वस्व । इव राज्येऽपि शून्यधीः ॥ ४७ ॥ सुलसा
कृतकृत्या सा । हताशा जितकासिनी ॥ रुक्मिणीं तोषयामास । जागहत्येव चंडिकां ॥४८॥
अथाभिमानी कौबेरी–पतिर्वाचाटशेखरं ॥ दूतं संप्रेषयामास । तदा हेमरथंप्रति ॥
॥ ४९ ॥ दूतोऽपि तत्र गत्वाह । रथमर्दनभूभृतं ॥ किमत्र कारणं देव । यन्नागादत्र तेंगजः
॥ ५० ॥ तेहेव त्वरयोद्वोढुं । रुक्मिणीं प्रेषयात्मजं ॥ यतो विवेकिनः स्वामिन् । सज्जनं ना-
वजानते ॥ ५१ ॥ तद्दूतोदितमादृत्य । नृपः पुत्रं रहोऽवदत् ॥ दृश्यसे वत्स विह्वायः । किं
शश्वच्छून्यस्तब्धवत् ॥ ५२ ॥ यदिहापतितं कष्टं । पूर्वदुःकर्मनिर्मितं ॥ तद्विधूय ध्रुवं धीरा ।
धुर्याः स्युः सर्वकर्मसु ॥ ५३ ॥ तत्त्वं मदुपरोधेन । कौबेरीपतिनंदिनीं ॥ परिणेतुं प्रयाणेन ।
वत्स प्रीणय मन्मनः ॥ ५४ ॥ पितुराज्ञामवज्ञातु–मनन्निङ्गतया च सः ॥ चचाल सैन्यभा-
रेण । कंपयन् पृथिवीतलं ॥ ५५ ॥ तत्तपोवनमासाद्य । क्रमेण कुमराग्रणीः ॥ ऋषिदत्ताम-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नुस्मृत्य । विषादादित्यचिंतयत् ॥ ५६ ॥ तद्वनं तदिदं चैत्यं । तत्सरस्तेऽग्र पादपाः ॥ यत्राहं स्नेहपूर्णस्तां । पर्यणैषं सुलोचनां ॥ ५७ ॥ ममाद्य तदिदं सर्वं । तां विनाऽजनि दुःखदं ॥ अव्यवस्थस्वप्नावेन । हा किं घातस्त्वया कृतं ॥ ५८ ॥ शोचन्निति जगामायं । श्रीमन्नाभेयमंदिरं ॥ पुस्फोर दक्षिणं चक्षु–स्तदाऽस्य प्रियसूचकं ॥ ५९ ॥ दध्यौ च निष्फलं नून–मिदं मे क्वास्ति सा प्रिया ॥ अग्रेवेदं वरं चैत्यं । पुरापि प्रियदर्शनं ॥ ६० ॥ इत्यादि ध्यायति स्मेर–विस्मयो यावदेषकः ॥ ऋषिदत्तामुनिस्ताव–त्पुष्पाण्यस्मै समर्पयत् ॥ ६१ ॥ प्रियाभ्रममस्पृशा सोऽपि । दृशा पश्यन्नमुं मुदा ॥ पुष्पमालां कराग्रस्थ । सत्यंकारमिवाऽग्रहीत् ॥ ॥ ६२ ॥ चेतसा चिंतयामास । मुनिर्गूढाकृतिस्तदा ॥ प्रतस्थे मत्प्रियो नून–मुद्वोढुमथ रुक्मिणीं ॥ ६३ ॥ जिनं नत्वा कुमारोऽपि । समादाय सहैव तं ॥ निजां पटकुटीं नीत्वा–ऽनर्च वस्त्राऽशनादिभिः ॥ ६४ ॥ पप्रच्छ च कदाऽमुष्मिं–स्त्वमायासीर्वने कुतः ॥ तदिदं निजकोदंतं । निवेदय मुने मम ॥ ६५ ॥ कुर्वाण इव दंतद्यु–च्छाजैरस्यैव मंगलं ॥ मुनिरप्याख्यदत्रासी–दृषिणो मुनिः पुरा ॥ ६६ ॥ तस्याऽभूदृषिदत्ताख्या । कन्या प्राणैकवल्लभा ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तामुद्वाह्य गतः कोऽपि । राजसूनुर्निजं पुरं ॥ ६७ ॥ प्रविश्य मुनिरप्यग्रौ । देवन्नूवमथाऽसदत् ॥ भ्रामं भ्रामं भुवमहं । तदैवात्र समागमम् ॥ ६८ ॥ अतिक्रांतानि वर्षाणि । पंच मेऽत्रैव तिष्ठतः ॥ सफलान्यद्य जातानि । कुमार तव दर्शनात् ॥ ६९ ॥ कुमारोऽप्याह सानंदं । मुने त्वां पश्यतो मम ॥ दृष्टिर्न तृप्यति स्थूल–स्थलीव जलवृष्टिभिः ॥ ७० ॥

तेनाप्यूचे न्नवेदेव । कोऽपि कस्यापि हर्षकृत् ॥ रवौ पद्मानि मोदंते । शशांके कैरवाणि च ॥ ७१ ॥ सोपरोधमथोवाच । मुनिं हेमरथात्मजः ॥ त्वत्प्रेमशृंखलेनैव । बद्धं मेऽस्ति मनोऽधुना ॥ ७२ ॥ ममास्त्यग्रे तु गंतव्यं । तत्समेहि मया समं ॥ वलमानस्तु कुर्यास्त्वं । यथा स्वैरमिहाश्रमे ॥ ७३ ॥ अथाह मुनिरत्रार्थे । कर्त्तव्यो देव नाग्रहः ॥ दूषितो राजसंसर्ग । ऋषीणां सर्वथा यतः ॥ ७४ ॥ तं तथाऽन्यर्थयामास । कुमारः सपरिच्छदः ॥ ऋषिदत्तामुनिर्मेने । साऽमागमनं यथा ॥ ७५ ॥ अथाऽस्ताद्रिशिलान्नग्न । इव पक्वफले रवौ ॥ तैरिव संध्याभ्रै । रंजिताः सकला दिशः ॥ ७६ ॥ ततः सप्तर्षियुक्तोऽपि । ऋषिदत्तामहामुनेः ॥ न्यंचत्करो नंतुमिव । समागाद्यामिनीपतिः ॥ ७७ ॥ कृतसांध्यविधी प्रीति–गोष्टीसु-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

खितमानसौ ॥ निन्यतुस्तौ निशामेक–पल्यंकतलशायिनौ ॥ ७८ ॥ क्रमेण प्राप कौबेरीं । मुदितस्तत्पतिस्ततः ॥ प्रवेशोत्सवमातेने । पौरोत्तंन्नततोरणं ॥ ७९ ॥ ज्योतिरादिष्टलग्नेऽथ । समृद्धिजितवासवः ॥ रुषिदत्तापतिर्जज्ञे । तत्पाणिग्रहणोत्सवी ॥ ८० ॥ तत्रैवाऽस्थापयद्राजा । कुमारं कतिचिद्दिनान् ॥ अन्यदा रुक्मिणी प्राह । पतिं विस्रब्धसंभृता ॥ ८१ ॥ कीदृशी रुषिदत्ता सा । स्वामिन्नासीत्तपस्विनी ॥ अहल्येव सुरेंद्रस्य । या ते चित्तमरंजयत् ॥ ॥ ८२ ॥ साऽश्रुदृष्टिः कुमारोऽपि । तां जगाद सगद्गदं ॥ विश्वत्रयस्त्रियो मन्ये । तस्याश्चरणरेणवः ॥ ८३ ॥ नवादृशोऽपि जायंते । हहा तद्विरहे प्रियाः ॥ क्षारकूप्यपि हर्षाय । नीरसे मरुमंडले ॥ ८४ ॥ लसत्कोपा ततो गोप–दुहिता निजपौरुषं ॥ सर्वं सहर्षमाचख्यौ । योगिनीप्रेरणादिकं ॥ ८५ ॥ रुषिदत्तामुनिश्चत्रं । तत् श्रुत्वा रुक्मिणीवचः ॥ स्वकलंकाऽपनोदेन । मुमुदे जानकी यथा ॥ ८६ ॥ इति तद्गिरमाकर्ण्य । कुमारोऽप्यरुणेक्षणः ॥ दधिनांरुक्षिप्तमुखीं । शुनीमिव ततर्ज तां ॥ ८७ ॥ धिक् त्वां पापीयसीं क्रूरां । धिक् त्वां तत्प्राणघातिनीं ॥ ययाहं पातितो दुःख–जलधौ दुष्टचेतसा ॥ ८८ ॥ नवत्याऽऽत्महितं कर्तुं–

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

कामया दुष्टवामया ॥ लोकद्वयविरुद्धं हा । चेष्टितं नरकातिथि ॥ ८९ ॥ निर्न्नत्स्येति महा-दुःख–न्नाराक्रांतो निरस्य तां ॥ कारयित्वा चितां गेहे । यावदुन्नति न्नूपन्नूः ॥ ९० ॥

तावदन्येत्य कौबेरी–पतिर्धृत्वाऽथ तं करे ॥ जनाश्च वारयंतिस्म । परितः साऽश्रुलोच-नाः ॥ ९१ ॥ कस्यापि वचसा याव–त्कुमारो न निवर्त्तते ॥ ऋषिदत्तामुनिस्तावद् । द्युतमे-त्य जगाद तं ॥ ९२ ॥ कुमार जगदाधार । विस्मृतं तव किं नु तत् ॥ तदानीं न्नवताऽवा-चि । यत्समानयता वनात् ॥ ९३ ॥ स्त्रीमात्रहेतवे किं वा । म्रियंते त्वादृशा अपि ॥ किं च यद्दत्तन्ना सेय–मकृता तेऽस्ति रत्नन्नूः ॥ ९४ ॥ मृतस्य वत्तन्नासंग–वार्त्तापि खलु दुर्ल-न्ना ॥ कुतोऽपि जीवतोऽवश्यं । मिलिष्यत्येव सा तव ॥ ९५ ॥ ऊचे कुमारः शिशुवत् । किं खेलयसि मां मुने ॥ न कोऽपि दुःखी जायेत । मृता अपि मिलंति चेत् ॥ ९६ ॥ मा शंकिष्टा महासत्त्व । सत्त्वेनाऽनेन तेऽधुना ॥ जीविष्यति ध्रुवं सार्या । सत्त्वं चिंतामणिर्यतः ॥ ९७ ॥ श्रुत्वेति पुनराहस्म । कुमारः स्फारलोचनः ॥ किं मुने क्वापि दृष्टा सा । श्रुता वा कथयैकदा ॥ ९८ ॥ ज्ञानेन जाने न्नो येन । मुनयो ज्ञानदृष्टयः ॥ यमधामस्थिता न्नत्र ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वल्लभा सुखमस्ति ते ॥ ९९ ॥ कथमेतीति पृष्टेन । तेनोक्तं देव तत्पदे ॥ धृत्वाऽऽत्मानं प्रहिष्यामि । स्वमित्रार्थे वधूं सतीं ॥ १०० ॥

स प्रत्याशमथ प्राह । तत्किं मित्र विलंबसे ॥ कात्र मे दक्षिणा देव । हितमाचरतस्तव ॥ १ ॥ त्वयाऽवर्जितमेवास्ति । पुरापि मम मानसं ॥ अधुनात्मापि दत्तस्ते । मित्रार्थे किं न दीयते ॥ २ ॥ मुनिरूचे विहस्याथ । त्वदात्मास्तु त्वदंतिके ॥ प्रस्तावे यदहं याचे । न तत्कार्यं त्वयाऽन्यथा ॥ ३ ॥ ॐमित्युक्ते प्रविष्टोऽथ । मुनिर्जवनिकांतरं ॥ ततः कुतूहलोत्ताला । मिमेल निखिलापि पुः ॥ ४ ॥ सतीसत्त्वतपोध्यान–माहात्म्यं जयति क्षितौ ॥ इत्यादिमागधौघेषु । स्तुवत्सु ललितध्वनिं ॥ ५ ॥ पुष्पमालाकरैर्देव–दानवैर्व्योमनि स्थितैः ॥ विलोक्यमाना साकूतं । मेघांन्नः कर्षकैरिव ॥ ६ ॥ विस्मृताऽशेषकार्येण । विस्मयोल्लासचेतसा ॥ उत्तानचक्षुषा राज–कुमारेण निरीक्षिता ॥ ७ ॥ कर्णात्पवित्रिकां दूरी–कृत्य कृत्यविदग्रणीः ॥ वह्नयुत्तीर्णा सुवर्णस्य । शलाकेवोद्यतद्युतिः ॥ ८ ॥ नृपपातिकशय्यातो–ऽवतीर्णेव सुरांगना ॥ अनर्घ्यभूषणोद्दीप्रा । नीरंगीस्थगितानना ॥ ९ ॥ प्राङ्मुनेय प्रसन्नास्या । ऋषिद-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

त्ता महासती ॥ कुमारपादविन्यस्त–दृष्टिः संसदमासदत् ॥ १० ॥ कलापकं ॥ पतिव्रते जयजये–त्याशीर्वादपुरस्सरं ॥ पुष्पवृष्टिं तदा चक्रु–स्तन्मूर्ध्नि त्रिदशव्रजाः ॥ ११ ॥ रूपेण रुक्मिणीं दासीं । कुर्वाणां वीक्ष्य तां तदा !! प्रशशंसुः कुमारस्य । तस्यां रागाग्रहं जनाः ॥ ॥ १२ ॥ कौबेरीपतिरप्येतां । जामातुर्जीवनौषधं ॥ विलोक्य सहसा हृष्टः । समुद्र इव कौमुदीं ॥ १३ ॥ कुमारसहितामेता–मथारोप्य करीश्वरे ॥ नीत्वा स्वसौधे स्नानाद्यैः । सच्चकार सगौरवं ॥ १४ ॥ विलूननासिकां छिन्न–कर्णयुग्मां नृपस्तदा ॥ विमंच्य बहुधा देशा–त्सुलसां निरवासयत् ॥ १५ ॥ स्वीयां च पुत्रिकां गाढं । रूक्षाक्षरमतर्जयत् ॥ तत्रैव स्थापितस्तेन । कुमारश्च कियच्चिरं ॥ १६ ॥

अन्यदा कुमरोऽवादी–त्सशोक इव वल्लभां !! त्वत्पदे प्रहितो हंत । दुःखमास्ते सुहृन्मम ॥ १७ ॥ सस्मेरमृषिदत्ताह । मा विषीद दयानिधे ॥ मयैव विहितं सर्व–मिदमौषधियोगतः ॥ १८ ॥ किंतु मे तं वरं देहि । तदानीं यः प्रतिश्रुतः ॥ प्रसीद नाथ जामिं मे । पश्य मामिव रुक्मिणीं ॥ १९ ॥ अहो विवेकिनी तस्या–मप्यसौ करुणावती ॥ एवमस्त्विति

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तामाह । कुमारः सुकुमारगीः ॥ २० ॥ इति तद्वचसा हृष्टा । तामादूय पतिव्रता ॥ ऋषेः समक्षं मंदाक्ष–मनमद्रुक्मिणीं च सा ॥ २१ ॥ सोऽथ श्वसुरमापृच्छ्य । दयिताभ्यां समन्वितः ॥ जगाम स्वपुरं प्रीति–रतिभ्यामिव मन्मथः ॥ २२ ॥ पित्राऽप्यभ्युद्गतः प्रीत्या । कुमारः प्राविशत्पुरीं ॥ नारीनेत्रोत्पलश्रेण्या । सपुष्पप्रकरामिव ॥ २३ ॥ ज्ञातोदंतो नरेंद्रोऽथ । स्वापराधेन लज्जितः ॥ सतीचूडामणिं काम–मृषिदत्तामममन्यत ॥ २४ ॥ निवेश्य कनकरथ–मथ राज्ये जितेंद्रियः ॥ व्रतं गृहीत्वा श्रीऋषभ–चार्यपार्श्वे शिवं गतः ॥ २५ ॥ पालयन्नथ कनक–रथः पृथ्वीपतिः प्रजां ॥ क्रमेण ऋषिदत्तायां । लेभे सिंहरथं सुतं ॥ २६ ॥ वातायनस्थितोऽन्येद्यु–ऋषिदत्तान्वितो नृपः ॥ प्राप वैराग्यमालोक्य । घनवृंदं विनश्वरं ॥ २७ ॥ सद्यो ऋषभयशःसूरि–मुद्याने च समागतं ॥ आकर्ण्य सपरीवारो । नमस्कर्तुं गतो नृपः ॥ २८ ॥

श्रुत्वा तद्देशनां मोह–नाशिनीमृषिदत्तया ॥ विज्ञप्तः श्रीगुरुर्ज्ञानी । कृताञ्जलीकृतहस्तया ॥ २९ ॥ किं मया भगवंश्चक्रे । पूर्वजन्मनि दुःकृतं ॥ राक्षसीति कलंको य–दसद्भूतोऽयमापतत् ॥ ३० ॥ अथ ज्ञानदृशोवाच । गुरुर्गंभीरया गिरा ॥ भद्रे गंगापुरं नाम । पुरमत्रै-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

व भ्रारते ॥ ३१ ॥ गंगदत्ताभिधस्तत्र । राजा गंगेति तत्प्रिया ॥ गंगसेनाख्यया पुत्री । त्वं सुशीलाऽभवस्तयोः ॥ ३२ ॥ तत्र चंद्रयशा साध्वी । तत्पार्श्वे भवती पुनः ॥ ज्ञात्वा धर्ममवज्ञासी–त्तृणवद्विषयान्खलान् ॥३३॥ तदा तु व्रतिनी संगा–ऽभिधा काचित्तपस्यति ॥ तां च स्तौति जनः सर्वः । सदा दुःकरकारिणीं ॥ ३४ ॥ त्वं तु मत्सरतोऽतुष्टां । तस्याः श्लाघामसासहिः ॥ अन्याख्यानमिति प्रादा–न्मत्सरे का विवेकता ॥ ३५ ॥ निस्संगा यदियं संगा । दिवसे तप्यते तपः ॥ रात्रौ तु ग्रसते यातु–धानीव मृतकामिषं ॥ ३६ ॥ सापि प्रशमपीयूष–युता तपति सत्तपः ॥ कर्मबंधस्ततो वत्से । त्वयाऽयं समुपार्ज्यत ॥ ३७ ॥ अनालोचिततत्कर्म–विपाकेन भवावलीं ॥ भ्रांत्वा गंगापुरे भूय–स्त्वं राजतनयाऽभवः ॥ ३८ ॥ जिनदीक्षामथादाय । कृत्वा च कपटात्तपः ॥ ईशानेंऽकलत्रत्वं । प्राप्ताऽनशनमृत्युना ॥ ३९ ॥ ततश्च्युत्वा हरिषेण–नेरेंऽस्य सुताऽभवः ॥ प्राचीनकर्मलेशाच्च । कलंकोऽयमजायत ॥ ४० ॥ इत्थं वचनमात्रेण । दुःकर्म यदुपार्जितं ॥ तस्मान्न छुटति प्राणी । भवांतरशतैरपि ॥ ४१ ॥ श्रुत्वा वैराग्यकल्पद्रु–नंदनोर्वीमिमां गिरं ॥ जातजातिस्मृतिः सापि । तदशेषमबुध्यत ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ ४२ ॥ ऋषिदत्तापि तत्कर्म–ज्ञाता सूरीन् व्यजिज्ञपत् ॥ दत्त मे भगवंतो ऽाक् । दीक्षां संसारतारिणीं ॥ ४३ ॥

तद्विज्ञाय नरेंशोऽपि । विशेषेण विरागवान् ॥ गुरुमभ्यर्थयामास । दीक्षार्थं रचितांजलिः ॥ ४४ ॥ गुरुरप्याह पुण्यार्थे । युज्यते न विलंबितुं ॥ अस्मिन्नसारे संसारे । फलं खलु तपःक्रिया ॥ ४५ ॥ अथ सिंहरथं पुत्र–मभिषिच्य निजे पदे ॥ सन्मती दंपती दीक्षा–मापदाते तदंतिके ॥ ४६ ॥ खड्गधारावदत्युग्रं । चरणाचरणादृतौ ॥ मायया वर्जितं शुद्धं । चेरतुस्तौ तपोविधिं ॥ ४७ ॥ इतः शीतलतीर्थेश–जन्मना पावनीकृतं ॥ श्रीभद्दिलपुरं प्राप्ता–वन्यदा गुरुभिः सह ॥ ४८ ॥ समूलं तत्र निर्मूल्य । कर्मकुंजं करेणुवत् ॥ विशुद्धध्यानसंतत्या । केवलज्ञानमापतुः ॥ ४९ ॥ क्रमेण पर्यस्तसमस्तकर्म–कलंकलेशं शशिनः कलेव ॥ तत्केवलिद्वंद्वमनिंद्यवृत्तं । शिवोत्तमांगस्थितिमाप युक्तं ॥ ५० ॥

॥ इति श्रीरुद्रपल्लीयगच्छे श्रीसंघतिलकसूरिपट्टावतंसश्रीसोमतिलकसूरिविरचितायां श्रीशीलतरंगिण्यां ऋषिदत्ताकथा समाप्ता ॥ श्रीरस्तु ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अथ श्रीदवदंतीकथा प्रारभ्यते—

अस्ति स्वीकृतसद्धर्म–कौशला कोशलापुरी ॥ अयत्नाऽदर्शतां याति । यद्भ्रः सुरयोषितां ॥ १ ॥ तत्राऽरिनारीशृंगार–निषेधी निषधो नृपः ॥ यत्खड्गयष्टिः श्यामापि । प्रसूते विमलं यशः ॥ २ ॥ लावण्यसुंदरी तस्य । प्रिया लावण्यसुंदरी ॥ काष्ठतां कलयामास । वल्लकी यद्गिरा जिता ॥ ३ ॥ तयोः सूनुरभूज्ज्येष्ठो । वैरिदावानलो नलः ॥ लघुस्तु सुदुराचारः । कूबरो दुर्मदाशयः ॥ ४ ॥ इतो वैदर्भदेशश्री–मंडने कुंडिने पुरे ॥ निःसीमविक्रमो भीम–भूपतिः शास्ति मेदिनीं ॥ ५ ॥ तत्प्रिया पुष्पदंताख्या । श्वेतेभस्वप्नसूचितां ॥ प्रासूत समये पुत्रीं । लक्ष्मीरिव विदग्धतां ॥ ६ ॥ पूर्वकर्मानुभावेन । तन्नालस्थलमंडनं ॥ तदयाश्चिवादित्य–स्तिलकः सदभूरभूत् ॥ ७ ॥ षष्ठीजागरसूर्येंदु–दर्शनादेरनंतरं ॥ दवदंतीति नामाऽभूत् । तस्याः स्वप्नानुसारतः ॥ ८ ॥ विमातरोऽपि तां चंच–च्चाटुचपुटिकादिभिः ॥ स्वभावसुभगां बालां । हासयंतिस्म लीलया ॥ ९ ॥ रिंखंती क्रमतः पाद–क्वणन्मधुरनूपुरा ॥ चचालाऽस्खलितैर्धात्र्या । अवलंब्य प्रदेशिनीं ॥ १० ॥ श्रीमतां वनिता जानो–रुपरि न्य-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स्य हर्षतः ॥ कंपयंत्यः शनैरेनां । दोंदोमिन्नमनीनृतन् ॥ ११ ॥ जाग्रत्सौन्नाग्यसौरन्न्या–ऽतिक्रांता शैशवीं दशां ॥ सा जग्राह कलाः सर्वाः । सिंधुः शैवलिनीरिव ॥ १२ ॥

अन्यदा प्रतिमां हैमीं । श्रीशांतेर्न्नाविनोऽईतः ॥ वितीर्य निर्वृतिर्देवी । दवदंतीमदोऽवदत् ॥ १३ ॥ न्नवत्या पूजनीयेयं । नित्यं कल्याणकारिणी ॥ सापि तां गृहचैत्यांत–र्हृदीव निदधे मुदा ॥ १४ ॥ न्नीमजा कामन्नूमीश–पत्तनं प्राप यौवनं ॥ तत्र क्रमेणाऽवर्द्धत । सर्वांगसुन्नगाः श्रियः ॥ १५ ॥ जितो मुखश्रिया तस्याः । शशी जातः पिशाचकी ॥ तेनाद्यापि ध्रुवं न्नूत–पतिमेष निषेवते ॥ १६ ॥ अनुरूपवराऽप्राप्त्योः । सा पित्रोश्चिंतया समं ॥ वर्द्धमानातिचक्राम । वर्षाण्यष्टादश क्रमात् ॥ १७ ॥ ततोऽमात्यैरनुज्ञातः । श्रीन्नीमरथन्नूपतिः ॥ स्वयंवरं समारेन्ने । सुताया वरलिप्सया ॥ १८ ॥ तत्र दूतैरथाहूताः । पुरुहूतसमश्रियः ॥ समीयुः पृथिवीपाला । मराला इव मानसे ॥ १९ ॥ तदा दूतेन विज्ञप्तो । निषधोऽपि धराधवः ॥ नलकूबरपुत्राभ्यां । मंत्रितो द्रुतमागमत् ॥ २० ॥ न्नीमोऽप्यपारसत्कार–सारानावासमंरुपान् ॥ सर्वेषामर्पयामास । स वासवसमृद्धिन्नृत् ॥ २१ ॥ नलं विलोक्य कंदर्प–कु-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

लं कुंडिनवासिनः ॥ नूपालान् कलयामासुः । शेषान् पोटगलानिव ॥ २२ ॥

अथ हेममयस्तंभ–शतं सिंहासनान्वितं ॥ नीलाश्मकुट्टिमं वज्र–बद्धसोपानपंक्तिकं ॥

॥ २३ ॥ शिल्पिभिः कल्पयामास । श्रीमान् भीममहीपतिः ॥ सुधर्मायाः सधर्माणं । श्री-

॥३५२॥ स्वयंवरमंडपं ॥ २४ ॥ बभुः स्तंभेषु पांचाल्य–स्तत्र सर्वांगभूषिताः ॥ सुरांगना इव प्राप्ता–

स्तत्कौतुकदिदृक्षया ॥ २५ ॥ अथ रत्नान्युपादातुं । भीमजाऽलंक्रियेच्छया ॥ अन्यार्थित इव

क्ष्मापैः । सूर्यो रत्नाकरेऽविशत् ॥ २६ ॥ न हि लप्स्यामहे दृष्टु–मपि भीमभुवं वयं ॥ इतीव

श्यामतां भेजुः । स्थावरा भूभृतस्तदा ॥ २७ ॥ अथ राज्ञस्तदाकर्ण्य । मिलितांस्तत्र भूरि-

शः ॥ सुधावर्ष्यपि राजाऽगा–त्तारहारैरलंकृतः ॥ २८ ॥ दिष्ट्या प्रज्ञाते दृष्टव्या । दृष्ट्याऽ-

स्माभिर्विदर्भजा ॥ ध्यायतामिति भूपानां । निद्रा रुष्टेव नाऽययौ ॥ २९ ॥ आमुच्यमानाऽ-

लंकार–तेजोभिरिव हीलिता ॥ सूर्पणखेव रामेण । द्रुतं रात्रिः पलायिता ॥ ३० ॥

दवदंत्या मुखस्याग्रे । मंडितस्य विभूषणैः ॥ लज्जिष्ये निर्वसुः प्रात–रितीवेंदुः पला-

यितः ॥ ३१ ॥ अन्यार्थितेनेव मही–भृद्भिर्नामसनाभिभिः ॥ स्वशीर्षे दर्शितं सूर्य–मंडलं पू-

॥३५२॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

र्वन्नूनृता ॥ ३२ ॥ उदिते च सहस्रांशौ । पद्मानीव जलाशये ॥ राजन्यकमुखांभोज–श्रेणी स्मेरत्वमासदत् ॥ ३३ ॥ अनर्घ्यवस्त्रालंकारैः । सर्वांगीणविभूषिताः ॥ धावंतिस्म महीपालाः । सत्वरं मंडपंप्रति ॥ ३४ ॥ रत्नसिंहासनासीना । मंचेषु व्यरुचन्नृपाः ॥ कौतुकादिव संप्राप्ता । निखिलद्वीपपूषणः ॥ ३५ ॥ अथौचित्यतया कृत्ता–ऽकल्पौ कल्पतरू इव ॥ स्वकुमारौ पुरस्कृत्य । कुमाराविव नाकिनां ॥ ३६ ॥ प्रातःकृत्यानि निर्माय । बंदिभिर्घुष्टमंगलैः ॥ गत्वा स्वयंवरे मंच–मारोहन्निषधाधिपः ॥ ३७ ॥ युग्मं ॥ इहत्यपरलोकश्री–पुंजाविव तदंगजौ ॥ विलोक्य नैम्यां नृपानां । निराशमभवन्मनः ॥ ३८ ॥ विशेषेण कलापुंज–मिव वीक्ष्य नलं नृपाः ॥ स्वस्यापि विस्मरंतिस्म । विवाहाशास्तु दूरतः ॥ ३९ ॥ अथ प्रसाधयामासु–रनवद्याः पुरंध्रयः ॥ स्वयंवरं समानेतुं । दवदंतीमनेकधा ॥ ४० ॥ पादयोः शुशुभे तस्याः । सरसो यावकश्रवः ॥ अनुराग इव क्ष्मोणी–भुंजां लग्नोऽयमंगवान् ॥ ४१ ॥ प्रशस्तिरिव कंदर्प–भूमिपालस्य जाग्रती ॥ कपोलयोर्बभौ तस्याः । कस्तूरीपत्रवल्लरी ॥ ४२ ॥ रराज जूटके तस्या । मल्लिकामाल्यमुज्ज्वलं ॥ नक्षत्राणीव संप्रापु–र्मुखचंद्रमिवासितुं ॥४३॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

कर्णयोः कुंडले तस्या । रत्नोन्मिश्रे रराजतुः ॥ स्वर्नाणुन्नयसंभ्रांतौ । चंद्रसूर्याविवागतौ ॥ ॥ ४४ ॥ नेत्रयोरांजनी रेखा । रेजे नृंगीव पद्मयोः ॥ कल्लोलाविव गंगाया । वस्त्रे च परिधापिते ॥ ४५ ॥ मंक्ति हृष्टचेटीन्नि–भ्रमरीन्निरिवाजिनी ॥ वज्रमौक्तिकवैमूर्य–प्रायन्नूषणन्नूषिता ॥ ४६ ॥

अथोलूलुसगन्नांन्नि–र्गायंतीन्निः पुरंध्रीन्निः ॥ श्वेतातपत्रसंछन्ना । परितो धूतचामरा ॥ ॥ ४७ ॥ नरयाना स्त्रजा युक्ता । स्मरपाशायमानया ॥ स्वयंवरमवातारी–त्कुमारी श्रीरिवांगिनी ॥ ४८ ॥ चंद्रलेखामिवोद्वीक्ष्य । नैर्मी नूमीशसागराः ॥ संक्षुन्य विविधाश्चक्रु–श्चेष्टाः शृंगारदीपिकाः ॥ ४९ ॥ वेत्रिण्यथ पुरोन्नूता । न्नारतीव वपुष्मती ॥ वंशशौर्यनयाचारान् । वर्णयामास नून्नृतां ॥ ५० ॥ सोऽयमंगपतिश्चंग–कीर्त्तिपूरितन्नूतलः ॥ यदंगविजितः काम–मनंगोऽनंगतां गतः ॥ ५१ ॥ देव्ययं मगधाधीशो । धामधामप्रन्नानिधिः ॥ कलिंगेशोऽयमुल्लासि–हारतारयशोन्नरः ॥ ५२ ॥ अमी च लाटकर्णाट–मेदपाटनरेश्वराः ॥ नत्तरोत्तरतेजः श्री–शौर्यगांन्नीर्यन्नूषिताः ॥ ५३ ॥ हंसीमिव स्थालाजेषु । दृष्ट्वा तां तेष्वनादृतां ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्रतीहारी पुनः प्राह । सानंदं नीमनंदिनीं ॥ ५४ ॥ पुरोऽयं निषधाधीशो । देवि दैवतवैन्नवः ॥ दस्राविव सुतावेता–वमुष्य नलकूबरौ ॥ ५५ ॥ दृष्टिः पुष्पंधयीवास्या । ब्रमंती राजकानने ॥ पुन्नाग इव पुन्नागे । नले चिरमरज्यत ॥ ५६ ॥ उदंचदुच्चरोमांचा । चेतस्येवमचिंतयत् ॥ श्लाघ्यो नृपेष्वयं नूनं । कल्पद्रुरिव शाखिषु ॥ ५७ ॥ धात्रा स्वसृष्टिसर्वस्व–मयमेव कृतो ध्रुवं ॥ अन्वमुं सर्वनृपाला । माणिक्यानीव कौस्तुन्नं ॥ ५८ ॥ ततो नलगले क्षिप्ता । सवेपथुतया तया ॥ सुमेराविव तारावली । वरमाला व्यराजत ॥ ५९ ॥ वृतेऽथ तस्मिन् वैदर्भ्या । सस्पर्धान्नृपतीन्नलः ॥ रुरोध शत्रून्नाराच–वृष्टयवग्रहमंडलः ॥ ६० ॥

ततो निषधनीमान्यां । प्रीतान्यां च परस्परं ॥ कारितो नलवैदर्भ्यो–र्वैवाहिकमहोत्सेवः ॥ ६१ ॥ अन्योऽन्यं हस्तसंयोगे । पाणिग्रहणपर्वणि ॥ तदैक्यमिव तच्चित्ते । प्रापतुः स्वेददंन्नतः ॥ ६२ ॥ प्रदक्षिणीकृते वह्नौ । पाणिमोचनपर्वणि ॥ नलाय रत्नाश्वेन्नादि । ददौ नीमरथो नृपः ॥ ६३ ॥ अथ पुत्रवधूयुक्तं । प्रस्थितं कोशलान्प्रति ॥ अन्वगान्निषधं नीमो । मार्त्तंमभिव मंगलः ॥ ६४ ॥ पतिते व्यसनेऽपि त्वं । नूयाः पत्यनुगामिनी ॥ अनुशास्य सु-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तामिङ्गं । कुंडिनेशो न्यवर्त्तत ॥ ६५ ॥ शिक्षां शिखामिवाधाय । सती पितुरुदीरितां ॥ न-
लस्यंदनमारूढा । नवोढा त्रपया नता ॥ ६६ ॥ नवोढाविभ्रमप्रेक्षा—स्फुरत्कुतूहलो नलः ॥
कापथे चालयामास । रथं सारथिना तदा ॥ ६७ ॥ अथ प्रसिद्धवृक्षादि—प्रभकैतवतः पथि ॥
लज्जां शिथिलयामास । मुग्धाया धूर्त्तवल्लनः ॥ ६८ ॥ नलं सरागमाशंक्य । स्पर्द्धयेव रवि-
स्तदा ॥ अनुरागवतीं संध्या—मालिलिंगानुरागवान् ॥ ६९ ॥ सखीव धूर्त्ता वैदर्भ्याः । संध्या
लज्जामपाकरोत् ॥ चित्रं विकाशमापच्च । तदा नलमुखांबुजं ॥ ७० ॥ वात्सायनोक्तयुक्तिज्ञि
—स्तां नवोन्निद्रयौवनां ॥ नैषधो रमयामास । माधवीमिव माधवः ॥ ७१ ॥ अथांधकारप्रा-
चुर्यं । दृष्ट्वा सैन्यं पतत्पतत् ॥ प्रियां प्राह नलः सुप्तां । मा स्वाप्सीर्देवि जागृहि ॥ ७२ ॥
प्रिये तमोऽपनोदाय । तिलकं प्रकटी कुरु ॥ तमथोत्तेजयामास । नालमुन्मृज्य नीमजा ॥
॥ ७३ ॥ आदित्यस्येव दीप्तिर्ण । दंपती तस्य तेजसा ॥ प्रतिमास्थितमग्रेऽथ । मुनिमेकमप-
श्यतां ॥ ७४ ॥ गंडकंडूत्यपाकृत्यै । घृष्टं काननकुंजिना ॥ भ्रमद्भिर्भ्रमरैर्ज्ञात्वा । समदं चाऽ-
नमन्नलः ॥ ७५ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तदा विज्ञातवृत्तांता—स्तं नंतुं निषधादयः ॥ सर्वे समेत्य तेनोक्तां । शुश्रुवुर्धर्मदेशनां ॥ ॥ ७६ ॥ प्रणम्य देशनांते च । नैमीतिलकहेतुतां ॥ नलः प्रांजलिरप्राक्षी—त्तमाह ज्ञानवान-पि ॥ ७७ ॥ असौ व्यधत्त तीर्थेशा—नुद्दिश्य प्राग्भवे तपः ॥ तदुद्यापनके रत्न—तिलकान् प्र-ददौ सती ॥ ७८ ॥ तेनास्यास्तिलको भाले । जातो मार्त्तंडखंडवत् ॥ क्रमेण सर्वकल्याण—भाजनं च भविष्यति ॥ ७९ ॥ श्रुत्वेत्यमृतसध्रीचीं । वाचमानंदमेदुराः ॥ प्रापुः स्वराजधा-नीं शक्रं । पौरैः कृतोरुमंगलां ॥ ८० ॥ नलो नवाभिः क्रीडाभिः । क्रीडन्नव्रीडमानसः ॥ दी-नानिव दिनांश्चक्रे । कृणदाः कृणदा इव ॥ ८१ ॥ नले निवेश्य साम्राज्यं । यौवराज्यं च कू-बरे ॥ निषधो व्रतमादाय । देवभूवमथाश्रयत् ॥ ८२ ॥ त्रिवर्गसाधनव्यग्रः । सतीसहचरी-युतः ॥ श्रीनलः पालयामास । चिरं राज्यमभंगुरं ॥ ८३ ॥ क्रमेण साधयामास । भरता-र्द्धं बली नलः ॥ अभिषेकं पुनश्चक्रु—राजानोऽस्य हरेरिव ॥ ८४ ॥ तद्राज्यकामुकः क्रूरः । कू-बरः कुटिलाशयः ॥ गोमायुरिव सिंहस्य । नित्यं रंध्राणि वीक्षते ॥ ८५ ॥ नलस्तु निर्मल-स्वांतः । सह तेनैव बंधुना ॥ चक्रे द्युरोदरक्रीडां । सतां व्रीडाविधायिनीं ॥ ८६ ॥ अन्यदा बं-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

धर्मोक्तादि-विदोऽपि नलभूपतेः ॥ विरुद्धपातिनो जाता । अक्षा विषयिणामिव ॥ ८७ ॥ ग्रा-
माकरपुरादीनि । श्रीनलो हारयन्नपि ॥ विरराम न च द्यूतात् । पिपीलक इवैक्षवात् ॥८८॥
तादृक्कदाग्रहे लग्नं । पतिं मत्वा विषादिनी ॥ भीमजा स्वयमभ्येत्य । समाधुर्यमदाऽवदत् ॥
॥ ८९ ॥ किं द्यूतव्यसनं तेऽद्य । महेंद्रसमवैभव ॥ स्वाधीने पयसि स्वामिन् । कांजिके र-
मते नु कः ॥ ९० ॥ मा कुर्याः कूबरायत्ता-मिमां भुवमनिंदित ॥ बकप्रवेशे जानीषे । याद-
सां का गतिर्भवेत् ॥ ९१ ॥

इत्याप्तपुरुषै राजा । भीमेनापि निवारितः ॥ न न्यवर्त्तत किं रुष्टे । दैवे स्यात्प्राणिनां
मतिः ॥ ९२ ॥ क्रमेण हारयन् दैवात् । स देहाभरणान्यपि ॥ शनैः सहावरोधेन । भीम-
जामप्यहारयत् ॥ ९३ ॥ सानंदः कूबरः प्राह । भ्रातर्मुंच महीं मम ॥ ततो नलोऽपि वस्त्रै-
क-धारी निरगमत्पुरात् ॥ ९४ ॥ उवाच कूबरः स्वैरं । दमीं दमंत्रनुयायिनीं ॥ जितासि
मयाऽसौ-मम शुश्रूंतमाश्रय ॥ ९५ ॥ पौराऽमात्यैरथाऽभ्यर्ण्य । रथमारोप्य भीमजा
॥ प्रहिता श्रीनलेनापि । रथः पश्चान्न्यवर्त्तत ॥ ९६ ॥ आपृच्छ्यमाना चेट्यादि-वर्गं श्रीभी-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मजा तदा ॥ वनावलीमिव प्रावृट् । कस्याईं नाऽकरोन्मनः ॥ ९७ ॥ हा विधे चेत्पुरापीदृं । चिकीर्षेयं तवाऽभवत् ॥ तर्हि किं विदधे क्रूर । श्रीनलो भरताऽभ्राक् ॥ ९८ ॥ यां सतीं शापशंकीव । पस्पर्श न करै रविः ॥ सा कथं पादचारेण । भैमी भूमिमभिव्रजेत् ॥९९॥ धिगमुं कूबरं क्रूरं । योऽनयोरिदमाचरत् ॥ तच्चेरुर्मध्ये नगर–मिति पौरगिरस्तदा ॥ १०० ॥ पौराऽमात्यादिभिर्याना–न्युपानीतानि भूरिशः ॥ न जग्राह नलः स्वात्मा–धारा एव हि दो-र्भृतः ॥ १ ॥ अनुव्रज्यापरान् वृद्ध–ऽमात्यपौरान् कथंचन ॥ कष्टं निवर्त्तयामास । नैषधिः सैष धीनिधिः ॥ २ ॥ दवदंतीव पद्मापि । जाता नूनं नलानुगा ॥ निःश्रीकं तत्पुरं जज्ञे । तदानीं कथमन्यथा ॥ ३ ॥ तत्तदुद्यानचारुत्वं । दर्शयन् गद्गदाक्षरं ॥ श्रांतामपि प्रियां भू-पो । मंदं मंदमचालयत् ॥ ४ ॥ न तथा मुमुदे भैमी । पूर्वमातपवारणैः ॥ यथा पटांचले मूर्ध्नि । स्वयं पत्या धृते तदा ॥ ५ ॥ स्वेदिनीं वीजयन् पत्रैः । श्रांतां संवाहयन् पदोः ॥ पि-पासुं पाययामास । तां पयः पद्मिनीपुटैः ॥ ६ ॥ अथ सत्त्वमवष्टभ्य । श्रांतामपि कदाचन ॥ पादसंवाहिनीं भैमीं। वारयामास पार्थिवः ॥ ७ ॥ जायापती फलाहारै–र्मध्यं दिनमती-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

त्य तौ ॥ सायं लतागृहे क्वापि । श्रितौ रात्रिमतीयतुः ॥ ८ ॥ तिग्मभानुकरत्रस्तै—रंधकारैरिवाश्रितां ॥ सांड्डुमामरण्यानी—मन्यदा तावुपेयतुः ॥ ९ ॥ ततः कांतारकासारे । नैमौ धौतपदो नलः ॥ दृष्ट्वा म्लानमुखीं कांता—मंतश्चित्तमचिंतयत् ॥ १० ॥ क्वेयं प्रवालसोमाला । क्व मार्गा दुःखवीचयः ॥ पुष्पैरुन्नतशोभैव । न तु स्यातामुपानहौ ॥ ११ ॥ विश्रामाय ततो भूमि—पतिः कंकेलिपल्लवैः ॥ क्वचिच्छिलातले रम्ये—ऽनल्पं तल्पमकल्पयत् ॥१२॥ मा दूयतां वपुर्नैम्या । वृंतैरितिधियानलः ॥ तत्तल्पं स्वोत्तरीयेणा—च्छादयामासिवानसौ ॥१३॥ परमेष्ठिनमस्कारं । समुच्चार्य च जंपती ॥ स्वैरं सुषुपतुर्मार्ग—श्रांतौ श्लिष्टभुजालतौ ॥ १४ ॥

अथ तन्मार्गदुःखेन । नलोऽनल इव ज्वलन् ॥ तत्कालं हिंस्रसंसर्गा—दिव क्रूरमचिंतयत् ॥ १५ ॥ कथं देवीसखः पारं । गंता मार्गमहोदधेः ॥ स्त्रियो हि स्वैरचारस्य । शृंखला इव सर्वदा ॥ १६ ॥ तदिमां शयितामेव । परित्यज्य व्रजाम्यहं ॥ प्रातर्यायादियं वेश्म । पितुर्वा देवरस्य वा ॥ १७ ॥ नाविज्ञर्तृवियोगार्त्ति—दूत्येव क्षत्रमाप्तया ॥ वैदर्भ्या लोचने तावन्निद्रया मुद्रिते रयात् ॥ १८ ॥ ततो मंदं परिरंभ—मुक्तमुन्मुक्तयत्नयं ॥ नैमीभुजलताश्लिष्ट—

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

माचकर्ष निजं भुजं ॥ १९ ॥ त्वं चिंतय नलं मुग्धे–ऽमुं च चांडालचेष्टितं ॥ यस्त्वामेकाकिनीं सुप्तां । विश्वस्तां त्यक्तुमिच्छति ॥ २० ॥ हा दैवाऽनुचितं कर्म । मम किं कारयस्यदः ॥ न लज्जितोऽसि केतक्याः । कुर्वाणोऽमेध्यदोहदं ॥ २१ ॥ अथ वस्त्रांचलं नैम्या–ऽक्रांतं नेतुमना नलः ॥ आदाय च्छुरिकां हस्ते । दध्यावश्रुप्लुताननः ॥ २२ ॥ हहा भुज महाभाग । व्यापृतोऽस्याः करग्रहे ॥ त्वमेव चास्याः सर्वांग–संभोगप्रमितातिथिः ॥ २३ ॥ तत्किं दक्षिणपाणे भो । दाक्षिण्यमपि नास्ति ते ॥ यद्वा निस्त्रिंशजातीय–संगाच्च करुणा क्व ते ।२४।

इति ब्रित्वा गलद्बाष्पः । स्वस्य चेलांचलं नलः ॥ निजासृजा पटप्रांते । वर्णानीति लिलेख च ॥ २५ ॥ वामभ्रु वामतः पंथा । वटैः कुंभिनगामुकः ॥ किंशुकैर्दक्षिणेनायं । कोशलामुपतिष्ठते ॥ २६ ॥ यत्र ते रोचते तत्र । गंतव्यं गजगामिनि ॥ अहं तु स्वमुखं क्वापि । नैव दर्शयितुं क्षमः ॥ २७ ॥ लिखित्वेति नलोऽचाली–ज्जूढदुःखतया रुदन् ॥ मुहुर्मुहुर्वलित्वाऽऽ–ऽपश्यन्नैमीमुखांबुजं ॥ २८ ॥ हा विधे चेत्त्वया नैमी । सृष्टा सर्वातिशायिनी ॥ तत्किं दुःखीकृता स्वोक्ता । न ह्येद्या हि बदर्यपि ॥ २९ ॥ प्रसद्य मयि शृण्वंतु । सर्वाः काननदेव-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ताः ॥ तथा कार्यं यथा मार्गं । वेत्स्यसौ निरुपद्रवा ॥ ३० ॥ इत्यावेद्य पुनर्जायां । पश्यन् वलितकंधरः ॥ तावद्गतो नलो यावद् । द्रुमैरागाददृश्यतां ॥ ३१ ॥ वन्यहिंस्रन्नवोऽमुष्या । मान्नूः कश्चिदुपद्रवः ॥ व्यावृत्येति नलस्तस्था–वेनां पश्यन् लतांतरे ॥ ३२ ॥ कथं न न्नस्मतां यासि । हा दुरात्मन्नडं नल ॥ इन्नमेकाकिनी यस्य । प्रिया शेते वनांतरे ॥ ३३ ॥ एवं विमृशतस्तस्य । विरराम विन्नावरी ॥ विलीनमिव तत्सर्वं । तमो नलमनोंतरे ॥ ३४ ॥ जगन्मित्रमथोदीय–मानं विज्ञाय साश्रुदृक् ॥ नलो गन्नन् पुरो ज्वाला–जटिलं वह्निमैक्षत ॥ ॥३५॥ आक्रंदान् दह्यमानानां । श्रृण्वन् वन्यांगिनां नलः ॥ मानुषीं गिरमश्रौषी–दिति तन्निकटं गतः ॥३६॥ ईक्ष्वाकुकुलपाथोधि–चंद्र विश्वैकवत्सल ॥ रक्ष मां नलराजेंद्र । दह्यमानं दवाग्निना ॥३७॥ तद्वाक्यमनुदत्ताक्षो । नलो वल्लीवनांतरे ॥ भुजंगमेकमद्राक्षी–त्स धीरमिदमाह च ॥३८॥ महानाग कथं नाम । मन्नाम ज्ञायते त्वया ॥ कथं वा मानुषीं न्नाषां । ब्रूषे सर्पोऽपि तं जगौ ॥३९॥ महान्नाग मनुष्योऽह–मन्नूवं पूर्वजन्मनि ॥ तत्संस्कारवशेनेह । न्नाषेऽयं मम मानवी ॥४०॥ अवधिज्ञानमप्यस्ति । येनाहं सकलं जगत् ॥ करस्थमिव पश्यामि । तदतो रक्ष मां नृ-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प ॥ ४१ ॥ अहमप्युपकर्त्तास्मि । तेनेत्युक्तो दयी नलः ॥ अंतर्लतावितानं स्वं । वस्त्रांचलमलंबयत् ॥ ४२ ॥ तल्लग्नममुमाकर्ष–त्कूपादिव जलं नलः ॥ तमेव चाऽदशत्सर्पः । कृतघ्न इव सज्जनं ॥ ४३ ॥ नलोऽपि पाणिनाहत्य । भूतले तमपातयत् ॥ ऊचे च भो द्विजिह्वेन । साध्वेवोपकृतं त्वया ॥ ४४ ॥ तद्विषव्यापतो भूपो । दृष्ट्वा स्वांगस्य कुब्जतां ॥ सद्यो वैराग्यमापन्नो । व्रतमादातुमैहत ॥ ४५ ॥ दिव्यमूर्त्तिमथाधाय । भुजंगोऽपि तमाख्यत ॥ तवैवाहं पिता वत्स । निषधस्तद्विषीद मा ॥ ४६ ॥ ब्रह्मलोके सुरो भूत्वा । वत्स दीक्षाप्रभावतः ॥ तद् ज्ञात्वा व्यसनं तेऽद्य । प्राप्तोऽत्र मायया ऽमुया ॥ ४७ ॥ त्वद्धितायैव जानीहि । वैरूप्यमिदमात्मनः ॥ यतस्तेऽनेन रूपेण । नोपक्षेप्स्यंति शत्रवः ॥ ४८ ॥ अद्यापि वत्स भोक्तव्यं । भरतार्द्धं त्वयाऽखिलं ॥ समये क्षापयिष्यामि । दीक्षावसरमप्यहं ॥ ४९ ॥ इदं श्रीफलमादत्स्व । तथेमां च करंडिकां ॥ सुगृहीतमिदं कुर्या–द्वत्स जीवितवत्सदा ॥ ५० ॥ स्वकीयरूपमास्थातुं । वत्साकांक्षा यदा भवेत् ॥ तदा श्रीफलमुन्मुद्य । दुकूलानि समाकृषेः ॥ ॥ ५१ ॥ ग्राह्याः करंडिकायाश्च । हाराद्याभरणोच्चयाः ॥ आमुक्ते च शरीरेऽस्मि–न्निजं रू-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पमवाप्स्यसि ॥ ५२ ॥

आदिश्येति हृयं तच्च । दत्वा देवस्तमब्रवीत् ॥ किं ते यियासितं स्थानं । वद वत्स नयामि तत् ॥ ५३ ॥ सुसुमारपुरे तात । नय मामिति चाऽवदत् ॥ तत्क्षणं तत्पुरद्वारि । स्वमथैक्षिष्ट नैषधिः ॥ ५४ ॥ पुरस्यान्निमुखं याव—द्याति स्मेरमुखो नलः ॥ अंतर्नगरमश्रौषी—त्तावत्कोलाहलं महत् ॥ ५५ ॥ किमेतदिति संभ्रांतो । यावत्तस्थौ क्षणं नलः ॥ तावन्मदात्तरुश्रेणीं । लेष्टुवत्परितः क्षिपन् ॥ ५६ ॥ प्रलयाऽनिलवत्सर्वं । विदधानो विसंस्थुलं ॥ पुरः प्रादुरभूत्तस्य । मत्तदंती कृतांतवत् ॥ ५७ ॥ युग्मं ॥ कस्मिन्नपि तमुन्मत्तं । स्ववशीकर्तुमक्रमे ॥ प्रजासंहारमुत्पश्य—न्नूर्ध्वबाहुर्नृपोऽवदत् ॥ ५८ ॥ भोभोः शृण्वंतु यः कश्चि—देनं वश्ययितुं क्षमः ॥ तस्य निःशेषसंपत्ति—पूरणे प्रभवाम्यहं ॥ ५९ ॥ श्रुत्वेति श्रीनलो जाग्रद्विक्रमोत्कलिकानलः ॥ दधावे गजमुद्दिश्य । पंचास्य इव वेगतः ॥ ६० ॥ मा मा म्रियस्व कुञ्जेति । वार्यमाणोऽपि पुर्जनैः ॥ नलोऽनिलगमाचष्ट । नागमाहत्य लेष्टुना ॥ ६१ ॥ रेरे दुरात्मन् मातंग । मावधीः स्त्रीशिशूनमून् ॥ अयमग्रेसरस्तेऽहं । मदोन्माथैककैसरी ॥ ६२ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ततः क्रोधांधमुन्मत्तं । धावंतं गजनायकं ॥ चिरं स खेलयामास । कुब्जः कुब्जगतिक्रमैः ॥ ॥ ६३ ॥ चिरं खिन्नस्य तस्याग्रे । स्वोत्तरीयं स चाऽक्षिपत् ॥ तत्रापि दत्तदंतस्य । स्कंधमस्यारुरोह च ॥ ६४ ॥ सांत्वयित्वा चिरं कुंभे । स्वकरास्फालनादिभिः ॥ दंतावलं नलो निन्ये । तं तदालानमुद्धणं ॥ ६५ ॥ निमृश्य तमसामान्यं । दधिपर्णमहीपतिः ॥ रत्नमालां गलेऽमुष्य । क्षेपयामास सादरं ॥ ६६ ॥ निबध्य गजमालाने । सह पौरजयारवैः ॥ आगत्य दधिपर्णस्य । समीपेऽसावुपाविशत् ॥ ६७ ॥

तस्मै दत्वा दुकूलानि । सर्वांगाभरणानि च ॥ सगौरवमथाऽपृच्छ–द्राजा वंशकुलादिकं ॥ ६८ ॥ कुब्जः प्राह जन्मभूमिः । कोशला मम भूपते ॥ सर्वः स्वजनवर्गोऽपि । तत्रैव क्षेममश्नुते ॥ ६९ ॥ अहं च सूपकारोऽस्मि । हुंडिको नलभूपतेः ॥ तत एव विदामासं । प्रीतितः सकलाः कलाः ॥ ७० ॥ किं चान्यद्भूपते सूर्य–पाकां रसवतीं भुवि ॥ स एव वेत्ति किंचाहं । तत्प्रसादान्न चाऽपरः ॥ ७१ ॥ दुर्दैवात्कूबरे बंधौ । सांप्रतं स दुरोदरे ॥ हारयित्वा महीं भार्या–युक्तः क्वापि गतो मृतः ॥ ७२ ॥ दधिपर्णस्तदाकर्ण्य । स्मरंस्तस्य गुणा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वर्ती ॥ नलस्य प्रेतकार्याणि । चक्रे शोकपरायणः ॥ ७३ ॥ सोऽन्यदाऽन्यर्थितो राज्ञा । विद्यां वैवस्वतीं स्मरन् ॥ सद्यो न्यस्यातपे स्थालं । संपूर्णं शालितंडुलैः ॥ ७४ ॥ कृत्वा रसवतीं सूर्य–पाकां हुंकिरूपकृत् ॥ सर्वेषां भोजयामास । निःशेषरसपेशलां ॥ ७५ ॥ युग्मं ॥ ग्रामपंचशतीं टंक–लक्षमेकं च भूपतिः ॥ तदाऽदत्त विना ग्रामां–स्तेनापि जगृहेऽखिलं ॥ ॥ ७६ ॥ कुब्जः प्रोक्तो नरेंद्रेण । प्रीतेन पुनरन्यदा ॥ यदन्यदपि तेऽभीष्टं । तद्ग्राह्यं सोऽप्यदोऽवदत् ॥ ७७ ॥ देव यावति भूपीठे । जागर्ति तव शासनं ॥ द्यूतं मद्यं मृगव्यं च । तावति प्रतिषिध्यतां ॥ ७८ ॥ तथैव सर्वं तच्चक्रे । राजा तस्मिन् कृतादरः ॥ तत्रेडं वसतस्तस्य । दिनानि सुखमत्यगुः ॥ ७९ ॥ अन्येद्युः सरसीतीर–तरुछायामुपेयुषः ॥ कश्चिद्देशांतरी विप्रः । कुब्जस्यांते निषेदिवान् ॥ ८० ॥ कुब्जं सर्वांगमालोक्य । सोऽपि कुड्मलितेक्षणः ॥ गीतगोष्ठ्यंतरे स्पष्टं । श्लोकद्वयमिदं जगौ ॥ ८१ ॥

अनार्याणामलज्जानां । दुर्बुद्धीनां हतात्मनां ॥ रेखां मन्ये नलस्यैव । यः सुप्तामत्यजत्प्रियां ॥ ८२ ॥ विस्रब्धां वल्लभां स्निग्धां । सुप्तामेकाकिनीं वने ॥ त्यक्तुकामोऽपि जातः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

किं । तत्रैव स न न्यस्मसात् ॥ ८३ ॥ कुब्जस्ततः साधु गीत–मित्युपश्लोक्य वाग्भवं ॥ कस्त्वं कुतो वा कुत्रायं । नलोदंतश्च शुश्रुवे ॥ ८४ ॥ इति पृष्टोऽवदत्सोऽपि । कुशलाख्योऽस्मि वाग्भवः ॥ कुंडिनादागतस्तत्रा–ऽश्रौषं च नलसंकथां ॥ ८५ ॥ विकस्वरमुखांभोजः । पुनः प्रत्र कुब्जकः ॥ नैमीत्यागावधिर्वार्त्ता । श्रुतेयं शेषमुच्यतां ॥ ८६ ॥ द्विजो, जगाद वैदर्भीं । सुप्तां त्यक्त्वा गते नले ॥ ततो विभावरीशेषे । स्वप्नमेवं ददर्श सा ॥ ८७ ॥ यदहं चूतमारूढा । तत्फलान्यादमिच्छया ॥ दंतिनोन्मूलिते तस्मिन् । पतिताहं भुवस्तले ॥ ८८ ॥ प्रातः प्रबुद्धा न्यर्त्तार–मदृष्ट्वा भीतमानसा ॥ इतस्ततो दृशं क्षिप्त्वा । चेतस्येवमचिंतयत् ॥ ८९ ॥ दुर्दैव मयि दग्धायां । किमद्यापि चिकीर्षसि ॥ यदीदृशीं दशां प्राप्ता । न पश्यामि प्रियं दृशा ॥ ९० ॥ मुखं क्षालयितुं यद्वा । गतो नूनं सरोवरे ॥ सौभाग्यैकनिधिं तं वा । जहार वनदेवता ॥ ९१ ॥ किमु वा केलिना क्वापि । लतागुल्मे न्यलीयत ॥ इत्युक्त्वा पतिं भैमी । प्रतिवृक्षमलोकत ॥ ९२ ॥

क्वाऽप्यदृष्ट्वा ततः शोकाद्–वैधीभूतमना इव ॥ रोदयंती वनं सर्वं । सा रुरोद मुमूर्छ

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

च ॥ ९३ ॥ अथोऽचिरेण संस्मृत्य । स्वप्नस्यार्थमन्नावयत् ॥ सहकारतरुर्योऽयं । स मे सर्वोत्तमः प्रियः ॥ ९४ ॥ फलानि खलु राज्यश्री–र्वारणः कूबरः पुनः ॥ यः पातश्च ततः सोऽयं । पत्युर्मे विरहो ध्रुवं ॥ ९५ ॥ इत्यालोच्याऽखिलं कर्म । मन्वाना प्राग्नवं सती ॥ क्वापि दृष्ट्वा पटप्रांते । वर्णान् वाचयतिस्म सा ॥ ९६ ॥ दध्यौ चास्मि ध्रुवं तस्य । मानसेऽद्यापि हंसवत् ॥ यत्स्वयं गमनादेशं । ददौ मे लिखिताक्षरैः ॥ ९७ ॥ तदहं जनकागारं । व्रजिष्यामि वटाध्वना ॥ योषितां पतिशून्यानां । पितैव शरणं यतः ॥ ९८ ॥ ततश्चचाल सा तात–गेहमुद्दिश्य नीमजा ॥ नयभ्रांता कुरंगीव । स्मरंती मंत्रवन्नलं ॥ ९९ ॥ अदभ्रदर्भनिर्निय–दक्तपिंजरितक्रमा ॥ अंकितामिव कुर्वाणा । यावकस्तबकैर्भुवं ॥ १०० ॥ स्वेदार्द्रतनुरुत्पाति–धूलिधूसरितोपरि ॥ हंसीव पद्मवलस्नाता । नैमी वनमगाहत ॥ १ ॥ अंबिकामिवपारीज्ञ । भुजंगा जांगुलीमिव ॥ सिंहीमिव वनेनाश्च । मेनिरे नलगेहिनीं ॥ २ ॥ शीलप्रनावतस्तस्या । व्रजंत्या निर्जने वने ॥ हिंस्रजीवा अपि स्वीय–सहायिन इवाऽनवन् ॥ ३ ॥ ध्यायंत्यौपयिकं किंचि–दनोल्लंघनहेतवे ॥ संकटं शकटैर्नैमी । सार्थमेकमथैक्षत ॥ ४ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यावदासीन्मनः सुस्थं । तस्याः सार्थस्य दर्शनात् ॥ तावत्तं रुरुधुश्चौरा । विषया इव कामुकं ॥ ५ ॥ सा तानूर्ध्वभुजाऽाचष्ट । सती रे यात तस्कराः ॥ नालिकेरे शुकस्येव । प्रारंभो निष्फलोऽत्र वः ॥ ६ ॥ सावज्ञं चरटान् सार्थं । प्रवृत्तानथ लुंटितुं ॥ हुंकारैर्वारयामास । सती मंत्राक्षरैरिव ॥ ७ ॥ आगत्य सपरीवारः । सार्थेशोऽपि महासतीं ॥ कुलेश्वरीमिव प्रेक्ष्य माणः प्राणमदुच्चकैः ॥ ८ ॥ ऊचे च कासि कल्याणि । भ्रमंती निर्जने वने ॥ अस्माकं पुण्ययोगेन । कुतो वात्र समेयुषी ॥ ए ॥ साऽप्याख्यदानलद्यूता--त्सर्वमस्मै स्ववृत्तकं ॥ ज्ञात्वा नलप्रियां सोऽपि । मेने तां भगिनीमिव ॥ १० ॥ पटकुट्यां स्थिता तस्य । मार्गं सुखमलंघयत् ॥ प्रावृट्कालः क्रमादागा--द्दाहकर्त्ता प्रवासिनां ॥ ११ ॥ शकटेषु निमज्जत्सु । पंके गलिवृषेष्विव ॥ आतपे ध्रियमाणेषु । वृष्टयन्नावेषु वस्तुषु ॥ १२ ॥ चिरं विलंबमाशंक्य । तत्र सार्थस्य सा सती ॥ सार्थेशमप्यनापृच्छ्य । निर्गतैकाकिनी ततः ॥ १३ ॥ पुरोऽग्र दृष्ट्वा दर्शान्नं । सती दंष्ट्राकरालितं ॥ राक्षसं द्रुतमायांत--मन्नाषिष्ट ससौष्टवं ॥ १४ ॥ शृणु भद्र कुतो भीति--र्मृत्योर्धर्मधियो मम ॥ स्पृशन् परकलत्रं मां । किं तु यास्यसि भस्मसात् ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ १५ ॥ इति तत्सत्त्वसंतुष्टो । राक्षसः प्राह नीमजां ॥ किं तेऽनीष्टं करोमीति । पृष्टा सापि तमाख्यत ॥ १६ ॥ वद तर्हि कदा नावी । पत्युर्मम समागमः ॥ सोऽप्याह द्वादशाब्दानां । प्रांते नूनं नविष्यति ॥ १७ ॥ सती प्राह ममाऽनीष्ट–मिदमेव त्वया कृतं ॥ स्वस्ति तेऽस्तु व्रज स्वैरं । धर्मगृह्यो नवेश्चिरं ॥ १८ ॥

दिव्यं रूपमथाधाय । पलादः स तिरोऽनवत् ॥ जग्राहाऽन्निग्रहान् सापि । तदादीति नलप्रिया ॥ १९ ॥ तांबूलं रक्तवस्त्राणि । पुष्पाण्याभरणानि च ॥ विकृतीश्च गृहीष्यामि । नाऽर्वाक् प्रियसमागमात् ॥ २० ॥ क्रमेण कंदरां प्राप्य । गिरेः शाम्बलपादपां ॥ विधाय मृन्मयीं शांते–र्मूर्त्तिं तत्कोणके न्यधात् ॥ २१ ॥ तामर्चयंती पुष्पौघैः । कुर्वाणा च तपःक्रियां ॥ स्वन्नावपतितैर्वृक्ष–फलैश्च कृतपारणा ॥ २२ ॥ परमेष्ठिनमस्कारं । सा स्मरंत्यघमर्षणं ॥ एकाकिन्यपि निर्भीका । कियंतं कालमत्यगात् ॥ २३ ॥ सार्थनाथोऽप्यनिष्टार्था–शंकया तत्पदानुगः ॥ कंदरांतर्जिनस्यार्चा–पूजिनीं तामलोकयत् ॥ २४ ॥ अर्चेयं कस्य देवस्य । सार्थेशेनेत्युदीरिते ॥ सा प्राह शांतिनाथस्य । षोडशस्य जिनेशितुः ॥ २५ ॥ तयोरालाप-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

माकर्ण्य । समीयुस्तत्र तापसाः ॥ ततश्चाचीकथन्नैमी । जिनधर्मं सविस्तरं ॥ २६ ॥ वसंत-
नामा सार्थेश–स्त्रुट्यत्कर्मततिस्ततः ॥ जिनधर्ममुरीकृत्य । तस्थौ तत्रैव सार्थयुक् ॥२७॥ नि-
कटाश्रमवास्तव्या । अन्येद्युस्ते तपस्विनः ॥ बभूवुराकुलाः कामं । वृष्टिधाराभिराहताः ॥
॥ २८ ॥ ततस्तान्परितो नैमी । कुंभलं विस्तृतं व्यधात् ॥ ऊचे च यद्यहं जैनो–पासिका-
स्मि महासतो ॥२९॥ तन्मा वर्षतु पाथोदा–स्तेऽपि शंकेतिता इव ॥ तथैव तस्थुर्जाताश्च । ताप-
सास्ते निराकुलाः ॥ ३० ॥ दध्युः सविस्मयास्तेऽथ । नूनं काचन देव्यसौ ॥ स्त्रीरूपेण ततो
बुद्धा । जैनधर्मं प्रपेदिरे ॥ ३१ ॥

तत्रैव सार्थपो रम्यं । स्थापयित्वा पुरं महत् ॥ विहारं कारयामास । श्रीशांतेस्तुंगतोर-
णं ॥ ३२ ॥ यत्र पंचशतीं नैमी । तापसानामबूबुधत् ॥ तत्र प्रसिद्धं तज्जातं । श्रीतापसपु-
राख्यया ॥ ३३ ॥ तत्राऽऽयातयशोभद्र–सूरेः पार्श्वे विरागवान् ॥ जग्राह दीक्षां विमल–म-
तिः कुलपतिस्तदा ॥ ३४ ॥ तस्मादेव गुरोर्ज्ञात्वा । स्वायुः पंचदिनीमितं ॥ नवोदूढः कूबर-
स्य । तनयः सिंहकेसरी ॥ ३५ ॥ दीक्षामादाय तत्कालं । गिरेः शृंगे स केवली ॥ जातस्त-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

न्महिमां कर्तु–मायातान् वीक्ष्य नाकिनः ॥ ३६ ॥ नैमी च सार्थपस्ते च । तापसास्तन्निने-
सया ॥ गत्वा गिरिपतेः शृंगं । शश्रुवुस्तस्य देशनां ॥ ३७ ॥ कुलकं ॥ महासतीं सत्यवतीं ।
धर्मङ्गां परमार्हतां ॥ वैदर्भीं कथयामास । केवली तत्पुरस्तदा ॥ ३८ ॥ शेषकर्मक्षयात्तत्र ।
केवली मोक्षमासदत् ॥ यशोभद्रोऽथ वैदर्भ्या । पृष्टः पूर्वं भवं जगौ ॥ ३९ ॥ प्राग्भवेऽभू-
भ्दलो भद्दे । मम्मणाख्यो महीपतिः ॥ त्वं तस्य वल्लभा वीर–मतीनाम्नी प्रियंकरा ॥ ४० ॥
भवदन्यामन्यदा क्वापि । गच्छदन्यां संमुखो मुनिः ॥ दृष्टः सोऽकुशलं ज्ञात्वा । धृतो द्वाद-
शनाभिकाः ॥ ४१ ॥ क्षणेन कोपं विस्मृत्य । युवाभ्यां क्षमितो मुनिः ॥ युवयोर्विरहो जात
–स्तेनायं द्वादशाब्दिकः ॥ ४२ ॥ तत्र स्थिताया वैदर्भ्याः । पूजयंत्या जिनेश्वरं ॥ अतीयुः
सप्त वर्षाणि । कारयंत्याः प्रभावनां ॥४३॥ अन्येद्युः कश्चिदभ्येत्य । गुहाद्वारे बभाण तां ॥ वै-
दर्भि त्वत्पतिर्दृष्टो । नातिदूरे मयाऽधुना ॥ ४४ ॥ अहं तु शीघ्रं गच्छामि । सार्थो मे न प्रती-
क्षते ॥ श्रुत्वेति नैमी तत्पृष्ट–लग्ना निपतिता वने ॥ ४५ ॥ राक्षसीमन्यदा वीक्ष्य । समा-
यांतीं महासती ॥ स्तंभयामास रक्षोवत् । सद्यः शीलप्रभावतः ॥ ४६ ॥ तृषार्त्ता शीलमा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

द्दात्म्यात् । पाणिनाऽऽहत्य भूतलं ॥ आविःकृत्य नदीं स्नाता । पपौ च विमलं पयः ॥ ४७ ॥ अन्यदा धनदेवाख्य–सार्थेशेन समं सती ॥ गताऽचलपुरे व्योम–पतितेव स्थिता बहिः ॥४८॥ तत्र श्रीऋतुपर्णाख्य–भूपतेर्जाययाऽथ सा ॥ मातृस्वस्रा चंड्यशा–नाम्न्याऽनीयत मंदिरे ॥ ॥ ४९ ॥ न ज्ञातेयं सर्वथापि । नाऽज्ञासीन्नलभामिनी ॥ सापि तां बालदृष्ट्वा–न्नोपालक्ष्य यदंजसा ॥ ५० ॥ पृष्टापि स्वस्वरूपं सा । न च गूढतयाऽवदत् ॥ तथापि तां स्वपुत्रीव–त्कौरवेण ददर्श सा ॥ ५१ ॥ साथ सत्रे ददौ दानं । मातृस्वसुरनुज्ञया ॥ तत्र पिंगलनामानं । वध्यं चौरममोचयत् ॥ ५२ ॥ वसंतसार्थवाहस्य । सोऽपि भृत्यस्तदाऽवदत् ॥ श्रीतापसपुराद्देवि । निर्गता भवती यदा ॥ ५३ ॥ सार्थवाहस्ततो दुःखी । श्रीयशोभद्रसूरिणा ॥ जनैश्च बोधितोऽभुंक्त । सप्ताहादश्रुपूर्णदृक् ॥ ५४ ॥ अन्यदोपायनै रत्न–स्वर्णाद्यैः कूबरं नृपं ॥ संतोष्य तत्पुरस्वामी । राजाऽभूत्सार्थनायकः ॥ ५५ ॥ विधायामुं वसंतं श्री–शेखराख्यं नृपं नृपः ॥ प्राहिणोत्स्वपुरं सोऽपि । समेतस्त्वत्प्रसादतः ॥ ५६ ॥ जगाद भीमजा वत्स । दीक्षामादत्स्व मद्गिरा ॥ सोऽपि हर्षात्तथा चक्रे । लघुकर्मतया कृती ॥ ५७ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

विप्रोऽथ हरिमित्राख्यः । कुंभिनात्पूर्वसंस्तुतः ॥ समेतो नृपमालोक्य । ययौ चंद्रय-
शांतिके ॥ ५८ ॥ क्षेमं पृष्टस्तया प्राह । सर्वत्र कुशलं स्वसः ॥ नलस्य दवदंत्याश्च । चिं-
ता मां बाधते परं ॥ ५९ ॥ नलोऽपि कूबरेणाक्षै—र्हारितः सकलां महीं ॥ निर्गत्य कानने
क्वापि । मुक्त्वा नैमीं गतः स्वयं ॥ ६० ॥ तत् श्रुत्वा भीमभूपालः । स्वामिनी पुष्पदंत्यपि
॥ तयोः शुद्ध्यर्थमन्यर्थ्यं । प्राहिष्टां मां सुदुःखितौ ॥ ६१ ॥ प्रतिग्रामं प्रतिपुरं । प्रत्यरण्यं
भ्रमन्नहं ॥ इदानीमत्र संप्राप्तः । शुद्धिर्लेभे न च क्वचित् ॥ ६२ ॥ श्रुत्वेति तस्यामाक्रंद—व-
त्यां राजकुलं समं ॥ जातं शोकाकुलं स्वामि—गामिनो ह्यनुजीविनः ॥ ६३ ॥ क्षुत्क्षामकु-
क्षिर्विप्रोऽपि । क्षिप्रं भोजनकांक्षया ॥ दानशालां गतो नैमीं । दृष्ट्वा तत्र सविस्मयः ॥ ६४ ॥
नत्वोचे नैमि दृष्टासि । भ्रांत्वाद्य भुवनं मया ॥ हहा गृहस्थिते रत्ने । मूढो भ्रमति भूतलं ॥
॥ ६५ ॥ नृपं मातृस्वसारं च । गत्वा विप्रोऽप्यवर्द्धयत् ॥ शोकाऽश्रूणि तयोरासं—स्तदाऽऽनं-
दाऽश्रुतास्पदे ॥ ६६ ॥ द्रुतं चंद्रयशा सत्रा—गारमागत्य भीमजां । गाढमालिंग्य तामाह ।
बलिर्वत्से भवाम्यहं ॥ ६७ ॥ धिग्मां न मूढयाऽज्ञायि । यया त्वं भागिनेय्यपि ॥ वत्से स्व-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

गोपनं कृत्वा । वंचिताहं कथं त्वया ॥ ६८ ॥ ततस्तां स्वगृहे नीत्वा–ऽस्नापयत्गंधवारिभिः॥ ज्योत्स्नासब्रह्मणीवास्या । दुकूले पर्यदीधपत् ॥६९॥ तामालंब्य करे राज्ञी । भूपाऽन्यर्णमुपाविशत् ॥ तत्पृष्टा भीमजा प्राह । राज्यभ्रंशादिकां कथां ॥ ७० ॥ राजापि मार्जयंस्तस्या । बाष्पौघग्लपिताननं ॥ जवाच वत्से कः खेदः । कर्मणां गतिरीदृशी ॥ ७१ ॥

तस्मिन्नवसरे कश्चि–द्दिवोऽभ्येत्य सुरोत्तमः ॥ सन्नामुद्योतयन् कांत्या । नत्वा भैमीमदोऽवदत् ॥ ७२ ॥ सोऽहं चौरस्त्वया पूर्वं । यस्मातः पिंगलाग्निधः ॥ प्रबोध्य जैनधर्मे च । त्वयैव ग्राहितो व्रतं ॥ ७३ ॥ स्मशाने प्रतिमास्थायी । चिताग्नवदवाग्निना ॥ दग्धो जातस्त्वत्प्रभावा–त्सौधर्मेऽहं सुरोत्तमः ॥ ७४ ॥ तच्चिराय महादेवि । विजयस्वेत्युदीरयन् ॥ सप्तकोटीः सुवर्णस्य । स ववर्ष सन्नांतरे ॥ ७५ ॥ तद्धर्मस्य फलं साक्षाद् । दृष्ट्वा भूपोऽपि हर्षितः ॥ जैनं धर्मं प्रपेदेऽथ । हरिमित्रोऽवदन्नृपं ॥ ७६ ॥ स्थिताऽत्र सुचिरं भैमी । प्रेषयातः पितुर्गृहं ॥ सेनया सह संवाह्य । नरेंद्रोऽपि तथाऽकरोत् ॥ ७७ ॥ श्रुत्वाऽयांतीं सुतां भीम–भूपतिः सप्रियोऽभ्यगात् ॥ ननाम पितरं भैमी । हर्षबाष्पजलाविला ॥ ७८ ॥ लगित्वा

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

च गले मातुः । साऽरोदीन्मोहमेदुरं ॥ नीमः प्रवेशयामास । ततस्तां समहोत्सवं ॥ ७९ ॥ सप्तरात्रोत्सवप्रांते । राज्ञा पृष्टा नलप्रिया ॥ श्यतीं स्वकथां कुब्ज । शृण्वतो मम साऽब्रवीत् ॥ ८० ॥ सवात्सल्यं पितोवाच । गृहेऽस्माकं सुखं वस ॥ तथा यतिष्यते वत्से । पूर्णार्था भविता यथा ॥ ८१ ॥ ग्रामपंचशतीं राजा । हरिमित्राय दत्तवान् ॥ ऊचे तुष्टो राज्यार्हं । दास्ये तुभ्यं नलागमे ॥ ८२ ॥

इतश्च निजकार्येण । दधिपर्णस्य भूपतेः ॥ सुसुमारपुरात्तत्र । गतो दूतो विचक्षणधीः ॥ ॥ ८३ ॥ अन्यदाऽवसरे क्वापि । सोऽवादीन्नीमभूभुजं ॥ देव श्रीदधिपर्णांते । प्राप्तोऽस्ति नलसूपकृत् ॥ ८४ ॥ सूर्यपाकां रसवतीं । स वेत्ति रसपेशलां ॥ कलाश्चान्या अपि दक्षो । द्विपैंऽदमनादिकाः ॥ ८५ ॥ श्रुत्वेति नीमजा कुब्ज । सत्रपं नीममब्रवीत् ॥ न तां रसवतीं कश्चि—त्तात वेत्तीह तं विना ॥ ८६ ॥ गुटिकामंत्रदेवादि—माहात्म्याज्ञोपिताकृतिः ॥ नूनं तवैव जामाता । स तात निषधात्मजः ॥ ८७ ॥ शिक्षां दत्वा ततो नीमो । मां मंक्षु प्राहिणोदिह ॥ पृच्छन् पृच्छंस्ततो भद्र । तव पार्श्वमुपेयिवान् ॥ ८८ ॥ प्रेक्ष्य त्वां च विषण्णात्मा । चिं-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तयामासिवानहं ॥ केयं मुक्तालवव्रांति–नैम्या अस्थिलवे न्नवेत् ॥ ८९ ॥ क्व नलस्त्रिदशा-
कारः । श्रियां पुंज इवांगवान् ॥ क्व त्वं कुब्जो घनुर्वात–व्याधिमानिव कुत्सितः ॥ ९० ॥
क्व कल्पवृक्षः क्वैरंडः । क्व माणिक्यं क्व वा दृषत् ॥ दृष्ट्वा त्वामथ कुब्जाऽन्नूत् । कुब्जो
नैमीमनोरथः ॥ ९१ ॥ हा सर्वा व्यर्थतां प्राप्ता । सा शुन्ना शकुनावली ॥ न कोऽपि दुः-
खी जायेत । फलेद्यदि मनीषितं ॥ ९२ ॥ हाहा परीक्षक कथं । दंपत्योरनयोरन्नूत् ॥ वि-
योग इति जायां स । स्मृत्वा कुब्जोऽरुदत्तदा ॥ ९३ ॥ ऊचे च विप्र पूज्योऽसि । वदन् पु-
ण्यामिमां कथां ॥ तदागच्छ मदावासं । सत्कारं विदधामि ते ॥ ९४ ॥ न्नोजयित्वा सूर्यपा-
क–रसवत्या निजे गृहे ॥ पूर्वलब्धं ददौ तस्मै । तट्टंकान्नरणादिकं ॥ ९५ ॥ ततो गत्वा वि-
दर्भायां । नैमीन्नूमिभुजो पुरः ॥ विप्रो विषादवान् कुब्ज–स्वरूपं तदचीकथत् ॥ ९६ ॥ र-
म्यां रसवतीं भुक्तां । रोदनं च कथांतरे ॥ टंकलक्षादिकं सर्वं । कुब्जदत्तमथाऽवदत् ॥ ९७ ॥
नैमी प्राह ततस्तात । नातः कार्या विकल्पधीः ॥ विज्ञेयः कुब्जरूपेण । स्वजामातैव स ध्रु-
वं ॥ ९८ ॥ कथंचिदेकदा तात । वामनं तमिहानय ॥ इंगितैर्लक्षयिष्यामि । ध्रुवं नलम-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

थाऽनलं ॥ ९९ ॥

अथ श्रीमनृपः प्राह । वत्से मिथ्या स्वयंवरं ॥ प्रारभ्य सुसुमारेश–माह्वातुं प्रेष्यते नरः ॥ ३०० ॥ नलः स यदि तत्तेन । साकं नूनं समेष्यति ॥ नार्यापराभवो यस्मा–त्पशूनामपि दुस्सहः ॥ १ ॥ किंच तस्याऽश्वहृद्येदि–विद्यामपि परीक्षितुं ॥ स्वयंवरमुदूर्त्तं तु । प्रत्यासन्नं निगद्यते ॥ २ ॥ चैत्रस्य सितपंचम्यां । तदऽलीकस्वयंवरे ॥ दधिपर्णे नृपं श्रीमः । स्वाप्तपुंभिरजूहवत् ॥ ३ ॥ अथासन्नदिनाख्याना–द्दधिपर्णे विषादिनं ॥ कुब्जः पप्रच्छ किं देव । दौर्मनस्यं तवाप्यदः ॥ ४ ॥ राजा प्राह कथाशेषं । नलं श्रुत्वा विदर्भजा ॥ प्रातः स्वयंवरं कर्त्ता । षष्टू यामा एव चांतरा ॥ ५ ॥ ततस्तच्छ्रोलुब्नत्वं मे । दुर्लभं कुब्ज दृश्यते ॥ सोऽप्याह कुंभिनं प्रात–र्देव नेष्यामि मा मुह ॥ ६ ॥ परं मदीप्सितं देहि । वररथ्ययुतं रथं ॥ तथाकृते नरेंद्रेण । कुब्जः सर्वमसज्जयत् ॥ ७ ॥ स्थगीप्रकीर्णकछत्र–धैरैः परिवृतो नृपः ॥ कुब्जश्च स्वकटीवद्ध–दिव्यबिल्ववकरंभिकः ॥ ८ ॥ स्यंदनं ते षडारोहन् । कुब्जः खेटयतिस्म च ॥ अध्वांभोधौ रथोऽचाली–द्वातप्रेरितपोतवत् ॥ ९ ॥ अथो रथाऽनिलोद्भूते । भूतलं पतिते

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पटे ॥ नृपः प्राह पटी कुब्ज । गृह्यते स्थाप्यतां रथः ॥ १० ॥

सोऽप्याह सस्मितं देव । यत्र ते पतिता पटी ॥ योजनानां ततो नूमे–रतीता पंचविंशतिः ॥ ११ ॥ अमी हि मध्यमा वाहा । यदि स्युः पुनरुत्तमाः ॥ शताई योजनानां त–ल्लंघेरन्नियता ध्रुवं ॥ १२ ॥ अक्षवृक्षमथोद्वीक्ष्य । फलितं तत्र नृपतिः ॥ आविःकुर्वन्निजोत्कर्षं । । सद्यः सारथिमन्यधात् ॥ १३ ॥ फलसंख्यां द्रुमस्यास्य । जानाम्यगणयन्नपि ॥ व्यावृत्तो दर्शयिष्यामि । कुतूहलमिदं तव ॥ १४ ॥ कुब्जः प्राहाऽधुनैवेदं । दर्शय कौतुकं मम ॥ सारथौ मयि मा नैषीः । कालक्षेपस्य सर्वथा ॥ १५ ॥ अष्टादश सहस्राणि । संख्यामस्य नृपोऽवदत् ॥ तत नत्प्लुत्य कुब्जोऽपि । मुष्टिनाऽताडयद् द्रुमं ॥ १६ ॥ फलानीतोऽनिलोद्भूत –द्रुमाज्जलकणा इव ॥ ड्डड्डडिति तत्कालं । निपेतुः पृथिवीतले ॥ १७ ॥ तावत्येवाऽन्नवत्संख्या । फलानां गणनात्ततः ॥ कुब्जो जग्राह तां विद्यां । वाजिहृद्वेदिविद्यया ॥ १८ ॥ नदयाडिं रथोऽन्यागा–देकतोऽनूरुसारथेः ॥ विदर्भगोपुरद्वार–मन्यतः कुब्जसारथेः ॥ १९ ॥ नैमी तस्यां निशि स्वप्नं । दृष्ट्वा पितुरथोऽब्रवीत् ॥ ताताद्य निर्वृतिर्देवी । मां निन्ये कोशला-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ऽवनीं ॥ २० ॥ तद्वाचा पुनरारोहं । रसालं फलशालिनं ॥ मत्करे च तयाऽदायि । विकचं सरसीरुहं ॥ २१ ॥ तदानीं विहगः कोऽपि । तत्तरोर्भूतलेऽपतत् ॥ भीमोऽप्याह त्वया वत्से । दृष्टः स्वप्नोऽयमुत्तमः ॥ २२ ॥ पूर्वैश्वर्यपदप्राप्तिः । पत्युश्चापि समागमः ॥ राज्यभ्रंशः कूबरस्य । स्वप्नेनाऽनेन सूच्यते ॥ २३ ॥ इत्थं वार्त्तयतोरेव । तयोर्मंगलनामकः ॥ दधिपर्णं पुरीद्वारि । समायातमभाषत ॥ २४ ॥

भीमेनातिश्यमाधाया–ऽभ्यर्थितो दधिपर्णराट् ॥ रविपाकां रसवतीं । कुब्जेनाऽकारयत्तदा ॥ २५ ॥ अभ्योजयत्स सपरि–वृदं तं भीमभूपतिं ॥ तामानाय्य गृहे भैमी । भुक्त्वा जनकमब्रवीत् ॥ २६ ॥ कुब्जोऽस्तु यदिवा खंजो । नल एव स निश्चितं ॥ ज्ञानिनोचे नलादन्यो । नेदृग्रसवतीपटुः ॥ २७ ॥ निषधात्मज एवायं । कुब्जरूपेण तात तत् ॥ श्वेतांबरमुनेर्वाचो । भवंत्यपि किमन्यथा ॥ २८ ॥ किंचैतदंगुल्यग्रेण । लग्नमात्रेण मे वपुः ॥ भविता चेत्सरोमांचं । ज्ञेयोऽसौ नल एव तत् ॥ २९ ॥ अथैतदंगस्पर्शायो–परुद्धः कुब्जकोऽवदत् ॥ आजन्मब्रह्मचारित्वा–त्स्पृशामो न स्त्रियं वयं ॥ ३० ॥ कथंचिदथ भीमेना–ऽभ्यर्थितः कु-

॥ ३८० ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

जकः स्वयं ॥ दुष्यत्पिटकवत्तस्या । अंगुल्याऽस्पृशदंगकं ॥ ३१ ॥ उत्कंटकेऽथ जातेंगे । नी-
मजा स्पष्टमब्रवीत् ॥ सुप्ता मुक्ता तदा नाथ । कथं मोक्षसि जागृतीं ॥ ३२ ॥ उक्त्वेति नी-
तो वेश्मांत–राङ्नीनूतमनाः क्षणात् ॥ आविश्चकार स्वं रूपं । देवोक्तविधिना नलः ॥ ३३ ॥
रूपस्थध्यानयुक्तेव । योगिनी नीमनंदिनी ॥ यथारूपं प्रपश्यंती । पतिं सर्वांगमाविशत् ॥
॥ ३४ ॥ नलं बहिरथाऽऽयातं । गाढमाश्लिष्य नीमराट् ॥ निवेश्य स्वासने हर्ष–प्रांजलः प्रां-
जलिर्जगौ ॥ ३५ ॥ राज्यं प्राज्यमिदं चैताः । संपदो विगतापदः ॥ वयमादेशकर्त्तारो । य-
थारुचि नियुज्यतां ॥ ३६ ॥ दधिपर्णोऽपि संभ्रांतः । प्राह वीक्ष्य नलं नमन् ॥ यदज्ञाना-
न्मयाऽचीर्णं । तदेतत्क्षम्यतां त्वया ॥ ३७ ॥ धनदेवः स सार्थेशो । नीमं दृष्टुमुपागमत् ॥
बंधुवद्गौरवं तस्य । नैमी नीमादकारयत् ॥ ३८ ॥ तं तापसपुराधीश–मृतुपर्णं नृपं च तं ॥
सुतयाऽन्यर्थितो नीम–रथो दूतैरजूहवत् ॥ ३९ ॥ नीमेन मान्यमानाना–मुपचारैर्नवैर्नवैः
॥ तत्रैव तस्थुषां तेषां । मासोऽतीतो मुहूर्त्तवत् ॥ ४० ॥

अन्येद्युः कश्चिदभ्येत्य । सुरो नैमीमवोचत ॥ देवि स्मरसि मां सोऽहं । यस्त्वया ताप-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सेश्वरः ॥ ४१ ॥ तदा प्रबोध्य सम्यक्त्वं । ग्राहितो व्रतमार्हतः ॥ क्रमेण जातः सौधर्मे । त्रिदशः केसराह्वयः ॥ ४२ ॥ तत्वोपकारिणी तस्व--मित्युक्त्वा नतिपूर्वकं ॥ सप्तकोटीः सुवर्णस्य । वृष्ट्वा सोऽगाद्यथाऽागतः ॥ ४३ ॥ विशेषकं ॥ वसंतदधिपर्णर्तु--पर्णन्नीमादयो नृपाः ॥ राज्येऽन्निषिषिचुः प्रौढ--प्रतापाऽनलसं नलं ॥ ४४ ॥ द्विधाऽपि सबलैः सर्व--न्नूपालैः सहितो नलः ॥ काश्यपीं कंपयन् सैन्यैः । प्रतस्थे कोशलांप्रति ॥ ४५ ॥ रतिवल्लन्नसंज्ञेऽथ । तमुद्याने समागतं ॥ आकर्ण्य कूबरश्चक्रे । संबंधं मृत्युना समं ॥ ४६ ॥ नलोऽपि दूतेनाचष्ट । कूबरं न्यायतत्परः ॥ अक्षैराड्यितां केलिः । कलिर्वा निशितैः शरैः ॥ ४७ ॥ कूबरोऽपि निराकृत्य । धीरसाध्यां रणक्रियां ॥ मेने दूरोदरं न्नूयो । दृष्टेऽर्थे को न सस्पृहः ॥ ४८ ॥ नलोऽप्युपचिताऽगण्य--पुण्यो जित्वा वसुंधरां ॥ यौवराज्यपदेऽयुंक्त । सौदर्यं तं च कूबरं ॥४९॥ न्नरताऽर्हनृपाः सर्वे । नलं नेजुरुपायनैः ॥ मारैर्निवारणं सोऽपि । यावदाज्ञमथाऽकरोत् ॥ ॥ ५० ॥ नलश्च दवदंती च । गतलब्धपुनःश्रियौ ॥ महोत्सवैर्ववंदाते । कोशलाचैत्यमंडलीं ॥ ॥ ५१ ॥ जैनप्रन्नावनाकर्तुः । पृथ्वीं पालयतः सतः ॥ परःसहस्रा न्नूपस्य । व्यतीयुः शरदः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सुखं ॥ ५२ ॥ अथो निषधनाकेंडुः । समये सुतमब्रवीत् ॥ वत्स का नाम राज्याशा । सा राऽसारविवेकिनां ॥ ५३ ॥ वात्याविवर्त्तनोत्ताल–तूलपूलचलाऽचलाः ॥ संपदस्तासु को नाम । रज्यते विशदाशयः ॥ ५४ ॥

ततः पुष्कलनामानं । सुतं राज्ये निवेश्य तौ ॥ दीक्षां जगृहतुर्जैनीं । दंपती श्रुतसम्मती ॥ ५५ ॥ विविधान्निस्तपस्याग्निः । समयं प्रतिपालयन् ॥ व्यहार्षीन्नलराजर्षि–र्मेदिनीं गुरुभिः सह ॥ ५६ ॥ स्वभावसुकुमारत्वा–त्संयमे शिथिलाशयः ॥ पुनर्दृढीकृतोऽन्येत्य । दिवो निषधनाकिना ॥ ५७ ॥ मनः कथंचिदुंधानो । नैर्ग्रन्थ्यां कामवशंवदं ॥ शिश्रायाऽनशनं दीक्षा–पालनाप्रत्यलो नलः ॥ ५८ ॥ मृत्वा कुबेरनामाऽभू–दुत्तराशापतिः सुरः ॥ भीमजाप्यभवत्तस्य । कांताऽनशनमृत्युना ॥ ५९ ॥ इति खलु दवदंती पापपंकं हरंती । विधृतविमलशीला क्वाप्यसंजातहीला ॥ नरभुवि पुनरेषा क्षिप्तकर्मावशेषा । सुगतिसुखमगाधं लप्स्यते वीतबाधं ॥ ६० ॥

॥ इति श्रीरुद्रपल्लीयगच्छे श्रीसंघतिलकसूरिपट्टावतंसश्रीसोमतिलकसूरिविरचितायां श्री-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

शीलोपदेशमालावृत्तौ शीलतरंगिण्यां दवदंतीकथा समाप्ता ॥ श्रीरस्तु ॥

अथ श्रीकमलासतीकथा कथ्यते, तथाहि—

देशः श्रीलाटनामास्ति । नैकैरत्नाकरैर्युतः ॥ एकरत्नाकरं जंबू–द्वीपं हेपयतीव यः ॥१॥ नृगुकच्छं पुरं तत्र । पावितोपवनं जिनैः ॥ पूतीकर्त्तुमिवात्मानं । रेवा यत्परिखायते ॥ २ ॥ तत्र मेघरथो राजा । यत्प्रतापनभोमणिः ॥ आशाः प्रकाशाः कुर्वाण–श्चित्रं पद्माविकाशकृत् ॥ ३ ॥ गेहिनी विमला तस्य । धर्मार्थविमलाशया ॥ कमलेव मुदां पात्रं । कमलेति सुता तयोः ॥ ४ ॥ कन्या सा सप्तबंधूनां । लघिष्ठा यौवनोन्मुखी ॥ जाता यूनामनेकेषां । मनःसंमोहनौषधी ॥ ५ ॥ पिका इव वसंतर्तुं । गजा विंध्यावनीमिव ॥ तामेव सस्मरुर्नृप–पुत्राः स्मरवशंवदाः ॥ ६ ॥ इतश्च सोपारपुरे । राजा श्रीरतिवल्लभः ॥ कस्य नो योऽवसच्चित्ते । रतिवल्लभदेववत् ॥ ७ ॥ चिकीर्षुर्मित्रतां सोऽथ । सह मेघेन भूभुजा ॥ उपायनान्यनेकानि । प्राहिणोति निरंतरं ॥ ८ ॥ तयोः प्रीतिरवर्द्धिष्ट । लेखोपायनपाणिषु ॥ दूतेषु कार्यदक्षेषु । नित्यमायात्सु यात्सु च ॥ ९ ॥ दानैः प्रशंसावाक्यैश्च । सानुकूलैश्च चेष्टितैः ॥ मि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

त्वं शत्रुरप्येति । किमुदासस्य तूच्यते ॥ १० ॥ चिंतयामास मेघोऽपि । विनयाद्यैर्गुणैरिमैः ॥ रतिवल्लभतुल्यः किं । राजपुत्रोऽस्ति कश्चन ॥ ११ ॥ यथा सर्वगुणः सैष । तथेयं कमला सुता ॥ तत्सर्वजनताश्लाघ्यः । संबंधो युज्यतेऽनयोः ॥ १२ ॥ आस्थानीमन्यदाऽऽसीने । । श्रीमेघे सपरिच्छदे ॥ आगत्य कमला कन्या । पितुरुत्संगमाश्रयत् ॥ १३ ॥ विलोक्य सर्वालंकार–सुभगां कन्यकां नृपः ॥ तत्कालं कलितश्चित्ते । वराऽन्वेषणचिंतया ॥ १४ ॥ पप्रच्छ च महामात्यान् । कमलायाः कृते नृपः ॥ सुधांशुरिव रोहिण्या–श्चिंत्यतामुचितो वरः ॥ १५ ॥ ज्ञात्वा सर्वोपधाशुद्धं । तेऽप्यथो दूषणोज्झितं ॥ शास्त्रज्ञा इव युक्तार्थं । रतिवल्लभमब्रुवन् ॥ ॥ १६ ॥ तत् श्रुत्वा भूपतिर्दध्यौ । मंत्रिभिस्तत्वदृष्टिभिः ॥ ममैव मनसा पर्या–लोच्य प्रोचे हितं वचः ॥ १७ ॥ आस्थान्या मंगनं प्रायो । भवेयुर्भुवि भूमिपाः ॥ राज्यं च सचिवायत्तं । परमार्थेन मन्महे ॥ १८ ॥ अमात्या एव चक्षूंषि । भूभुजामित्युदीर्यते ॥ मंत्रिणां लोचनैरेव । सहस्रनयनो हरिः ॥ १९ ॥ संपूर्णेष्वथ सर्वेषु । राज्यांगेषु महीभृतां ॥ अमात्यबलमेवैकं । जृंभते सकलोत्तरं ॥ २० ॥ ध्यात्वेति प्रकटं प्राह । साधु भो मंत्रिपुंगवाः ॥ हि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तं पश्यमिव प्रोक्तं । विमृश्य मनसा समं ॥ २१ ॥

वितरीतुं ततस्तस्मै । कन्यां सोपारपत्तने ॥ दक्षो दौवारिकः कोऽपि । निसृष्टार्थः प्रहीयते ॥ २२ ॥ प्राज्ञतेन सहाऽन्येद्यु—र्दूतः शालान्निधः सुधीः ॥ प्रेषितः कन्यकां दातुं । रतिवल्लभसन्निधौ ॥ २३ ॥ रतिवल्लभभूपोऽपि । कमलां कमलामिव ॥ उरीकृत्य ततो दूतं । सत्कृत्य प्राहिणोत्पुनः ॥ २४ ॥ सुमुहूर्ते महद्धर्याथ । समेत्य रतिवल्लभः ॥ कमलां तामुपायंस्त । कमलामिव केशवः ॥ २५ ॥ रत्नालंकारकट्याण—गजवाहादिकं बहु ॥ जामात्रे प्रददौ भूपः । पाणिमोचनपर्वणि ॥ २६ ॥ प्रस्थितं स्वगृहेऽन्येद्युः । सीमांतं यावदादरात् ॥ जामातरमनुव्रज्य । न्यवर्त्तत स भूमिपः ॥ २७ ॥ स्थाने स्थाने पुरंध्रीभिः । कृतप्रावेशिकोत्सवः ॥ परितो मागधोद्गीत—प्रोद्यज्जयजयारवः ॥ २८ ॥ दीयमानमहादान—मिलितप्रकृतिव्रजः ॥ वाद्यमानघनातोद्य—बधिरीकृतदिङ्मुखः ॥ २९ ॥ जायया मूर्त्तिमत्येव । राज्यलक्ष्म्या विभूषितः ॥ रतिवल्लभभूभर्त्ता । प्रविवेश निजं पुरं ॥ ३० ॥ कुलकं ॥

नृपो गतिक्रमाऽपास्त—राजहंसीं गुणोज्ज्वलां ॥ सर्वांगसुभगां राज्य—लक्ष्मीं रेमे प्रि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यामित्र ॥ ३१ ॥ इतश्च जलधेर्मध्ये । नगरे गिरिवर्द्धने ॥ कीर्त्तिवर्द्धननामास्ति । नरेंद्रः स्त्रीषु लोलुपः ॥ ३२ ॥ सोऽन्यदा कमलारूपं । धत्तूरमिव निर्न्नरं ॥ पीत्वा श्रोत्रपुटैः काम–मूर्ग-वैकल्यन्नागभूत् ॥ ३३ ॥ ततो युगंधरान्निख्यं । मित्रं मांत्रिकसत्तमं ॥ एकांते प्राह किं व-श्य–कलाया मित्र ते फलं ॥ ३४ ॥ यदहं दुःखमेताव–त्स्वदायत्तेऽपि कर्मणि ॥ सेहे निर्न्ना-ग्यवद्गेह–स्थितेऽप्यनवधौ निधौ ॥ ३५ ॥ ज्ञात्वा सोऽपि तदिष्टार्थं । विवेकनिपुणो जगौ ॥ पतिव्रता असत्यश्च । न्नवेयुर्द्विविधाः स्त्रियः ॥ ३६ ॥ महासती चेत्तद्वयर्थ–स्तदानयनजश्रमः ॥ इत्वरी चेत्तरी युष्म–न्मनोरथमहोदधौ ॥ ३७ ॥ सोऽप्याह मित्र किं काम–हतं हंता न्न-वानपि ॥ त्वमानयैकदा शेषं । ममायत्तं फलाऽफलं ॥ ३८ ॥ अथ न्नूमिगृहे मंत्र–जापहो-मादिकर्मन्निः ॥ वात्यान्निरिव पत्राली । निद्राणा साहृता क्षणात् ॥ ३९ ॥ करोतु न्नस्मसा-न्मां मा । प्रबुद्धेयं महासती ॥ ध्यात्वेति पद्मनागिन्या । इवासौ बहिरागमत् ॥ ४० ॥ स कीर्त्तिवर्द्धनस्तां तु । मंगलान्नरणामपि ॥ विलोक्य दध्यावीदृक्षा–ऽप्यसौ विश्वस्य मोहिनी ॥ ॥ ४१ ॥ प्रातः प्रबुद्धा सौरन्य–शालिनी नलिनीव तु ॥ क्रीडां मे राजहंसस्य । पूरयिष्य-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ति मानसीं ॥ ४३ ॥ अकुंठोत्कंठया प्राह । भद्रे जागृहि मा स्वपीः ॥ प्रबुद्धा यूथभ्रष्टेव । मृगी साऽप्यैक्षताङ्गितः ॥ ४३ ॥ क्व गेहं किमिदं स्थानं । क्वाहं निश्चलुता क्व वा ॥ इंद्रजालमथ स्वप्न–मिदं भर्त्ता च स क्व मे ॥ ४४ ॥

ब्रुवाणामिति संभ्रांतां । नत्वा तां चरणाब्जयोः ॥ जगाद भद्रे भर्त्ताहं । पुरस्ते कीर्त्तिवर्द्धनः ॥ ४५ ॥ इदं गेहमिदं स्थानं । पुरश्चैताः समृद्धयः ॥ सर्वं स्वकीयं जानीहि । मय्यादेशवशंवदे ॥ ४६ ॥ कमलापि सती कोप–मुखी तं दुष्टमाख्यत ॥ अकीर्त्तिवर्द्धनः कस्त्वं । दुरात्मन् पुरतो मम ॥ ४७ ॥ रतिवल्लभभूभर्त्तुः । प्रियां कस्त्वं पतिव्रतां ॥ मरालीमिव काकोलो । दुर्बुद्धे नोक्तुमर्हसि ॥ ४८ ॥ क्षिप्रं प्रेषय मां गेहे । नो चेन्मत्प्रियसायकाः ॥ शिरस्ते कल्पयिष्यंति । दिक्पालबलिहेतवे ॥ ४९ ॥ सोऽप्याह तामुपायित्वाथ । वचोभिर्यष्टिभिश्च तां ॥ सतीत्वं तेऽधुना भंक्ष्ये । वल्लीकुंजमिव द्विपः ॥ ५० ॥ सर्वांगे शृंखलैर्लौहैः । कर्मजैरिव पुष्कलैः ॥ नियंत्र्य धारयामास । गुप्तौ कामगवीमिव ॥ ५१ ॥ रतिवल्लभभूपोऽपि । शय्यातः प्रातरुत्थितः ॥ नाऽपश्यद्वल्लभां चौरैः । सर्वत्र मुषितो यथा ॥ ५२ ॥ निरीक्ष्येत-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स्ततः शाखि। विभ्रष्ट इव मर्कटः ॥ पप्रच्छ यामिकांस्तेऽपि। विस्मिता इव तं जगुः ॥ ५३ ॥ न तावत्पादचारेण । देवी कुत्रापि निर्गता ॥ अस्माकं जागरूकाणां । यद्विज्ञाता विज्ञावरी ॥ ५४ ॥ द्वीपांतरेषु सर्वेषु । राजस्थानेषु च क्रमात् ॥ चरदूतादिभिः कांतां । बहुशोऽप्यग-वेषयत् ॥ ५५ ॥ न च काचन तच्छुद्धि–र्लेभे क्वापि महीभुजा ॥ कथं वा ज्ञानसाध्येऽर्थे । । गोचरा बाह्यचक्षुषां ॥ ५६ ॥ निश्चिकाय ततश्चित्ते । राजा धर्मविचक्षणः ॥ नूनं विद्यादि-सिद्धेन । जहे केनापि मत्प्रिया ॥ ५७ ॥ निरर्थकमिदं राज्यं । धिगिमाः संपदो मम ॥ धि-गिदं बाहुशौंडीर्यं । यज्जाया यात्यलक्षिता ॥ ५८ ॥ यः कश्चिच्छुद्धिमात्रं मे । वल्लभाया नि-वेदयेत् ॥ तस्मै यच्छामि राज्यार्द्धं । पटहेनेत्यघोषयत् ॥ ५९ ॥ हहा जीवन्मृतं जन्म । म-मेदं यस्य वल्लभा ॥ केनापि जहे सुप्तस्य । किरीटमिव मूर्द्धतः ॥ ६० ॥ इत्थं भुजबलं निंद-न् । गूढकोपो नराधिपः ॥ मंत्रस्तंन्नितवीर्योऽहि–रिवांतर्ज्वलतिस्म सः ॥ ६१ ॥ इतश्च पं-चमे मासे । शोकापन्नस्य भूपतेः ॥ केवली नगरोद्यानं । दिवामणिरिवागमत् ॥ ६२ ॥ त-स्याऽागमनहृष्टात्मा । जलदस्यैव कर्षकः ॥ गत्वा शुश्राव वैराग्य–कारिणीं देशनागिरं ।६३।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

देशनां ते नृपोऽप्राक्षी–त्किं जीवति मृताऽथवा ॥ मम भार्या यथावृत्तं । ततोऽभाषिष्ट केवली ॥६४॥ पुनः पप्रच्छ भूपालः । कस्येदं कर्मणः फलं॥ मिलिष्यति न वा नाथ । जीवंती सा पुनर्मम ॥ ६५ ॥ अथाख्यत्केवली राजन् । विस्मयाख्ये महापुरे ॥ दुर्जयो नाम भूपालो । धन्या तस्येहिनी मता ॥ ६६ ॥ सा ते भार्याऽन्यदा क्रुद्धा । विनियंत्र्य स्वदासिकां ॥ भूमीगृहे निचिक्षेप । निर्दया क्षुत्तृषाकुलां ॥ ६७ ॥ पुनः प्रसन्नया स्तोकै–र्दिवसैर्मुमुचे तया ॥ तद्बंधनार्जितं कर्म । बद्धं देव्या सुदारुणं ॥ ६८ ॥ ततो गतिष्वनेकासु । भुक्त्वा तत्कर्मणः फलं ॥ त्वद्भार्या सांप्रतं जाता । बंधनं चेदमंतिमं ॥ ६९ ॥ यत्पंचम्यास्तपस्तस्या–मितः पूर्वभवेऽनया ॥ मासमात्रेण तत्तस्या । बंधमोक्षो भविष्यति ॥ ७० ॥ ततो निःसंशयं ते सा । मिलिष्यति महासती ॥ वेदितान्येव कर्माणि । क्षीयंते प्राणिनां यतः ॥ ७१ ॥ इति तद्देशनामाप्य । कतकक्षोदसोदरां ॥ पापपंकैरमुच्यंत । बहवो भव्यजंतवः ॥ ७२ ॥ रतिवल्लभभूपश्च । दयिताहरणेच्छया ॥ अन्विषेणयितुं याव–दीहते कीर्त्तिवर्द्धनं ॥ ७३ ॥ स एव केवलज्ञानी । मुनिर्नाम्नामहाबलः ॥ क्रमेण विहरन् प्राप्तो । नगरं गिरिवर्द्धनं ॥ ७४ ॥ तस्य प्रभावतः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सद्यः । कमलालोहशृंखला ॥ शेफालीकुसुमानीव । पेतुः प्रज्ञातवाततः ॥ ७५ ॥ कीर्त्तिवर्द्धन
नृपोऽपि । तं नंतुं सपरिच्छदः ॥ समियाय महात्मापि । दत्वा धर्माशिषं ततः ॥ ७६ ॥ वि-
शिष्य प्रतिबोधार्थं । प्राच्यजन्मांतरान्वितं ॥ प्रत्यक्षं कमलोदंत–मेवाऽज्ञापत केवली ॥७७॥
प्रेक्ष्यतामिहलोकेऽपि । शीलश्रेः परमं फलं ॥ शृंखलात्रुटनं पूर्वा–वस्था च कमलातनौ ॥
॥ ७८ ॥ श्रुत्वेति विमानाः कीर्त्ति–वर्द्धनश्चकितस्तरां ॥ लोकद्वयविरुद्धं हा । चेष्टितं किमिदं
मया ॥ ७९ ॥ कमलाया महासत्याः । कामासक्तेन यन्मया ॥ विरुद्धं चिंतितं तत्त–च्छीलेन
विफलीकृतं ॥ ८० ॥ इत्युद्घाय गतो गुप्तौ । तामाकृष्य त्रपापरः ॥ निपत्य पादयो राजा ।
क्षमयामास तां सतीं ॥ ८१ ॥ अदृष्टव्यमुखः पापो । धृष्टो भुवननिंदितः ॥ अहमेव स्वस-
र्येन । तवेदं व्यसनं कृतं ॥ ८२ ॥ ततस्त्वमेव बंधुस्त्वं । धर्माचार्यश्च निश्चितं ॥ अकार्ये वर्त्त-
मानोऽहं । यया प्राग्वारितस्त्वया ॥ ८३ ॥ रोषस्त्वयाऽपनेतव्यो । रतिवल्लभनृभुजः ॥ त्वा-
महं खलु नेष्यामि । स्वयमेव नृवत्पुरे ॥ ८४ ॥ ततो यानानि संपूर्य । महार्घैं रत्नसंचयैः ॥
समं कमलया कीर्त्ति–वर्द्धनः प्रस्थितो ययौ ॥ ८५ ॥ सैन्यैः सहागतो याव–त्सीमांतं रति-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वल्लभः ॥ तावदत्रांतरे प्राप्तः । कमलालेखवाहकः ॥ ८६ ॥ रोषतोषदृशोर्मिश्र–स्तत्कालं र-
तिवल्लभः ॥ कमलालिखितं लेखं । वाचयामासिवानसौ ॥ ८७ ॥ तथाहि—

स्वस्तिश्रीहृदयस्थं तं । नत्वा श्रीरतिवल्लभं ॥ विज्ञप्तिं कुरुतेंऽभोधि–मध्यतः कमला प्रि-
या ॥ ८८ ॥ अहमकृतशीलास्मि । स्वामिन् युष्मत्प्रसादतः ॥ शश्वदेव सनाथा च । भव-
द्भिर्हृदयस्थितैः ॥ ८९ ॥ श्रीकीर्त्तिवर्द्धनो नाम्ना । बांधवोऽपि मया समं ॥ युष्मत्पाददिदृक्षा-
यै । समियन्नस्ति भक्तियुक् ॥ ९० ॥ अहो शीलस्य माहात्म्यं । कमलाया यतो मम ॥ श-
त्रुर्मित्रत्वमापन्नो । दध्याविति नृपस्तदा ॥ ९१ ॥ अन्योऽन्यं मिलितौ भूपौ । ततो जलनि-
धेस्तटे ॥ उचितां प्रतिपत्तिं च । द्वावप्याचरतःस्म तौ ॥ ९२ ॥ प्रमोदतस्ततः पौरै–र्बद्धवंद-
नमालिकां ॥ पुरीं प्रविशतो भूपौ । सतीकमलया युतौ ॥ ९३ ॥ दिनानि कतिचित्तत्र ।
स्थित्वा प्रीत्या सगौरवं ॥ श्रीकीर्त्तिवर्द्धनो राजा । जगाम निजपत्तनं ॥ ९४ ॥ रतिवल्लभ-
भूपोऽपि । सत्या कमलया समं ॥ त्रिवर्गसारं गार्हस्थ्य–धर्मं साधितवानलं ॥ ९५ ॥ क्रमे-
ण तनये जाते । राज्यभारधुरंधरे ॥ साम्राज्यभारं संयोज्य । स्वयं विषयनिस्पृहौ ॥ ९६ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दत्वा दानं ततः संघं । पूजयित्वा च दंपती ॥ दीक्षां जगृहतुः श्रीम–त्स्यंदनाचार्यसन्निधौ ॥ ॥ ९७ ॥ दीक्षां पालयतोः कर्म–संघातं घातिनं घ्नतोः ॥ उत्पन्नं केवलज्ञान–मुन्नयोर्विश्वदीपकं ॥ ९८ ॥ विबोध्य क्रमतो भव्य–पूगान् पद्मानि भानुवत् ॥ निर्वाणपदवीं प्राप । रतिवल्लभकेवली ॥९९॥ अथ विहृत्य पुरे भृगुकच्छके ॥ स्वपितरौ प्रतिबोध्य च सान्वयौ ॥ विमलकेवलवासितभूतला । शिवपदं कमलाप महासती ॥ १०० ॥

॥ इति श्रीरुद्रपल्लीयगच्छे श्रीसंघतिलकसूरिपट्टावतंसश्रीसोमतिलकसूरिविरचितायां श्रीशीलतरंगिण्यां कमलामहासतीकथा समाप्ता ॥ श्रीरस्तु ॥

अथ श्रीकलावतीकथा प्रकाश्यते—

इहैव जंबूद्वीपेऽस्ति । देशः श्रीकमलाह्वयः ॥ स्वर्गं जिगाय योऽपार–लक्ष्मीरंभातिलोत्तमः ॥ १ ॥ पुरं शंखपुरं तत्र । तारकप्रतिबिंबितः ॥ जितः श्रिया ध्रुवं स्वर्गः । पुष्पैरर्चयतीव यत् ॥ २ ॥ प्रजानुकूलकृत्तत्र । श्रीमान् शंखो महीपतिः ॥ चित्रं न बिभरांचक्रे । यः कौटिल्यं हृदंतरे ॥ ३ ॥ निर्जित्य समरे स्वीयी–कृतामेकातपत्रिणीं ॥ अनाक्रांतां परैः पृथ्वीं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

। बुभुजे यः सतीमिव ॥ ४ ॥ तमेकदा स्वमास्थान–मासीनं दत्तसंज्ञकः ॥ गजश्रेष्ठिसुतो द-
त्तो–पायनः प्राणमन्मुदा ॥ ५ ॥ तं पृष्टस्वागतं दत्ता–सनासीनं च भूपतिः ॥ पप्रच्छ कौतुकं
किंचि–द्वद देशांतरोचितं ॥ ६ ॥ दत्तोऽप्याख्यदतो देव । देवशालपुरं गतः ॥ वाणिज्यसाग-
रे यस्मा–दस्माकं श्रीः प्रवर्द्धते ॥ ७ ॥ कृतकृत्यतया नाथ । व्यावृत्तोऽहं परं मया ॥ वक्तुं न
शक्यते ताव–त्तस्याश्चर्यपरंपरा ॥ ८ ॥ तदस्या वर्णिकामात्रं । स्वयं देवाऽवधार्यतां ॥ वदन्नि-
ति न्यधाद्दत्तो । नृपाग्रे चित्रपट्टिकां ॥ ९ ॥ विलोक्य लिखितां तत्र । शंखः कांचिद्वरांगनां
॥ देवीति मन्यमानो झाक् । प्राणंसीज्जूपुरंदर ॥ १० ॥ दत्तः सस्मेरमाहस्म । यदियं देव मा-
नुषी ॥ देवीति मेने तेनासौ । पट्टदेव्येव ज्ञाप्यतां ॥ ११ ॥ दत्तदृष्टिर्नृपस्तत्र । निधान इव दु-
र्गतः ॥ दत्तमूचे न मर्त्येषु । रूपरेखेयमीक्ष्यते ॥ १२ ॥

तेनोचे देव जानीहि । मानवीमेव किंत्वसौ ॥ सृष्टा घुणाक्षरन्याया–न्नहीदं कौशलं वि-
धेः ॥ १३ ॥ केयं तर्हीति पृष्टेन । दत्तेनोचे महीपतेः ॥ श्रीमद्विजयसेनस्य । देवशालपुरे-
शितुः ॥१४॥ श्रीमतीकुक्षिसंभूता । पुत्री नाम्ना कलावती ॥ कलासौभाग्यरूपाद्यैः । सृष्टेर्या

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

निकषः किल ॥ १५ ॥ युग्मं ॥ तारुण्यश्रीरवर्द्धिष्ट । कलावत्या यथा यथा ॥ चिंता हृदि न-
रेंद्रस्य । तद्वरार्थे तथा तथा ॥ १६ ॥ तद्वोढा तमहं ज्ञाता । यो मे प्रश्नचतुष्टयीं ॥ अन्येद्यु-
र्जैनजक्ता सा । प्रतिज्ञामकरोदिति ॥ १७ ॥ गाढं तद्वरचिंताब्धौ । निमग्नो नृपतिस्तदा ॥
तदर्थे कारयामास । स स्वयंवरमंडपं ॥ १८ ॥ इतश्च स्वपुराद्देव । व्यवसायचिकीरहं ॥ का-
ननं क्वापि संप्राप्तो । देवशालंप्रति व्रजन् ॥ १९ ॥ राज्ञो विजयसेनस्य । जयसेनाभिधं सु-
तं ॥ दुष्टाश्वापहृतं तत्र । मूर्छागतमजीवयं ॥ २० ॥ सुखासनमथारोप्य । प्रापयं हेलया गृ-
हं ॥ राजा तेनोपकारेण । मेने मां पुत्रवत्सदा ॥ २१ ॥ अन्यदा मां समाध्यक्षं । नरराजः
समादिशत् ॥ स्वबंधोर्जयसेनस्य । यथैवोपकृतं त्वया ॥ २२ ॥ तथा स्वसुः कलावत्या—श्चिं-
तयित्वा वरं वरं ॥ चिंतामहोदधेर्वत्स । मां समाकृष्टुमर्हसि ॥ २३ ॥ तदा श्रीशंखनृपाल ।
भवतो योग्यसंगतिं ॥ विमृश्य च पटे रूपं । लेखयित्वाहमागमं ॥ २४ ॥ इदं हि वर्णिका-
मात्रं । न सम्यग् लिखितुं क्षमः ॥ न यावती प्रज्ञा ज्ञानोः । प्रतिबिंबेऽपि तावती ॥ २५ ॥
तत्पश्यन् योगिवद्राजा । क्षणं मुकुलितेक्षणः ॥ धूनयित्वाथ मूर्द्धानं । दत्तं मधुरमूचिवान् ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ २६ ॥ साध्वेवोपकृतं ताव—त्त्वया मित्रैकवत्सल ॥ क न्नाग्यं मादृशा ताव—द्येनेदृक्पात्रसंगमः ॥ २७ ॥

दत्तः सानंदतः प्राह । नाथ मा खिद्यथा वृथा ॥ शकुनैर्वेद्मि ते पत्नी । नूनमेषा न्नविष्यति ॥ २८ ॥ परमाराध्यतां देव । द्रुतं वागीश्वरी सुरी ॥ यथा प्रश्नचतुष्कस्य । निर्णयो जायते स्फुटं ॥ २९ ॥ ततः श्रीशंखनृपालो । ब्रह्मचर्यादियुक्तिन्निः ॥ वाग्देवीं तोषयामास । सापि स्पष्टतयाऽवदत् ॥ ३० ॥ त्वत्पाणिपद्मयोगेन । शालन्नंज्यपि तत्क्षणात् ॥ कर्त्ता कलावतीप्रोक्त—प्रश्नानां वत्स निर्णयं ॥ ३१ ॥ ललाटांजलियोगेन । तत्प्रसादं नृपोऽगृहीत् ॥ सरस्वत्यपि तत्सर्व—मुक्त्वाऽङ्गाय तिरोदधे ॥ ३२ ॥ कृतकृत्यस्ततो न्नूपः । समं दत्तेन सत्वरं ॥ प्रतस्थे देवशालाय । सैन्यकंपितन्नूतलः ॥ ३३ ॥ तमायांतमथाकर्ण्य । विजयोऽपि नरेश्वरः ॥ जयसेनं सुतं प्रैषीत् । संमुखं शंखन्नूपतेः ॥ ३४ ॥ दिदृक्षुर्नारीनेत्रौघै—र्नीलोत्पलमयीमिव ॥ द्यां कुर्वाणं महद्ध्यांथ । शंखस्तत्पुरमाविशत् ॥ ३५ ॥ अथ स्वयंवरे न्नूपाः । समीयुस्तां वुवूर्षवः ॥ आरोहदेकं शंखोऽपि । मंचमुच्चूलमालिनं ॥ ३६ ॥ अथोचे चित्राऽलं-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

कार–कृप्तदेवेंऽकामुकी ॥ विष्वक्धूपघटीनिर्य–द्धूमध्यामलितांबरा ॥ ३७ ॥ साक्षात्कलाधि-
देवीव । मूर्त्या लक्ष्मीरिवाऽपरा ॥ सौंदर्यसारसर्वस्व–मिव पुंजीकृतं विधेः ॥ ३८ ॥ सखी-
भिः परितो व्याप्ता । भृंगीभिरिव पद्मिनी ॥ धृतातपत्रचामर–चालनैर्नर्त्तितालका ॥ ३९ ॥
सखीकरेण बिभ्राणा । कंदर्पज्यामिव स्रजं ॥ स्वयंवरमवातारी–त्कौमुदीव कलावती ॥४०॥
कलापकं ॥ अथोवाच प्रतीहारी । समस्यापत्रिकाकरा ॥ कथ्यतां निर्णयप्रभ–चतुष्कस्य म-
हीधवाः ॥ ४१ ॥ को देवः को गुरुः किं च । तत्वं सत्त्वं च कीदृशं ॥ स्फुटीकर्त्ताईति स्पष्टं
। कलावत्या वरस्रजं ॥ ४२ ॥ स्वस्वप्रज्ञाऽनुसारेण । ततः सर्वेऽपि भूधवाः ॥ उत्तरं प्रददुर्नै-
व । मेने सा परमार्हती ॥ ४३ ॥ ततः शंखनृपः शंख–निधानाप्त्येव हर्षभाक् ॥ अनया स-
ह पांचाली । ममैषा वक्तुमर्हति ॥ ४४ ॥

इत्युक्त्वा स्तंभनपांचाली–मूर्ध्नि पाणिकुशेशयं ॥ अधत्त शंखभूपालः । सोत्तराएयन्यधत्त
च ॥ ४५ ॥ वीतरागः परो देवो । महाव्रतधरो गुरुः ॥ तत्वं जीवदया ज्ञेया । सत्त्वं चेंद्रिय-
निग्रहः ॥ ४६ ॥ ततः प्रमुदिता पूर्ण–कामा कामं कलावती ॥ कंठे श्रीशंखभूभर्तु–श्चिक्षेप

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वरणस्रजं ॥ ४७ ॥ ततः कलावती शील–प्रज्ञावेण महीयसा ॥ सामर्षा अपि नृपाला । न शंखे प्राज्ञवंस्तदा ॥ ४८ ॥ सुमुहूर्ते तयोरेक–मासनं तस्थुषोर्द्विजः ॥ हस्तावयोजयद्व-स्ता–क्षेपनक्षेपपूर्वकं ॥ ४९ ॥ निक्षेपमिषतो हारि–मुद्रिकायाः करांतरे ॥ आवयोः प्रेममु-द्रेय–मेकरूपेति संदधे ॥ ५० ॥ सत्कृतो हास्तिकाश्वीय–वस्त्राद्यैः शंखनृपतिः ॥ युतः कला-वतीदेव्या । प्रतस्थे स्वपुरंप्रति ॥ ५१ ॥ स्वयं विजयनृपालः । प्रमोदाश्रुविलोचनः ॥ शिक्षां दत्वा कलावत्या । निवृत्तो दूरमार्गतः ॥ ५२ ॥ दत्तोऽपि विजयक्षोणी–भृदादेशपरायणः ॥ कलावत्याः स्वसुः प्रीति–हेतवे शंखमन्वगात् ॥ ५३ ॥ एकस्यंदनमारूढौ । गच्छंतौ पथि दं-पती ॥ नक्तंदिनपक्षमासां–श्चक्राते क्षणवाहतः ॥ ५४ ॥ ऐरावणगजारूढौ । पौलोमीवज्रि-णाविव ॥ महर्द्ध्या वारणारूढौ । प्रविष्टौ दंपती पुरं ॥ ५५ ॥ पट्टराज्ञ्या कलावत्या । समं राज्यसुखं भुजन् ॥ भूयांसमक्षिपत्कालं । लीलया शंखभूपतिः ॥५६॥ शयनीयस्थिताऽन्येद्युः । स्वप्ने देवी कलावती ॥ पीयूषकुंभमालोक्य । प्रबुद्धा प्रत्युरब्रवीत् ॥ ५७ ॥ प्रमोदोद्भेदिरो-मांचः । श्रीमान् शंखस्तदाऽवदत् ॥ भद्रे राज्यकरिस्तंभः । सुतस्ते भवितोत्तमः ॥ ५८ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मौक्तिकं ताम्रपर्ण्यैव । देव्या गर्भं दधानया ॥ अष्टमासी व्यतिक्रांता । विंशत्याऽन्यधिका दिनैः ॥ ५९ ॥ प्रसूयते किल स्त्री प्राक् । पितृगेह इति श्रुतिः ॥ विजयः स्वनरान् प्रैषी—दित्या-ह्वातुं कलावतीं ॥ ६० ॥ तेषां करे कुमारोऽपि । सांशुकामंगदद्वयीं ॥ न्नगिन्यै प्रेषयामास । मूर्त्तं स्नेहमिवात्मनः ॥ ६१ ॥ तेऽपि पूर्वप्रतीतत्वा—त्तद्वत्तस्य समार्पयन् ॥ सहकृत्वा नरान् सोऽपि । कलावत्यै वितीर्णवान् ॥ ६२ ॥ आकर्ण्य कुशलोदंतं । पित्रोरानंदमेदुरा ॥ विससर्ज ससत्कारं । कलावत्यपि तान्मुदा ॥ ६३ ॥ बंधुस्नेहात्करे धृत्वा । तदानीमंगदे मुदा ॥ भुजामूले महादेवी । वयस्याभिः सह स्थिता ॥ ६४ ॥

ततो देवी समालोक्य । सांगदे स्वभुजातले ॥ प्रमोदमेदुरस्वांता । सा सखीभिः सहाऽहसत् ॥ ६५ ॥ नृपोंतःपुरमागत्त्र—न्नाकर्ण्य हसितध्वनिं ॥ किमेता निगदंतीति । गवाक्षांतरितोऽशृणोत् ॥ ६६ ॥ ततोंगदे भुजावद्धे । दर्शं दर्शं कलावती ॥ सखीरुद्दिश्य वाग्दंन्ना—न्निजं हर्षमिवाऽवमत् ॥ ६७ ॥ अहो प्रेम धृतस्थेम । मयि तस्य चिरायुषः ॥ येनेदमद्भुतं प्रैषि । केयूरद्वयमद्य मे ॥ ६८ ॥ चिरादद्य मया प्राप्तं । वस्तु तत्पाणिसंगतः ॥ साक्षात्तु मि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

लिते तस्मिन् । नावि मे सफलं जनुः ॥ ६९ ॥ सख्योऽप्यूचुर्महादेवि । तस्य विश्वान्निनंदिनः ॥ चंडस्येव कुमुद्वत्यां । त्वयि प्रेमातिरिच्यते ॥ ७० ॥ श्रुत्वेति नृपतिर्दीप्त—क्रोधात्क्रूरमचिंतयत् ॥ क्वाप्यन्यत्र ध्रुवं प्रेम—वती देवी कलावती ॥ ७१ ॥ बहिरेव ध्रुवं रक्ता । गुंजा इव चलेक्षणाः ॥ धिगिमाः कपिवद्यासु । नवति लोलुपो नरः ॥ ७२ ॥ तदिमां कपिकच्छुव—दंगासक्तां महार्त्तिदां ॥ त्यक्ष्यामीति हृदि ध्यात्वा । निवृत्यागान्महीधवः ॥ ७३ ॥ ज्ञात्वा कलावतीत्यागं । तदा दृष्टुमिवाऽक्रमः ॥ समं नृपविवेकेन । रविरस्तमयं गतः ॥ ७४ ॥ क्रुराशेव नरेंद्रस्य । जजृंभे च मतिस्ततः ॥ प्रत्यूषमथ मातंगी—युगलं नृप आदिशत् ॥ ७५ ॥ त्यक्तायाः कानने देव्याः । सांगदं भुजयोर्युगं ॥ छित्वा युवाभ्यामादेयं । नात्र कार्या विचारणा ॥ ७६ ॥ द्विधा निष्करुणो राजा । शय्यापालकमादिशत् ॥ अलक्षितमिमां नीत्वा । त्यज्यतां क्वापि कानने ॥ ७७ ॥

देवीमेकाकिनीं सोऽपि । रथमारोप्य संभ्रमात् ॥ नीत्वा कांचिदरण्यानीं । पुरस्तस्थौ सशोकवत् ॥ ७८ ॥ ततः सगद्गदं प्राह । देवि दोषेण केनचित् ॥ त्याजितासि वने राज्ञा ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

श्रुत्वा तद्वाग् मुमूर्छ सा ॥ ७९ ॥ पुनः सा प्राप्य चैतन्यं । कथंचिद्वनमारुतैः ॥ छिन्नवृक्षादि-
व लता । पपात रथतो भुवि ॥ ८० ॥ पितरं भ्रातरं चापि । सा स्मरंती मुहुर्मुहुः ॥ मूर्छ-
तीव सती तारं । मुक्तकंठं तदाऽरुदत् ॥ ८१ ॥ निंदन्नकरुणोऽपि स्वं । रुदंतीमनु तां रुदन् ॥
देवीमुत्कलयामास । निशांते स्वपुरं व्रजन् ॥ ८२ ॥ साऽप्याह नृ संदेशं । शंस मे शंख-
नृपतेः ॥ दास्यां मयि यदाचीर्णं । तत्किं तव कुलोचितं ॥ ८३ ॥ शंकास्पदे च दिव्यादि ।
प्रदाप्यमन्नवन्मम ॥ यथा तथास्तु वा स्वस्ति । तुभ्यं नवतु नूभुजे ॥ ८४ ॥ देवीमाश्वास-
यन् सोऽपि । यावत्तिष्ठति साश्रुदृक् ॥ चांडालीयुगलं ताव—न्मूर्त्तं दौष्कृत्यमिवागमत् ॥ ८५ ॥
आः पापे भुज्यतामेत—त्स्वपत्युर्वंचनाफलं ॥ इत्युक्त्वा सांगदं तस्या—श्छित्वा बाहुयुगं गतं ॥
॥ ८६ ॥ सोपालंभं ततः शंखं । साह दुःखदयार्दिता ॥ स्फुटन्मे हृदयं रक्ष । वालुंकमिव
पक्किमं ॥ ८७ ॥ तदाकुला नदीतीर—निकुंजे सा गता सती ॥ असूत तनयं तादृक्—दुःखेऽपि
सुखहेतुकं ॥ ८८ ॥ सुखी नव सुदीर्घायु—र्नव वत्स स्वतो यतः ॥ अक्षमाऽहं तु ते पोष—
हेतुर्दैवेन कल्पिता ॥ ८९ ॥ हा दुर्गतकुटुंबेऽपि । जातेऽपत्ये स्युरुत्सवाः ॥ राजपत्न्या अ-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पि मम । तल्लेशस्यापि संशयः ॥ ९० ॥ इतश्च काननन्दी--पूरो दूरोन्नतस्तदा ॥ संप्लाव-यितुमारेभे । तं कीटमिव बालकं ॥ ९१ ॥

परमेष्ठिनमस्कारं । स्मृत्वा प्राह पतिव्रता ॥ मया त्रिवर्गशुद्ध्या चे--त्पालितं शीलमु-ज्ज्वलं ॥ ९२ ॥ जिनदर्शनजीवातो । मातः श्रीशासनेश्वरि ॥ शिशोस्तत्पालनोपायो । ज-लशांतिश्च जायतां ॥ ९३ ॥ ततः शीलप्रभावेण । भुजौ जातौ पुनर्नवौ ॥ शांतं नदीपयो व्योम्नः । पुष्पवृष्टिः पपात च ॥ ९४ ॥ शीललीलायितं दृष्ट्वा । स्वयं तत्र कलावती ॥ हनू-मानिव पाथोधिं । तीर्त्वा विस्मयमादधौ ॥ ९५ ॥ कश्चिदत्रांतरेऽभ्येत्य । तापसस्तामवोच-त ॥ वत्से प्रसूतवत्साया । नात्र ते स्थातुमौचितिः ॥ ९६ ॥ तदेहि देहिपूगाना--मकुतोभ-यमाश्रमं ॥ इत्युदित्वा मुनिर्निन्ये । सतीं कुलपतेः पुरः ॥ ९७ ॥ तेनापि तातरूपेण । तदा पृष्टा सगद्गदं ॥ स्वोदंतमवदत्कामो--दरी मंदाक्रमंथरं ॥ ९८ ॥ तापसाधिपतिः प्रोचे । भद्रे मा खिद्यथा वृथा ॥ जानामि लक्षणैर्नूनं । पुनः श्रेयांसि लप्स्यसे ॥ ९९ ॥ इत्तमाश्वासिता तेन । हृष्टा विजयनंदिनी ॥ तापसीभिः सुखं तस्थौ । सपुत्रा पितृगेहवत् ॥ १०० ॥ इतश्च

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

श्वपचीन्यां ते । कलावत्याः कलाचिके ॥ सांगदे शंखराजाय । दर्शिते वेदकुर्दशे ॥ १ ॥ विलोक्य जयसेनाख्यां । तत्र राजा समाकुलः ॥ दत्तमादूय पप्रच्छ । विवर्णवदनश्चविः ॥ २ ॥ किमद्यकल्ये कोऽप्यागा–देवशालपुरादिह ॥ तेनोक्तं मानवा देव । ह्य एवात्र समाययुः ॥३॥ देव्याः कृते करे तेषा–मंगदद्वयमद्भुतं ॥ प्रहितं जयसेनेन । तत्तस्यै च मयाऽर्पितं ॥ ४ ॥ श्रुत्वेति भूपतिर्दुःखा–दुज्जाहत इवाऽशिराट् ॥ सिंहासनात्पपातोर्व्यां । मूर्छाविच्छिन्नविग्रहः ॥ ॥ ५ ॥ कथं कथमपि प्राप्य । चैतन्यं चंदनादिभिः ॥ पश्चात्तापपरो वक्त्र–स्ताडयन्निदमूचिवान् ॥ ६ ॥ अहो मे मूढचारित्व–महो मे मंदभाग्यता ॥ अहो मे निर्विचारित्व–महो निस्त्रिंशता मम ॥ ७ ॥ अहो विद्वदयोग्यत्व–महो दुःकर्मकारिता ॥ अहो अदृश्यवक्त्रत्व–महो ममाकुलीनता ॥ ८ ॥

किमेतदित्यसौ पृष्टो। विलपन्निति मंत्रिभिः ॥ सलज्जं सानुतापं च। सपूत्कारमदोऽवदत् ॥ ९ ॥ क्व यामि किमु वा वच्मि । क्व विशामि करोमि किं ॥ आत्मनैव मयात्मासौ । हंत कष्टे निपातितः ॥ १० ॥ अनादृत्य कुलाचार–मचिंत्य च निजोचितं ॥ धर्मश्चेदमना-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

लोच्य । हा किं चक्रे दुरात्मना ॥ ११ ॥ लक्ष्मेव चंद्रलेखायां । दुग्धे पूतरकानिव ॥ हहा दोषमसंज्ञाव्यं । तस्यां कथमज्ञावयं ॥ १२ ॥ अंतर्वत्नी प्रिया प्रैषि । कथं हा निर्जने वने ॥ न पुनः प्रेषणार्हापि । प्रहिता सा पितुर्गृहे ॥ १३ ॥ विशेषकं ॥ तत्कस्य दर्शयिष्यामि । स्वकीयमहमाननं ॥ सतोऽपि लज्जेऽहं प्राणान् । धारयंस्तदतः परं ॥ १४ ॥ प्रगुणीक्रियतां तस्मा–च्चिता दारुगणैश्चिता ॥ देहं दहामि येनाहं । नारीहत्यामलीमसं ॥ १५ ॥ श्रुत्वेति साग्रहं वाक्यं । राज्ञः पौरा गजादयः ॥ सशोका मंत्रिमुख्याश्च । नृपमिदं व्यजिज्ञपन् ॥१६॥ एका तावन्मृता देवी । केनापि निजकर्मणा ॥ स्वमृत्युना पुनर्नाथ । किं प्रजांतं चिकीर्षसि ॥ १७ ॥ किंचान्यदधुना स्वामि–न्नाग्रहे तव जागृति ॥ सन्निइ इव वैमूर्ये । प्रविक्ष्यंति द्विषां गुणाः ॥ १८ ॥ तद्विवेकिन्निमां मुंच । मुधा मृत्योः कथामपि ॥ जुह्वतिस्म तनुं वह्नौ । शलभाः सुभटा न तु ॥ १९ ॥ इत्यादि पौरामात्यानां । युक्तियुक्तवचांस्यपि ॥ अनादृत्य नृपो वेगा–न्मृत्यवे काननेऽगमत् ॥ २० ॥ समयज्ञो गजः श्रेष्ठी । कालक्षेपचिकीरथ ॥ मधुराक्षरमाहस्म । श्रीशंखं धरणीधवं ॥ २१ ॥ देव देवीसमीहा चे–त्तत्पुण्योपचयं विनु ॥ यत-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स्तेनैव हन्यंते । पूर्वार्जीर्णा महापदः ॥ २२ ॥ ततश्चोपवनेऽत्रैव । विहारे श्रीजिनेशितुः ॥ अचिंतितफलां मूर्त्तिं । सद्योऽर्चयितुमर्हसि ॥ २३ ॥

किं चात्र वनमध्येऽस्त्य—मिततेजा महामुनिः ॥ सांप्रतं सांप्रतोपास्ति—स्तस्यापि क्षेमकांक्षया ॥ २४ ॥ तत्क्षणोचितमाकर्ण्य । तद्वचः शंखराजपि ॥ जिनमभ्यर्च्य साधुं च । नत्वा पुर नृपाविशत् ॥ २५ ॥ मुमुक्षुरपि विज्ञात—तद्भावो मधुराक्षरं ॥ चकाराऽतिशयज्ञानी । देशनां भवनाशिनीं ॥ २६ ॥ जीवाः संसारकांतारे । पूर्वकर्मवशेरिताः ॥ वातप्रभ्य इव व्यर्थं । भ्राम्यंति भ्रांतिसंभृताः ॥ २७ ॥ सुखं सुखमिति भ्रांत्या । दुःखपूक्ताः पदे पदे ॥ जीवाः क्लिष्यंति संसारे । वातोद्भूतपलाशवत् ॥ २८ ॥ कल्पद्रुमिव कामार्थी । भावोद्विग्नो भवीह हा ॥ न सेवते जिनादेशं । परत्रेह च शर्मदं ॥ २९ ॥ दुःप्रापं प्राप्य जन्मेदं । तद्भाजन मा वृथा मृथाः ॥ अचिरेणैव कल्याण—भाजनं हि भविष्यसि ॥ ३० ॥ तद्वाचमिभमाकर्ण्य । सद्यः संजातसंमदः ॥ विशश्राम विशामीश—स्तत्रैव खलु तां निशां ॥ ३१ ॥ अथो विज्ञातकल्यायां । विज्ञावर्यां भुवःपतिः ॥ स्वप्नमालोक्य तं प्रात—र्गुरुणां पुरतोऽवदत् ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ ३२ ॥ अपक्वैकफला वल्ली । पतिता कल्पपादपात् ॥ आरुरोह पुनः पूर्ण–फला सा तत्र तत्क्षणात् ॥ ३३ ॥ गुरुरप्याह नूमींड । नवान् कल्पमहीरुहः ॥ वल्ली प्रिया ते सा सूत–पुत्रा पुनरुपेष्यति ॥ ३४ ॥

अतः प्रीतः पुरं प्राप्य । सत्वरं नृपकुंजरः ॥ पदात्यश्वयुतं दत्तं । राज्ञीमन्वेष्टुमादिशत् ॥ ३५ ॥ दत्तोऽपि दत्तदृक् विष्वक् । वृक्षाद्वृक्षं वनाद्वनं ॥ भ्राम्यंस्तापसमज्ञक्षी–दूराद् द्वीपमिवांबुधौ ॥ ३६ ॥ गत्वा पप्रच्छ दत्तो ऽक् । वनेऽस्मिन् नगवंस्त्वया ॥ वीक्षितैकाकिनी काचि–द्वनिता क्वापि दुःखिता ॥ ३७ ॥ प्रत्युवाच मुनिर्नेड । किं तया कार्यमुच्यतां ॥ तेनोक्तं नूपतेर्वह्नौ । विशतः प्राणरक्षणं ॥ ३८ ॥ मत्वा नूपतिसाहाय्यं । मुनिराश्रमरक्षणात् ॥ दत्ताय दर्शयामास । पुत्रोपेतां कलावतीं ॥ ३९ ॥ दूरतो दत्तमालोक्य । जाग्रल्लोका कलावती ॥ रुरोद रोदसीकुक्षिं–भरि नूध्रप्रतिस्वनैः ॥ ४० ॥ दत्तः प्राह स्वसर्मास्म । रोदीः कर्मफलं ह्यदः ॥ अभुक्त्वा प्राग्नवोपात्तं । न मुच्यंते जिना अपि ॥ ४१ ॥ तद्विवेकिनि धीरत्व–माधाय रथमारुह ॥ स्वदर्शनसुधादृष्ट्या । नृपमाश्वासय द्रुतं ॥ ४२ ॥ पश्चात्तापपरो

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नूपो । वह्निमह्नाय संविशन् ॥ दिनमद्यतनं कष्टात् । स्थापितोऽस्ति त्वदाशया ॥ ४३ ॥ कु-
लीना मानमुन्मुच्य । प्रियकारुण्यतस्ततः ॥ नत्वा कुलपतिं सद्य । आपप्रच्छ कलावती ॥
॥ ४४ ॥ ततस्तेनापि दत्ताशीः । प्रहिता हितमिच्छुना ॥ चचाल सह दत्तेन । सांगजा वि-
जयांगजा ॥ ४५ ॥ आकर्ण्यार्थ पुरोपांत्य–मागतां शंखनूपतिः ॥ नदश्रुलोचनो राज्ञी–मु-
वाच न्यंचदाननः ॥ ४६ ॥ निर्दोषापि तदा नइे । यन्मयासि विडंबिता ॥ मोचिता च व-
ने तन्मे । क्षम्यतां देवि दुःकृतं ॥ ४७ ॥ नृपः प्रीतिपरो बाढं । संमान्येति महासतीं ॥ पुरं
प्रवेशयामास । सादरं समहोत्सवं ॥ ४८ ॥ पौरांतःपुरनारीभि–र्वृता देवी कलावती ॥ श-
चीव सजयंताप । शुद्धांतं पुत्रसंयुता ॥ ४९ ॥ स्वप्नानुसारतः पूर्ण–कलशेत्यभिधां ततः ॥
स्वसूनोः कारयामास । द्वादशेऽहनि नूपतिः ॥ ५० ॥ कलावत्यन्यदा प्राह । नूपतिं रहसि
स्थिता ॥ केन दोषेण मे स्वामिन् । स दंडः कारितस्त्वया ॥ ५१ ॥ सलज्जमथ नूपालः ।
प्राह नइे ध्रुवं त्वयि ॥ प्रतिपच्चंद्रलेखाया–मिव दोषो न सर्वथा ॥ ५२ ॥ किंतु ते प्राग्भवा-
चीर्ण–कर्मदोषवशादहं ॥ तत्कर्माऽकरवं यन्न । मातंगा अपि कुर्वते ॥ ५३ ॥ तन्मूलकारणं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

चेदं । यत्तदंगदयोर्युगं ॥ विनैव जयसेनाख्यां । नवत्या श्लाघितं प्रिये ॥ ५४ ॥ नगरोपवनस्था-
ष्णो-र्मुनेरमिततेजसः ॥ यत्कर्म प्राक्तनं पृष्ट्वा । तदपि ज्ञास्यतेऽधुना ॥ ५५ ॥ ततः कला-
वतीदेव्या । सार्द्धं मुनिनिनंसया ॥ जगाम नंदनोद्यानं । नूधवः सपरिच्छदः ॥ ५६ ॥ आरामे
चैत्यसन्नक्त्या । पूजयित्वा जिनेश्वरं ॥ निषीदतुर्मुनेरग्रे । दंपती नतिपूर्वकं ॥ ५७ ॥ देशनां-
ते महीपालः । पप्रच्छ प्रांजलिर्मुनिं ॥ नगवन् किं कृतं कर्म । कलावत्या पुरानवे ॥ ५८ ॥
निर्दोषाया अपि मया । येनास्याश्चेदितौ भुजौ ॥ मुनिराख्यातुमारेने । ज्ञात्वाथ ज्ञान-
चक्षुषा ॥ ५९ ॥

अस्ति श्रीमद्विदेहोर्व्यां । श्रीमद्देवाभिधं पुरं ॥ तत्र नूमिपतिश्चारु-विक्रमो नरविक्र-
मः ॥ ६० ॥ लीलावती च तन्नार्या-ऽसूत पुत्रीं सुलोचनां ॥ आबालकालं सा धर्म-रसिका
कौतुकप्रिया ॥ ६१ ॥ मातापित्रोर्महाप्रेम-पात्रं सत्रं कलाततेः ॥ सा प्राप बाल्यतारुण्य—
संधिवर्यं वयः क्रमात् ॥ ६२ ॥ एतस्यां पितुरुत्संग-स्थितायां नूनृतोऽन्यदा ॥ केनाप्युपा-
यनीचक्रे । राजकीरो मनोहरः ॥ ६३ ॥ ततः कौतुकिना राज्ञा । करे कृत्य स पाठितः ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

न्त्पाद्य दक्षिणं पाणि–माशीर्वादमुदाहरत् ॥ ६४ ॥ स्फुरत्तमःपक्षपाति–राजतेजोऽग्निवर्द्धकः ॥ ज्ञाति प्रतापज्ञानुस्ते । राजन् विश्वावज्ञासकः ॥ ६५ ॥ प्रीतः स्वदेहालंकारां–स्तदानेतु–र्नरेश्वरः ॥ दत्वा राजशुकं तु स्व–पुत्र्यै प्रीतमना ददौ ॥ ६६ ॥ तं लब्ध्वा सापि दारिद्र्य–तनूज इव मोदकं ॥ गत्वा गृहेऽक्षिपत्स्वर्ण–पंजरे मदिरेक्षणा ॥ ६७ ॥ शर्कराशकलैः शा–लि–दाडिमीफलज्ञक्षणैः ॥ हारदूरादिपानैः सा । प्रमोदात्तमपोषयत् ॥ ६८ ॥ सा कदाचि–त्करस्थं तं । हृदयस्थं कदाचन ॥ अंकस्थं पंजरस्थं च । पाठयंती व्यनोदयत् ॥ ६९ ॥ भो–जने शयने राजा–ऽस्थाने याने वने गृहे ॥ योगीव मानसैकाग्र्यं । नाऽमुंचत्तं सुलोचना ॥ ॥ ७० ॥ सुलोचनाथ तद्भंगो–द्याने तु कुसुमाकरे ॥ पंजरस्थं तमादाय । गताऽनेकसखीयुता ॥ ७१ ॥ तत्र सीमंधरं नंतुं । प्रविष्टा सा जिनौकसि ॥ शुकोऽपि दृष्ट्वा श्रीवीत–रागं चेत–स्यज्ञावयत् ॥ ७२ ॥ दृष्टपूर्वमिदं बिंब–मीदृक्कापि मया पुरा ॥ इत्यूहापोहसंदोहं । विद–धानश्चिरं शुकः ॥ ७३ ॥ जातजातिस्मृतिर्दध्यौ । यदहं पूर्वजन्मनि ॥ चारित्रं सुगतिप्राप्ति–प्रतिज्ञु प्राप्तवानहं ॥ ७४ ॥ अध्यैषि सर्वशास्त्राणि । क्रयोपशमतस्ततः ॥ क्रियां पुनरकार्षं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

न । सर्वथा पठनैकधीः ॥ ७५ ॥ वस्त्रपुस्तकपात्रादि–मूर्छामुदिततत्वधीः ॥ परोपकरणीकृत्य । मुधा ज्ञानमहारयं ॥ ७६ ॥ व्रतं विराध्य पर्यंत–मसंशोध्य मुधाव्रतं ॥ विपद्य कानने-ऽमुष्मि–न्नहं राजशुकोऽभवं ॥ ७७ ॥

प्रत्यासन्नतया मुक्त–शास्त्रज्ञानबलादहं ॥ तिर्यग्भवेऽपि संजातः । पाठको धिषणापटुः ॥ ७८ ॥ तत्कथं ज्ञानदीपेऽहं । करप्राप्तेऽप्यपुण्यवान् ॥ तिर्यग्जन्मोदधौ मग्नः । स्खलच्चरणपङ्क्तिः ॥ ७९ ॥ अतःपरमहं नाथ–मेनं नत्वैव संततं ॥ आदास्ये नक्तमित्येष । नियमोऽत्रापि मे भवे ॥ ८० ॥ सुलोचनापि तीर्थेशं । नत्वाऽन्यर्च्य च भक्तितः ॥ सपंजरं तमादाय । निजमंदिरमासदत् ॥ ८१ ॥ कीरं करेऽन्यदाऽदाय । राजकन्या सुलोचना ॥ भोक्तुं यावदुपाविक्षत् । स्मृत्वा स्वनियमं शुकः ॥ ८२ ॥ तावन्नमोरहंताण–मित्युक्त्वा च नभोऽध्वना ॥ तदभीयत तीर्थेशं । नंतुं चैत्यं जगाम च ॥ ८३ ॥ युग्मं ॥ स्वैरं सीमंधरं देवं । नत्वा त्रैवर्ग्यशुद्धितः ॥ विजहार फलाहारैः । प्रीतः श्रीकुसुमाकरे ॥ ८४ ॥ इतो राजतनूजायां । क्रंदंत्यां तद्वियोगतः ॥ धावंतिस्म तमादातुं । पत्तयो गरुमा इव ॥ ८५ ॥ तं ग-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

न्नं पादपांतस्ते । निविष्टं शाखिनि द्रुतं ॥ बध्ध्वा पाशेन नृपाल–कन्याया नुपनिन्यिरे ।८६। सा प्रेममन्मनालापैः । करेणादाय तं जगौ ॥ जननीनिर्विशेषां मां । परित्यज्य गतोऽसि यत् ॥ ८७ ॥ न विश्वसिमि तेनाह–मित्युदीर्य नृपांगजा ॥ गतिन्नंगाय तत्पक्षौ । रोषात्क्षिप्रमलीलवत् ॥ ८८ ॥ जीवं दुश्चीर्णकर्मै वा–ऽपारसंसारसागरे ॥ तं पंजरे विनिक्षिप्तं । स्थापयामास नृपजा ॥ ८९ ॥ शुकोऽप्यचिंतयद्धिग्मे । पराधीनत्ववेदनां ॥ क्रियां नाऽकरवं मूर्खः । स्वाधीनामपि हा तदा ॥ ९० ॥ सहस्व तदिदानीं रे । जीव पीवरवेदनाः ॥ क्व ते जिनमुखं द्रष्टुं । समयः पापकर्मणः ॥ ९१ ॥ इत्यादिचिंतासंताप–मग्नो हारितशेखरः ॥ अश्रूणि मुमुचे कर्म–लवानिव विरागवान् ॥ ९२ ॥ स मृत्वाऽनशनेनाथ । कतिचिद्दिवसांतरे ॥ देवः सौधर्मकल्पेऽभू–दनल्पाकल्पविभ्रमः ॥ ९३ ॥ सुलोचनापि तद्दुःखा–न्मृताऽनशनमृत्युना ॥ सौधर्मेऽभूत्प्रिया तस्य । बुभुजाते च तौ सुखं ॥ ९४ ॥ राजन् स शुकजीवस्त्वं । शंखनामा ततश्च्युतः ॥ जातः सुलोचनाजीवः । पुनरेषा कलावती ॥ ९५ ॥ प्राग्भवे यत्कलावत्या । पक्षौ छिन्नौ शुकस्य ते ॥ तत्कर्मणो विपाकेन । त्वयाऽस्याश्छेदितौ करौ ॥ ९६ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सर्वस्य कर्मणोऽवश्यं । शुभस्याऽप्यशुभस्य वा ॥ दशधा बहुधा चैव । विपाकः परिपच्यते ॥ ९७ ॥ जातिस्मरणमासाद्य । ततस्तौ दंपती क्षणात् ॥ संयमायोद्यतौ साधुं । प्रणम्य स्व-गृहं गतौ ॥ ९८ ॥ निवेश्य राज्ये श्रीपूर्ण–कलशाख्यं निजांगजं ॥ दीक्षां जगृहतुः पार्श्वे । गुरोरमिततेजसः ॥ ९९ ॥ प्रपाल्य चारित्रमनल्पकालं । तौ दंपती स्वर्गमवाप्य सम्यक् ॥ ततश्च्युतौ क्षीणकुकर्मलेशौ । क्रमान्निवं प्राप्स्यत उत्तरेण ॥ २०० ॥

॥ इति श्रीरुद्रपल्लीयगच्छे श्रीसंघतिलकसूरिपट्टावतंसश्रीसोमतिलकसूरिविरचितायां श्रीशीलतरंगिण्यां कलावतीकथानकं समाप्तं ॥ श्रीरस्तु ॥

कासांचिन्महासतीनां गृहवासे वसंतीनामपि महर्षिस्तवनीयं शीलमाहात्म्यमाह—

॥ मूलम् ॥—सीलवइनंदयंती–मणोरमारोहिणीपमुहाउ ॥ रिसिणोवि सया कालं । महासईणं थुणंति गुणे ॥ ५६ ॥ व्याख्या—शीलवतीनंदयंतीमणोरमारोहिणीप्रमुखा महा-सत्यो जयंत्विति संबंधः, प्रमुखशब्देनाऽनन्निव्यक्तप्रज्ञावप्रतीक्षाणां पतिव्रतानां बाहुल्यमुक्तं, यासां महासतीनां सदाकालं नित्यमृषयोऽप्याजन्मब्रह्मचारिणोऽपि गुणान् स्तुवंति, निर्मलं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

शीलातिशयं श्लाघंत इत्यर्थः, भावार्थः कथानकाद्गम्यः, तत्रादौ शीलवतीकथा प्रतन्यते. तथाहि—

जंबूद्वीपाभिधद्वीप–मौलिमाणिक्यमंडनं ॥ अस्ति श्रीनंदनवन–नामधेयं पुरोत्तमं ॥ ॥ १ ॥ यत्र स्फटिकहर्म्याग्रो–च्छलत्कांतिकदंबकैः ॥ हस्यमान इव व्योम्नि । क्रीयते क्षणदापतिः ॥ २ ॥ तत्रारिमर्दनो राजा । यस्य विष्टपमंभरे ॥ यशश्चंद्रोदयः स्फार–तारविद्वित्तिभागू बभौ ॥ ३ ॥ मान्यस्तस्य सदाचारः । श्रेष्ठी रत्नाकराभिधः ॥ श्रीनामधेया तज्जाया । निरपायगुणोदया ॥ ४ ॥ श्राद्धधर्ममनाबाधं । पालयन्नयमायतौ ॥ सुखहेतुं चिरेणापि । न लेभे पुत्रसंततिं ॥ ५ ॥ पुत्राऽभावमहादुःख–पीडिता श्रीरथान्यदा ॥ श्रीश्रेष्ठिनमभाषिष्ट । शिष्टाचारविधायिनी ॥ ६ ॥ चैत्याग्रेऽजितनाथस्य । स्वामिन्नुपवने पुरः ॥ देवी व्यक्तमहाशक्ति–रास्तेऽजितबलाभिधा ॥ ७ ॥ सा च पुत्रानपुत्राणां । निर्धनानां धनानि च ॥ दुर्भगानां च सौभाग्या–न्याधत्ते सेविता सती ॥ ८ ॥ तदार्यपुत्र तस्यां त्व–मुपयाचितुमर्हसि ॥ पुत्रार्थे हि विधीयंते । स्वप्राणा अप्युपायनं ॥ ९ ॥ तेनापि तत्तथा चक्रे । जातश्च तनयो-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

त्तमः ॥ भाग्ययोगात्फलंत्येव । काले स्वाराधिताः क्रियाः ॥ १० ॥ अथ जन्मोत्सवादूर्ध्वं । देवीमाहात्म्यसूचिकां ॥ चक्रेऽजितसेन इति । तस्याख्यां द्वादशेऽहनि ॥ ११ ॥ क्रमाद्बाल्यमतिक्रम्य । संप्राप्तो यौवनश्रियं ॥ शिश्रिये स्पर्द्धयेवासौ । सरस्वत्या श्रियापि च ॥ १२ ॥ तस्यानुरूपकन्यायै । श्रेष्ठी रत्नाकरस्ततः ॥ चिंतां चकार शास्त्रार्थ–संदेह इव बुद्धिमान् ॥ ॥ १३ ॥ कन्यामात्मगुणैस्तुल्यां । यद्येष मम नंदनः ॥ न लभेत ध्रुवं तस्या–ह्यर्थः स्रष्टुरुपक्रमः ॥ १४ ॥ यतः—निर्विशेषः प्रभुः पार–वश्यं दुर्विनयोऽनुगः ॥ दुष्टा भार्या च चत्वारि । मनःशल्यानि देहिनां ॥ १५ ॥ इतश्च व्यवसायार्थी । तेनैव प्रहितः पुरा ॥ कोऽप्यभ्येत्य वणिक्पुत्र–स्तदंतिकमुपाविशत् ॥ १६ ॥ व्यवहारस्वरूपं च । स पृष्टः श्रेष्ठिना कृती ॥ आयव्ययायुतं सर्वं । व्याजहार यथाविधि ॥ १७ ॥ किंचाहं जग्मिवान् क्वापि–मंगलायां महापुरि ॥ श्रेष्ठिना जिनदत्तेन । व्यवहारोऽभवन्मम ॥ १८ ॥

भोजनायाऽन्यदा तेना–ऽभ्यर्थितस्तद्गृहेऽगमं ॥ अशङ्कं कन्यकां तत्र । स्वर्गाद्भ्रष्टां सुरीमिव ॥ १९ ॥ केयमित्यहमप्राक्षं । ततो विस्मितमानसः ॥ श्रेष्ठी प्राह तनूजेयं । मम चिं-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तेव देहिनी ॥ २० ॥ यतः—किं प्राप्स्यति वरं श्रेष्ठं । तदिष्टा किं भविष्यति ॥ किमसौ श्वसुरादीनां । स्वगुणै रंजयिष्यति ॥ २१ ॥ पालयिष्यति किं शीलं । प्रसविष्यति किं सुतं ॥ श्वसुरादिकवर्गोऽस्याः । कथं वा तोषयिष्यते ॥ २२ ॥ मा भवंतु सपत्न्योऽस्या । दुष्येयुर्मास्म यातरः ॥ इहं पितृगृहे कन्या । मूर्त्ता चिंतेव वर्द्धते ॥ २३ ॥ एषा च गुणमाणिक्य—रोहणाचलभूमिका ॥ पक्किशब्दांतसर्वांगि—भाषाविज्ञानदक्षिणा ॥ २४ ॥ कन्येयं शीलवत्याख्या । ख्याता रूपकलागुणैः ॥ तदस्यां योग्यजामातृ—चिंता मे बाधतेतरां ॥ २५ ॥ मयोक्तं देव मा चिंतां । कुरु श्रीनंदने पुरे ॥ अस्ति योग्यो वरोऽमुष्या । रत्नाकरसुतोऽजितः ॥ ॥ २६ ॥ जिनभक्तोऽन्यधाभद्र । साधु साधु त्वयोदितं ॥ वरचिंतोदधौ मग्नो । भवताऽद्य समुद्धृतः ॥ २७ ॥ भक्त्वेत्यजितसेनस्य । दातुं शीलवतीं सुतां ॥ जिनशेखरनामानं । प्रजिघाय निजं सुतं ॥ २८ ॥ सोऽप्यत्रैव मया सार्द्ध—मागतोऽस्ति धियां निधिः ॥ इति कर्त्तव्यता तस्मा—च्छ्रेष्ठिन्नादिश्यतां मम ॥२९॥ श्रेष्ठी प्राह महाभाग । साध्वेवोपकृतं त्वया ॥ जातश्च सर्वलाभेभ्यो । महालाभोऽयमेव मे ॥ ३० ॥ ससत्कारमथाहूतः । श्रेष्ठिभूर्जिनशेखरः ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ददावजितसेनस्य । यामिं शीलवतीं मुदा ॥ ३१ ॥ ययावजितसेनोऽपि । सार्द्धं तेनैव तां पुरीं ॥ परिणीय महद्ध्यां च । समियाय निजं गृहं ॥ ३२ ॥ स तया गृहलक्ष्म्येव । स्वगोत्रामृतकुड्यया ॥ त्रिवर्गसारं गार्हस्थ्य–धर्मं चिरमपालयत् ॥ ३३ ॥ शिवाध्वनिमथाऽकर्ण्या–ऽन्यदा शीलवतीसती ॥ निशीथे निर्गता गेहा–द्भटमादाय मूर्द्धनि ॥ ३४ ॥ तदानीं श्वसुरस्तस्याः । कामिन्वेव जरन्नवः ॥ निर्ऋत्या दूरतस्त्यक्त–स्तां ददर्श महासतीं ॥ ३५ ॥ विकल्पोदधिनिर्मग्न–श्चेतस्येवमचिंतयत् ॥ कुशीलां कलयाम्येना–ममीभिर्लक्षणैर्वधूं ॥ ३६ ॥ सक्षोत्रजा अपि घन–रसकल्लोलसंयुताः ॥ प्रायः स्त्रियो भवंत्येव । निम्नगा इव निम्नगाः ॥ ३७ ॥

एताः स्वार्थपरा नार्यो । बहिरेव मनोहराः ॥ अत्यंतदारुणाश्चांतः । स्वर्णाढ्याः क्षुरिका इव ॥ ३८ ॥ शीलवत्यपि निर्माय । किंचित्कार्यमनिंदितं ॥ घटं मुक्त्वा पुनः प्राप्ता । स्वतल्पमविकल्पितं ॥ ३९ ॥ पयस्यलांबुवच्चिंता–शतपातुकधीरिमः ॥ उत्सुको रजनीशेषे । श्रेष्ठी जायामभाषत ॥ ४० ॥ वधूः शीलगुणैर्वृद्धे । कीदृशी प्रतिभाति ते ॥ तयोक्तं कुलमर्यादा–ऽनुरूपं चेष्टतेऽखिलं ॥ ४१ ॥ नांतर्मुखी शेमुखी ते । ङमन्ये यन्मया निशि ॥ वी-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

क्षितैकाकिनी क्वापि । रंतुमद्य गता वधूः ॥ ४२ ॥ तत्समस्तप्रमाणेऽन्यो । बलीयोऽध्यक्षमेव हि ॥ जानीहि सकलंकां त—द्यूं चंद्रतनूमिव ॥ ४३ ॥ इतश्चाऽजितसेनोऽपि । पितुः पादनिनंसया ॥ समेतस्तत्र तेनाऽथ । सखेदमिव भाषितः ॥ ४४ ॥ किमिह प्रोच्यते वत्स । विधात्राऽस्मकृहांगणे ॥ रोपिता च न सेहे च । पारिजातकवल्लरी ॥ ४५ ॥ यत्तादृग्वंशजातापि । गुणसंसर्गवत्यपि ॥ कौटिल्यं भजते चाप—लतिकेव वधूरियं ॥ ४६ ॥ सलज्जमजितोऽप्याह । जिनधर्मरताप्यसौ ॥ चेष्टते दुष्टचारित्वं । हतास्तदखिला गुणाः ॥ ४७ ॥ जाने वत्स वधूरासी—त्कल्पवल्लीव नः कुले ॥ सांप्रतं दृष्टदोषा तु । विषवल्लेर्विशिष्यते ॥ ४८ ॥ किंच—को नाम स्त्रीषु विश्वासः । श्वासस्येव शरीरिणः ॥ स्वार्थैकवशतः शीलं । यासां विद्युल्लतायते ॥ ४९ ॥ यदुक्तं—

न बद्ध्यंते गुणैः पत्यु—र्न लक्ष्यंते परीक्षकैः ॥ न धनेन च धार्यंते । शीलत्यागोद्यताः स्त्रियः ॥ ५० ॥ शास्त्रेषु श्रूयते यच्च । यच्च लोकेषु गीयते ॥ संवेदयंति दुःशीलं । तन्नार्यः कामविह्वलाः ॥ ५१ ॥ निशीथेऽद्य गता क्वापि । नीराहरणदंभतः ॥ यामे तु पुनरप्यागा—

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ज्ञाग्रतो मे वधूरियं ॥ ५२ ॥ अवेहि तदिमां वत्स । दुर्वृत्तां त्यजनोचितां ॥ गुर्वादेशपराधीन—स्तथेत्युक्त्वा गतः सुतः ॥ ५३ ॥ श्रेष्टी कूटप्रयोगेण । तस्याः प्रातरजिज्ञपत् ॥ त्वामाह्वयति ते तातो । वत्से मिलितुमुत्सुकः ॥ ५४ ॥ ज्ञात्वा रात्रिविकल्पं तं । विदग्धा शीलवत्यपि ॥ अनुमेने परीक्षायां । किं जात्यं हेम कंपते ॥ ५५ ॥ स्यंदनं प्रगुणीकृत्य । शीलवत्या समन्वितः ॥ स्वयं रत्नाकरः श्रेष्टी । चचाल कृतमंगलः ॥ ५६ ॥ मार्गे नद्यामुपेतायां । श्रेष्टी शीलवतीं जगौ ॥ पादत्राणे परित्यज्य । वत्से संचर पाथसि ॥ ५७ ॥ किंचिद्विचार्य साऽप्यंत—स्ते विशेषेण पर्यधात् ॥ मेने च दुर्विनीतां तां । श्रेष्टी प्राक्धृतकश्मलः ॥ ५८ ॥ पुरः फलितमालोक्य । मुक्तक्षेत्रं जगावसौ ॥ अहो शास्यश्रियः क्षेत्र—स्वामिनः करगोचराः ॥ ५९ ॥ स्नुषाऽज्ञाणीदेवमेत—न्न जग्धं यदिदं पुरा ॥ श्रेष्टी दध्यावसंबद्ध—प्रलापिन्यप्यसाविति ॥ ६० ॥ एतस्यां वामचारित्वा—ऽनुरूपं कृतवानिति ॥ मुदितो द्रुतसंपातं । श्रेष्टी रथमचालयत् ॥ ६१ ॥ समृद्ध्या धनदङ्ग—सरंगं जनसंकुलं ॥ पुरः पुरमथोद्दीक्ष्य । सोऽशंसन्मूर्द्धूननात् ॥ ६२ ॥ तयापि व्यापिबुद्ध्योचे । साध्विदं यदि नोद्दसं ॥ श्रेष्टिनाऽचिंति सो-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ल्लुंग–गीर्मामपि हसत्यसौ ॥ ६३ ॥

अग्रेऽथ भटमालोक्य । प्रहारभरजर्जरं ॥ श्रेष्टी श्लाघितवानस्य । शौंडीर्यं साधु साधिति ॥ ६४ ॥ विलोक्य तमथो प्राह । मधाविव पिकीवधूः ॥ साध्वस्ति कुट्टितस्ताव–त्पामरोऽयं हि कातरः ॥ ६५ ॥ प्रतिकूला ध्रुवं ह्येषा । मदुक्ते दुष्टचारिणी ॥ प्रत्यक्षेऽपि विरुद्धार्थ–मुन्मत्तेवाऽन्यधत्त या ॥ ६६ ॥ भावयन्निति तत्त्याग–कर्म चाप्यनुमोदयन् ॥ न्यग्रोधपादपाधस्ता–त्क्वापि श्रेष्टी स्थितः पथि ॥ ६७ ॥ वधूरपि वटच्छायां । परिहृत्य सुदूरतः ॥ आतपे पटमावृत्य । तस्थौ स्थिरमतिप्रज्ञा ॥ ६८ ॥ श्रेष्टी प्राह जिनदत्तां–गजे छायामुपाश्रय ॥ श्रुत्वाऽप्यश्रुतकेनेव । साऽस्थाद्भजनिमीलया ॥ ६९ ॥ अहो चरितवामेयं । न शिक्षार्हा कुशिष्यवत् ॥ इत्युपेक्ष्य स्वयं तस्थौ । तच्छायाप्तसुखासिकः ॥७०॥ ततः क्वापि गतः श्रेष्टी । कर्वटे तत्र गत्वरीः ॥ कुटीस्त्रिचतुरो वीक्ष्य । ग्रामं दुःस्थमुदाहरत् ॥ ७१ ॥ ततः शीलवती किंचि–द्विमृश्य मतिमद्वरा ॥ जनतासंकुलं स्थान–मिदमित्युच्चकैर्जगौ ॥ ७२ ॥ सर्वथा विपरीतेयं । कुशिक्षिततुरंगवत् ॥ इति यावद्विषण्णात्मा । श्रेष्टी चेतस्यचिंतयत् ॥ ७३ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तावता मातुलस्तस्या–स्तत्राऽन्येत्य सगौरवं ॥ श्रेष्टिनं स्वगृहे नीत्वा । ऽनोजनाद्यैरुपाचरत् ॥ ७४ ॥ साग्रहं स्थाप्यमानोऽपि । तेन श्रेष्टी तु सोत्सुकः ॥ प्रतस्थे सवधूकस्त–त्क्षुत्सव-स्त्रादिसत्कृतिः ॥ ७५ ॥ संप्राप्तः प्रांतरं वृक्ष–च्छायायाममुचच्छ्रयं ॥ भुक्त्वा तदुपरि श्रेष्टी । क्षणं श्रांतश्च सुप्तवान् ॥ ७६ ॥ वधूरपि पितुर्गेहं । ततोऽन्यर्णं विजानती ॥ शुद्धाचारा स्व-कर्मार्प्ति–हृष्टा ऽनोक्तुमुपाविशत् ॥ ७७ ॥ करीरस्तंबमारूढ–स्तावता करटोऽरटत् ॥ तद्भा-षामुपलभ्याह । किं रे करकरायसे ॥ ७८ ॥

श्रुत्वेति चिंतयामास । श्रेष्टी वातकिनी ह्यसौ ॥ दुराचारा नराऽन्नावा–च्छाषते शकुनै-रपि ॥ ७९ ॥ काके करंबकालोक–जातोत्कंठे रटत्यलं ॥ विमृश्याऽवसरं प्रोच्चैः । सती निः-शंकमाख्यत ॥ ८० ॥ वियुक्ता दुर्नयेनाहं । पत्युरेकेन रे द्विक ॥ पित्रोरपि द्वितीयेन । कु-तेन तु मिलामि न ॥ ८१ ॥ जागरूकस्ततः श्रेष्टी । सान्निप्रायमिदं वचः ॥ श्रुत्वा पप्रच्छ किं वत्से । दुर्नयेनेत्युदीर्यते ॥ ८२ ॥ सा प्राह सत्यमेवाहं । वच्मि श्वसुर सर्वथा ॥ दोषा-य मे गुणा एव । जाताश्चंदनवद्यतः ॥ ८३ ॥ कुसुमनिचयः शाखाऽनंगं तनोति वनस्पते–

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रलसगमनो बर्हाटोपो वधाय शिखंडिनः ॥ चतुरगमनो यो जात्योऽश्वः स गौरिव वाह्यते । गुणवति जने प्रायेणैते गुणाः खलु वैरिणः ॥ ८४ ॥ बाढ्ये बंधूपरोधेन । सर्वशास्त्रशिरोमणिं ॥ अहमध्येषि मूढात्मा । शास्त्रं पक्किरुताह्वयं ॥ ८५ ॥ गिरा गारुडिकस्येव । सर्पदष्ट इव क्षणात् ॥ उन्नाय रथतः श्रेष्टी । सुतं तत्पार्श्वमीयिवान् ॥ ८६ ॥ तदाहं हंत निर्न्नाग्या । निशीथे तव जाग्रतः ॥ श्रुत्वा श्वसुर गोमायु–कांताध्वनिं समुन्विता ॥ ८७ ॥ घटमादाय मूर्ध्नाऽगां । नदीं तीर्त्वा च तेन तां ॥ अदां मृतकमाकृष्य । शिवायै जलमध्यतः ॥ ८८ ॥ तत्कटीतटसंटंकी–न्यादायाऽऽभरणान्यहं ॥ अनर्घ्याणि घटे क्षिप्त्वा । क्षिप्रं स्वगृहमागमं ॥ ॥ ८९ ॥ निखातानि महीपीठे । संति तानि तथैव च ॥ अनेन दुर्नयेनाह–मियतीं भुवमासदम् ॥ ९० ॥ सांप्रतं वायसस्त्वेष । याचमानः करंबकं ॥ ब्रूते करीरस्तंबाधो । दशलक्षाणि कांचनं ॥ ९१ ॥ तदहं वच्मि रे काक । दुर्विपाकमिदं वचः ॥ मा पुनः पुनराचक्ष्व । कृते क्षारमिवात्र मे ॥ ९२ ॥

ततः ससंभ्रमं कर्णौ । कंपयन् स्थविरो जगौ ॥ किं वत्से सत्यमप्येत–त्साऽवदत्संश-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

योऽत्र कः ॥ ९३ ॥ ततः परिकरं बध्ध्वा । वृद्धस्तरुणवत्तदा ॥ अयःकुद्दालमादत्त । करे कमललीलया ॥ ९४ ॥ काकाय स्वजनायेव । दापयित्वा करंबकं ॥ स्वयं खनितुमारेभे । करीरस्तंबमादरात् ॥ ९५ ॥ प्रादुरासन् स्वर्णकुंभाः । शीलवत्या गुणा इव ॥ तस्या दोषा इव क्षिप्ता । दूरतस्तेन रेणवः ॥ ९६ ॥ अहो मूर्त्तिमती लक्ष्मी–रेवासौ मद्गृहे वधूः ॥ काचव्रांत्या मरकत–मिवाऽवगणिता मया ॥ ९७ ॥ ध्यायन्निति रथे स्वर्ण–कलशान् सत्वरं न्यधात् ॥ क्षमयामासिवांस्तां च । स्वापराधप्रकाशनात् ॥ ९८ ॥ अन्निनंदन् वधूमेष । सद्म-स्थश्चव्यसोत्सुकः ॥ स्यंदनं वालयामास । जितकासीव युद्धतः ॥ ९९ ॥ वधूराख्यदितोऽन्यर्ण–मेव मेऽस्ति पितुर्गृहं ॥ तत्तात पित्रोः संगंतु–मुचितोऽवसरो ह्यसौ ॥ १०० ॥ व्यावर्त्तस्वाऽग्रहादस्मा–त्कुलमुज्ज्वालयाऽधुना ॥ रथमारुह मे वत्से । द्राक् पूरय मनोरथान् ॥१॥ सापि श्वसुरदाक्षिण्या–द्दत्तचित्ता तथाऽकरोत् ॥ श्रेष्टी तु खेटयामास । रथं प्रमुदिताशयः ॥ ॥ २ ॥ तत्पूर्वन्नणितं सर्वं । स मन्वानः सकारणं ॥ पर्वतोपत्यकावासं । ग्राममुद्दसमागतः ॥ ३ ॥ जगाद मधुरं वत्से । न ते निर्हेतुकं वचः ॥ उद्दसस्तदयं ग्रामः । कथमूचे जनाकु-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

लः ॥ ४ ॥ साऽऽख्यत ख्यातमेवेदं । तात लोकैर्न किंचन ॥ यत्रास्ति स्वजनः कोऽपि । तच्छून्यमपि सुंदरं ॥ ५ ॥ ज्ञवंतमागतं श्रुत्वा । यदत्र मम मातुलः ॥ सञ्चकार तथा तेनाऽस्माकमेतज्जनाकुलं ॥ ६ ॥ ततो हेतुशताश्लिष्टं । चाणाक्यस्येव जल्पितं ॥ वध्वा व्यवसितं सर्वं । सान्निप्रायमसौ विदन् ॥ ७ ॥

क्रमेण संगतो मार्ग–जुषो वटतरोस्तले ॥ वधूं पप्रच्छ किं वत्से । जायाऽस्य मुमुचे तदा ॥ ८ ॥ युग्मं ॥ साह श्वसुर किं नेदं । श्रुतपूर्वमपि क्वचित् ॥ वायसश्येनदृष्टारूढो । वनिताशिरसि श्रवेत् ॥ ९ ॥ षण्मासाभ्यंतरे पत्यु–स्तदाऽपायो ज्ञवेन्महान् ॥ वृक्षमूले च सर्पादि–ज्ञवाद्या दोषराशयः ॥ १० ॥ युग्मं ॥ तदस्तापायमाचीर्णं । वरं स्वाधीनकर्मणि ॥ परिहृत्य वटच्छाया–मतिष्टमहमातपे ॥ ११ ॥ साधु साधु कुलाधारे । सर्वज्ञावविचक्षणे ॥ वृद्धत्वेन वयं वीत–मतयो बोधिता यया ॥ १२ ॥ श्लाघमानो वधूमिद्धं । त्रपमाणः स्वकर्मणा ॥ पुनः पप्रच्छ किं साधु । स कुट्टित इतीरितः ॥ १३ ॥ अन्यधत्त वधूस्तात । तत्प्रहारा न संमुखाः ॥ प्रहारैः पृष्टगैरेव । प्रणश्यन् कुट्टितो ह्यसौ ॥ १४ ॥ श्रुत्वा चमत्कृतः श्रेष्टी । त–

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

न्मत्या पुनरब्रवीत् ॥ पत्तनं श्लाघ्यमेवैत–त्कथमुद्वसमन्यथाः ॥ १५ ॥ साऽवदत्सुवसेनापि । पत्तनेन किमत्र नः ॥ यत्र च स्वजनो नास्ति । यो दृष्ट्वाऽऽलापयत्यपि ॥ १६ ॥ यदुक्तं—

स्वन्नावस्नेहसांडेण । विनैकेन प्रियात्मना ॥ जनाकुलमपि क्षोणी–पीठमान्नात्यरण्यवत् ॥ १७ ॥ सत्यमूचे महान्नागे । मुग्धक्षेत्रमिदं कथं ॥ परिपाकदशापन्न–मपि जग्धमुदाहरः ॥ १८ ॥ व्याजहार ततो हारि–हारदूरानुकारगीः ॥ मुग्धा विदग्धगम्यार्थं । पश्य श्वसुर संमुखं ॥१९॥ भ्रामं भ्रामं कञ्चनूमौ । कर्षुकोऽसावितस्ततः ॥ रक्षाऽनपेक्षया शंबाः । स्वैरमश्नाति यद् डुतं ॥ २० ॥ तद् ध्रुवं ड्व्यमादत्त । वृद्ध्यासौ व्यवहारिणः ॥ तेनात्र निरपेक्षात्मा । पूर्वं जग्धमतोऽब्रुवं ॥ २१ ॥ तमाकार्य ततः श्रेष्टी । स्वयं पप्रच्छ विस्मितः ॥ वृद्ध्याऽऽदायि मया पूर्वं । जग्धमित्याह सोऽपि तं ॥ २२ ॥ अखिलं पुनरुत्पन्न–मिदं सोऽथ गृहीष्यति ॥ प्रयासफलमेवेदं । ममेत्युक्त्वा जगाम सः ॥ २३ ॥ नूयोऽप्राक्षीन्नदीं दृष्ट्वा । श्रेष्टी वत्से जलांतरे ॥ संचरंत्या त्वया नोपा–नहौ मुक्ते तदा किमु ॥ २४ ॥ तत्र कंटककीटादे–र्नये दृष्टेरगोचरे ॥ को नामाल्पकृते काय–मपाये तात पातयेत् ॥ २५ ॥ इत्यादिपुत्रजायोक्ति–यु-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

क्तिप्रीणितमानसः ॥ क्रमात्प्राप गृहं श्रेष्टी । प्रेक्षमाणः पुरीजनैः ॥ २६ ॥ दर्शितानि ततो वध्वा । गृहीत्वाऽऽभरणानि च ॥ तुष्टस्तदखिलं वृत्तं । जगाद सुतजाययोः ॥ २७ ॥ सर्वस्व-स्वामिनी सैव । श्रेष्टिना स्थापिता ततः ॥ तत्कृत्यैश्च गृहं प्राप । नित्यं नवनवश्रियं ॥ २८ ॥ चलत्वादायुषः श्रेष्टी । कालधर्मं गतः क्रमात् ॥ गावेव पादपं सद्यः । श्रेष्टिन्यपि तमन्वगात् ॥ २९ ॥ कुटुंबनायकत्वेन । स्थापितः स्वजनैस्ततः ॥ गृहस्थधर्ममजित-सेनश्चिरमपालयत् ॥ ३० ॥ इतश्च मेलितैकोन-मंत्रिपंचाशतोऽन्यदा ॥ विशिष्टधिषणं कंचि-च्चिकीर्षुर्मंत्रिणं परं ॥ ३१ ॥ अरिमर्दनभूपालः । प्रत्येकं नागरान् जगौ ॥ यो मां हंति स्वपादेन । को दंडस्तस्य युज्यते ॥ ३२ ॥ युग्मं ॥ सर्वेऽप्यूचुः शिरश्छेदं । सर्वे दंडं च सोऽर्हति ॥ तत् श्रुत्वाऽजितसेनोऽपि । शीलवत्या न्यवेदयत् ॥ ३३ ॥ चतुर्विधमहाबुद्धि-निधानं साऽप्यदोऽवदत् ॥ सर्वांगाभरणव्रातं । दत्वा संतोष्यते सकः ॥ ३४ ॥ कथमित्यनुयुक्ताह । विदग्धः कः प्रियं विना ॥ तमाहंतुमपीहेत । तज्ज्ञे सोऽप्यवोचत ॥ ३५ ॥ संतुष्टो भूपतिस्तं च । मुख्यं सकलमंत्रिषु ॥ मंत्रिणं स्थापयामास । धर्मकार्यैकसुत्रिणं ॥ ३६ ॥ पर्यंतदेशभूपालं ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सिंहनामानमन्यदा ॥ सद्योऽन्यषेणयशजा । गृहीत्वा षम्विधं बलं ॥३७॥ ततश्चाजितसेनोऽपि । चिंताचांतमना मनाक् ॥ शीलवत्या महासत्या । पृष्टः स्पष्टमजाषत ॥ ३८ ॥ यद्यपि त्वं सुशीलासि । तथाप्येकाकिनीं गृहे ॥ विहाय सह नूपेन । ययासोर्मे न निर्वृतिः ॥३९॥ साऽप्याह राजकार्याणि । कर्त्तव्यानि यथा तथा ॥ शीलं तु मम शक्रोपि । नैव म्लानयितुं क्षमः ॥४०॥ प्रत्ययार्थं तथा चेयं । पुष्पमालास्तु ते गले ॥ सुशीलां विद्धि मामेना—मम्लानां यावदीक्षसे ॥ ४१ ॥ इत्युक्त्वा स्वगुणश्रेणि—मिव तत्कंठकंदले ॥ पुष्पमालां निचिक्षेप । हृष्टः सोऽपि ततोऽचलत् ॥ ४२ ॥ गतः कांचिदरण्यानीं । नृपः कुसुमवर्जितां ॥ ददर्शाजितसेनस्य । कंठे मालां विकस्वरां ॥ ४३ ॥ कुतोऽसाविति नूपेन । पृष्टो मंत्री स्फुटं जगौ ॥ नित्यमस्तीयमम्लाना । प्रियाशीलप्रजावतः ॥ ४४ ॥ उक्त्वेति स्वापदं प्राप्ते । सचिवे कौतुकी नृपः ॥ पुरः स्वनर्मपात्राणां । तदुवाच विवेकधीः ॥ ४५ ॥

ततः कामांकुरः प्राह । कुतः शीलं मृगीदृशां ॥ ललितांगोऽवदद्देव । सत्यं कामांकुरोदितं ॥ ४६ ॥ रतिकेलिरजाषिष्ट । संशयः कोऽत्र देव ते ॥ अशोकः प्राह संदेहं । हंतुं प्रहि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

णु मामिह ॥ ४७ ॥ ततः शीलवतीशील–ध्वंशनाय कुतूहली ॥ दत्वा बहु धनं प्रैषी–दशोकं स्वनरं नृपः ॥ ४८ ॥ विधृत्य नूपनेपथ्यं । प्राप्तोऽसौ नंदने पुरे ॥ शीलवत्या गृहासन्नं । स्थानमादाय तस्थिवान् ॥ ४९ ॥ एषोऽपि पंचमोङ्कार–मुङ्किरन् नंगुरांगकः ॥ संचचार पुरस्तस्या । वक्त्रवीक्षणदक्षिणः ॥५०॥ बहुप्रकारान् कुर्वाणं । विकारान् वीक्ष्य तं सती ॥ दध्यौ शीलवती मेऽसौ । शीलध्वंसं चिकीर्षति ॥ ५१ ॥ नूनमिच्छति मूढोऽसौ । कृष्टुं केसरिकेसरान् ॥ विविक्षति हतस्वांतः । सुदूतं वा हुताशनं ॥ ५२ ॥ पश्यामि कौतुकं तावत्किमसौ चेष्टते कुधीः ॥ ध्यात्वेत्यपांगकोणेन । प्रवृत्ता तं विलोकितुं ॥ ५३ ॥ अशोकोऽपि विशंकात्मा । सिद्धमर्थं विमृश्य तां ॥ दूतीं प्रस्थापयामास । सापि तामिच्छमाख्यत ॥ ५४ ॥ नद्दे तव गतो नर्त्ता । समं राङ्गास्पदांतरे ॥ वनपुष्पमिवैतत्ते । तारुण्यं याति निष्फलं ॥ ॥ ५५ ॥ नाग्यैरिव तवाकृष्टः । सुनगे तत्पुमानयं ॥ राजमान्योऽनुरागी च । संगं कामयते तव ॥ ५६ ॥ साप्याह फलमादातु–मुचितं यौवनश्रियः ॥ कुलस्त्रीणां न युज्येत । किंत्वन्यनरसंगमः ॥ ५७ ॥ किंचैतदप्याचर्येत । लभ्यते चेन्मनीषितं ॥ फलान्नक्ष्यमपि स्नेह–

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

लोन्नेन स्यात्फलेग्रहि ॥ ५८ ॥ तयोचे तत्कियन्मात्रं । याचसे साप्यवोचत ॥ ददातु सांप्रतं मेऽई–लक्षं प्रगुणताकृते ॥५९॥ एत्वर्धलक्षमादाय । पंचमेऽह्नि पुनः स्वयं ॥ पूरयामि यथा पूर्णा–मस्य कांचित्सुखास्पिकां ॥ ६० ॥ न्यवेदयदशोकाय । मुदिता दूतिकापि तत् ॥ तद्दत्त-मर्द्धलक्षं च । शीलवत्याः समार्पयत् ॥ ६१ ॥ ततोऽपवरकस्यांतः । सुबुद्धिः शीलवत्यपि ॥ प्र-ब्रुन्नं स्वनरैर्गत्वा । खनयामास मांसलां ॥ ६२ ॥ सोत्तरब्रदमव्यूतं । पर्यंकं तदुपर्यधात् ॥ पंच-मेऽह्नि ततः सोऽई–लक्षमादाय सोन्मदः ॥ ६३ ॥ तांबूलहस्तः सौभाग्या–न्मन्वानस्तृणवज्ज-गत् ॥ समेत्योपविशंस्तत्र । गर्त्तातः सहसाऽपतत् ॥ ६४ ॥ रज्जुबद्धशरावेण । ददती भोज-नोदके ॥ नरकोर्व्यां जीवमिव । तं तत्राऽस्थापयत्सती ॥ ६५ ॥

मासमात्रे व्यतिक्रांते । राजाख्यन्नर्ममंत्रिणः ॥ सिद्धार्थैः किमसिद्धार्थो । नाऽशोकस्ता-वदागतः ॥ ६६ ॥ भूपेन तावदादिष्टो । वितीर्य ऽविणं ततः ॥ रतिकेलिचिकीस्तस्यां । रति-केलिरुपागमत् ॥ ६७ ॥ तयैकलक्षमादाय । सोऽपि तत्रैव पातितः ॥ बुद्धेर्हि सुप्रयुक्तायाः । किमसाध्यमपि क्वचित् ॥ ६८ ॥ एवं लक्षमुपादाय । तौ प्रत्येकमुन्नावपि ॥ कामांकुरललि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तांगा–वपि साऽपातयत्क्रमात् ॥ ६९ ॥ चातुर्गतिकसंसार–दुःखानीव महासती ॥ पाताले पा-
तयामास । चतुःपुरुषदंभतः ॥ ७० ॥ अथ शत्रुं विनिर्जित्य । राजा सिंहरथाभिधं ॥ प्रविवे-
श पुरं पौरैः । कृतमंगलमालिकं ॥ ७१ ॥ तेऽथ शीलवतीं प्रोचु–र्दीनास्याः पीडिताः क्षुधा
॥ अनात्मज्ञा नरा यत्स्यु–रस्मद्दुःखभाजनं ॥ ७२ ॥ न दृष्टं तव माहात्म्य–मस्मादेश-
कारिणः ॥ निःकाशयैकदाऽमुष्मा–न्नरकादिव कूपतः ॥ ७३ ॥ तयोचे चेद्यथादिष्टं । वचनं मे
करिष्यथ ॥ तदा मोक्षामि तैरूचे । यत्कर्त्तव्यमथादिश ॥ ७४ ॥ एवं भवत्विति यदा । ब्र-
वीम्यहमशंकितं ॥ भवद्भिरपि वक्तव्या ! भवत्वेवं तेदेति वाक् ॥ ७५ ॥ शिक्षयित्वेति तान्नाथ–
मूचेऽथ मतिमत्तमा ॥ निमंत्रयैकदा भूपं । स्वगेहे सपरिच्छदं ॥ ७६ ॥ तथैव विहिते तेन
समेतस्तत्र भूपतिः ॥ मुक्तावचूलोल्लोचादि–विस्तरैर्द्योतितांबरे ॥ ७७ ॥ तया भोजनसाम-
ग्री । प्रच्छन्ना विदधेऽखिला ॥ उपविष्टश्च भूपालो । भोक्तुं सारपरिच्छदः ॥ ७८ ॥ दध्यौ च दृ-
श्यते तावन्न कश्चिद्भोजनोद्यमः ॥ निमंत्रिता वयं चैते । तत्किमेतदिहाद्भुतं ॥ ७९ ॥ ततः
शीलवती गर्त्ता–द्वारमागत्य सादरं ॥ कुसुमादिभिरभ्यर्च्य । प्रौच्चैरब्रवीदिदं ॥ ८० ॥ भो

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

न्नो रसवतीः सर्वाः । यक्षाः सज्जयत द्रुतं ॥ अस्त्ववेमिति तैरुक्ते । प्राङ्मुखके तयाथ सा ॥ ॥ ७१ ॥ विदधे न्नोजनं राजा । कौतुकाक्षिप्तमानसः ॥ अपरापि हि सामग्री । प्राप्ता तद-न्निलापतः ॥ ७२ ॥ तांबूलवस्त्रालंकारै—श्चतुर्लक्षव्ययात्तदा ॥ एवमस्त्विति तन्नाक्या—ऽनंतरं सत्कृतो नृपः ॥ ७३ ॥ सिद्धिः काचिदपूर्वेयं । यक्षनोंक्तवाक्यतः ॥ सर्वं जातमिति ध्यात्वा —ऽपृच्छच्छीलवतीं नृपः ॥ ७४ ॥ न्नद्दे किमिदमाश्चर्यं । तयोचे देव मक्रृहे ॥ असिध्यन् यक्षाश्च-त्वार—स्तेभ्यः संपद्यतेऽखिलं ॥ ७५ ॥

ततः शीलवतीं राजा । सत्कृत्य वसनादिभिः ॥ कृत्वा तां न्नगिनीं यक्षान् । ययाचे ब-हुमानतः ॥ ७६ ॥ जीवितव्यमपि स्वामिं—स्त्वदीयमिदमावयोः ॥ यक्षाणां का कथा तस्मा —द्वौकिष्यंते प्रन्नोः पुरः ॥ ७७ ॥ प्रतिज्ञायेति सा कूपा—न्निष्कास्यैतानसिस्नपत् ॥ परितः कु-सुमालीढा—नालिप्तान् हरिचंदनैः ॥ ७८ ॥ ततो वंशकरंभेषु ! निक्षिप्य चतुरोऽपि तान् ॥ र-थेष्वारोपयामास । धूपक्षेपपुरस्सरं ॥ ७९ ॥ दिगंतव्यापिन्निस्तूर्य—निर्घोषैरथ मंत्रिराट् ॥ प्र-तस्थे तानुपादाय । कारयन् प्रेक्षणीयकं ॥ ८० ॥ नृपः सन्मुखमागत्य । बहुमानपुरस्सरं ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

करस्थमिव मन्वानो । जगत्तान्न स्वगृहेऽनयत् ॥ ९१ ॥ तदा रसवतीपाका–त्सूपकारान्न्यवारयत् ॥ नृपो यदद्य दास्यंति । यक्षा वो दिव्यभोजनं ॥ ९२ ॥ भोजनावसरेऽन्यर्च्य । राजा यक्षकरंडकान् ॥ जगाद जायतां भोज्य–मेवमस्त्विति तेऽब्रुवन् ॥ ९३ ॥ यावदूर्ध्वमुखं प्रेक्ष–माणानां सर्वदेहिनां ॥ पुरो न किंचन प्राप्त–मूतं नृपोदितादि च ॥ ९४ ॥

विलक्षात्मा ततो राजा । समुद्घाट्य करंडकान् ॥ म्लानेंद्रियान् विदीर्णास्यान् । ददर्श चतुरो जनान् ॥ ९५ ॥ प्रेतानिव करालांस्ता–न्निरीक्ष्य सहसा नृपः ॥ नामी यक्षाः किंतु यातु–धाना इत्तत्वेत्यपासरत् ॥ ९६ ॥ तैरप्यूचे रयादेव । न यक्षा न च राक्षसाः ॥ कामांकुरादयः किं तु । त्वन्नर्मसचिवा वयं ॥ ९७ ॥ सम्यग् निरीक्ष्य नृपेनो–पलक्ष्य च बन्नाषिरे ॥ नष्टाः केयमवस्था वः । काकानामिव रोगिणां ॥ ९८ ॥ यथावृत्तः स्ववृत्तांत–स्तैरप्यूचे क्रमादथ ॥ राजा शीलवतीशीलं । श्लाघे धूनयन् शिरः ॥ ९९ ॥ आकार्याख्यदहो बुद्धि–कौशलं ते पतिव्रते ॥ शीलपालनयत्नेना–ऽमुना श्लाघा न कस्य तत् ॥ १०० ॥ अम्लानया तदा पुष्प–मालयैव मया स्फुटं ॥ ज्ञातं ते शीलमाहात्म्य–मज्ञानाद्यदिदं कृतं ॥ १ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तत्कंतव्यं न कोपोऽत्र । कार्यो बंधुसमे मयि ॥ सापि तं बोधयामास । जिनधर्मोपदेशतः ॥ ॥ २ ॥ परदारनिवृत्तिं च । कारिता नर्ममंत्रिणः ॥ सत्कृत्य प्रेषिता राज्ञा । सती स्वगृहमासदत् ॥ ३ ॥ विशिष्याऽजितसेनोऽपि । राजकार्यधुरंधरः ॥ शीलवत्या समं धर्म–सारं कालमवाहयत् ॥ ४ ॥

तत्रागतश्चतुर्ज्ञानी । दमघोषाभिधोऽन्यदा ॥ ययावजितसेनोऽपि । तं नंतुं वल्लभायुतः ॥ ३ ॥ देशनांते मुनिः शील–वतीं भाषितवान् गुरुः ॥ भद्रे पूर्वभवाऽभ्यासा–ज्जाति ते शीलमुज्ज्वलं ॥ ६ ॥ कथमित्यजितसेनेन । पृष्टः प्रांजलिना गुरुः ॥ ऊचे कुशपुरे स्थाने । श्रावकः सुलसाभिधः ॥ ७ ॥ तद्भार्या सुयशा गेहे । तयोर्दुर्गतनामकः ॥ प्रकृत्या भद्रको भृत्य–स्तद्भार्या दुर्गिला पुनः ॥ ८ ॥ साऽहं सुयशसाऽन्येद्यु–र्व्रतिनीवसतिं ययौ ॥ दुर्गिला स्वामिनीं वीक्ष्य । पुस्तकार्चनसादरां ॥ ९ ॥ आर्ये किमद्य पर्वेति । सा पप्रच्छ प्रवर्त्तिनीं ॥ तयोचेऽद्य श्रुततिथि–र्विख्याता श्वेतपंचमी ॥१०॥ य इह श्वेतपंचम्या–मुपवासपरायणः ॥ पुस्तकान्यर्चनपूर्वं । कुर्याद् ज्ञानप्रभावनां ॥ ११ ॥ सा प्रेत्यसुखसौभाग्य–भाग्यबुद्ध्यादिवैभवं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ प्राप्य क्रमेण निर्वाणं । लभते शुद्धशीलयुक् ॥ १२ ॥ श्रुत्वेति दुर्गिला प्राह । धन्यासौ स्वामिनी मम ॥ निंद्या तु मादृशी यत्र । स्वहितं कर्तुमक्षमा ॥ १३ ॥ प्रवर्त्तिन्याह चेद्दानं—तपःशीले न गोचरे ॥ तत्स्वाधीनं भावसारं । शीलं त्वमपि पालय ॥ १४ ॥ विधेहि परपुंस्त्यागं । यावज्जीवं विवेकिनि ॥ तथाष्टमीचतुर्दश्योः । स्वभर्त्तुरपि वर्जनं ॥ १५ ॥ गृहीत्वाभिग्रहं हृष्टा । सापि भर्त्तुरभाषत ॥ कर्मलाघवतः सोऽपि । तमाद्रियत भावतः ॥ १६ ॥ क्रमेण प्रापतुस्तौ च । सम्यक्त्वं भावशुद्धितः ॥ दुर्गिलापि क्रमाद् ज्ञान—पंचम्या विदधे तपः ॥ १७ ॥ कालधर्मं गतौ जातौ । सौधर्मे त्रिदशावुभौ ॥ भवानजितसेनोऽभू—द्दुर्गजीवस्ततश्च्युतः ॥ १८ ॥ जातश्च दुर्गिलाजीवः । सैषा शीलवती सती ॥ ज्ञानाराधनपुण्येन । विशिष्टमतिवैभवा ॥ १९ ॥ जातिस्मृत्या ततः सर्वं । स्वयमेव विबुध्य तौ ॥ परं वैराग्यमापन्नौ । जगृहाते व्रतं द्रुतं ॥ २० ॥ प्रपाल्य चारित्रधुरं चिराय । तौ प्रापतुः पंचमदेवलोकं ॥ ततश्च्युतौ केवलमाप्य सिद्धिं । व्रजिष्यतो निर्मलशीलयोगात् ॥ २१ ॥

॥ इति श्रीरुद्रपल्लीयगच्छे श्रीसंघतिलकसूरिपट्टावतंसश्रीसोमतिलकसूरिविरचितायां

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

श्रीशीलतरंगिण्यां शीलवतीकथा समाप्ता ॥

अथ नंदयंतीसतीकथा कथ्यते, तथाहि—अस्ति स्वतिपराऽपार–पौरं श्रीपोतनं पुरं ॥ दृष्ट्वेव यस्याऽनेकश्रीः । श्यामलोऽजनि नीरधिः ॥ १ ॥ तत्रास्ति भूपतिर्जाग्र–द्विक्रमो नर–विक्रमः ॥ धाराधरोऽपि यत्खड्ग–श्चित्रं शात्रवतापकः ॥ २ ॥ श्रेष्टी सागरपोतोऽस्ति । तत्र सत्रमिव श्रियां ॥ समुद्दत्तस्तत्पुत्रः । पवित्राचारपंक्तितः ॥ ३ ॥ स बाल्येऽपि पुरोपात्त–पुण्यप्राग्भारतोऽखिलाः ॥ संजग्राह कलाः काले । रत्नानीव परीक्षकः ॥ ४ ॥ क्रमेण काममुन्मील–द्भीलासन्मदमंदिरं ॥ स प्राप यौवनं विंध्य–वनं वन्य इव द्विपः ॥ ५ ॥ इतश्च सोपारपुरे । पौराणां महिमानिधेः ॥ श्रेष्टिनो नागदत्तस्य । नंदयंतीति कन्यका ॥ ६ ॥ सा शैशवमतिक्रांता । जिनधर्मधुरीणधीः ॥ संप्राप्ता यौवनं शील–माणिक्यमणिभूमिका ॥ ७ ॥ तामथो मन्मथोर्वीश–राजधानीं सविभ्रमां ॥ नंदयंतीं मनो यूनां । नंदयंतीं सविस्तरं ॥८॥ सृष्टुर्योग्यसमारंभ–स्येव सत्यापनोद्यतः ॥ श्रेष्टी सागरपोतः स्व–सूनुना पर्यणाययत् ॥९॥ ॥ युग्मं ॥ अथो समुद्दत्तस्ता–मेकांतप्रेमलालसां ॥ चित्रवल्लीमिवासाद्य । जातः पूर्णम–

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नोरथः ॥ १० ॥ सहदेवान्निधानेन । स बालसुहृदा समं ॥ क्रीडन् कालमतीयाय । कियंतमपि लीलया ॥ ११ ॥ सोऽन्यदा देशविज्ञान–ख्यार्जनकुतूहली ॥ पप्रच्छ पितरं पोत–व्यवसायविधित्सया ॥ १२ ॥ पिताह कोटिशो मेऽस्ति । द्रविणं भुंक्ष्व वत्स तत् ॥ कोंगणे फलिते कल्प–वृक्षे व्रजति काननं ॥ १३ ॥ तात कापुरुषा एव । भुंजते पूर्वजार्जितं ॥ अन्योग्या पैतृकी लक्ष्मी–र्यौवने जननीव यत् ॥ १४ ॥ निशम्येति तनूजस्य । वाचमुत्साहमंजुलां ॥ शोकानंददशोन्मिश्रः । सगद्गदमदोऽवदत् ॥ १५ ॥ पित्रार्जितैर्धनैर्लोका । दुर्मदाः संति भूरिशः ॥ स्वार्जितैर्विरला एव । दातारो भोगिनश्च ये ॥ १६ ॥

इत्यादि वदता तातः । कथंचन निजाग्रहं ॥ प्रमाणीकारितस्तेन । भिक्षुकेनेव तद्धनं ॥ ॥ १७ ॥ ततः समुद्दत्तोऽपि । समं मित्रेण सोत्सुकः ॥ आपृच्छय स्वजनान् धिष्णे । शुभे पोतमपूरयत् ॥ १८ ॥ तदा सुहृदमाचष्ट । श्रेष्ठिसूः स्वजना मया ॥ आपृष्टास्तु विना जायां । यत्तदासीऽजस्वला ॥ १९ ॥ तेनोचे चिरसौहार्दे । मयि सत्यपि पार्श्वगे ॥ चिंता ते बाधते चेत्त–दीनाः कल्पद्रुसेवकाः ॥ २० ॥ दाक्षिण्यकुलमर्यादा–लज्जानिगमितात्मनां ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स्वैरानुरागन्नाजां च । मित्रादन्यन्न नेवजं ॥ २१ ॥ समुद्रोऽपि ततो राग–समुल्लहरीवशः ॥ केनाप्यलक्षितो रात्रौ । स्ववेश्मद्वारमासदत् ॥ २२ ॥ तत्राऽजीजागरत्सूर–पालं दोवार-पालकं ॥ रत्नांगुलीयकं तस्मै । दत्वा गोप्यं जगाद च ॥ २३ ॥ स्ववासन्नवनं प्राप्तो । जालकांतरवर्त्मना ॥ ददर्शाब्जपजले मत्सी–मिव कांतां महाकुलां ॥ २४ ॥ किमियं चेष्टते याव–दीक्षते श्रेष्टिन्नूः प्रियां ॥ तावच्चिरेणाप्यप्राप्य । निशमुन्मुक्तिताऽरतिः ॥ २५ ॥ शयनीयात्समुत्थाय । नंदयंती महासती ॥ जगामोपवने चंद्र–द्युतिधौतशिलातले ॥ २६ ॥ युग्मं ॥

सुप्ता तत्र वियोगार्त्ति–दूना पतिव्रता सती ॥ अमन्यत शिलां दीप्य–दंगारशकटीमिव ॥ २७ ॥ सोमालाऽशोकपत्राली–मास्तीर्याथ शिलातले ॥ शयिता पुनरङ्गासी–द्दंडानिव विधोः करान् ॥ २८ ॥ हा क्षिप्रजग्मुषा पत्या । तदा नाऽलापिताऽप्यहं ॥ इत्थं किममुना मैंत–र्गडुना जीवितेन तत् ॥२९॥ स्मारं स्मारं गुणान् पत्यु–र्वियोगविधुरा सती ॥ पाशमादातुकामाऽगा–द्गृहारामद्रुमांतिकं ॥ ३० ॥ स एव गुणराशिर्मे । पतिर्न्यूयान्नवे नवे ॥ इत्युदीर्य द्रुशाखायां । स्वोत्तरीयेण यावता ॥ ३१ ॥ बध्नाति पाशबंधेन । स्वात्मानं नागदत्तजा ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

समुड्डदत्तश्चिच्छेद । पाशमुत्प्लुत्य तावता ॥ ३२ ॥ युग्मं ॥ तत्कालमुल्लसच्छृंगा–ऽतिरेकाच्चेष्टिनंदनः ॥ सस्वजे तद्दिनस्नातां । तामयस्कांतवत्कुर्शी ॥ ३३ ॥ आपृच्छ्य दयितां प्रीतां । पुनः पोतमथापतत् ॥ कर्मानुकूल्यतः कूलं । संप्राप्तश्च महोदधेः ॥ ३४ ॥ अंतर्वत्नी सती नंद–यंत्यपि प्राप्य संमदं ॥ मासत्रयमतीयाय । सुखमप्रकटोदरी ॥ ३५ ॥ वैमूर्यन्नूमौ वैदूर्य–शलाकेव धनध्वनेः ॥ निधानमिव चाधानं । क्रमादाविरभून्मनाक् ॥ ३६ ॥ श्वसुरः कलयामास । मद्वधूरसती ध्रुवं ॥ प्रस्थानावसरे सूनो–र्यदेषा ऋतुमत्यभूत् ॥ ३७ ॥ यतः–त्राह्याकारसदाचार–वृत्त्या स्त्रीषु न विश्वसेत् ॥ दुरंतपरिणामाः स्युः । किंपाकफलवत्खलु ॥ ३८ ॥ तन्नूनं परिहार्यैषा । श्वपचीवात्मपांक्तितः ॥ निष्कलंके कुलेऽस्माकं । मास्तु नीलीविशेषकः ॥ ३९ ॥ विमृश्येति ततः श्रेष्टी । जिहासुः सहसा स्नुषां ॥ वने त्यजैतामित्याह । नरं निःकरुणाग्रिणीं ॥ ४० ॥ केनापि व्यपदेशेन । नीत्वा तेनापि कानने ॥ मुक्ता मुक्तावलीव शाकू । निर्मोकभ्रांतितः सती ॥ ४१ ॥ कुतश्चित्कारणात्साध्वि । त्याजिता भवती वने ॥ यथा स्वैरं व्रजेत्युक्त्वा । यावद्व्यावर्त्तते स च ॥ ४२ ॥ तावदाकस्मिकोत्पात–भयभीता महासती ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मूलतश्छिन्नवल्लीव । मूर्छिता पतिता क्षितौ ॥ ४३ ॥ स्फीतशीतवनीवात–व्यपनीतभ्रमोदया ॥ हहा केनाऽपराधेन । त्यक्तेत्युक्त्वा रुरोद सा ॥ ४४ ॥

तदा निष्करुणो वृक्षां–तरितो यावदीक्षते ॥ सिंहव्याघ्रादयो दूरं । सतीं नत्वा ययुः प-थि ॥ ४५ ॥ साऽरक्षि शासनामर्या । भक्तयंतो विषं सती ॥ छिन्नः पाशो मुमूर्षोश्च । त-स्या देवतया तदा ॥ ४६ ॥ दत्तऊंपा गिरेः शृंगात् । स्मृतपंचनमस्कृतिः ॥ पल्यंकमाविःकु-र्वत्या । तयैवाऽरक्षिचांतरा ॥ ४७ ॥ पतिपित्रादिमुक्तां मां । न यमोऽपि जिघृक्षति ॥ किम-न्यदपि दैवं मे । विधातेति विषण्णधीः ॥ ४८ ॥ निंदंती निजजन्मादि । भाव्यं कर्म च जा-नती ॥ संचचार पुरो यूथ–भ्रष्टेव हरिणी सती ॥ ४९ ॥ इतश्चैक्षि भृगुकच्छ–पुरेशेन कृपा-लुना ॥ मृगया निर्गतेन श्री–पद्मभूपेन सा सती ॥ ५० ॥ संभाव्य मधुरं चास्या । ज्ञात्वो-दंतं तयेरितं ॥ भगिनीकृत्य तां स्वीय–पुरं निन्ये नरेश्वरः ॥ ५१ ॥ ऊचे च दानं दीनार्थि–वर्गे भग्नि ददानया ॥ स्थीयतामापतिप्राप्तेः । सत्रागारे यथासुखं ॥ ५२ ॥ नंदयंत्यपि तत्का-लो–चितं धर्मानुयायि तत् ॥ विदधाना सुखं तस्थौ । ध्यायंती पतिमुन्मनाः ॥ ५३ ॥ तदा

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

निःकरुणोऽपि झाक् । निवृत्तः काननात्ततः ॥ श्रेष्ठिनो ज्ञापयामास । तस्याः शीलविजृंभितं ॥ ५४ ॥ तदानीं सूरपालोऽपि । स्वकार्यप्रेषितः पुरा ॥ नंदयंत्याः पितुर्गेहा–त्समियाय चिरेण सः ॥ ५५ ॥ स्वपुत्र्यै नागदत्तेन । प्रहितं भूषणादिकं ॥ दित्सुः पप्रच्छ किं चात्र । नंदयंती न दृश्यते ॥ ५६ ॥ उक्ते सागरपोतेन । तदुदंते विषादवान् ॥ सूरपालो रुदन् प्राह । वृथा त्यक्ता पतिव्रता ॥ ५७ ॥ प्रस्थितोऽपि तदा युष्म–त्पुत्रः प्रच्छन्नमेत्य च ॥ निशि स्नुषायाः संगत्य । पुनः पोतं समासदत् ॥ ५८ ॥ तदाऽदायि च नामांक–मिदं मे स्वांगुलीयकं ॥ वितीर्य शपथान्मह्य–मित्युक्त्वा तददर्शयत् ॥ ५९ ॥ ततः सागरपोतोऽपि । शोकसागरमध्यगः ॥ स्नुषामन्वेष्टुमादिक्ष–त्तं स्वयं च चचाल सः ॥ ६० ॥ इतः समुद्दत्तोऽपि । दत्तोपात्तक्रयाणकः ॥ बहुलाज्ञयुतः काले । क्रमेण गृहमाययौ ॥ ६१ ॥ तं वृत्तांतमथाकर्ण्य । सोऽपि गोपायिताकृतिः ॥ प्रतस्थे जायामन्वेष्टुं । सपाथेयपरिच्छदः ॥ ६२ ॥ ग्रामकर्बटखेटादि–नगरारण्यभूमिषु ॥ भ्रमंश्चिरादयं त्यक्तो । भृत्यैः पाथेयवर्जितैः ॥ ६३ ॥ एकाक्यपि ततो नंदयं–तीं मित्रमिव स्मरन् ॥ कंदमूलफलाहार–श्चिरं बभ्राम भूतले ॥ ६४ ॥ पिचंमि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

लो विवर्णांग–द्युतिः कृशकरक्रमः ॥ भ्रमन् समुद्दत्तोऽगा–न्मृगुकच्छपुरं क्रमात् ॥ ६५ ॥
क्षुधाक्रांतश्च तत्रैव । सत्रागारे समीयिवान् ॥ दृष्ट्वोपलक्षयामास । स्वप्रियां नयनामृतं ॥ ६६ ॥ नंदयंत्यपि तत्काल–मालोक्योत्पन्ननंदथुः ॥ जागरूकानुरागांकै–र्निश्चिकाय पतिं हृदि ॥ ६७ ॥ ससंभ्रममथोत्थाय । स्वौचित्यमुपचर्य च ॥ न्युंङनं विदधानेव । दृशा सस्पृहमैक्षत ॥ ६८ ॥ जाते मिथो दृगाश्लेषे । स्मृतप्रागुदुःखदुर्दशा ॥ वृष्टिर्नाऽपदीनेव । तदाऽश्रुन्निरभूत्सती ॥ ६९ ॥ तदा पीयूषवृष्ट्यैव । स्वहस्तजलजन्मना ॥ प्रजार्ज्य नयने साश्रुः । सतीमाश्वासयत्प्रियः ॥ ७० ॥ चिरप्रवासखिन्नोऽपि । तन्मुखेंदुनिरीक्षणात् ॥ जातः समुद्य आनंद–रसकल्लोलमांसलः ॥ ७१ ॥ नंदयंत्याः पतिं तत्रा–गतमाकर्ण्य सादरं ॥ प्रत्युज्जगाम नूर्मींशे । वसंतमिव मन्मथः ॥७२॥ पृष्टोदंतस्ततः स्वीय–गेहं नीतः स बंधुवत् ॥ वैद्यौषधप्रयोगैश्च । क्रमेणोल्लाघतामपि ॥ ७३ ॥ श्रेष्टी सागरपोतोऽपि । सूरपालादयश्च ते ॥ क्रमेण मिमिलुस्तत्र । कर्माणीव शरीरिषु ॥ ७४ ॥ इतश्च केवलज्ञान–भानुस्तत्र समागमत् ॥ ययुः समुद्दत्ताद्या । वंदितुं सपरिच्छदाः ॥ ७५ ॥ भगवन् कर्मणा केन । कलंकोऽयं समाप·

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तत् ॥ नंदयंतीति पप्रच्छ । देशनांते पुराऽनवं ॥ ७६ ॥ ऽनगवानाह पौरस्त्य–ऽनवे यज्ञोत्सवेऽनया ॥ ऽनिक्षार्थमागतः साधुः । शूऽ इत्येष दूषितः ॥ ७७ ॥ सर्वैरनुमतं चैत–देतस्याः श्वसुरादिऽनिः ॥ सामुदायिकमप्येत–त्कर्म त्वय्येव दार्ढ्यवत् ॥ ७८ ॥ तेन त्वयि महासत्या–मपि कश्मलसंऽनवः ॥ तर्कितः श्वसुरेणायं । पूर्णचंऽे जनैरिव ॥ ७९ ॥ अनालोचितऽनावानि । कर्माणि प्राणिनामिह ॥ शूकलाश्वा इवाऽश्रांतं । ऽभ्रमयंति ऽनवाटवीं ॥ ८० ॥ धन्याः श्रीमज्जिनोपऽं । धर्ममादृत्य सादरं ॥ स्वर्गापवर्गसंसर्ग–सुऽनगाः स्युरिह क्रमात् ॥ ८१ ॥ श्रुत्वेति ऽनववैराग्य–सागरांतर्गता सती ॥ सिषेव मौक्तिकं चित्ते । दध्रे व्रतमनोरथं ॥ ८२ ॥ गृहिव्रतं प्रपद्याथ । दीनोद्धारादिकर्मऽनिः ॥ स्वजन्म सफलीचक्रे । नागदत्ततनूऽनवा ॥ ८३ ॥ चिरं प्रपाल्येति गृहस्थधर्मं । प्रपद्य चांते व्रतमात्मशुद्ध्या ॥ विक्षिप्य कर्माणि च नंदयंती। महासती मोक्षसुखान्यवाप ॥ ८४ ॥

॥ इति श्रीरुद्रपल्लीयगच्छे श्रीसंघतिलकसूरिपट्टावतंसश्रीसोमतिलकसूरिविरचितायां
श्रीशीलतरंगिण्यां नंदयंतीकथा समाप्ता ॥ श्रीरस्तु ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अथ श्रीमनोरमा महासती, या श्रीसुदर्शनश्रेष्ठिसधर्मिणी, तस्याश्च शीलमाहात्म्यं श्रीसुदर्शनस्याऽन्नयाराज्ञीकृतोपसर्गस्यावसरे कायोत्सर्गाकृष्टश्रीशासनदेवताविहिततादृशजिनधर्मप्रभावनारूपं तत एव ज्ञेयमिति. ॥ अथ श्रीरोहिणीमहासत्युदाहरणं श्रोतृणां श्रवणान्नरणीक्रियते, तथाहि—

अस्ति श्रीपाटलीपुत्रं । पुरं यस्य समृद्धिभिः ॥ अंतस्तप्त इव श्रीदः । कुबेर इति विश्रुतः ॥ १ ॥ तत्रास्ति त्रासितारातिः । श्रीनंदो मेदिनीपतिः ॥ नैकुर्नंदति यत्कीर्त्ति—र्जितश्चिरमंबरे ॥ २ ॥ द्वीपांतरश्रियां सत्रं । तत्र श्रेष्ठी धनावहः ॥ धनदस्य वणिक्पुत्र । इव यो लक्ष्यते धनैः ॥ ३ ॥ तत्प्रिया रोहिणी नाम्नो । विश्वविश्वांगिमोहिनी ॥ रोहिणीव भुवं प्राप्ता । त्यक्त्वा चंद्रं कलंकितं ॥ ४ ॥ ययौ समुद्रयात्राया—मन्यदाऽपृच्छय स प्रियां ॥ विदेशवासिनः प्रायो । भवेयुर्व्यवसायिनः ॥ ५ ॥ तदादि रोहिणी वेणी—बंधमाधाय मूर्द्धनि ॥ सखीवृंदयुता । निन्ये दिवसान् धर्मकर्मभिः ॥ ६ ॥ धूलीकदंबपुष्पौघ—रेणुधूसरितांबरः ॥ अवातारीदितो ग्रीष्म—कालस्तपनयौवनं ॥ ७ ॥ सफलीकर्त्तुमुद्यान—श्रियं श्रीनंदभूपतिः ॥ ग-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ञन् ददर्श घर्मार्त्तां । रोहिणीं जालकस्थितां ॥ ८ ॥ चिरं विरहिणीं चारु–लावण्यो‌ल्लेखशालिनीं ॥ इतः प्रकामं कामेन । दर्शं दर्शं स रोहिणीं ॥ ९ ॥ विस्मृत्य तत ञद्यान–क्रीडामत्रीरुमानसः ॥ द्विगुणीभूतसंतापः । प्रत्यावृत्य गृहानगात् ॥ १० ॥ स्मराऽपस्मारसंभ्रञ–चेतनोऽथ महीपतिः ॥ प्राभृतैः संभृतां दूतीं । प्राहिणोदुपरोहिणीं ॥ ११ ॥ तामासाद्याऽवदत्सापि । देवस्तुष्टोऽद्य ते स्मरः ॥ यत्त्वां कामयते सुभ्रु । स्वयं श्रीनंदभूपतिः ॥ १२ ॥ सफलीकुरु तत्पुण्यं । तारुण्यं तस्य संगमात् ॥ श्रुत्वेति रोहिणी रोह–द्रोषा चेतस्यचिंतयत् ॥ १३ ॥ अहो कुलमनालोच्य । निजमेष निरर्गलः ॥ मत्तदंतीव मे शील–द्रुममुन्मूलयिष्यति ॥ १४ ॥ नृपायैस्तदयं बोध्यो । यावन्नोष्णति धारणां ॥ विमृश्येति सती दूती–मुवाच मधुराक्षरैः ॥ १५ ॥ सखि स्वभावतो नार्यो । वांछंति सुभगं स्वयं ॥ असावर्थ्यते मां तु । तदियं पायसे सिता ॥ १६ ॥ अनाविलं कुलं किंतु । शशिलक्ष्म्योरिवावयोः ॥ तदेष ञन्नमायातु । यामिन्यां सुभगाग्रणीः ॥ १७ ॥

इति प्राभृतमादाय । राज्ञः स्वयं वितीर्य च ॥ सद्यः प्रीतिपरामेतां । विससर्ज महा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सती ॥ १८ ॥ नंदमानंदयामास । सापि तद्वचनामृतैः ॥ तं वासरमतीयाय । सोऽपि संवत्सरोपमं ॥ १९ ॥ प्रादुर्भूतैः प्रभूतैस्तैः । श्रीनंदहृदयादिव ॥ तमोभिर्मलिनीभूते । सर्वतो मंडले दिशां ॥ २० ॥ कृतशृंगारसर्वस्वो । विसृज्य परिचारकान् ॥ नर्ममंत्रिसखो राजा । रोहिणीसदनं ययौ ॥ २१ ॥ युग्मं ॥ सहसोत्थितचेटीभिः । सत्कृतो नंदभूपतिः ॥ मनोरथमिव प्रोच्चं । सिंहासनमशिश्रयत् ॥ २२ ॥ विष्वक् संचारयामास । दूतीमिव नृपो दृशं ॥ रोहिण्यपि नरेंद्रस्य । पुरोऽभूद्भूमिदत्तदृक् ॥ २३ ॥ स्तिमितं वक्रितं विष्वक् । प्रसारि तरलं जडं ॥ जात्तं चक्षुर्नरेंद्रस्य । तां निरीक्ष्य मृगेक्षणां ॥ २४ ॥ यावदाष्टर्यमवष्टभ्य । वक्तुमुत्तिष्टते नृपः ॥ रसवत्यै सखीवृंदं । रोहिणी तावदादिशत् ॥ २५ ॥ नृपस्य पुरतो न्यस्य । स्थूलस्थालं मनोहरैः ॥ तत्फलैः पूरयामास । स्वगुणैरिव रोहिणी ॥ २६ ॥ वस्त्रैर्नवनवैः क्लृप्त–स्थगनाः स्थालिका अथ ॥ पुरः संचारयामासु–श्चेटिकाः पूर्वशिक्षिताः ॥ २७ ॥ पायंपायमिव स्वैरं । तल्लावण्यरसं रयात् ॥ तृषार्त्तः पानकं पानं । ययाचे रोहिणीं नृपः ॥२८॥ ततो नवनवस्थाली–न्योऽपि स स्वादयन् रसं ॥ एकमेव रसं विंदन् । विस्मितस्तामवोचत

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ २९ ॥ व्यंजनानामिव स्वादे । वेषवारैरनेकधा ॥ पिधानैरिव किं कोऽपि । स्वादो मुग्धे विशिष्यते ॥ ३० ॥ साऽप्याह ज्ञास्यते राजन् । सविवेकं विचारिते ॥ कस्यात्र मुग्धता तृष्णां । मृगस्येवाभिधावितः ॥ ३१ ॥ स्थानस्थगनभेदेन । न विशेषो रसस्य चेत् ॥ को भेदस्तर्हि रामासु । रूपवेषादिभेदतः ॥ ३२ ॥ यथा भ्रांत्या नभोऽनेक–चंद्रं कश्चिद्विलोकते ॥ तथा कामभ्रमभ्रांतः । स्त्रीषु मुह्यति कामुकः ॥ ३३ ॥ जाज्वलीति यथा सूर्यो–पलः सूर्यविलोकनात् ॥ तथा कामानलः पुंसां । मूढानां स्त्रीनिरीक्षणात् ॥ ३४ ॥

किंच देव भवानेव । प्रजानां जनकायसे ॥ त्वमेव च परित्राणं । सर्वेषां निर्विशेषतः ॥ ३५ ॥ प्रादुष्यंति भवभ्रयोऽपि । चेदन्यायप्रवृत्तयः ॥ जाता तदियमंगार–वृष्टिः पीयूषरोचिषः ॥ ३६ ॥ खानिर्नरकदुःखानां । ग्लानिः सुगतिसंपदां ॥ पत्तनं पाप्मनां न्याय्य–मपि वैषयिकं सुखं ॥ ३७ ॥ यदिदं पुनरन्याय–पाति तस्य किमुच्यते ॥ तत्संस्मर कुलाचारं । मा विचारपथं त्यज ॥ ३८ ॥ इति तद्वचनोन्मीलद्–ज्ञानचक्षुर्नराधिपः ॥ रोहिणीं क्षमयामास । दुर्न्यायव्रणरोहिणीं ॥ ३९ ॥ संति भद्रे दुराचारो–पदेष्टारः पदे पदे ॥ हितार्थमुपदीकर्तुं ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

विरला एव केचन ॥ ४० ॥ नगिनी तत्वतस्तन्मे । नवती यदिवा गुरुः ॥ दुर्यशोंधमहाकू-
पा-दुद्धृतोऽहं ययाऽमुतः ॥ ४१ ॥ ब्रुवन्निति सतीं नंद-नूपतिः कृतसत्कृतिः ॥ स्मरन् गुणो-
दयं तस्याः । समियाय निजं गृहं ॥ ४२ ॥ इतोऽर्जितधनो द्वीपां-तरात् श्रेष्टी धनावहः ॥
चिरं विरहजोत्कंठा-विवशो गृहमागमत् ॥ ४३ ॥ रोहिण्यपि तदीयास्य-चंद्र्योत्स्नाऽमृतप्लु-
वैः ॥ चिरात्कृतार्थयामास । नेत्रे नीलोत्पले निजे ॥ ४४ ॥ कदाचिदथ वाचाट-चेटीवक्त्रा-
दनावहः ॥ नरेंद्रागमनोदंतं । श्रुत्वा दध्याविदं हृदि ॥ ४५ ॥ समासाद्य मधुव्रतं । वानरः
क्षुधितोऽशनं ॥ काको दधिघटीमाप्य । विजने किमु मुंचति ॥ ४६ ॥ लावण्यामृतकुंड्येयं ।
तथा प्रेयस्विनी मम ॥ तन्नेत्रातिथितां प्राप्ता । सुशीला कथमस्ति तत् ॥ ४७ ॥ इत्यंतःक-
ल्पिताऽनल्प-विकल्पः स धनावहः ॥ रजन्यां स्तिमितस्तस्थौ । सुप्तो ग्राह इवाऽवटे ॥४८॥
अथास्य चित्तकालुष्य-क्षालनप्रत्यला इव ॥ कर्त्तुमारेभिरे वृष्टिं । घनकाले घनाघनाः ॥४९॥
कषपट्टायते व्योम्नि । रोहिण्याः शीलकांचनं ॥ परीक्षितुं कृता धात्रा । रेजे रेखेव चंचला ॥
॥ ५० ॥ अथ सप्तदिनीं याव-न्महावृष्टौ प्रसृत्वरः ॥ मंदाकिनीपयःपूरः । पुरगोपुरमासदत्

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ ५१ ॥ परचक्रादिवाऽमुष्मा–न्नीतैर्लोकैर्बहिस्तनैः ॥ तत्पुरं पूरयांचक्रे । फलं बीजन्नरैरिव ॥ ५२ ॥ अत्यासन्नत्वमापन्ने । नदीपूरे रयात्ततः ॥ पुरीप्रतोलीद्वाराणि । रोधयामास न्नूधनः ॥५३॥ वेदिकायामिवांन्नोधौ । दुर्गन्नित्तौ नदीरये ॥ आरोहति नृपोऽस्मार्षी–न्नीतः स्वान्नीष्टदेवतां ॥ ५४ ॥ तत्क्षणं वचनात्तस्या । न्नून्नृदाद्भूय रोहिणीं ॥ स्वयमारोहयामास । नगरीगोपुरोपरि ॥ ५५ ॥ परमेष्टिनमस्कार–परावर्त्तनपूर्वकं ॥ हस्ताग्रे नीरमादाय । रोहिणीदमुदाहरत् ॥ ५६ ॥ गंगे त्वदंगचंगं चे–त्त्रिशुद्ध्या शीलमस्ति मे ॥ निवर्त्तस्व पुरात्तस्मा–त्तार्द्र्यान्नागच्चमूरिव ॥ ५७ ॥ इत्युक्त्वा यावदाहंतु–मीष्टे हस्तगतांन्नसा ॥ तावन्मायेव तत्पूरो । जातो दृष्टेरगोचरः ॥ ५८ ॥ न्यवर्त्तत तदाऽब्धाय । जाह्नवीपयसा समं ॥ लोकानां चित्ततो न्नीति–स्तत्पत्युश्च विकल्पधीः ॥ ५९ ॥ अहो शीलमहो जैन–धर्मोऽयमिति सर्वतः ॥ भुवि व्योमपथ्ये चेत्त–मुच्चैरुच्चैरुराशिषः ॥ ६० ॥ रोहिण्या अथ मिथ्यात्व–नाशिन्या देशनागिरा ॥ श्रीजैनधर्मान्निमुख–संयोगोऽन्नून्महीपतिः ॥ ६१ ॥ तया सार्द्धं पुरीचैत्य–परिपाटीं विधाय च ॥ रोहिणीं प्रापयामास । सदने सोत्सवं नृपः ॥ ६२ ॥ धनावहोऽपि सत्कृत्य । सपौरं नृपतिं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मुदा ॥ विससर्ज ततं लोके । तच्चरित्रैश्च निर्मलैः ॥ ६३ ॥ धनावहादयः सर्वे । शीलमाहात्म्यदर्शनात् ॥ शिवश्रीकार्मणं जैन–धर्मं चक्रुरनारतं ॥ ६४ ॥ श्रीरोहिणी सेति जिनेंद्रधर्म–प्रज्ञापनाऽद्वैतमिदं विधाय ॥ कृत्वा कृतार्थं च मनुष्यजन्म । प्राप्ता प्रभूतां सुकृतप्रतिष्ठां ॥६५॥

इति श्रीरुद्रपल्लीयगच्छे श्रीसंघतिलकसूरिपट्टावतंसश्रीसोमतिलकसूरिविरचितायां श्रीशीलतरंगिण्यां रोहिणीकथा समाप्ता ॥ श्रीरस्तु ॥

अथ शीलवतां संगमपि बहुगुणावहमाह—

॥ मूलम् ॥—सीलकलिएहिं सहिं । संगोवि हु बहुगुणावहो होइ ॥ कप्पूरसुरहिघ्रत्तंपि । कुणइ वत्थूण सुरहित्तं ॥ ५७ ॥ व्याख्या—खु निश्चितं शीलकलितैः शीलवद्भिः साईं संगमोऽपि संसर्गोऽपि तद्गुणावहस्तच्छीलकारणं भवति; दृष्टांतमाह–कर्पूरसाध्यात्म्यमपि घनसारेण सह वासोऽपि वस्तूनां पदार्थानां सुरभित्वं करोति, विगंधेऽपि वस्तुनि सहवासात्कर्पूरसौगंध्यं संक्रामतीत्यर्थः, यदागमः–जो जारिसेण मित्तं । करेइ अचिरेण तारिसो होइ ॥ कुसुमेहिं सह वसंता । तिलावि तग्गंधिया जाया ॥ १ ॥ इतिगाथार्थः ॥ ५७ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

शीलरहितस्य तु शेषगुणगणानामपि अगुणत्वमाह—

॥ मूलम् ॥—सयलोवि गुणग्गामो । सीलेण विणा न सोहमावहइ ॥ नयणविहूणंव मुहं । लवणविहूणा रसवइव्व ॥ ५८ ॥ व्याख्या—सकलोऽपि गुणग्रामः शीलेन विना न शोभामावहति, दृष्टांतावाह—नयनविहीनं मुखमिव, लवणविहीना रसवतीव यथा शोभां न प्राप्नोति, तथौदार्यस्थैर्यगांभीर्यविज्ञानज्ञानादयो गुणाः शीलेन विना न शोभंते, यदुक्तं—ऐश्वर्यस्य विभूषणं मधुरता शौर्यस्य वाक्संयमो । रूपस्योपशमः श्रुतस्य विनयो वित्तस्य पात्रे व्ययः ॥ अक्रोधस्तपसः क्षमा प्रभवतो धर्मस्य निर्व्याज्यता । सर्वेषामपि सर्वकारणमियं शीलं परं भूषणं ॥ १ ॥ 'ऊहीनं वेति' विहीनस्य विहूण, इति गाथार्थः ॥ ५८ ॥

शीलवतामिह प्रत्यक्षफलान्याह—

॥ मूलम् ॥—विसविसहरकरिकेसरि—चोरारिपिसायसाइणीपमुहा ॥ सव्वेवि असुहभावा । पहवंति न सीलवंताणं ॥ ५९ ॥ व्याख्या—विषविषधरकरिकेसरिचौरारिपिशाचशाकिनीप्रमुखाः सर्वेऽप्यशुभभावा उपद्रवकारित्वेनाऽसौख्यकरा भावाः पदार्थाः स्थावरजंगमा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

श्व शीलवतां न प्रभवंति. उक्तंच—तोयत्यग्निरपि स्रजत्यहिरपि व्याघ्रोऽपि सारंगति । व्यालोऽप्यश्वति पर्वतोऽप्युपलति क्ष्वेडोऽपि पीयूषति ॥ विघ्नोऽप्युत्सवति प्रियत्यरिरपि क्रीडातमागत्यपां—नाथोऽपि स्वगृहत्यटव्यपि नृणां शीलप्रभावाद्ध्रुवं ॥ १ ॥ इत्यर्थः ॥ ५९ ॥

अथ शीलं प्रतिपद्य तद्भ्रष्टानां दुर्गदौर्गत्यमाह—

॥ मूलम् ॥—सीलभ्भट्ठाणं पुण । नामग्गहणंपि पावतरुबीयं ॥ पुण तेसिंपि गई तं । जाणइ हु केवली भयवं ॥ ६० ॥ व्याख्या—शीलभ्रष्टानां पुनर्नामग्रहणमपि पापतरुबीजं, यथा किल बीजं तरोरुत्पादकं तथाऽशीलानां नामग्रहणमपि पापहेतुकमित्यर्थः, या पुनस्तेषां शीलभ्रष्टानां गतिः संसारपर्यटनरूपा तां भगवान् केवली जानाति, अपारत्वात्तद्दोःशील्यदुःकृतस्य, इतरज्ञानिभिरवबोद्धुमशक्यत्वादित्यर्थः ॥ ६० ॥

पुनः शीलभ्रष्टानामिहलोकपरलोकप्राप्यं दुःखफलमाह—

॥ मूलम् ॥—बंधणछेयणताडण—मारणपमुहाइं विविहदुक्खाइं ॥ इह लोयंमि तहा थीर—मजसं पावंति गयसीला ॥ ६१ ॥ दालिद्दखुद्दवाही । अप्पाउ कुरूवयाइं असुहाइं ॥ न-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रयं ताइं वसगाइं । विगलीयसीलाण परलोए ॥ ६२ ॥ युग्मं ॥ व्याख्या—इह लोकेऽपि तावद्गृहीतशीला बंधनच्छेदनताडनमारणप्रमुखानि विविधदुःखानि, तथा स्थिरं चिरंकालस्थायि अयशोऽवर्णवादं प्राप्नुवंति, तत्र बंधनं रज्ज्वादिना, छेदनं कर्णनाशादीनां शस्त्रेण, ताडनं लगुडादिभिः कुट्टनं, मारणं प्राणच्यवनं, प्रमुखशब्देनाऽपरानपि कदर्थनाप्रकारान् दुःशीला लभंत इत्यर्थः, परलोकेऽपि गलितशीलानां दारिद्र्यक्षुत्क्याधिअल्पायुःकुरूपताप्रमुखानि, न केवलं तानि, नरकांतान्यपि तेषां वशगानि हस्तस्थितानि भवंतीति गाथाद्वयार्थः ॥६१॥६२॥

वृत्ति

शीलभ्रष्टस्यैव दृष्टांतमाह—

॥ मूलम् ॥—निरुवमतवगुणरंजिय–सुरोवि सो कूलवालउ साहू ॥ मागहियासंगाउ । गलियवउ पाविउ कुगइं ॥ ६३ ॥ व्याख्या—निरुपमतपोगुणरंजितसुरोऽपि दुश्चरतपश्चरणाकृष्टदेवोऽपि स कुलवालकः साधुर्मागधिकासंगाद्गलितव्रतो भ्रष्टचारित्रः सन् कुगतिं प्राप्त इति गाथार्थः, भावार्थो दृष्टांतेन गम्यः, स चायं—

॥ ४५१ ॥

बभूवुः केचिदाचार्याः । क्षमाधारितया यकैः ॥ हीलितात्मेव पाताल–मूलेऽलीयत ना-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

गराट् ॥ १ ॥ गणं पालयतां तेषां । विधिवद्गुणधारिणां ॥ श्रीवीरस्येव गोशालो । विनेयः समपद्यत ॥ २ ॥ प्रकृत्या दुर्विनीतात्मा । गुरूक्ते प्रतिकूलधीः ॥ कपिकच्छुवदुद्वेग–कारी कपिरिवाऽस्थिरः ॥ ३ ॥ प्रयुक्ता गुरुभिस्तस्य । सारणावारणादिकाः ॥ शिक्षा ज्वरार्दितस्येव । विषाय घृतविप्रुषः ॥ ४ ॥ अन्यदा सह तेनैव । सूरयो गुणभूरयः ॥ उज्जयंतगिरिं जग्मु–स्तीर्थयात्राचिकीर्षया ॥ ५ ॥ तत्र यात्रिकस्त्रीवर्गे । दृष्ट्वा चंचललोचनं ॥ कुशिष्यं वारयामासुः । सोऽपि चित्ते क्रुधं दधौ ॥ ६ ॥ ततोऽवरोहतां तेषां । गुरूणां चूरणाय सः ॥ कुशिष्यो यमगोलाभं । गंभशैलमपातयत् ॥ ७ ॥ सुदक्षाः सूरयस्तस्य । पतत्प्रस्खलितध्वनिं ॥ श्रुत्वा वितत्य जंघे स्वे । तस्थुर्मोघश्च सोऽभवत् ॥ ८ ॥ स्पृष्टरोषलवास्तेऽथ । कुशिष्यं गुरवोऽगृणन् ॥ वनिताभ्यो व्रतभ्रंशं । रे दुरात्मन्नवाप्स्यसि ॥ ९ ॥ स्थाताऽस्मि खलु तत्रैव । नेक्षे यत्रांगनामुखं ॥ शापं वो व्यर्थयिष्यामि । प्रतिज्ञायेति दुष्टधीः ॥ १० ॥ निर्मर्यादो गुरुं त्यक्त्वा । पिपासुः सरसीमिव ॥ गतः कांचिदरण्यानी–मज्ञानीव स कापथं ॥ ॥ ११ ॥ कायोत्सर्गजुषो नद्याः । कूले तस्य तपस्यतः ॥ पक्षतो मासतो वापि । सार्थादेः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पारणाऽन्नवत् ॥ १२ ॥

वर्षाकालेऽन्यदा प्राप्ते । प्रवृत्ता गिरितस्ततः ॥ जाताः स्वच्छंदचारिण्यो । निम्नगाः कुलटा इव ॥ १३ ॥ क्षुल्लकाश्रितकूलायां । गिरिनद्यामितस्ततः ॥ वहंत्यां देवता दध्यौ । ज्ञात्वा श्रीजिनशासने ॥ १४ ॥ नूनं प्रवर्द्धमानेन । कृतघ्नेनेव सर्वतः ॥ एष नद्याः प्रवाहेन । मुनिराप्लावयिष्यते ॥ १५ ॥ ततः कूलंकषाकूलं । सा प्रावर्त्तयदन्यतः ॥ कूलवालक इत्येष—स्तदादि प्रथितो भुवि ॥ १६ ॥ इतश्च हारकुंडल—वासोन्निः सहितो द्विपः ॥ श्रीश्रेणिकनरेंद्रेण । दत्तो हल्लविहल्लयोः ॥ १७ ॥ परलोकाध्वनीने च । श्रेणिके कूणिको नृपः ॥ शोकाज्ञजगृहे स्थातु—मशक्तो वास्तुपंडितैः ॥ १८ ॥ सद्यो निरूपितस्थाने । चंपेति नगरीं नवां ॥ निवेश्य तत्र कालादि—दशभ्रातृयुतः स्थितः ॥ १९ ॥ युग्मं ॥ ततः पद्मावतीपट्ट—राज्ञीनित्याग्रहान्नृपः ॥ हारादितुर्यकं हल्ल—विहल्लाभ्यामयाचत ॥ २० ॥ बुद्धिमंतौ ततस्तौ च । मत्वा तामशुभायतिं ॥ सारं स्वसर्वमादाय । विशाट्यां निशि जग्मतुः ॥ २१ ॥ मातामहस्तयोस्तु श्री—चेटकः पृथिवीपतिः ॥ तावमन्यत मेधावी । स्नेहेन युवराजवत् ॥ २२ ॥ विज्ञाय

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तौ गतौ तत्र । चिंतयामास कूणिकः ॥ न बंधू न च रत्नानि । जातोऽहमुन्नयच्युतः ॥२३॥ तथापीदं प्रतिज्ञातं । स्वयमेव त्यजामि चेत् ॥ श्रेणिकस्य सुतो नूत्वा । स्वतोऽपि किमु न त्रपे ॥ २४ ॥ अमर्षादिति दूतेन । चेटकान्तावयाचत ॥ दौहित्रौ शरणायातौ । न च तौ चेटकोऽप्यदात् ॥ २५ ॥ ततो रेकारितः सिंह । इव प्रथितन्नीषणः ॥ वेशालीमरुधच्चंपा—पतिः सर्वान्निसारतः ॥ २६ ॥ जायमाने महायुद्धे । तयोः स्वबलयोर्मिथः ॥ व्यापादि कोटिर्वीराणां । लक्षाशीत्यधिका तदा ॥ २७ ॥ वीरौ हल्लविहल्लौ ता—वारूढौ सेचनद्विपं ॥ निहत्य तद्बलं रात्रौ । सत्वरं प्रतिगच्छतः ॥ २८ ॥ कृतोपाया अपि न्नटा—श्चंपान्नर्तुः कदाचन ॥ न प्रहर्तुं न वा धर्तुं । शेकुः सेचनकद्विपं ॥ २९ ॥ ततस्तौ खदिरांगार—खातिकायाः प्रयोगतः ॥ हते सेचनके हल्ल—विहल्लौ न्नवनिस्पृहौ ॥ ३० ॥ नीतौ शासनदेव्याथ । श्रीमद्वीरजिनांतिके ॥ दीक्षां जगृहतुः स्वार्थ—साधकौ न्नवतःस्म च ॥ ३१ ॥ श्रीकूणिकोऽपि वेशाली—पुरीमादातुमक्षमः ॥ प्रतिज्ञामकरोदेवं । बलीयान् श्रेणिकात्मजः ॥ ३२ ॥ हलेन खरयुक्तेन । वेशालीं न खनामि चेत् ॥ नृगुपातेन वा वह्नि—प्रवेशान्तदहं म्रिये ॥ ३३ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ततः कृतप्रतिज्ञोऽपि । पुरीं नंक्तुमनीश्वरः ॥ अशोकचंद्रनृपालो । विषसादतरां हृदि ॥ ३४ ॥ गुर्वाज्ञालोपतो रुष्टा । देवता कूलवालके ॥ नन्नःस्थिताऽतिखिन्नस्य । कूणिकस्येद-मन्यधात् ॥ ३५ ॥ गणियं च मागधियं । समणे कुलवालए मिलिज्जेइ ॥ कुणिए हेलाएतो । वेसालिं गहिस्सदि ॥ ३६ ॥ वाचमेतामथाऽाकर्ण्य । जयाशान्निमुखो नृपः ॥ आह्वास्त व-हुमानेन । वेश्यां मागधिकान्निधां ॥ ३७ ॥ सत्कृत्य वस्त्रालंकारै—रादिदेश महीपतिः ॥ नंइ त्वयानेकपुंसां । धीराजन्मोपजीविता ॥ ३८ ॥ तदद्य स्वकलामस्म—त्कार्ये सफलय द्रुतं ॥ कृत्वा कलावति पतिं । कूलवालकमानय ॥ ३९ ॥ नमिति प्रतिपेदाना । विसृष्टा नृभुजा तदा ॥ कपटैकपटुः कूट—श्राविकावेषमादधौ ॥ ४० ॥ सा गर्न्नश्राविकारूपा । नमंती तीर्थ-मंडलीं ॥ आससाद प्रदेशं तं । यत्रर्षिः कूलवालकः ॥ ४१ ॥ वैराग्यनिर्न्नरेवैषा । वंदित्वा तं मुनिं जगौ ॥ वंदये रैवतादीनि । तीर्थानि नवतामहं ॥ ४२ ॥ ददौ च प्रतिमां मुक्त्वा । ध-र्मलान्नाशिषं मुनिः ॥ नत्वा तीर्थान्यपृच्छच्च । कुतोऽत्रागा विवेकिनि ॥ ४३ ॥ साऽाचख्यौ नाथ चंपातो । धर्मैकशरणाऽागमं ॥ नत्वा तीर्थान्यहं तीर्थं । जंगमं त्वामवंदिषं ॥ ४४ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

द्विचत्वारिंशतादोषै–रदूषितमिहास्ति मे ॥ पात्रेयं तदुपादाय । महर्षेऽनुगृहाण मां ॥ ४५ ॥ जगाम साधुस्तद्भक्ति–यंत्रितात्मा तयापि च ॥ पूर्वसंयोजितख्याः । प्रत्यलाभ्यत मोदकाः ॥ ४६ ॥ भुक्तमात्रैश्च तैः साधु–स्तथाऽभूदतिसारकी ॥ शशाक संचरीतुं न। यथांगानि स्वकान्यपि ॥ ४७ ॥ आपृष्टुमिव सा वक्त्र–न्यस्तवस्त्रा समीयुषी ॥ तदवस्थं च तं दृष्ट्वा । सगद्गदमिवाख्यत ॥ ४८ ॥ मुने सेयमवस्था ते । मत्कृता समजायत ॥ धिग्मामामयदां साधो–र्निरयेऽपि न नूर्मम ॥ ४९ ॥ किंचैकाकिनमस्वस्थं । भवंतं निर्जने वने ॥ मुक्त्वा तीर्थांतरं गंतुं । न युक्तं मम निर्मम ॥ ५० ॥ आत्मानं पावयिष्यामि । ग्लानशुश्रूषयैव तत् ॥ इत्युक्त्वा भेषजादीनि । मुहुर्मुहुरुपाहरत् ॥ ५१ ॥

क्रमेणोद्वर्त्तयामास । तदंगं गणिका तथा ॥ यथा सर्वांगसंस्पर्शं । कारयामास तस्य सा ॥ ५२ ॥ नीतश्चोल्लाघतां स्वात्म–वशतां च क्रमादसौ ॥ संकटे पतितः सर्वः । सुखग्राह्यो भवेद्यतः ॥ ५३ ॥ कटाक्षैर्विभ्रमैर्वक्त्र–वचोयुक्तिभिः सा क्रमात् ॥ तपस्तस्य खलीचक्रे । स्त्रीसंसर्गेण किं तपः ॥ ५४ ॥ ततः संततसंवास–भङ्गयनर्मोक्तियुक्तिभिः ॥ दंपतीव्यवहारो-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ऽनू–तयोर्धिग्मोहचेष्टितं ॥ ५५ ॥ रज्जुबद्धमिव क्रीडा–मर्कटं कूलवालकं ॥ यत्र चंपाधिप-
स्तत्रा–निन्ये मागधिका जवात् ॥ ५६ ॥ ऊचे चाशोकचंद्राय । देवायं कूलवालकः ॥ पती-
कृत्य मयाऽानीतो । यत्कर्त्तव्यमथादिश ॥ ५७ ॥ कूलवालकमादिक्ष–त्ततो राजा सगौरवं ॥
तथा कुरु यथा मंक्षु । वैशाली न्नज्यते मुने ॥ ५८ ॥ तदादृत्य मुनिर्लिंगि–रूपेण प्रसरन्म-
तिः ॥ प्रविवेशाथ वैशालीं । बकोटः सरसीमिव ॥ ५९ ॥ चंपेशोऽपि विशेषेण । तदानीम-
रुधत्पुरीं ॥ तदंतः परिबभ्राम । मुनिरप्यस्खलद्गतिः ॥ ६० ॥ प्रेक्षमाणः पुरीद्रव्य–संचयं प-
रितोऽथ सः ॥ मुनिसुव्रतनाथस्य । दृष्ट्वा स्तूपमचिंतयत् ॥ ६१ ॥ नूनमस्य प्रतिष्ठायाः । किं-
चिद्भग्नबलं महत् ॥ पूरेषा तद्भग्नावेण । शक्रेणापि न न्नज्यते ॥ ६२ ॥ नन्नाप्यस्तदयं स्तू-
प–नुपायेनेति चिंतयन् ॥ पानीयहारिकामार्गे । मुहुर्मुहुरथाऽभ्रमत् ॥ ६३ ॥ कुर्वाणा वनि-
तास्तत्र । पुरीरोधकथा मिथः ॥ दृष्ट्वा मागधिकाधीशं । प्रपच्छुरिति दुःखिताः ॥ ६४ ॥ न-
गवंश्चिररोधेन । नगर्याः स्मः कदर्थिताः ॥ तदुद्वेष्टः कदामुष्या । न्नविताऽाश्वासयाशु नः ॥६५॥

सोऽप्यूचे यावदत्रास्ति । स्तूप एषो ह्यखंडितः ॥ न भावी तावदुद्वेष्टो । व्याधेरिव म-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

लग्रहे ॥ ६६ ॥ प्रत्ययस्त्वयमेतस्मिन् । ज्ञप्यमानेऽपि तत्क्षणं ॥ वाहिंवेलेव विद्वेषि–बलं दूरं प्रयास्यति ॥ ६७ ॥ सर्वथा पातिते त्वस्मिन् । ज्ञवित्री वः कृतार्थता ॥ यतः स्थापित एवायं । मुहूर्त्तं क्षयकारिणि ॥ ६८ ॥ अहंपूर्विकया ज्ञंक्तु–मारेभे तं ततो जनः ॥ प्रतार्यंते न के धूर्त्तै–र्विशिष्टा व्यसनार्दिताः ॥ ६९ ॥ ज्ञप्यमाने ततः स्तूपे । प्रत्ययार्थं मुनिब्रुवः ॥ कूणिकं सबलं ज्ञात्वा । द्विकोशीं परतोऽनयत् ॥ ७० ॥ तत्प्रत्ययानुसारेण । द्रुतं नागरिको जनः ॥ कूर्मन्यासशिलां याव–त्स्तूपं समुदमूलयत् ॥ ७१ ॥ ततो द्वादशवर्षांते । वैशालीं कूणिकोऽज्ञनक् ॥ दुर्ग्राह्याऽभूदियत्कालं । सा हि स्तूपप्रज्ञावतः ॥ ७२ ॥ विरराम तदा चंपा–धिपचेटकयो रणः ॥ एतस्यामवसर्पिण्या–मीदृशो न कदाप्यभूत् ॥ ७३ ॥ ज्ञाषितोऽशोकचंद्रेण । निर्गच्छन्नथ चेटकः ॥ पूज्य मातामह ब्रूहि । कमादेशं करोमि ते ॥ ७४ ॥ सोऽप्याख्यत विलंबस्व । पुर्यां मा प्रविश क्षणं ॥ पुष्करिण्यामिह स्नानं । यावन्निर्वर्त्तयाम्यहं ॥ ७५ ॥ प्रतिपन्नेऽमुना तस्मिन् । शुज्ञध्यानावरुद्धधीः ॥ कंठेऽयःपुत्रिकां बध्वा । वाप्यां श्रीचेटकोऽपतत् ॥ ७६ ॥ विधृत्य धरणेंद्रेण । तदा साधर्मिकत्वतः ॥ नीतः स्वमंदिरं तत्र ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

जीविताशाऽनपेक्षया ॥ ७७ ॥ पर्यंताराधनां कृत्वा । विहिताऽनशनक्रमः ॥ सहस्रारमहाकल्पे । प्राप्तश्चेटकभूपतिः ॥७८॥ युग्मं ॥ दौहित्रस्तस्य च ज्येष्ठा–सूनुः सत्यकिखेचरः ॥ निनाय नीलवंताद्रौ । समग्रं नगरीजनं ॥ ७९ ॥ तदा कूणिकभूपोऽपि । लांगलैर्युक्तरासभैः ॥ वैशालीं खेटयित्वालं । स्वप्रतिक्षामपूपुरत् ॥ ८० ॥ अशोकचंद्रभूपाल–स्ततः पूर्णमनोरथः ॥ महोत्सवैर्महीयोभिः । प्राप चंपां महापुरीं ॥ ८१ ॥ कूलवालकमुनिस्तु मागधी–संगरंगजलधौ निमग्नधीः ॥ शीलखंडनसमुद्भपातका–द्वंद्वमिष्यति भवाननेकशः ॥ ८२ ॥

॥ इति श्रीरुद्रपल्लीयगच्छे श्रीसंघतिलकसूरिपट्टावतंसश्रीसोमतिलकसूरिविरचितायां श्रीशीलतरंगिण्यां कूलवालकमुनिकथा समाप्ता ॥ श्रीरस्तु ॥

विषयरसपिपासालोलतायां तपश्चरणस्यापि नैरर्थक्यमाह—

॥ मूलम् ॥—समणीवि हु विसयरसा । पुव्वभवे दोवई कयनियाणा ॥ सिवदायगंवि हु तवं । मुहाइ हारिंसु ही मोहो ॥ ६५ ॥ व्याख्या—द्रौपदी द्रुपदात्मजा पांडवभार्या पूर्वभवे सागरदत्तश्रेष्ठिसुताभवे श्रमण्यपि गृहीतचारित्रापि विषयरसात्कृतनिदाना भोगगा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

द्धर्याद्विक्रीततपश्चरणा शिवदायकमपि मोक्षहेतुकमपि तपो मुधा व्यर्थं हारयामास निर्गमितवती, हा इति खेदकारी मोहः, कष्टतरश्चारित्रमोहनीयकर्मविपाक इति सूत्रसंक्षेपार्थः, विस्तरार्थस्त्वयं, तथाहि—

समस्तदत्तदृष्टारि—कंपा चंपा महापुरी ॥ सुरीदर्पणतां याति । प्रत्प्राकारो मणीमयः ॥ १ ॥ गुणा इव त्रयो विप्रा—स्तत्राऽभूवन् सहोदराः ॥ सोमदेवसोमभूति—सोमदत्ताः स्थिराशयाः ॥ २ ॥ तेषामासन् प्रियास्तिस्रः । क्रमेण प्रेमपीवराः ॥ नागश्रीरथ भूतश्री—र्यज्ञश्रीश्चेति विश्रुताः ॥ ३ ॥ त्रयाणामपि बंधूना—मिङ्गमासीद्व्यवस्थितिः ॥ अनुक्रमेण भोक्तव्यं । सर्वैरप्येकसद्मनि ॥ ४ ॥ स्ववारकदिनेऽन्येद्यु—र्नागश्रीर्मुदिता हृदि ॥ चक्रे रसवतीं नाना—रसव्यंजनपेशलां ॥ ५ ॥ अज्ञानतस्तयाऽनेक—द्रव्यसंस्कारकर्मभिः ॥ कटुतुंबीफलं पक्व—मपच्यत कथंचन ॥ ६ ॥ तद्विज्ञायापि पाकांते । कर्मणो दुर्विपाकतः ॥ तावद्वस्तुव्ययं स्मृत्वा । न तत्याज मितंपचा ॥ ७ ॥ सर्पदष्टमिवांगुष्टं । विप्रा प्रकृतिलोलुपा ॥ कटुतुंबीफलं पक्त्वा । स्थापयामास भाजने ॥ ८ ॥ कुटुंबं भोजयामास । तदन्यैर्भोज्यवस्तुभिः ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

भुक्त्वा बहिर्गता नर्तृ–देवराद्या अपि क्षणात् ॥ ९ ॥ इतश्च धर्मघोषाख्याः । सूरयो ज्ञान-
न्नानवः ॥ समीयुस्तत्पुरोद्याने–ऽनवद्यचरणास्पदं ॥ १० ॥ तेषां धर्मरुचिः शिष्यो । मासक्ष-
णपारणे ॥ सूनागृहमिव ब्भागो । नागश्रीनिलयं ययौ ॥ ११ ॥ नानावस्तुव्ययोऽमुष्मिन् । वि-
फलो मा नवत्विति ॥ एषोऽपि न्निक्षुर्न्निक्वार्थी । तोषितस्तावदस्तु च ॥ १२ ॥ नागश्रीरिति
तत्तुंबी–फलं तस्मै तपस्विने ॥ ददौ दुर्गतिपाताय । सत्यंकारमिवात्मनः ॥ १३ ॥ समागत्य
महात्मापि । तद्गुरूणामदर्शयत् ॥ निरीक्ष्य तत्क्षणं प्राहु–र्गुरवो वत्सलाशयाः ॥ १४ ॥ क-
टुतुंबीफलमिदं । दौष्ट्यादज्ञानतोऽथवा ॥ दत्तं नागश्रिया सद्यः । प्राणिप्राणप्रयाणकं ॥ १५ ॥
तदिदं स्थंडिले क्वापि । परिस्थापय यत्नतः ॥ आदेशमिममासाद्य । सोऽप्यगान्नगराद्बहिः ॥
॥ १६ ॥ कथंचित्पात्रतस्तस्मा–द्बिंदौ निपतिते भुवि ॥ दृष्ट्वा पिपीलिका लग्ना । म्रियमाणाः स-
हस्रशः ॥ १७ ॥ दध्यौ च बिंदुरप्येष । यदीह्रं प्राणघातकः ॥ तत्समग्रमिदं जीवान् । कति
कर्त्ता न न्नस्मसात् ॥ १८ ॥ वरमेकश्च मे जीवो । यातु मा कोटिरंगिनां ॥ विमृश्येति स्व-
यं साधु–र्बुभुजे तन्मुदान्वितः ॥ १९ ॥ स्वयमाराधनापूर्वं । विपद्यासौ समाधिना ॥ नदप-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

द्यत सर्वार्थ–सिद्धौ सिद्धमनोरथः ॥ २० ॥ बहिर्धर्मरुचेः कस्मा–द्विलंबोऽनूदितीक्षितुं ॥ धर्म-घोषमुनींद्रेण । निर्दिष्टा मुनयोऽपरे ॥ २१ ॥ ते बहिस्तं तथा वीक्ष्य । तस्योपकरणं समं ॥ आनिन्युर्गुरुपादांते । यथादृष्टं तथोचिरे ॥ २२ ॥ सूरयोऽतिशयज्ञाना–त्तत्स्वरूपं यथास्थितं ॥ सुगतिप्राप्तिसंयुक्तं । मुनीनां पुरतोऽवदत् ॥ २३ ॥

कथंचिदथ विज्ञाय । तत्स्वरूपं जनाननात् ॥ सोमदेवादयो विप्रा । रुष्टा नागश्रियं गृ-हात् ॥ २४ ॥ सद्यो निर्वासयामासुः । सापि लोकैर्विगर्हिता ॥ हन्यमाना च बभ्राम । पा-मरेवान्वितः शुनी ॥ २५ ॥ युग्मं ॥ सा तत्रैव भवे कासा–तिसारोग्रज्वरादिभिः ॥ रोगैरा-क्रांतदेहाऽप्य । वेदनां नरकावनेः ॥ २६ ॥ क्षुत्तृषाबाधिताऽगाध–रौद्रध्यानपरायणा ॥ विप-द्य षष्ठनरका–ऽतिश्रिताभियमीयुषी ॥ २७ ॥ तत उद्धृत्य मर्त्येषु । नरकं सप्तमं गता ॥ त-तोऽपि प्राप्य मीनत्वं । तत्रैव पुनरीयुषी ॥ २८ ॥ समस्तनरकेष्वेवं । दुष्टात्मा द्विर्द्विरभ्रम-त् ॥ उत्पेदे च तदुद्धृत्य । पृथ्वीकायादियोनिषु ॥ २९ ॥ अथो गिरिनदीग्राव–न्यायतः क-र्मलाघवात् ॥ स हि नागश्रियो जीवो । भ्रांत्वा संसारसागरं ॥ ३० ॥ श्रेष्ठिसागरदत्तस्य ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

चंपायां पुरि तस्थुषः ॥ सुन्नशश्रेष्ठिनीकुक्षौ । कन्याऽभूत्सुकुमारिका ॥ ३१ ॥ तत्रैव जिनदत्ताह्वः । श्रेष्ठी भद्रा च तत्प्रिया ॥ तत्पुत्रो सागरो नामा । कलाविज्ञानसेवधिः ॥ ३२ ॥ जिनदत्तोऽन्यदा दृष्ट्वा । वेश्मस्थां सुकुमारिकां ॥ योग्येयं मत्तनूजस्य । सागरस्येत्यचिंतयत् ॥ ३३ ॥ समीक्ष्य बंधुवर्गं स्वं । गौरवेण गरीयसा ॥ गत्वा सागरदत्तस्य । मंदिरे तामयाचत ॥ ३४ ॥ सोऽप्याह साधु देयैव । वरस्य खलु कन्यका ॥ किं त्वेषा भाग्यरेखेव । प्राणेभ्योऽपि प्रिया मम ॥ ३५ ॥ मुहूर्त्तमपि न स्थातुं । प्रभवाम्यनया विना ॥ तदस्तु गृहजामाता । मम ते सागरः सुतः ॥ ३६ ॥ सुतेन मंत्रयामीति । जिनदत्तो गतो गृहं ॥ अश्रावयच्च तत्सूनोः । सोऽपि मौनमथाश्रितः ॥ ३७ ॥ संमतं ह्यनिषिद्धार्थं । मन्वानोऽस्य पिता ततः ॥ जगौ सागरदत्ताय । गृहजामातरं सुतं ॥ ३८ ॥

महर्द्ध्याथ तयोरासी–त्पाणिग्रहमहोत्सवः ॥ बद्धस्मै प्रददौ पाणि–मोचने श्वसुरस्तदा ॥ ३९ ॥ सुवासिनीजने सन्मा–निते तत्र यथोचितं ॥ तौ च शिश्रियतुर्नक्तं । पल्यंकं वासवेश्मनि ॥ ४० ॥ सत्यामखिलभोगांग–सामग्र्यामपि सागरः ॥ लेभे कर्मवशात्तस्याः । स्प-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

र्शमंगारसोदरं ॥ ४१ ॥ ग्रीष्मग्रीष्मज्वलज्ज्वाष्टू–मध्यगामीव सागरः ॥ क्षणमेकमतीयाय । स वर्षमिव दारुणं ॥ ४२ ॥ निशणायामथैतस्यां । प्रणश्य स्वगृहेऽगमत् ॥ तस्थौ सा हारलेखेव । तद्वप एव विनायका ॥ ४३ ॥ पत्येव निश्या मुक्ता । दर्शं दर्शमितस्ततः ॥ यूथभ्रष्टा कुरंगीव । रुरोद सुकुमारिका ॥ ४४ ॥ निरीक्ष्य तामथो चेटी । रुदंतीं पतिवर्जितां ॥ न्यवेदयत्सुन्नशायाः । सापि पत्युरवीवदत् ॥ ४५ ॥ सोऽपि स्वरूपं जामातु–र्जिनदत्तमजिज्ञपत् ॥ तत एषोऽपि साक्षेपं । पुत्रमित्रमतर्जयत् ॥ ४६ ॥ नवता नवता चक्रे । कुलीनेन न साध्विदं ॥ स्वजना नाऽपमान्या हि । धैर्यसागर सागर ॥ ४७ ॥ सगुणं निर्गुणं वापि । मुख्यैतैगीकृतं न हि ॥ सकलंकं सकौटिल्यं । चंद्रं नोज्झति धूर्जटिः ॥ ४८ ॥ तदाश्यिस्व गत्वा ता–मिदानीमपि वत्सल ॥ मा कुले स्वजनाऽवज्ञा–नवं दोषं नवं कुरु ॥ ४९ ॥ सागरः स्पष्टमाचष्ट । वरमग्निं विशाम्यहं ॥ न पुनस्तकृहं यामि । जामिर्मेऽतःपरं हि सा ॥ ५० ॥ श्रुत्वा सागरदत्तोऽपि । तत्कुट्यांतरितोऽखिलं ॥ आगत्य पुत्रिकामाह । क्षरदश्रुविलोचनः ॥ ५१ ॥ तथा कथंचिद्वत्सेऽसौ । विरक्तस्त्वयि सागरः ॥ यथा स्वप्नेऽपि नाकांक्ष–त्यंगारशकटीमिव ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ ५२ ॥ तदन्यं चिंतयिष्यामि । ते वत्सायाः कृते पतिं ॥ न ह्यल्पमूल्यतामेति । रत्नं ग्रा-
मीणदूषितं ॥ ५३ ॥ श्रेष्टी सागरदत्तोऽथा–ऽन्येद्युर्वातायनस्थितः ॥ आत्तैककर्परं ग्राम्य–न्म-
क्षिकाकुलसंकुलं ॥ ५४ ॥ कुत्सितं यौवनावस्थं । कक्षापटपरिग्रहं ॥ भिक्षुकं कंचिदद्राक्षी–
द्दारिद्र्यमिव मूर्त्तिमत् ॥ ५५ ॥ युग्मं ॥ अन्यंगोद्वर्त्तनस्नानै–र्निरस्ततनुकश्मलं ॥ विलिप्तचं-
दनं दिव्य–वाससी परिधाप्य च ॥ ५६ ॥ ऊचे श्रेष्टी मदीयेयं । पुत्रिका सुकुमारिका ॥ इ-
यं च प्रचुरा लक्ष्मी–र्विलसन् सुखमास्व तत् ॥ ५७ ॥ युग्मं ॥ स्वर्गितामिव मन्वानः ।
स्वस्य सोऽपि च तद्गृहे ॥ गृहजामातृवत्तस्थौ । प्रोद्यदानंदमेदुरः ॥ ५८ ॥ कृतशृंगारया वा-
स–वेश्म प्राप्तस्तया समं ॥ अग्निष्टोपमिवाऽमंस्त । तदाश्लेषं स दुर्गतः ॥ ५९ ॥ राक्षसी-
मिव तां मत्वा । सहसोत्थाय भिक्षुकः ॥ पलायामास वेगेन । करेणादाय कर्परं ॥ ६० ॥

तथैव रुदतीं पुत्री–माश्वास्य जनकोऽब्रवीत् ॥ सोऽयं प्राक्कर्मणां कोऽपि । विपाकस्त्व-
य्युपस्थितः ॥ ६१ ॥ सूर्योऽपि भ्राम्यति व्योम्नि । गुणी निष्कामटाद्यते ॥ मूर्खोऽपि संपदं भुं-
क्ते । विपाकात्पूर्वकर्मणां ॥ ६२ ॥ यतस्व कर्मोच्छेदाय । तत्त्वं मा खिद्यथा वृथा ॥ दानं ददा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ना दीनेभ्यः । शांतात्मा तिष्ठ मद्गृहे ॥ ६३ ॥ स्वकर्ममर्म जानाना । सापि धर्मं जिनोदितं ॥ कुर्वाणा तद्गृहे तस्थौ । समाधिनिर्जितेंद्रिया ॥ ६४ ॥ तद्गेहमन्यदा प्रापुः । साध्व्यो गोचरचर्यया ॥ प्रत्यलाभ्यंत ताः शुद्ध–ऽशनपानैश्च भक्तितः ॥ ६५ ॥ लवित्रं कर्मवल्लीनां । चारित्रं तत्पदांबुजे ॥ सा जग्राह विरक्तात्मा । माणिक्यमिव निर्धनः ॥ ६६ ॥ सा तपांसि महीयांसि । कर्मनिर्मूलनोद्यता ॥ भूरिशः कर्तुमारेभे । मारेभपतिवारिका ॥ ६७ ॥ कदाप्येषा विशेषोग्र–तपश्चरणकाम्यया ॥ प्रवर्त्तिनीं प्रणम्येदं । पप्रच्छ स्वच्छचेतसा ॥ ६८ ॥ विविक्तोद्यानभूमिस्था । दत्तदृष्टिरहं रवौ ॥ आतापनां चिकीर्षामि । जिहीर्षामि सुदुःकृतं ॥६९॥ साध्व्यः प्रादुर्न नो धर्म–मार्गे बहिरुपाश्रयात् ॥ साध्वीनां कल्पते जातु । कर्तुमातापनाविधिं ॥ ७० ॥ साऽप्यनादृत्य तद्वाचं । वनमागत्य किंचन ॥ यावदातापनां कर्तु–मारेभे दत्तदृग् रवौ ॥ ७१ ॥ एकस्य तावदुत्संगे । न्यस्तांघ्रिमपरस्य तु ॥ श्रयंतीमंकमन्येन । वीज्यमानप्रकीर्णकां ॥ ७२ ॥ कृतावतंसमेकेन । धृतछत्रां परेण च ॥ ददर्श देवदत्ताख्यां । गणिकां तत्र संगतां ॥ ७३ ॥ विशेषकं ॥ तस्या अनन्यसामान्य–भाग्यसौभाग्यवैभवं ॥ सा वी-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

क्ष्याऽपूर्णभोगेच्छा । निदानमकरोदिति ॥ ७४ ॥ मदाचीर्णस्य चेदस्य । तपसोऽस्ति फलं खलु ॥ तदानीं देवदत्तेव । भवेयं पंचभर्तृका ॥ ७५ ॥ सा तथैव तपस्यंती । निदानमिति कुर्वती ॥ आर्याभिर्वार्यमाणा च । चेतसीदमचिंतयत् ॥ ७६ ॥ पुरा मां मानयंतिस्म । भ्रातिन्योऽन्निजनामिव ॥ न्यत्कुर्वंत्यधुना मां त्व–कारणं वैरिणीमिव ॥ ७७ ॥ विमृश्येति पृथग्वेश्म–स्थिता साऽपालयद्व्रतं ॥ स्वैरत्वाज्जैनमार्गस्य । मालिन्यमुपचिन्वती ॥ ७८ ॥ संलेखनां ततो मासा–नष्टौ कृत्वा यथाविधि ॥ नवपल्योपमायुष्का । सौधर्मे देव्यभूदसौ ॥७९॥

ततश्च्युता सा कांपील्य–भर्तुर्द्रुपदभूपतेः ॥ कन्याऽभूद् द्रौपदीसंज्ञा । रूपनिर्जितमेनका ॥ ८० ॥ सा नित्ययौवना जात–यौवनापि पितुः पुरः ॥ राधावेधपणं चक्रे । वरेण्यवरकाम्यया ॥ ८१ ॥ स्वयंवरेऽथ प्रत्येकं । दूतप्रेषणकर्मणा ॥ भूपालान् मेलयामास । द्रुतं द्रुपदभूपतिः ॥ ८२ ॥ युधिष्ठिरादयः पंच । पांडवेयास्तदाऽययुः ॥ अवातारीन्मरालीव । स्वयंवरसरश्च सा ॥ ८३ ॥ वरितुकामा कामांगी । सापि पंचापि लज्जया ॥ प्रतीहारीकरात्पार्थ–कंठे मालामचिक्षिपत् ॥ ८४ ॥ दिव्यानुभावादेकापि । पुष्पमाला पृथक्पृथक् ॥ पंचाना-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मपि तेषां सा । कंठपीठे व्यलोक्यत ॥ ८५ ॥ साधुसाधु वृतं राज–कन्यया कृतपुण्यया ॥ नल्लासेति सहसा । वाणी व्योम्न्यशरीरिणां ॥ ८६ ॥ कथमेकामहं कन्यां । पंचन्यो दातुमुत्सहे ॥ यास्यामि वा ददानोऽपि । सर्वेषामुपहास्यतां ॥ ८७ ॥ पंचानामपि कंठेषु । वरमाला लुलोठ सा ॥ आदृतं दिव्यवाचा च । तत्किमत्र भविष्यति ॥ ८८ ॥ इति द्रुपदभूपालो । यावच्चिंतामहार्णवे ॥ मग्नो यथावत्कर्त्तव्य–मूढश्चिंतयति चिरं ॥ ८९ ॥ तावद्व्योमाध्वनाऽन्येत्य । चारणश्रमणो द्रुतं ॥ निदानकथनात्प्राच्या–त्तत्संदेहमपाहरत् ॥ ९० ॥ हृष्टात्मान्यां ततः पांडु–द्रुपदान्यां महोत्सवात् ॥ चक्रे वैवाहिकं कर्म । कृष्णापांडुतनूभुवां ॥९१॥ इत्थं शिवश्रीपरिणामि तिव्रं । तपोऽपि तप्त्वा द्रुपदेशकन्या ॥ निदानतोऽजायत पंचपांडु–सूनुप्रिया ह्री विषयान्निलाषः ॥ ९२ ॥

॥ इति श्रीरुद्रपल्लीयगच्छे श्रीसंघतिलकसूरिपट्टावतंसश्रीसोमतिलकसूरिविरचितायां श्रीशीलतरंगिण्यां द्रौपदीकथा समाप्ता ॥ श्रीरस्तु ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पारदारिकस्य गरीयसोऽपि लघीयस्त्वमाह—

॥ मूलम् ॥—अमरनरासुरविसरिस–पोरसचरिउवि पररमणीरसिउ ॥ विसमदसं संपत्तो । लंकाहिवइवि रंकुव्व ॥ ६५ ॥ व्याख्या—अमरनराऽसुरविसदृशपौरुषचरितोऽपि पररमणीरसिकः परस्त्रीलंपटो लंकाधिपतिरपि रावणोऽपि रंक इव भिक्षुरिव विषमदशां मरणावस्थां संप्राप्तः, श्रीरावणः सीतापहारेण रामलक्ष्मणसंग्रामे बिभीषणादिबंधुवर्गं वियुज्य तादृग्जगज्जयार्जितोर्जस्विसाम्राज्यलक्ष्मीपरिभ्रष्टो रंक इव कृतांताऽतिथितां प्राप्तः, इति संक्षेपार्थः, विस्तरार्थस्तु पुरोवक्ष्यमाणश्रीसीतामहासतीचरित्राद् ज्ञेयः. आस्तां दुर्गतिर्दुर्गतिभवं दुःखं, शीलभ्रंशाद्दुर्यशःप्रसरस्यापि अविश्रांततामाह—

॥ मूलम् ॥—नेउरपंडियदत्त–दुहियापमुहाण अज्जवि जयंमि ॥ असइत्तिघोसघंटा–टंकारो विरमइ न तारो ॥ ६६ ॥ व्याख्या—नूपुरपंडितादत्तदुहितृप्रमुखाणामसतीनां तारो दीप्तोऽसतीत्वघोषाघंटाटंकारोऽद्यापि जगति न विरमति, अपरो हि घंटास्वरोऽतितरां मेदुरोऽपि क्षणमात्रेण मंदायते, असौ तु दौःशील्यघंटाघोषोऽद्यापि शास्त्रेषु कोविदैरुद्घुष्यत इत्य-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

क्षरार्थः, भावार्थस्तु कथानकान्यामवसेयः, तत्रादौ नूपुरपंडितोदाहरणं, तथाहि—

अस्ति राजगृहं नाम । पुरं यत्रोच्चसद्मसु ॥ नक्षत्राणि जिघृक्षंति । मुग्धा मौक्तिकलोभतः ॥ १ ॥ सुवर्णकारस्तत्रास्ति । देवदत्ताभिधः सुधीः ॥ यः कलावान् सदा चक्रे । सुवर्णं श्रवणोचितं ॥ २ ॥ देवदिन्नस्तदीयांग–जन्मा यन्मानसं गुणैः ॥ राजहंसैरिवाश्रायि । विवेकपद्मचंचुभिः ॥ ३ ॥ तज्जाया दुर्गिलानाम्ना–ऽनर्गलस्पर्द्धयेव या ॥ रूपसौभाग्यशृंगार–विकारैराश्रितातरां ॥४॥ मदयंती मनो यूनां । सरागैर्नेत्रविभ्रमैः ॥ सा नद्यां स्नातुमन्येद्यु–र्जगाम मदनोन्मदा ॥ ५ ॥ विभूषास्फालितादित्य–तेजोद्विगुणितद्युविः ॥ अलंचकार सा सिंधु–तीरं लक्ष्मीरिवाऽपरा ॥६॥ संत्यक्तकंचुका मुक्त–केशपाशा रयादसौ ॥ सरित्तितीर्षयेवाऽऽपा–दात्तकुंभा कुचद्वलात् ॥ ७ ॥ प्रत्युद्गतेव वीचिभि–श्चंचलत्वसनाभिभिः ॥ प्रविवेश महानद्यां । सा प्रसारितदोर्द्वया ॥ ८ ॥ बाहुपक्षद्वयोत्क्षेपं । कुर्वंती गतिमंथरा ॥ ततार राजहंसीव । संचरंती तटात्तटं ॥ ९ ॥ तरंगभ्रूभ्रसर्वांगं । तरंत्याः सलिलोत्तरं ॥ शैवालवल्लरीवास्याः । केशपाशो व्यराजत ॥ १० ॥ सूक्ष्मांशुवस्त्रां सुस्पष्ट–सर्वांगावयवामिमां ॥ निरीक्ष्य

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नागरः कश्चि–दुःशीलः क्रोन्नतोऽपठत् ॥ ११ ॥ नदी पृच्छति सुस्नातं । तथामी पादपास्तव ॥ अहं च प्रणतः पाद–पद्मयोस्तरलेक्षणे ॥ १२ ॥

पपाठ सापि स्वस्त्यस्तु । नद्यै नंदंतु च द्रुमाः ॥ मनीषितं करिष्यामि । सुस्नातप्रश्नकारिणः ॥ १३ ॥ क्षणं तद्वचसा काम–माङ्गयैव मनोभुवः ॥ सांऽनंदरसाऽपूर्णः । स निश्चेष्टइवाऽभवत् ॥ १४ ॥ तरोरूर्ध्वदृशः सोऽथ । फलपातार्थिनोऽन्नकान् ॥ फलपातेन संतोष्य । केयमित्यनुयुंक्तवान् ॥ १५ ॥ तेऽप्याहुर्देवदत्ताह्व–स्वर्णकारवधूरसौ ॥ देवदिन्नप्रिया गेह–मितश्चास्या दृशोऽतिथिः ॥ १६ ॥ क्षणेन सापि पर्याप्य । जलकेलिं निरर्गला ॥ योगिनीव तमेकाग्रं । ध्यायंती गृहमासदत् ॥ १७ ॥ युवापि तस्याः शृंगार–मंगारमिव मानसे ॥ प्रविष्टं संततं ध्यायन् । न जातु रतिमाप्तवान् ॥ १८ ॥ प्रदोषार्चिर्व तौ रक्तौ । वियोगात्तौ परस्परं ॥ रथांगाविव दुःखेन । चिरं कालमतीयतुः ॥ १९ ॥ स नागरोऽन्यदा कांचि–त्कुटिलां कुलदेवतां ॥ तापसीं नृशमन्यर्च्य । प्राह्णेाद्दुर्गिलांप्रति ॥ २० ॥ सापि ज्ञात्वा तयोः पूर्वा–ऽनुरागं संगमं पुनः ॥ अभ्युपेत्य ययौ स्निग्धा–दंत्रेन स्वर्णकृद्गृहं ॥ २१ ॥ अथो ददानां तां वी-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दृश्य । स्याढ्यां तिलकमंजरीं ॥ स्वर्णकारवधूं प्राख्य–दितिमायाविनी रहः ॥ २३ ॥ स्नांती तेन यदादि त्वं । दृष्टा यूना जलांतरे ॥ तदादि त्वद्गुणासक्तो–ऽन्यस्त्रीमपि नवेत्ति सः ॥२३॥ स्निग्धा तस्मिन् विदग्धा सा । स्वर्णकारवधूरपि ॥ आकारं गोपयंत्याह । खरं पाखंडिनीमथ ॥ २४ ॥ आः कुशीले कुलीनां मां । सदोषां कर्तुमर्हसि ॥ बभ्रे वेध्यमिवाऽवैहि । दुःकरं ते वचो मयि ॥ २५ ॥ दुष्टे न ज्ञवितासीति । जल्पंती कृतकक्रुधा ॥ निर्गलंत्या ददौ तस्याः । पृष्टे हस्तं सकज्जलं ॥ २६ ॥

तदाशयाऽनभिज्ञा सा । तं युवानमदोऽब्रवीत् ॥ वृथा कुलीनां तां स्वस्मि–न्नज्ञासीर-नुरागिणीं ॥ २७ ॥ अमोघवचनां मोघां । मां मा कार्षीस्तु सांप्रतं ॥ सुविज्ञान्यपि किं कु-र्या–त्पाषाणे मणिकारकः ॥ २८ ॥ किंच सा मम निर्यात्याः । कज्जलांकितपाणिना ॥ चपे-टां प्रददौ पृष्टे–ऽपराधिन्या इव स्फुटं ॥ २९ ॥ नक्तंवेति दर्शयामास । पृष्टमुद्घाट्य तापसी ॥ तत्र पंचांगुलिन्यासं । दृष्ट्वा यूनापि तर्कितं ॥ ३० ॥ संकेतं कृष्णपंचम्यां । विदग्धा नून-माह मे ॥ धूर्त्तानां चरितं गुप्त–मपि धूर्त्ता विदंति वा ॥ ३१ ॥ परं न ज्ञापितं स्थानं । सं-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

गंतव्यं मया क्व तत् ॥ ध्यात्वेति पुनराहस्म । तापसीं धूर्त्तनागरः ॥ ३२ ॥ अवश्यं मयि र-
क्तैव । विद्यते सा सुलोचना ॥ नूनं कारणतः कस्मा–दपि निर्भर्त्सिता तदा ॥ ३३ ॥ तदेक-
दा पुनस्तत्र । गंतुमर्हसि मद्गिरा ॥ उपक्रमेण गृह्यंते । दुर्गाण्यपि न सा किमु ॥ ३४ ॥ सा-
ऽप्यूचे सा सतीमन्या । नामापि सहते न ते ॥ रुमाया इव माणिक्यं । दुर्लभं तत ईप्सितं
॥ ३५ ॥ तथापि चेत्तवाशेयं । रत्नमालेव मालिकात् ॥ मत्तोऽपि सिद्धिमायाति । पुनरेषा व्र-
जामि तत् ॥ ३६ ॥ इत्युदित्वा गता भूयो । दुर्गिलामाह सस्मितं ॥ सुभ्रु तं तरुणं रक्तं ।
विश्वस्तं माऽपमानय ॥ ३७ ॥ स्थानजिज्ञासया भूयः । प्रहितेति विमृश्य सा ॥ रोषादिवा-
ऽशोकवनी–द्वारात्तां निरवासयत् ॥ ३८ ॥ विलक्षाऽवाङ्मुखी सापि । द्रुतं यूने तदब्रवीत्
॥ सोऽपि तत्संगमस्थानं । ज्ञात्वा चित्ते मुदं दधौ ॥ ३९ ॥ तामूचे च विनिह्नुत्य । स्वेंगितं
नागराग्रणीः ॥ मत्कृते सोढमेताव–त्त्वया वाच्या न सा पुनः ॥ ४० ॥ अथासौ कृष्णपंच-
म्या–मशोकवनिकांतरे ॥ जगाम सापि पश्यंती । वर्त्म दूराद्ददर्श तं ॥ ४१ ॥ पायं पायं मि-
थः प्रेमा–मृतं नेत्रपुटैरिमौ ॥ आश्लिष्यतामुरःपीडं । तरंगाविव वेगतः ॥ ४२ ॥ चिरदर्शन-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

जस्नेह–वार्त्तान्नोगसुधाश्रयौ ॥ अतिचक्रामलुर्याम–छयौ तौ घटिकामिव ॥ ४३ ॥ बाहूपधा-
नयोः क्रीडा–श्रांतयोस्तत्क्षणात्तयोः ॥ अन्नूतां मुद्रिते नेत्रे । स्वकर्मत्रसिते इव ॥४४॥ देवद-
त्तस्तदाऽशोक–वनिकां कायचिंतया ॥ प्रगतो विटमैक्षिष्ट । शयानं स्नुषया समं ॥ ४५ ॥
निश्चेतुं विट एवाय–मिति स स्थविरो डुनं ॥ दृष्ट्वा सुप्तं सुतं गेहे । दध्याविति हृदंतरे
॥ ४६ ॥ असतीत्वकथां वध्वाः । प्रत्येष्यति न मे सुतः ॥ इत्यादाय पदात्तस्या । नूपुरं श्व-
सुरोऽगमत् ॥ ४७ ॥ लाघवादपि तेनात्तं । ज्ञात्वा प्राबुद्ध दुर्गिला ॥ निद्रा कुतस्त्या नीतेव ।
निर्नरा वद कामिनां ॥ ४८ ॥ सत्वरं जारमुत्थाप्य । बद्ध्वा सापि पुंश्चली ॥ दृष्टौ स्तः श्व-
सुरेणावां । कुर्याः साहाय्यमाशु मे ॥ ४९ ॥ तदंगीकृत्य संवीतो–त्तरीयः स गृहं ययौ ॥
गाढमालिंग्य सुष्वाप । सापि पत्युरथांतिके ॥ ५० ॥ पतिं जागरयामास । ताम्यंतीवाथ पुं-
श्चली ॥ स्वामिन्नत्रास्मि घर्मार्त्ता । न निद्राद्य समेति मे ॥ ५१ ॥ तदशोकवनीमेहि । वा-
युप्रसरशीतलां ॥ इत्युत्थाय गतो देव–दिन्नोऽपि सरलाशयः ॥ ५२ ॥ तत्रापि तत्क्षणं निद्रां ।
प्रपेदे स्वर्णकृत्सुतः ॥ पुण्यश्रीरिव निद्रा हि । सुलभा सरलात्मनां ॥ ५३ ॥ सापि सर्वांग-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मालिंग्य । नटीवत् शयिता पतिं ॥ कुतो हि निश्च क्षुद्राणां । लक्ष्मीरिव दरिद्रिणा ॥ ५४ ॥ धूर्त्ताश्च पतिमाहस्म । कः क्रमोऽयं नवत्कुले ॥ श्वसुरो यन्नयानाया । वध्वा हरति नूपुरं ॥ ॥ ५५ ॥ धिग्मेऽनावृतगात्रायाः । कथं ते निस्त्रपः पिता ॥ वामपादादुपादाय । नूपुरं सहसा गतः ॥ ५६ ॥ देवदिन्नोऽवदन्नेवं । मा ताम्यः सुप्यतां क्षणं ॥ निर्न्नर्त्स्यं पितरं प्रात—र्दापयिष्यामि नूपुरं ॥ ५७ ॥

सोचे मूर्ख न जानासि । स वक्ता प्रातरन्यथा ॥ नृपपत्यादिना दृष्टा । मयेयं यद्वधूरिति ॥ ५८ ॥ आलस्येन तवानेन । प्राणांतो मे नविष्यति ॥ तक्त्वा सांप्रतं वृद्ध—त्रिय नूपुरमाहर ॥ ५९ ॥ पतिः प्राह प्रिये मास्म । शंकिष्टाः संशयो न मे ॥ तद् दृष्टव्यं यथा प्रात—स्तं वक्ष्यामि गलन्मतिं ॥ ६० ॥ मां त्वं पितृमुखं वीक्ष्या—ऽन्यथा संन्नावयिष्यसि ॥ धिगस्तु जीवितं मे त—दित्युदश्रुमुखीं प्रियां ॥ ६१ ॥ कलंकन्नीरुकां ज्ञात्वा । स्वप्रतीत्यधिरोपकान् ॥ शपथान् शतशश्चक्रे । स्त्रीवशाः किं न कुर्वते ॥ ६२ ॥ सक्रोधं देवदिन्नोऽपि । प्रातः पितरमब्रवीत् ॥ नूपुराकर्षणं वध्वाः । किमकार्षीस्त्रपाकरं ॥ ६३ ॥ स्थविरोऽप्याह दुःशीला

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

। वधूरुपवने निशि ॥ दृष्ट्वान्यपुंसा सुप्तेति । प्रतीत्यै तदिदं हृतं ॥ ६४ ॥ जगाद पुत्रस्तत्राहं । सुप्तोऽन्नूवं न चापरः ॥ कुर्वताऽनुचितं तात—ज्ञयता लज्जितः पुनः ॥ ६५ ॥ मंजीरमर्प्यतामस्या । वृद्धत्वं हि यदीदृशं ॥ त्वयात्तं मम सुप्तस्य । तदाऽहौ तु सती ध्रुवं ॥ ६६ ॥ वृद्धः प्राह यदामुष्या । नूपुरं जगृहे मया ॥ नत्वेत्य गृहमागत्य । नवान् सुप्तस्तदेक्षितः ॥ ६७ ॥ वधूरूचे न तर्हीमं । दोषारोपमहं सहे ॥ स्वात्मानं शोधयिष्यामि । दैविकेनापि कर्मणा ॥ ॥ ६८ ॥ कलंको हि कुलीनत्व—मलीयानपि दूषयेत् ॥ जात्यरत्नमिवाऽनर्घ्यं । बिंदुरंतरगोन्नसः ॥ ६९ ॥ इहास्ति शोभनो यक्षो । जंघयोस्तस्य याम्यहं ॥ जंघांतर्यस्य नाऽशुद्धो । जातु यातुमपि क्रमः ॥ ७० ॥ सशंकेनाथ तातेन । निःशंकेन च सूनुना ॥ साहसैकनिधेस्तस्याः । प्रतिज्ञा प्रत्यपद्यत ॥ ७१ ॥ धौतपोतावृता स्नाता । बलिहस्ताथ दुर्गिला ॥ समक्षं सर्वलोकानां । यक्षमर्चयितुं ययौ ॥ ७२ ॥ मार्गेऽथ ग्रहिलीन्नूय । पूर्वसंकेततो विटः ॥ तत्फले द्रुमशाखायां । गोलांगूल इवाऽलगत् ॥ ७३ ॥ अहो ग्रहिल इत्येष—स्तद्बंधुन्निरपास्यत ॥ सापि स्नानादिकं न्नूयः । कृत्वा यक्षं व्यजिज्ञपत् ॥ ७४ ॥ मुक्त्वासुं ग्रहिलं यक्ष । गुरु-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दत्तं तथा पतिं ॥ स्पृष्टः कदाचिच्चेदन्यः । स प्रत्यक्षोऽस्ति देव ते ॥ ७५ ॥ एतद्द्वितयमुष्ट्रि-
त्वा । लग्नश्चेदपरो नरः ॥ मत्तनौ तन्महासत्याः । शुद्धिं देया दयानिधे ॥ ७६ ॥ यावता किं
करोमीति । यक्षश्चिंतापरोऽभवत् ॥ धूर्त्ता तज्जंघयोरंत–र्निरगात्तावदाशु सा ॥ ७७ ॥ तत्कालं
सकले लोके । शुद्धा शुद्धेति जल्पति ॥ चिक्किपुस्तत्फले पुष्प–मालां राजनियोगिनः ॥ ७८ ॥
ताड्यमानेषु तूर्येषु । परितोऽन्निजनैर्वृता ॥ हृष्टेन देवदत्तेन । सहिता स्वगृहं ययौ ॥ ७८ ॥
नूपुराकर्षणोद्भूता–द्यन्निस्तीर्णा कलंकतः ॥ तदा प्रभृति सा लोकै–रूचे नूपुरपंडिता ॥
॥ ७९ ॥ वध्वास्तेन चरित्रेण । विस्मयापन्नमानसः ॥ स्वर्णकृद्देवदत्तोऽभू–न्नष्टनिद्रः स योगि-
वत् ॥ ८० ॥ अपूर्वकरणारूढ–मिव निश्चदरिद्रिणं ॥ तं मत्वा भूपतिश्चक्रे । निजांतःपुररक्ष-
कं ॥ ८१ ॥ राज्ञी काचित्तदा मिथ–लुब्धोद्वाय पुनः पुनः ॥ जागरूकं तमालोक्य । व्याव-
र्त्तत मुहुर्मुहुः ॥ ८२ ॥ दक्षोऽथ स्वर्णकारोऽपि । तद्वृत्तांतबुभुत्सया ॥ कुर्वन् घुर्घुरारावं । सु-
प्तः कपटनिद्रया ॥ ८३ ॥ सापि चौरवदुद्वाय । क्षिप्तचक्षुरितस्ततः ॥ उच्चैर्गवाक्षमारूढा । नि-
त्यसंकेतमुद्रया ॥ ८५ ॥ तदधोन्नागवेष्टेन । भूभर्तुः पट्टहस्तिना ॥ करेणादाय सा राज्ञ्य–ऽ-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

परन्नूमावमुच्यत ॥ ८६ ॥ चिरेणागमनक्रोधा–ऽावेशादाघोरणस्तदा ॥ हस्तिशृंखलया पृष्टे ।
चेटीमिव जघान तां ॥ ८७ ॥ साप्याह कश्चिन्मुक्तोऽस्ति । यामिकोऽन्निनवोऽद्य नः ॥ स जा-
गरूक एवाऽस्था–त्तन्निया नाहमागता ॥ ८८ ॥ सांप्रतं क्षणमासाद्य । सुप्ते तस्मिन् दुरात्म-
नि ॥ आगतास्मि द्रुतं स्वामिं–स्तन्मुधा मयि मा कुप ॥ ८९ ॥ इत्थं हस्तिपकः कोप–पंकि-
लो बोधितस्तया ॥ स्वजायामिव तां राज–रामां रेमे स्मरातुरः ॥ ९० ॥ रजन्याः पश्चिमे
यामे । तथैव नृपहस्तिना ॥ मुक्ता वातायने पीन–साहसा स्वास्पदं ययौ ॥ ९१ ॥ तद्वी-
क्ष्य स्वर्णकारोऽपि । दध्यावध्यामलाशयः ॥ स्त्रीवृत्तं कः खलु ज्ञातुं । घनगर्जमिव क्षमः ॥
॥ ९२ ॥ यद्येवं राजयोषाणा–मपि शीलविजृंभितं ॥ को नाम विस्मयस्तार्हि । सामान्यज-
नयोषितां ॥ ९३ ॥ या नित्यं निजगेहस्य । व्यापारविनियंत्रिताः ॥ संचरंतितरां स्वैरं । ता-
सां शीलं कियच्चिरं ॥ ९४ ॥ विमृश्येति स्नुषादोषा–ऽमर्षध्यानं विधूय सः ॥ सुष्वाप निर्भरं
मुक्त–महाभार इव श्रमात् ॥ ९५ ॥ निस्तंद्रे निद्रिते भानू–दयेऽप्यस्मिन्नऽजागृति ॥ यथा-
स्थितं तमाचख्यु–र्भूभुजे यामिकाः पुनः ॥ ९६ ॥ न हि निर्हेतुकोऽकस्मा–त्स्वापस्तस्येति

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नूपतिः ॥ विचार्याह यदा बुद्ध्ये—त्स प्रेष्योऽत्र तदा सुतं ॥ ९७ ॥ चिरं संपिंडितमिव । नि-
शासुखमुपेयिवान् ॥ स्वर्णकारोऽनवद्यिन्नं । सप्तरात्रमशेत सः ॥ ९८ ॥ ततो जागरितो द्वी-
पां—तरादिव समागतः ॥ नीतश्चेटैः पुरो राज्ञ—स्तेनाप्येवमपृच्छयत ॥ ९९ ॥ किं सुप्तश्चिर-
रात्राय । सप्तरात्रं कलाद नोः ॥ आदायाऽन्नयमेषोऽपि । तत्सर्वं स्पष्टमब्रवीत् ॥ १०० ॥ ज्ञा-
त्वा तद्दंतिनो वृत्तं । पत्न्या हस्तिपकस्य च ॥ विससर्ज ससत्कारं । स्वर्णकारं नरेश्वरः ॥१॥
विज्ञातुं ललनां स्वीयां । पुंश्चलीमथ नूपतिः ॥ किलिंचहस्तिनं प्रौढं । विज्ञानिन्निरकारयत्
॥ २ ॥ अथैष पुनराह्वाय्य । सर्वाः शुश्रूंतयोषितः ॥ ससंभ्रम इवोवाच । गूढाकारो नराधिपः
॥ ३ ॥ दुःस्वप्नोऽद्य मया दृष्टः । किलिंचमयवारणः ॥ युष्मान्निर्गतवस्त्रान्नि—रारोढव्यः पुरो
मम ॥ ४ ॥ तच्चक्रुः प्रेक्षमाणस्य । राज्ञोंतःपुरनायकाः ॥ सैका सकंपमाहस्म । स्वामिन्न-
स्माद्विन्नेम्यहं ॥ ५ ॥ लीलोत्पलेन सामर्ष—स्ताडयामास तां नृपः ॥ ब्रह्ममूर्ध्नं नाटयंती ।
सा पपात क्षितौ क्षणात् ॥ ६ ॥ तामेव कुलटां बुद्ध्या । निश्चिकाय ततो नृपः ॥ पृष्टे च
शृंखलाघातं । दृष्ट्वा सस्मितमाख्यत ॥ ७ ॥ रमसे मत्तनागेन । कृत्रिमेन्नाद्विन्नेपि च ॥ शृं-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

खलाघाततो मोदं । यासि मूर्खो तथोत्पलात् ॥ ८ ॥ वैन्नारन्नूघरे गत्वा । कोपसंन्नारन्नाग् नृपः ॥ पत्नीमाकारयत्तं च । हस्तिनं सनिषादिनं ॥ ९ ॥

गजे तस्मिन्नथारोह्य । राज्ञीं हस्तिपकान्वितां ॥ आदिदेश विशामीशो । भ्रूकुटीन्नीषणाननः ॥ १० ॥ शैलाग्रशृंगमारुह्य । ऊंपापातो वितन्यतां ॥ यद्युष्माकं निपातेन । त्रिवर्गी सफलास्तु मे ॥ ११ ॥ गजाजीवो गजाधीशं । नीत्वा पर्वतमूर्द्धनि ॥ ऊर्ध्वीकृतैकचरणं । त्रिपद्याऽस्थापयत्क्षितौ ॥ १२ ॥ हाहाकारपरा लोकाः । प्रोचुः स्वामिन्नमुं पशुं ॥ आदेशकारिणं रक्ष । कुंजरं राजकुंजर ॥ १३ ॥ अवमन्य नृपे कोपा–त्पातयेत्याशु जल्पति ॥ ह्रान्यां पन्नयां द्विपं हस्ति–पको ऽुतमधारयत् ॥ १४ ॥ न वध्योऽयं गजो देव । पूत्कुर्वाणेऽखिले जने ॥ सतूष्णीके नृपे सोऽथ । गजमेकांह्रिणा दधौ ॥ १५ ॥ तन्मुधामारणं हस्तिरत्नस्य दृष्टुमक्षमा ॥ भुजानुदंच्य न्नूपालं । सकष्टं जनताऽवदत् ॥ १६ ॥ देवायं ऽुर्लभ्नः सर्व–लक्षणश्च सुशिक्षितः ॥ नृपवाह्यस्तेदेतस्य । मारणं युज्यते न हि ॥ १७ ॥ स्वाधीनोऽपि पराधीनो । योग्याऽयोग्यविधौ प्रभुः ॥ तत्प्रसीद दयासार । रक्ष रत्नं हि यत्नतः ॥ १८ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तदादृत्य नृपोऽवादी–दृदतैनं गिरा मम ॥ निवर्त्तयते शैलाग्रा–द्येनामुं वारणोत्तमं ॥ १९ ॥ लोकाः प्रोचैस्तदा प्रोचु–राधोरणधुरीण नोः॥ निवर्त्तय नृपादेशा–दजमेनमितो गिरेः ॥२०॥ सोऽप्युवाच गिरेरेनं । क्रमेण भुवमानये ॥ आवयोरन्नयं नूपः । सर्वथा प्रददाति चेत् ॥२१॥ प्रोक्तः प्रधानैर्नृपाल–स्तयोरन्नयमन्यधात् ॥ शनैःशनैर्गजं सोऽपि । मेदिन्यामुदतारयत् ॥ ॥ २२ ॥ मद्देशो मुच्यतां शीघ्र–मित्युक्तो नूभुजा रयात् ॥ उत्तीर्य हस्तिनो राज्ञी–महामात्रौ पलायितौ ॥ २३ ॥ संध्यायां कंचनग्रामं । प्राप्तौ श्रांतौ महाध्वना ॥ शून्ये देवकुले धन्यं–मन्यौ सुप्तावुन्नावपि ॥ २४ ॥ चौरस्त्वेकस्तदा ग्रामा–च्चौर्यं कृत्वा पलाय्य च ॥ प्रविष्टो देवकुलके । तत्रैव रजनीन्नरे ॥ २५ ॥ तत्र प्रविष्टं तं ज्ञात्वा । ग्रहीष्यामः प्रगे ध्रुवं ॥ इति देवकुलं ग्रामा–ऽरक्षकाः पर्यवेष्टयन् ॥ २६ ॥ महांधकारे चौरोऽपि । तत्र सर्वत्र पर्यटन् ॥ सुप्तावन्नूतां तौ यत्र । तं प्रदेशमुपेयिवान् ॥ २७ ॥ निषादी निर्न्नरं सुप्तो । न तत्स्पृष्टोऽप्यजागरीत् ॥ ईषत्करेण स्पृष्टापि । जजागार नृपांगना ॥ २८ ॥ तेन वश्यौषधेनेव। स्पृष्टा मंदमसौ क्षणात् ॥ अनुरक्ताऽवदन्मंदं । निशीथे कासि नऽ नोः ॥ २९ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सोऽपि मंदमनापिष्ट । नष्टेऽहं तस्करोऽधुना ॥ नश्यन्नारक्षकेऽन्योऽत्रा-ऽविशं प्राणरि-
रक्षया ॥ ३० ॥ सानुरागा कुराचारा । शनैश्चौरमवोचत ॥ रक्षाम्यहमवश्यं त्वां । विधत्से
चेन्ममेप्सितं ॥ ३१ ॥ चौरोऽप्याह मया सुभ्रु । स्वर्णं प्राप्तं सुगंधि च ॥ आजन्मजीवितेशा-
सि । मम त्वं प्राणरक्षणात् ॥ ३२ ॥ परं ब्रूहि कया युक्त्या । रक्षिष्यसि शुभ्राानने ॥ आ-
श्वासय क्षणं चेतो । भाग्यापन्नासि मे यतः ॥ ३३ ॥ सा प्राह प्रातरारक्ष-पुरुषेष्वागतेष्वहं
॥ वक्ष्ये त्वामेव भर्त्तार-मेवमस्त्विति सोऽब्रवीत् ॥ ३४ ॥ प्राविशन् सायुधाः प्रातः । कृत-
भृकुटयो भटाः ॥ पप्रच्छुस्तेऽपि कश्चौरो । युष्मास्विति ससंभ्रमं ॥ ३५ ॥ मूर्त्ता मायेव सा
दुष्टा । ग्रामीणपुरुषान्प्रति ॥ चौरमुद्दिश्य सा प्राह । ममायमिति वल्लभः ॥ ३६ ॥ ग्रामां-
तरे व्रजंतौ नौ । दंपती दिवसात्यये ॥ अस्मिन् देवालयेऽवास्त्वः । श्रमाक्रांताविमां निशां ॥
॥ ३७ ॥ तेऽपि संज्ञावयामासुः । संभूयेति परस्परं ॥ लुंटाकवृत्तेश्चौरस्य । कुतः स्त्रीरत्नमी-
दृशं ॥ ३८ ॥ ईदृशी वल्लभा यस्य । साक्षाल्लक्ष्मीरिवोत्तमा ॥ तस्या भर्त्ता भवेच्चौर । इ-
ति याति न संगतिं ॥ ३९ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अयमेव परं चौर । इति हस्तिपकस्य ते ॥ शूलाधिरोपणं चक्रु–र्दोषमारोप्य तत्क्षणं ॥ ॥ ४० ॥ शूलाप्रोतः पथा यं यं । संचरतं स प्रैक्षत ॥ तृषार्त्तो दीनवाक् पातुं । तं तं नीर- मयाचत ॥ ४१ ॥ न कोऽपि पाययामास । तस्य भूपभयात्पयः ॥ इतश्च जिनदासाख्यः । श्राद्धस्तेनाध्वनाऽगमत् ॥ ४२ ॥ याचमानं जलं चौरं । श्रावकश्चैवमब्रवीत् ॥ करोषि मद्वच- श्चेत्त–दुदन्यां ते हराम्यहं ॥ ४३ ॥ यावद्वार्यानये तावं–न्नमोऽर्हद्भ्य इति स्मर ॥ मेंगोऽपि घोषयामास । तत्पदं नीरवांछया ॥४४॥ राजानुज्ञामुपादाय । श्राद्धोऽपि जलमाहरत् ॥ मुदा पुण्योपकाराय । यतंते तादृशा यतः ॥ ४५ ॥ निषाद्यपि जलं दृष्ट्वा–ऽऽनीतमाश्वास्य तत्क्ष- णं ॥ नमोऽर्हद्भ्य इति प्रोच्चैः । पठन् प्राणैरमुच्यत ॥ ४६ ॥ अज्ञातधर्मतत्वोऽपि । नम- स्कारप्रभावतः ॥ अकामनिर्जरायोगा–दंतरेषु सुरोऽभवत् ॥ ४७ ॥ पुंश्चली सापि चौरेण । व्रजंती पथि सोन्मदा ॥ प्राप कूलंकषां कांचि–दात्मानमिव कुस्थितिं ॥ ४८ ॥ चौरोऽप्याह प्रिये वस्त्रा–लंकारैस्त्वां समन्वितां ॥ पारं नेतुं न शक्नोऽस्मि । तटिन्या एकवेलया ॥ ४९ ॥ तदर्पय मम स्वीयं । वस्त्रालंकरणादिकं ॥ येनेदं परतो धृत्वा । नयामि त्वां ततः सुखं ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ ५० ॥ अहं तु यावदायामि । तावन्निर्नीकमानसा ॥ तिरोभव शरस्तंबे । समेष्याम्यचिरादहं ॥ ५१ ॥

किं शंकसे निजे पृष्टे । त्वामारोप्य गरुत्मवत् ॥ एष आगत्य नेतास्मि । प्राणेश्वरि परं तटं ॥ ५२ ॥ सापि दत्वाऽखिलं तस्मै । स्वयं शरवणे स्थिता ॥ महापराधतो दैवे—नेव सर्वस्वदंडिता ॥ ५३ ॥ तस्करोऽपि कृणान्नया । गत्वा पारमतर्कयत् ॥ ममापि खड्गपायाय । या तथाऽघातयत्पतिं ॥ ५४ ॥ ध्यात्वेति पश्चाद्वीक्ष्य । स पक्षीवोदडीयत ॥ धूर्ता हि साधितस्वार्थाः । परापेक्षां न कुर्वते ॥ ५५ ॥ नग्ना सा गाढनग्नाशा । मुषित्वा यांतं वीक्ष्य तं ॥ विहस्ता हस्तमुत्क्षिप्य । पूत्कार चलेक्षणा ॥ ५५ ॥ किं मामभ्रादिव भ्रष्टां । विहाय व्रजतो हहा ॥ कृतघ्न विघ्नं निघ्नंतु । कथं ते पथि देवताः ॥ ५६ ॥ चौरः प्राह हताशे त्वां । नग्नामेकाकिनीं वने ॥ विन्नेमि नीमामालोक्य । तदुराशे कृतं त्वया ॥ ५७ ॥ वदन्निति मृगोत्पात—मुत्पतन्नश्यतिस्म सः ॥ दुष्टा सेतस्ततो भ्रष्टा । तस्थौ दीनतमानना ॥ ५८ ॥ इतो देवत्वमापन्नो । जीवो हंस्तिपकस्य सः ॥ अवधिज्ञानतोऽशंकी—त्तथास्थां स्वैरिणीं वने ॥५९॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्राग्जन्मगृहमेधिन्या–स्तस्याः संबोधनेच्छया ॥ मुखात्तमांसखंडस्य । गोमायो रूपमादधे ॥ ॥ ६१ ॥ मांसपेसीं मुखात्त्यक्त्वा । शृगालस्तद्दृशोः पुरः ॥ सरित्तीरगतं मीनं । डुतं नोक्तु-मधावत ॥ ६२ ॥ मीनो नदीजले नूयः । प्रविवेश क्षणादपि ॥ तन्मांसं तु शकुन्यात्तं । व्य-र्थं फेरुस्तु तस्थिवान् ॥ ६३ ॥ नग्नोचे मांसमुज्झित्वा । दुर्बुद्धे मीनमिच्छसि ॥ भ्रष्टो मांसाच्च मीनाच्च । किं शृगाल विलोकसे ॥ ६४ ॥ गोमायुराह नर्त्तारं । मुक्त्वोपपतिमादृता ॥ भ्रष्टा पत्युस्तथा जारा–न्नग्निके किमु वीक्षसे ॥ ६५ ॥ तत् श्रुत्वा नयकंप्राया–स्तस्याः स व्यंत-रेश्वरः ॥ दिव्यं स्वरूपमाधाय । जगाद द्युतिरंबरी ॥६५॥ सोऽहं हस्तिपकः पापे । यस्त्वया मारितस्तदा ॥ जैनधर्मप्रसादेन । देवत्वमिदमासदं ॥ ६७ ॥ तत्त्वं कृतापराधापि । मयका कृपयोच्यसे ॥ जिनधर्ममुपादत्स्व । प्राप्स्यपापव्यपोहकं ॥ ६८ ॥ तथेति प्रतिपन्नां ता–मुत्पा-व्य व्यंतरामरः ॥ प्रव्रज्यां ग्राहयामास । नीत्वा साध्वीपदांबुजे ॥ ६९ ॥ संप्राप्नुवत्याः शु-चिशीलरत्न–न्रंशं तथा नूपुरपंडितायाः ॥ अद्यापि तस्या असतीत्वनूतो । दुःकीर्त्तिनादो वि-रराम नैव ॥ ७० ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ इति श्रीरुद्रपल्लीयगच्छे श्रीसंघतिलकसूरिपट्टावतंसश्रीसोमतिलकसूरिविरचितायां श्री-
शीलतरंगिण्यां नूपुरपंडितायाः कथा समाप्ता, प्रसंगतो राजपत्नीमेंढकथा चोक्ता ॥ श्रीरस्तु ॥

अथ दत्तदुहितुरुदाहरणमुदाह्रियते, तथाहि—

ऊर्जस्वलश्रियां गेह–मास्ते जयपुरं पुरं ॥ यस्योच्चसद्मशृंगाणि । विश्रांत्यै स्युर्दिवौक-
सां ॥ १ ॥ राजा जयरथस्तत्र । धर्मसत्रं महारथः ॥ यत्खड्गपुष्करे लक्ष्मी–र्नित्यवासमशि-
श्रयत् ॥ २ ॥ मंत्री दत्तान्निधो यस्य । मत्या शून्यांतरेक्षणः ॥ स्वं जितं ज्ञापयन्नत्र । का-
ण एवाऽन्नवत्कविः ॥ ३ ॥ तस्यास्ति कन्या शृंगार–मंजरी मंजरीव या ॥ कामेशः कामु-
कालीनां । मनस्तल्लयमानयत् ॥ ४ ॥ साऽारूढयौवना पीन–स्तनशैलद्वयस्थितेः ॥ कामके-
सरिणः स्थाम्ना–ऽभ्रमयद्विश्वमानसं ॥ ५ ॥ सा तु पूर्वभवाचीर्ण–कर्मकालुष्यदूषिता ॥ ने-
जे गतींगिताकारै–रसतीपथपांथतां ॥ ६ ॥ तथाहि—तिर्यग्वलितया दृष्ट्या । गच्छंती पथि
वीक्षते ॥ अनालपंतमप्यालो–कयते परुषाक्षरं ॥ ७ ॥ चंचत्कांचनसन्नाय–घनाडंबरमंडना
॥ अनेकत्र स्थिरपदा । विद्युल्लेखेव सा बभौ ॥ ८ ॥ अन्यदोपवनक्रीडा–कौतुकी जयन्नूप-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तिः ॥ वातायनसमासीनां । नेत्रातिथ्यत्वमानयत् ॥ ९ ॥ तदानीमन्यचेतस्क–मिव ज्ञात्वा नराधिपं ॥ जघान मदनो निच्चं । श्व गीतवशं मृगं ॥ १० ॥ तद्दृशश्च विशामीशो । विस्मृत्यारामरम्यतां ॥ समियाय गृहं क्रीडा–शंकुता श्व पंजरं ॥ ११ ॥

अथाऽमात्यैरयाचिष्ट । राजा दत्तसुतां रयात् ॥ किं परापेक्षतां कुर्या–त्कोऽपि स्वरसबोधितः ॥ १२ ॥ प्रदत्तामथ दत्तेन । सुतामुद्वाह्य भूपतिः ॥ प्रमोदाऽद्वैततां भेजे । तत्वज्ञानीव निवृतिं ॥ १३ ॥ सा तु स्वभावलोलत्वा–द्विभ्रमैरथ भूपतिं ॥ उपाचरंती तं लीन–चित्तं धूर्त्ततयाऽकरोत् ॥ १४ ॥ कदाचिदुचिरारामे । क्रीडाशैले कदाचन ॥ कदाचित्सप्तभूगेहे । भेजे तां तद्दृशो नृपः ॥ १५ ॥ स्वछंदचरितां नाना–विलासविहितादरां ॥ स्मरातुरमना राजा । रामां रेमे रमामिव ॥ १६ ॥ तामथो मन्मथागारं । प्रासादे सप्तभूमिके ॥ व्यतिरिच्य सपत्नीभ्यः । स्थापयामास भूपतिः ॥ १७ ॥ उद्यमं चपलत्वेन । वक्तृत्वं मुखरत्वतः ॥ प्रेम स्थेमयुतं धाष्टर्या–दार्जवं चातिहासतः ॥ १८ ॥ इतस्ततो दृग्निपाता–त्सत्रपत्वं च भूधनः ॥ तस्यां संन्यावयामास । वातकीडुद्यमीमिव ॥ १९ ॥ युग्मं ॥ पतिवाञ्छन्यतस्तत्र । स्नानपा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नाऽज्ञनादिकाः ॥ क्रियाः समस्ताः कुर्वाणा । तस्थौ स्वैरं सुरीव सा ॥ २० ॥ इतश्च नगरे तस्मि–न्निनन्यपुत्रो धनंजयः ॥ संचचार स्मर इव । सौधाधस्तेन वर्त्मना ॥ २१ ॥ वीक्ष्य दत्तसुता काम–मूढा तं कामन्नासुरं ॥ पुष्पमालां गलेऽमुष्य । बाहुपाशमिवाऽक्षिपत् ॥२२॥ नयानावधि तत्सौधे । तन्नावङ्को धनंजयः ॥ सुरंगां खानयामास । प्रच्छन्नामाप्तपूरुषैः ॥२३॥ गतागतानि कुर्वाणा । राज्ञी तत्र स्मरातुरा ॥ कालं किंचिदतीयाय । सुखं स्वान्नीष्टकेलिभिः ॥ २४ ॥ वलमानोऽन्यदा राज–पट्टिकातो नराधिपः ॥ ददर्शोपवने राज्ञीं । क्रीडंतीं दत्तपुत्रिकां ॥ २५ ॥ ज्ञात्वा सापि विदग्धात्मा । गत्वाऽगारं सुरंगया ॥ तस्थौ वातायने दत्त–लोचना नृपतिंप्रति ॥ २६ ॥

समेति त्वरितं याव–त्सौधोपरि नरेश्वरः ॥ मुमुदे तामथो वीक्ष्य । प्रेम्णा संमुखचक्षुषीं ॥ २७ ॥ प्रेक्षणीयकृते सायं–तनस्यावसरेऽन्यदा ॥ गंधर्वा रचयामासुः । ससामंतनृपाग्रतः ॥ २८ ॥ तानमानलयग्राम–मूर्छनास्वनपेशलं ॥ गीतमाकर्णयामास । नृपो वादित्रसुंदरं ॥ ॥ २९ ॥ युग्मं ॥ तेषु सक्षोन्नमालोक्य । नृपो दत्तसुतां खलु ॥ विसृज्य प्रेक्षणं याव–त्सौ-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

धमारुह्य वीक्षते ॥ ३० ॥ घूर्णमानदृशं ताव–त्तल्पैकतलशायिनीं ॥ निशीथामिव तां वीक्ष्य । स्वशंकां समकोचयत् ॥ ३१ ॥ विशिष्यशंकया राजा । तथोपचरितस्तया ॥ आतिथ्यम-पि तथ्येन । यथा मेने तदीरितं ॥ ३२ ॥ सपौरजनसामंतो । वसंतसमयेऽन्यदा ॥ ययावुप-वने क्रीडां । कर्तुं सांतःपुरो नृपः ॥ ३३ ॥ कुसुमावचयेनाशु । श्रांतौ तावथ दंपती ॥ नक्तं सुषुपतुर्वल्लि–मंडपे क्वापि निर्भरं ॥ ३४ ॥ कालेनेव करालेन । दंदशूकेन तावता ॥ दष्टा रा-ज्ञी जजागार । पूत्कुर्वाणा क्षणादथ ॥ ३५ ॥ यावदारुन्नताह्वातुं । भूपतिर्मंत्रवादिनः ॥ पपा-त मूर्छिता ताव–द्राज्ञी गरलवेगतः ॥ ३६ ॥ प्रयुक्ता विषमोक्षाय । क्रिया गारुत्मिकैर्यकाः ॥ खलोपकृतिवत्तस्यां । तास्ता वैफल्यमासदन् ॥ ३७ ॥ विधूय धीरतां राजा । वल्गन्नाप्रेमवि-ह्वलः ॥ विललाप चिरं राज्यं । मन्वानो जीर्णतार्णवत् ॥ ३८ ॥ वारितोऽपि विशामीश–श्चि-तां चंदनदारुभिः ॥ चितां प्रवेष्टुकामोऽभू–ज्जायया सह यावता ॥ ३९ ॥ गच्छन्नंदीश्वरे ताव–त्खेचरो व्योमवर्त्मना ॥ विलोक्य जनतामेलं । तत्राऽकस्मादवातरत् ॥ ४० ॥ सर्पदष्टप्रियाप्रे-म–वशाद्विश्वानरे नृशं ॥ विशंतं भूपमाशंक्य । सकृपः खेचरोऽभ्यवत् ॥ ४१ ॥ निवार्य स-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

हसा तस्मा–त्साहसात्खेचरो नृपं ॥ चकार सज्ञां तज्ञायां । जलाञ्जोटेन सत्वरं ॥ ४२ ॥ र-
रंज राजा मुमुदे । जनता जगुरंगनाः ॥ नेदुर्मृदंगाश्च तदा । जातं हर्षमयं जगत् ॥ ४३ ॥
अकृत्रिमोपकर्त्तारं । सर्वकामगुणादरैः ॥ सन्मान्य खेचरं राजा । विससर्ज यथागतं ॥४४॥
निशामुवास तत्रैव । नूयस्तत्रागतो नृपः ॥ सापायमपि सेवंते । स्थानं मन्मथजीविनः ॥४५॥
इतश्च पूर्वसंकेता–त्तत्रैवागाऽनंजयः ॥ सुदूरमपि नो दूरं । यत्र लग्नं मनोंगिनां ॥ ४६ ॥
साऽप्येत्य तमथोवाच । किमिहं सुखमावयोः ॥ यावो देशांतरं कंचि–द्यावज्जागर्त्ति नो नृपः
॥ ४७ ॥ श्रेष्टिसूनुरुन्नाषिष्ट । मुग्धे नेयं विमर्शधीः ॥ कोऽलंनूष्णुर्भुजंगस्य । समुद्धर्तुं शि-
रोमणिं ॥ ४८ ॥ जीवत्यस्मिन्नराधीशे । यस्त्वामपि जिहीर्षति ॥ ज्वलिते करवालाग्नौ । स
खलु स्वं जुहूर्षति ॥ ४९ ॥ तदुक्तमन्युपेत्याथ । गता राज्ञी नृपांतिकं ॥ जिघांसुस्तं च नि-
स्त्रिंशा । सा निस्त्रिंशं करेऽकरोत् ॥ ५० ॥ खड्गं निःकोशमाधाय । यावद्व्यापारयत्यसौ ॥
समेत्य जगृहे पाणि–स्तावता श्रेष्टिसूनुना ॥ ५१ ॥ अचिंतयच्च येनेयं । पट्टराज्ञीपदे कृता ॥
यस्यां च व्यालदष्टायां । प्राणा अपि पणीकृताः ॥ ५२ ॥ तस्मिन्नपि महानागे । चेष्टते यदि

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ईदृशं ॥ तस्याः संज्ञाव्यते चित्तं । मयि स्वार्थिनि कीदृशं ॥ ५३ ॥ तदलं विषवल्लीव–दनयाऽनर्थकुद्वयया ॥ इयत्कालमनालोच्य । धिगात्मानमहारयं ॥ ५४ ॥ त एव केवलं धन्या । ये संसारं पलालवत् ॥ परित्यज्य फलं धर्म–माङ्क्षियंते तपोधनाः ॥ ५५ ॥ यदर्थं तप्यतेऽत्यर्थ–मनुत्तरसुरैरपि ॥ प्राप्तं तन्मानुष्यं मूढा । हारयंति मुधैव हा ॥ ५६ ॥ इत्यादिज्ञववैराग्य–भागी सर्वविरक्तधीः ॥ बुद्धतत्वतया ज्ञेजे । जैनीं दीक्षां धनंजयः ॥ ५७ ॥ गतः प्रातर्नरेशोऽपि । सदनं मदनैकहृत् ॥ चिराय पालयामास । राज्यं रज्यन्मनोरथः ॥ ५८ ॥ अन्यदा भूमिपालस्य । स्वास्थानीमधितस्थुषः ॥ समीयुर्वणिजो वाजि–व्रजविक्रयकारिणः ॥ ॥ ५९ ॥ तेषु सल्लक्षणं कंचि–त्तुंगमेकं तुरंगमं ॥ कुतूहलवशो राजा । पर्याणितमकारयत् ॥ ६० ॥ सबले निर्बले वापि । द्विपदेऽपि चतुष्पदे ॥ अपरीक्ष्य न कर्त्तव्यः । कार्यारोपो विपश्चिता ॥ ६१ ॥

इति वारयतामेव । सचिवानां नृपोत्तमः ॥ करेणाकृष्य वल्गां त–मारुरोह तुरंगमं ॥ ॥ ६२ ॥ अश्वोऽपि प्रथमं तास्ता । वीथिकाः प्रथयन्नपि ॥ वल्गया किंचिदाकृष्टः । संचचार

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

समीरवत् ॥ ६३ ॥ वदतां याति यातीति । यातो दृष्टेरगोचरः ॥ नृपोऽप्यचिंतयत्ताव–द्वनेऽहं पातितोऽमुना ॥ ६४ ॥ निर्विण्णश्च यथा ज्ञाप्यं । ज्ञवत्वेवं विकल्पयन् ॥ मुमोच शिथिलां वल्गां । स्थिरस्तस्थौ च शूकलः ॥ ६५ ॥ ज्ञात्वा कुशिक्षितं तस्मा–दवतीर्य नृपो भुवि ॥ क्षुत्तृषाबाधितोऽत्यर्थं–मरण्यानीमथाऽभ्रमत् ॥ ६६ ॥ प्रशांतश्वापदं याव–द्वनं याति पुरः पुरः ॥ तावन्मोहतमोव्यूह–तिरस्कारदिवाकरं ॥ ६७ ॥ तपःशोषितसर्वांगं । निर्ममं प्रतिमाजुषं ॥ मुनिं ददर्श नूर्मीशे । मूर्त्तं धर्ममिव स्थितं ॥ ६८ ॥ सुधास्नात इव प्रीतो । ववंदे नृपतिर्मुनिं ॥ प्रतिमां पारयित्वा च । महात्माशिषमब्रवीत् ॥ ६९ ॥ व्रतदानोपकर्त्तारं । तं मन्वानस्तपोधनः ॥ यथोचितमुपादिक्ष–दुपविश्य विशेषतः ॥ ७० ॥ राजन्नसारे संसारे । क्रूरे दुःखं निरंतरं ॥ अंतरेण जिनोपज्ञं । धर्मं त्राणं न किंचन ॥ ७१ ॥ इत्यादिदेशनाजात –वैराग्योऽथ विशांपतिः ॥ मन्वानस्तृणवज्ज्यं । दध्रे दीक्षामनोरथं ॥ ७२ ॥ ऊचे च ज्ञगवन् ज्ञोग–योग्येऽपि मधुरेऽपि च ॥ वयसि व्रतनिर्माणे । किं ते वैराग्यकारणं ॥ ७३ ॥ मुनिरूचे ज्ञवानेव । राजन् संयमहेतुकः ॥ कथमित्यनुयुक्तश्च । पुनराह महामुनिः ॥ ७४ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तदानीमहिदष्टायां । जायायां यज्जनाधिप ॥ ज्ञवता चेष्टितं प्रेम्णा । तत्राहं साक्षिज्ञावज्ञाक् ॥ ७५ ॥ चिरंतनघनस्नेह—वशात्तत्र समीयुषः ॥ कृतघ्नमिव संत्यज्य । ज्ञवंतं मम संगता ॥ ७६ ॥

किमिज्ञमावयोः सौख्य—मित्युदित्वा दुराशया ॥ पाणौ कृपाणमादाय । यावत्त्वांप्रत्यधावत ॥ ७७ ॥ तमालिंद्य रयात्ताव—दहमिज्ञमचिंतयं ॥ धिगिमां धिक् च कामेज्ञां । धिक् संसारविमंबनां ॥ ७८ ॥ संविग्नात्मा समुत्सृज्य । समग्रं गरलौघवत् ॥ दीक्षामादाय ज्ञूपाल । करोम्यात्मापनामहं ॥ ७९ ॥ श्रुत्वेति जातवैराग्यः । सैन्येन समुपेयुषा ॥ समं राजा समागज्ञ—त्पुरमुद्यत्पताककं ॥ ८० ॥ क्षीणार्णमिव मन्वानः । संसारं स रसापतिः ॥ विधाय पुत्रसाज्ञाज्यं । स्वयं दीक्षामुपाददे ॥ ८१ ॥ क्रमेण ज्ञातवृत्तांतैः । स्वजनैः पामरैश्च सा ॥ न्यक्कृता धिक्कृता दत्त—दुहिता दुःखिताऽज्ञवत् ॥ ८२ ॥ वृढं निकाचितं कृत्य—सृष्टं कर्म निबद्ध्य च ॥ जगामाधोगतिं नागा—क्रांतकैवर्त्तजालवत् ॥ ८३ ॥ तत ज्ञकृत्य तिर्यक्षू—त्पद्य पापमुपार्ज्य च ॥ शीलवैकल्यतो ज्ञीम—ज्ञवानंत्यं ज्ञ्रमिष्यति ॥ ८४ ॥ इज्ञं सतीज्ञावविपर्यये-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ण । निरंतरं क्लिष्टमुपार्ज्य कर्म ॥ बभ्राम सा दत्तसुता दुरंत–संसारपाथोनिधिमुग्रपापा ॥७५॥

॥ इति श्रीरुद्रपल्लीयगच्छे श्रीसंघतिलकसूरिपट्टावतंसश्रीसोमतिलकसूरिविरचितायां
श्रीशीलतरंगिण्यां दत्तदुहितृकथा समाप्ता ॥ श्रीरस्तु ॥

अथ पूर्वोक्तकथार्थमुपदेशरूपेण भावयन्नाह—

॥ मूलम् ॥—एवं सीलाराहण–विराहणाणं च सुक्कदुक्काइं ॥ इय जाणिय नो भव्वा। मा सिढिला होह सीलंमि ॥ ६७ ॥ व्याख्या–एवं पूर्वोक्तभंग्या शीलाराधनाविराधनयोश्च सुखदुःखानि कथितानि, शीलस्याराधने सुखं विराधने च दुःखमिति यथाक्रमं ज्ञेयं; इति ज्ञात्वा विमृश्य नो भव्याः शीले चतुर्थव्रतपालने मा शिथिला भवत ? शीलमेवाश्रियध्वमित्यर्थः।

शीलधारिणां नारीसंगोऽपि वर्जनीय इत्याह—

॥मूलम्॥—बंभव्वयधारीणं । नारीसंगो अणत्थपत्थारी ॥ मूसाणव मंजारी। इअ निसिद्धं च सुत्तेवि ॥ ६८ ॥ व्याख्या—ब्रह्मव्रतधारिणां शीलपालनबद्धकक्षाणां नारीसंगो, मूषकाणामिव मार्जारीसंगो अनर्थप्रस्तारी पापहेतुः, यथा मूषकाणां बिडालिका क्षयकारिणी भव-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वति, तथा स्त्रीसंगः शीलवतां शीलशरीरविघातकारित्वादनर्थपरंपराकरी. प्रामाण्यमाह— इति हि सूत्रेऽपि दशवैकालिकसूत्रेऽपि निषिद्धं वर्जितं, चकारः समुच्चयार्थः, तदेवाह—

॥ मूलम् ॥—विभूसा इत्थीसंसग्गो । पणीयं रसभोयणं ॥ नरस्सत्तगवेसिस्स । विसं तालउडं जह ॥ ६९ ॥ व्याख्या—आत्मगवेषिणस्तत्वज्ञस्य पुरुषस्येदं तालपुटं विषमेवेति संबंधः, किं तदित्याह—विभूषा मंडनं नटवस्त्राभरणादिभिः, यथा सोमनीतिः—नानृषिः कुरुते काव्यं । नाविष्णुः पृथिवीपतिः ॥ निस्पृहो नाधिकारी स्या—न्न कामी मंडनाऽप्रियः ॥ ॥ १ ॥ इति. स्त्रीसंसर्गो वनितादिभिः सहवासः, यदाहुः—संसर्गजं गुणमवाप्य हि पाटलाया—स्तोयं कपालशकलान्यपि वासयंति ॥ ज्ञानाधिकैरहरहः परिघृष्यमाणाः । प्रायेण मंदमतयोऽपि भवंति तद्वज्ञाः ॥ १ ॥ इति. प्रणीतः स्निग्धाहारः, सरसभोजनं विकृतिसेवनं, यदागमः—विगइ विगईसीलो आहारेइ अभिक्खणं ॥ अरइ अतवोकम्मे । पावसमणुत्ति वुच्चइ ॥ १ ॥ इति. यथा तालपुटं नाम विषं सद्यः प्राणापहारकं, तथेदमपि विभूषादिकं शीलजीवितापहारकत्वेन तादृग्विषोपमं ज्ञेयमिति गाथार्थः ॥ ६९ ॥ सिद्धांतनिदर्शनान्येवाह—

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ मूलम् ॥—जहा कुक्कडपोयस्स । निच्चं कुकलओ भयं ॥ एवं खु बंभयारिस्स । इत्थी-विग्गहओ भयं ॥ ७० ॥ व्याख्या—यथा कुर्कुटपोतस्य कुललाद्विडालाद्भित्यं भयं, यथा ग-लमासाद्य मार्जरः कुर्कुटबालकं निहंत्येव, एवममुना भंग्या खु इति निश्चयेन ब्रह्मचारिणः स्त्रीविग्रहाद्भयं, स्त्रीशरीरं तस्य मदनोन्मादं जनयतीत्यर्थः ॥ ७० ॥ आस्तां विभ्रमसारस्त्री-शरीरदर्शनस्य, चित्रगतस्यापि स्त्रीरूपस्य वर्जनीयतामाह—

॥ मूलम् ॥—चित्तभित्तिं न निज्झाए । नारिं वा समलंकिअं ॥ भक्खरंपिव दट्ठूणं । दि-ट्ठिं पडिसमाहरे ॥ ७१ ॥ व्याख्या—चित्रभित्तिं कुड्यालिखितानि चित्राणि न निध्यायेत् न पश्येत्, चित्ररूपकाणि हि दृष्टमात्राणि मनोहारित्वेन प्रमोदपोषकाणि, नारीं वा सुष्ठु अलं-कृतां विभूषितां न विलोकयेत्, ननु ' न शक्यं रूपमदृष्टुं । चक्षुर्गोचरमागतं ' इति चेन्न, भास्करं सूर्यमिव दृष्ट्वा दृष्टिं प्रतिसमाहरेत् व्यावर्त्तयेदिति भावः ॥ ७१ ॥ प्रसंगदोषपरिजि-हीर्षया स्त्रीनामापि निषेधयन्नाह—

॥ मूलम् ॥—हत्थपायपडिच्छिन्नं । कन्ननासविगप्पियं ॥ अवि वाससयं नारिं । बंभया-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

री विवज्जए ॥ ७२ ॥ व्याख्या—हस्तपादपरिच्छिन्नां छिन्नकरचरणां, कर्णनासाविकल्पितां छिन्नकर्णनासिकां अपि वर्षशतजराजीर्णामपि नारीं ब्रह्मचारी विवर्जयेत्, रूपवेषवर्षादिनिरपेक्षं स्त्रीत्यभिधापि परिहर्त्तव्येत्यर्थः ॥ ७२ ॥ ननु ज्ञाततत्वानां शीलधर्मवतां किमयमाग्रहोपदेश इत्याह—

॥ मूलम् ॥—विसमा विसयपिवासा । अणाइभवभावणाइ जीवाणं ॥ अइदुज्जेआणि अ । इंदियाणि तह चंचलं चित्तं ॥ ७३ ॥ थोवमसारं संतं । मोहणवल्लीउ महिलिआउवि ॥ इइ कहवि चलिअचित्तो । गावए एवमप्पाणं ॥ ७४ ॥ युग्मं ॥ व्याख्या—जीवानां प्राणिनामनादिभवभावनयाऽभ्यस्तत्वेन विषमा विषयपिपासा, दुस्तरा भोगतृष्णा, इति दुर्जेयानि चेंद्रियाणि, तथा चंचलं चित्तं चपलं मनइंद्रियं ॥ ७३ ॥ ननु सत्त्वेन तृष्णां निरुत्स्यंतीत्याह—थोवमिति स्तोकमप्यल्पमप्यसारं क्षणभंगुरं सत्त्वं चित्तघाष्टर्यं महिलाश्च स्त्रियो मोहनवल्लयः स्वभावादेव मोहोत्पादिकाः, यदुक्तं—नीयंगमाहिं सुपउ—हराहिं जपहिमंथरगईहिं ॥ महिलाहिं निण्णगाहिं । गिरिवरगरुआवि भिज्जंति ॥ १ ॥ इत्येवंप्रकारैश्चलितचित्तः प्रा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

णी कथमपि एवं पूर्वोक्तस्त्रीसंसर्गवर्जनज्ञंग्याऽऽत्मानं स्थापयेत्, शीलज्ञंगं न प्राप्नोतीत्यर्थः ॥ ७४ ॥ जीवस्यैव स्वयंप्रबोध्यतामाह—

॥ मूलम् ॥—रे जीव समइकप्पिय–निमेससुहलालसो कहं मूढ ॥ सासयसुहमसमतमं । हारयसि ससिसोयरं च जसं ॥ ७५ ॥ व्याख्या—रे जीव नोः स्वात्मन् स्वमतिकल्पितनिमेषसुखलालसश्चक्षुःस्पंदप्रमाणसुखलेशलंपटः सन् हे मूढ मूर्ख! असमतमं शाश्वतसुखं शीलशीलनलभ्यमनंतं मोक्षसुखं, शशिसोदरं च चंद्रनिर्मलं यशो हारयसि निर्गमयसि, यदुक्तं—दत्तस्तेन जगत्यकीर्त्तिपटहो गोत्रे मषीकूर्चक–श्चारित्रस्य जलांजलिर्गुणगणारामस्य दावानलः ॥ संकेतः सकलापदां शिवपुरद्वारे कपाटो दृढः । कामार्त्तस्त्यजति प्रन्नोदयन्निदाशस्त्रीं परस्त्रीं न यः ॥ १ ॥ इति गाथार्थः ॥ ७५ ॥ कामासक्तस्य दूषणान्याह—

॥ मूलम् ॥—कलिमलअरइअभुक्का–वाहीदाहाइं विविहअसुहाइं ॥ मरणंपि हु विरहासु । संपज्जइ कामतविआणं ॥ ७६ ॥ व्याख्या—कलिमललांपट्यात्तदप्राप्तौ चित्तक्षोन्नः, अरतिर्गाढं चित्तोद्वेगः, अबुभुक्षा तत्तच्चिंताव्याकुलितांतरत्वादरोचकत्वं, व्याधिर्ज्वरादिसंन्नवः,

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दाहस्तापोऽरेकः, आदिशब्दान्मूर्छाद्यसुखानि, न केवलमेतानि जायंते, मरणं प्राणत्यागोऽपि खुरवश्यं कामतप्तस्य संपद्यते, मरणांतां दशामपि प्राणी स्मरातुरतयाऽनुभवति. यदुक्तं— प्रथमे त्वभिलाषः स्याद् । द्वितीयेऽप्यर्थचिंतनं ॥ अनुस्मृतिस्तृतीये च । चतुर्थे गुणचिंतनं ॥ ॥ १ ॥ उद्वेगः पंचमो ज्ञेयो । विलापः षष्ठ उच्यते ॥ उन्मादः सप्तमो ज्ञेयो । भवेद्व्याधिरथाष्टमे ॥ २ ॥ नवमे जडता प्रोक्ता । दशमे मरणं भवेत् ॥ तथा च—सव्याधेः कृशता क्तस्य रुधिरं दृष्टस्य लालाश्रुतिः । सर्वं नैतदिहास्ति तत्कथमसौ पांथो वराको मृतः ॥ आः ज्ञातं मधुलंपटैर्मधुकरैराबद्धकोलाहलै—र्नूनं साहसिकेन चूतमुकुले दृष्टिः समारोपिता ॥ १ ॥ इति गाथार्थः ॥ ७६ ॥ पुनर्विषयिणां दुःखसंभारमाह—

॥ मूलम् ॥—विसईण दुक्खलक्खा । विसयविरत्ताणमसमसमसुक्खं ॥ जइ निउणं परिचिंतसि । ता तुम्हवि अणुभवो एसो ॥७७॥ व्याख्या—विषयिणां स्मरातुराणां दुःखलक्षाणि संपद्यंते, विषयविरक्तानां कामिनीसंगविमुखानां असमशमसौख्यमसमानोपशमसुखं मोक्षरूपं भवति, यदि निपुणं परिचिंतयसि, भो भव्यजीव यदि निपुणतया विचारयसि तदा

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तव स्वस्यापि एषोऽनुभवः, यतो विषयासक्तानां च दुःखविपाकोदयः प्रकट एव. यदुक्तं— तीरात्तीरमुपैति रौति करुणं चिंतां समालंबते । किंचिद्ध्यायति निश्चलेन मनसा योगीव मुक्तेक्षणः ॥ स्वां जायामवलोक्य कूजति पुनः कांतेति मुग्धः खगो । धन्यास्ते भुवि ये निवृत्तमदना धिग्दुःखिताः कामिनः ॥ १ ॥ इति गाथार्थः ॥ ७७ ॥ इदं विषयाशां निर्वास्य प्रबोधोपदेशमाह—

॥ मूलम् ॥—जासिं च संगवसन्न । जसधम्मकुलाइं हारसे मूढ ॥ तासिंपि किंपि चित्ते । चिंतसु नारीण दुच्चरियं ॥ ७८ ॥ व्याख्या—हे मूढ संसारव्यामूढप्राणिन्? यासां नारीणां संगवशतो यशोधर्मकुलानि हारयसि, तासामपि दुश्चरितं चित्ते चिंतय? यद्यपि—रत्तो दुट्ठो मूढो । पुव्वं दुग्गाहिन्न अ चत्तारि ॥ नवएसस्साणरहा । अरिहो पुण होइ मज्झत्थो ॥ १ ॥ इत्युपदेशयोग्यः, तथापि माध्यस्थ्यमास्थाय क्षणं विचारयेति गाथार्थः ॥ ७८ ॥ नारीदोषानेवाह—

॥ मूलम् ॥—चवलान्न कुडिलान्न । वंचणनिरयान्न दुट्ठधिट्ठान्न ॥ तह नीअगामिणीन्न ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

जाउ तासिंपि को मोहो ॥ ७९ ॥ व्याख्या—याश्चपलाश्चंचलस्वभावाः, कुटिला मायाशीलाः, वंचनानिरताः परपुरुषचित्तरंजनबद्धाध्यवसायाः, दुष्टा व्यसनपातनप्रवणाः, धृष्टा दृष्टव्यलीका अपि सतीमन्याः, ततो द्वंद्वः, तथा नीचगामिन्यः कुपात्रदासनटविटरताः, यदुक्तं—उन्मार्गगामिनी सांइ—रसा घनचिंतांतरा ॥ स्त्री नदीवन्निनत्येव । कुलं कूलं इव क्षणात् ॥ १ ॥ या एवंविधास्तासु को मोहः, यदुक्तं—अनुरागो वृथा स्त्रीषु। तथा गर्वो वृथेति च ॥ प्रियोऽहं सर्वदा ह्यस्या। ममैषा सर्वदा प्रिया ॥ १ ॥ एवं निःस्नेहा एव स्त्रियो ज्ञेया इति भावः, उक्तं च—एता हसंति च रुदंति च कार्यहेतो–र्विश्वासयंति च परं न च विश्वसंति ॥ तस्मान्नरेण कुलशीलसमन्वितेन। नार्यः स्मशानघटिका इव वर्जनीयाः ॥ १ ॥ इति गाथार्थः ॥ ७९ ॥ अमूषामेव क्षणरागितामाह—

॥ मूलम् ॥—गुणसायरंपि पुरिसं । चंचलचित्ता विवज्जिउं पावा ॥ वच्चइ निरक्करेवि हु । नीअत्तमहो महेलाए ॥ ८० ॥ व्याख्या—च पुनरर्थे चंचलचित्ता पापा दुराचारा गुणसागरमपि गुणवंतमपि पुरुषं पतिं वर्जयित्वा निरक्षरेऽपि मूर्खेऽपि रज्यते, अहो महे-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

लायाः स्त्रिया नीचत्वं कुत्सिताचारशीलत्वं. ' महिलायां महेलापि । मेहला स्यान्महेलिका ॥ ' इति शब्दभेदः, इति गाथार्थः ॥७०॥ एवंविधासु तासु विरक्तानां पुनःपुनरुपदिशन्नाह—

॥ मूलम् ॥—रूवोवहसियमयर—द्धयंपि पुहवीसरंपि परिहरिउं ॥ इयरनरेवि पसज्जइ । हीही महिलाण अहमत्तं ॥ ७१ ॥ व्याख्या—रूपोपहसितमकरध्वजमपि कामरूपमपि पुरुषं पृथ्वीश्वरमपि राजानमपि परिहृत्य, इतरनरेऽपि सामान्यमानुषेऽपि प्रसज्यते, कामातुरा हि रामा रूपादिरूढिपात्रनिरपेक्षं यत्रकुत्रापि रज्यते. सनिर्वेदमाह—हीही महिलानामधमत्वं, धिक् स्त्रीणां कुकर्मकारित्वं. उक्तं च—नो वयस्य यदि स्वस्य । प्रशस्यमपि वांछसि ॥ कुषेरन्यत्र मा कार्षीः । प्रमाणं नायिकासुखं ॥१॥ इत्यर्थः ॥७१॥ तत्स्वरूपकुरवबोध्यतामाह—

॥मूलम्॥—धीरा व कायरा वा । नारी मुद्धा व बुद्धिमंता वा ॥ रत्ताव विरत्ता वा । सरला कुडिला व नो जाणे ॥ ७२ ॥ व्याख्या—नारी स्त्री धीरा साहसिनी, वा अथवा, कातरा भीरुस्वभावा, यद्वा मुग्धा मूर्खा, यदिवा बुद्धिमंती स्वकार्यकरणप्रवणमतिः, वाऽथवा रक्ताऽनुरक्ता, वा पुनर्विरक्ता अन्यासक्ता सरला सन्मार्गगामिनी, कुटिला वा वक्र-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

चरित्रा वेति न जाने, विशेषं नोपलक्षयामि. यदुक्तं—प्राणप्रदा देहहरा नाराणां । स्त्रीरुस्व-
न्नावाः प्रविशंति वह्नौ ॥ क्रूराः परं पल्लवपेशलांग्यो । मुग्धा विदग्धानपि वंचयंति ॥ १ ॥ इ-
ति गाथार्थः ॥ ८२ ॥ बुद्धिवैभवपरिकलितभुवनानामपि स्त्रीचरित्रबहिर्मुखतामाह—

॥ मूलम् ॥—निअमइमाहप्पेणं । जे सयलं तिहुअणं परिकलयंति ॥ नारीचरियवियारे । तेवि हु मूढुव्व मूअव्व ॥ ८३ ॥ व्याख्या—ये बुद्धिमंतो निजमतिमाहात्म्येन सकलं त्रि-
भुवनं परिकलयंति, जगत्त्रयस्वरूपं जानंते, तेऽपि पुमांसो नारीचरित्रविचारेषु निश्चितं मूढा
इव मूका इव, स्त्रीणां सुशीलदुःशीलतापरिज्ञानेऽज्ञाना इव. यदिवा किंचिज्जानंतोऽपि सुसं-
चितकपटत्वाद्वक्तुमक्षमतया मूका निरुद्धप्रसरा इव. यदुक्तं—चतुरः सृजता पूर्व—मुपायां-
स्तेन वेधसा ॥ न सृष्टः पंचमः कोऽपि । गृह्यंते येन योषितः ॥ १ ॥ इति गाथार्थः ॥ ८३ ॥
ननु मानुष्यसाधारणा अपि कथममूरीदृश्य इत्याह—

॥ मूलम् ॥—अन्नं रमइ निरक्खइ । अन्नं चिंतेइ नासए अन्नं ॥ अन्नस्स देइ दोसं । क-
वरुकुडी कामिणी विन्नला ॥ ८४ ॥ व्याख्या—अन्यं नरं सस्पृहतया रमते कामयते, निरी-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

कृते पश्यति चान्यं सविभ्रमतया, समुच्चयोऽध्याहारार्थः, अन्यं चिंतयति हृदये तत्वतया निधत्ते, भाषते सशृंगारवचनैर्वाचालयत्यन्यं, अन्यस्य प्रत्यऽननुरागिणो दोषं दौःशील्यापवादमसद्भूतमपि ददाति, तस्मात्कामिनी स्त्री विकटा विपुला कपटकुटी दंभगृहं. यदुक्तं—जल्पंति सार्द्धमन्येन । पश्यंत्यन्यं सविभ्रमाः ॥ हृत्तं चिंतयंत्यन्यं । न स्त्रीणामेकतो रतिः ॥ ॥ १ ॥ अन्यच्च—आवर्त्तं संशयानामपि भयभवनं पत्तनं साहसानां । दोषाणां सन्निधानं कपटशतमयं क्षेत्रमप्रत्ययानां ॥ मोक्षद्वारस्य विघ्नं नरकपुरमुखं सर्वमायाकरंडं । स्त्रीयंत्रं केन सृष्टं विषममृतमयं प्राणिलोकस्य पाशः ॥ १ ॥ इतिगाथार्थः ॥ ७४ ॥ अनुरक्तास्वपि स्त्रीष्वविश्वसनीयतामाह—

॥ मूलम् ॥—जन्नाणुरत्तचित्ता । सइ धणदेसाइअंपि मुंडेइ ॥ तंपि हु खिवेइ दुक्के । महिला मिंठस्स निवन्नज्जा ॥ ७५ ॥ व्याख्या—यत्र पुरुषेऽनुरक्तचित्ता रागपरवशा महिला कामुकी सती धनदेशादिकमपि मुंचति, तमपि नरं सा दुःखे क्षिपति, प्राणांतं प्रापयति. दृष्टांतमाह—मेंठस्य नृपभार्येति लुब्धोपमा ज्ञेया. यथा किल राजपत्नी हस्तीपकेऽनुरज्य

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

कुटुंबऋध्यराष्ट्रराज्यादिसमृद्धिं मुक्त्वापि तमेव गजपालकं, तत्कालमिलितं तस्करं पतीकृत्य शूलायामपि रोपितवतीति विस्तरतः प्रागुक्तनूपुरपंडिताकथातो ज्ञेयमिति गाथार्थः ॥ ८५ ॥ तद्विरक्तानामुपश्लोकयन्नाह—

॥ मूलम् ॥—कुडिलं महिलाललिअं । परिकलिउं विमलबुद्धिणो धीरा ॥ धन्ना विरत्त-चित्ता । हवंति जह अगडदत्ताइ ॥ ८६ ॥ व्याख्या—महिलां स्त्रियं ललितामपि कुटिलां मकरदंष्ट्रावत्क्रूरहृदयां परिकल्प्य ज्ञात्वा विमलबुद्धयो निर्मलमतयो धीरा मेरुवद्धैर्यभ्राजो धन्याः पुण्यवंतो विरक्तचित्ता भवंति, यथा अगडदत्तादय इति संक्षेपार्थः, आदिशब्दाद्भालिभद्रजंबूप्रभृतयः, विस्तरार्थो दृष्टांतादवसेयः, तथाहि—

अस्ति शंखपुरं नाम । पुरं यत्रत्यसंपदः ॥ निरीक्ष्याऽनिमिषो नाकं । वंचनामिव मेनिरे ॥ १ ॥ तत्रास्ति रूपशौंडीर्य—सुंदरः सुंदरो नृपः ॥ कृपाणलेखा यत्पाणि—पद्मे शृंगावली यथा ॥ २ ॥ वल्लभा सुलसा तस्य । त्रस्यदेणविलोचना ॥ अदीदिपत्पताकेव । या सदृशं न कं गुणैः ॥ ३ ॥ तत्कुक्षिभूरभूत्पुत्रो—ऽगडदत्त इति श्रुतः ॥ दोषैरशेषैरक्षीण—निधान-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मिव यः श्रितः ॥ ४ ॥ महेंद्र इव भूमीशे–ऽन्येद्युरास्थानमास्थिते ॥ कुमारोप्रक्रमं पौराः । पुरोपेत्यमब्रुवन् ॥५॥ क्रुधाताम्रो नृपः सूनोः । श्रावयन्निदमब्रवीत् ॥ अपुत्रो हि वरं प्राणी । दुर्विनीतांगजो न तु ॥ ६ ॥ भूष्यते सकुणैः पुत्रैः । सामान्यमपि यत्कुलं ॥ कुलमत्युज्ज्व-लमपि । कुपुत्रैः सकलंक्यते ॥७॥ साहंकारः कुमारोऽपि । भूपालेनेति भर्त्सितः ॥ निर्जगा-म पुराद्भौ । पंचास्य इव निर्भयः ॥ ८ ॥ क्रमेण भुवमाक्रामन् । प्राप्य वाणारसीं पुरीं ॥ महेंद्रपुरपारीणां । श्रियं तस्या व्यलोकयत् ॥ ९ ॥ गतः क्वापि पथ्यह्नात्रे । मठे सोऽशठमा-नसः ॥ नत्वा पवनचंद्राख्य–मुपाध्यायमुपाविशत् ॥ १० ॥ विलोक्याकृतिमंतं त–मुपाध्या-योऽवदन्मुदा ॥ कुतोऽत्र संगतः किंवा । तवागमनकारणं ॥ ११ ॥ यथातथं कुमारोऽपि । नि-जकोदंतमब्रवीत् ॥ सोऽपि तं प्रीणयन्नाह । सवात्सल्यमिमां गिरं ॥ १२ ॥

न मोक्तुं पितरौ वत्स । सुपुत्राणामिहोचितं ॥ तावंतरेण नैवान्यो । यदत्र परमोपकृत् ॥ १३ ॥ स्तन्यपाननिवृत्त्यापि । मुच्यते पितरौ यदि ॥ पशूनां मानवानां च । वत्स तर्हि किमंतरं ॥ १४ ॥ राजसूनुरुवाचैष्ट । साधु ह्यस्मि प्रबोधितः ॥ पितृभ्यां जन्यते पुत्रो । गु-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रुणा ज्ञानजन्म तु ॥१५॥ प्रमाणं मे त्वदादिष्ट–मूचिवांसममुं गुरुः ॥ आनीय स्वगृहे स्नान–न्नोजनैर्जगृहेतरां ॥ १६ ॥ ऊचे च जनकस्येव । गेहे मे वत्स तस्थुषा ॥ कृतार्थीक्रियतां लक्ष्मीः । पुत्रेणेव त्वया नृशं ॥ १७ ॥ तथेति प्रतिपद्याथ । विनयं विनयन्नयं ॥ क्रमेणान्यस्तवान् सर्वाः । शस्त्रशास्त्रादिकाः कलाः ॥ १८ ॥ स पुरोपवनेऽन्येद्युः । शरैः खेलन् खलूरिकां ॥ अकस्मादन्वनूत्पृष्टे । पुष्पस्तबकताडनं ॥ १९ ॥ चक्षुराक्षिप्य साक्षेपं । लक्षतो यावदीक्षते ॥ तरुणीं रमणीमेकां । पुरस्तात्तावदैक्षत ॥ २० ॥ वीरंमन्यममुं नूनं । स्मरवीरोऽपि कौतुकी ॥ कटाक्षसायकैर्योद्धुं । तदाऽढौकत तल्लतां ॥ २१ ॥ स्वनेत्रबाणैर्भ्रूचाप–मुक्तैर्निर्भिन्नमानसं ॥ ज्ञात्वा कुमारं माराज्ञं । सविकारमुवाच सा ॥ २२ ॥ यदादिलोचनैर्दृष्टो । मया त्वं सुभगाग्रणीः ॥ तदादि हंत कामोऽयं । निर्दयो मामताडयत् ॥ २३ ॥ इमामन्यर्थनां नाथ । नावमंतुं तदर्हसि ॥ तदाकर्ण्याऽवदत्सोऽपि । कासि त्वं कस्य वा सुता ॥ २४ ॥ साऽप्याह बंधुदत्तस्य । श्रेष्ठिनोऽहं सुता प्रिया ॥ बाल्येऽप्यधीतशास्त्रा च । नाम्ना मदनमंजरी ॥ २५ ॥ कमला कृपणेनेव । पत्या किंतु विडंबिता ॥ तिष्ठामि स्वपितुर्गेहे । निर्गुणेव

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

धनुर्लता ॥ २६ ॥ उक्तं च—

पतिर्मूर्खो हि मुग्धानां । जमः प्रज्ञावतां गुरुः ॥ शूराणां नेश्वरः स्वामी । मृत्योरपि विशिष्यते ॥ २७ ॥ सरसीव पिपासोस्त्वं । चिरादृग्गोचरं गतः ॥ तस्माज्जीवोऽसि नर्तुश्च । मम जानामि नापरं ॥ २८ ॥ तद्रूपमोहितः प्राह । कुमारोऽपि मनोज्ञगीः ॥ रंभोरु सफलीकार्यः । काले तव मनोरथः ॥ २९ ॥ प्रमोदमेदुरा साथ । जगाम निजमंदिरं ॥ अश्ववारः कुमारोऽपि । प्रतस्थे नगरोन्मुखः ॥ ३० ॥ शृण्वन् कलकलारावं । पश्यन् शून्यानिवापणान् ॥ यावद्व्यापारयामास । विस्मितः पुरतो दृशं ॥ ३१ ॥ तावत्सप्तास्पदश्चोत—दानपंकिलभूतलं ॥ उद्दंडशुंडं क्रोधांध—मायांतं गजमैक्षत ॥ ३२ ॥ युग्मं ॥ ततस्तुरंगादुत्तीर्य । धावित्वा रभसादसौ ॥ वेष्टितेनोत्तरीयेण । जघान करिणः करं ॥ ३३ ॥ कोपात्संमुखमायांतं । प्रसारितकरं रयात् ॥ हाहारवपरे पौरे । पेचके हतवान् द्विपं ॥ ३४ ॥ पुरःक्षिप्तोत्तरीयोऽथ । गजं परिणतं रयात् ॥ आरुह्यालानयामास । तमाधोरणसंस्तुतः ॥ ३५ ॥ राजा भुवनपालोऽथ । तं समाहूय वेत्रिणा ॥ नमंतं गाढमालिंग्य । पादपीठे न्यवेशयत् ॥ ३६ ॥ गुणैरेव म-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

या ज्ञातं । वत्स यद्यपि ते कुलं ॥ तथापि तद्विशेषार्थं । मनो मे तरलायते ॥ ३७ ॥
श्रुत्वेत्यवाङ्मुखो याव–न्मनाक् तिष्ठति राजसूः ॥ तावत्पवनचंड्स्त–द्वृत्तांतमखिलं ज-
गौ ॥ ३८ ॥ राजोचे तर्हि साम्राज्य–मिदमस्यैव नान्यथा ॥ इत्युक्त्वा कुमरं राजा । सच्च-
क्रे भूषणादिभिः ॥ ३९ ॥ इतः समाभृताः पौरा । भूमिभर्त्रे व्यजिज्ञपन् ॥ देव त्वन्नगरी
क्षुद्र–ग्रामादप्यतिरिच्यते ॥ ४० ॥ यत्केनचिददृष्टेन । चौरेण निशि मुष्यते ॥ त्वयि शास्तरि
यद्येवं । तच्चंडाक्षरविप्रुषः ॥ ४१ ॥ आक्षिप्य क्षितिपालेना–ऽादिष्टो नगररक्षणे ॥ तलारक्षः क्रो-
णिपृष्ट–घृष्टमौलिरथाऽब्रवीत् ॥ ४२ ॥ देवासौ तस्करः सिद्धो । मांत्रिको वास्ति निश्चितं ॥
यश्चिरंचिंत्यमानोऽपि । न प्रयाति दृशोः पथं ॥ ४३ ॥ उपायचिंताविश्रांते । नृपेऽथ कुमारोऽ-
वदत् ॥ विमुच्य तात चिंतार्त्तिं । ममैवादिश्यतामिदं ॥ ४४ ॥ न चान्यत्रेदमादेश्यं । म-
य्यादेशवशंवदे ॥ शुंठीसाध्ये कफापोहे । कः प्रयुंक्ते रसायनं ॥ ४५ ॥ दत्तादेशस्ततो राज्ञा ।
कुमारो मुदिताशयः ॥ श्रीमत्पवनचंड्स्यो–पाध्यायस्याऽन्यनुज्ञया ॥ ४६ ॥ द्यूतकृन्मालिका-
पान–वेश्यान्नदृष्यापणादिषु ॥ चौरमन्वेषयन् काम–मतिचक्राम षण्मूदिनीं ॥ ४७ ॥ युग्मं ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सप्तमेऽह्नि ततो दध्यौ । चौरवार्त्तापि नाप्यते ॥ एकमेव दिनं शेषं । तत्प्रतिज्ञा कथं मम ॥ ॥ ४८ ॥ इति निश्चित्य स प्रेत–वनमाश्रित्य यावता ॥ कृपाणपाणिर्न्यग्रोध–तलासीनो वि- लोकते ॥ ४९ ॥ तावता रौद्ररुद्राक्ष–मालालंकारधारिणं ॥ कषायवाससं दंभ–कुंडिकाव्यग्र- पाणिकं ॥ ५० ॥ विशालभालं ताम्राक्षं । दीर्घजंघाभुजोर्जितं ॥ परिव्राजकमायांतं । राजसू- नुरवैक्षत ॥ ५१ ॥ युग्मं ॥

स एवायमिति स्पष्टं । संज्ञावयति भूपजे ॥ पाखंमिकोऽप्यथागत्य । कस्त्वमित्यनुयुंक्त तं ॥ ५२ ॥ अहं वैदेशिको द्यूता–दारिद्र्यमतुलं गतः ॥ भ्रमामि यत्रतत्रार्थी । नष्टधेनुरिवाऽ- निशं ॥ ५३ ॥ पाखंमी पुनरप्याह । हिमानीवाब्जिनीवनं ॥ विहन्मि तव दारिद्र्यं । द्युतमेहि मया समं ॥ ५४ ॥ ततः प्रमाणमादेश । इत्युक्तवति भूपजे ॥ तत्रैव तमवस्थाप्य । गतः पितृवने स्वयं ॥ ५५ ॥ अयस्कुशीद्वयं खड्गं । चादाय पुनरीयुषा ॥ चलितः कुमरस्तेन । नगराभिमुखं रयात् ॥ ५६ ॥ विधाय विद्यया सद्यः । पौरलोचनबंधनं ॥ स क्षात्रं पातया- मास । कस्यापि धनिनो गृहे ॥ ५७ ॥ रत्नाभरणवस्त्राणां । कृष्ट्वा पेटा अनेकशः ॥ कुमार-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

संयुतोऽनैषी–त्क्वापि देवकुले क्षणात् ॥ ५८ ॥ तत्र वैदेशिकान् सुप्ता–नुत्थाप्य धनलोभतः ॥ स्वयमग्रेसरः शून्य–चैत्ये पेटा अनीनयत् ॥ ५९ ॥ तत्र सुप्तेषु सर्वेषु । सोऽपि सुष्वाप दांभिकः ॥ दध्यावत्रांतरे राज–पुत्रोऽस्याहो दुरात्मता ॥ ६० ॥ तन्मयायं न विश्वास्यो । मुक्त्वेति स्रस्तरे पट्टीं ॥ वटकोटरमध्यास्य । तस्थिवान् खड्गदंडभृत् ॥ ६१ ॥ परिव्राजमपि खड्गेन । सर्वान् सुप्तान् निहत्य तान् ॥ उत्तरीयं द्विधा चक्रे । कुमारस्यापि कोपतः ॥ ६२ ॥ स्रस्तरं शून्यमालोक्य । यावत्पश्यतीतस्ततः ॥ तावत्खड्गकरेण श्री–कुमारेण स तर्जितः ॥ ॥ ६३ ॥ क्व यासि रे चिरं कृत्वा । चौर्यमद्य दुराशय ॥ वदन्निति विशङ्केदं । तज्जंघायुग्ममच्छिदत् ॥ ६४ ॥

जगाद चौरः शौर्येण । तवाहं खलु रंजितः ॥ हितोपदेशस्तदयं । महाभाग निशम्यतां ॥ ६५ ॥ चैत्यस्य पृष्ठदेशेऽस्ति । न्यग्रोधतरुरुच्चकैः ॥ कोटरे तस्य पाताल–भवनं मम विद्यते ॥ ६६ ॥ तत्र वीरमतीत्यस्ति । शिलापिहितमाहितः ॥ द्वारमुद्घाटयेः खड्गः । संकेतार्थं च गृह्यतां ॥ ६७ ॥ सा मे कनीयसी जामि–र्भवंतं परिणेष्यति ॥ दर्शयिष्यति ते कोश–

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सर्वस्वं च नरोत्तम ॥ ६८ ॥ गत्वा कुमारस्तत्सर्वं । तथा कृत्वा च तत्क्षणं ॥ प्रविष्टस्तद्गृहे वीर–मतीं वीक्ष्य विसिस्मये ॥ ६९ ॥ तद्रूपमोहितस्तस्यै । भ्रातृवृत्तांतमब्रवीत् ॥ तदीयं खड्गरत्नं च । सोऽन्निज्ञानमथार्पयत् ॥ ७० ॥ हर्षोत्फुल्ला दधौ सापि । तस्य स्वागतसत्कृतिं ॥ पल्यंके स्थापयित्वा तं । गृहोपरि जगाम सा ॥ ७१ ॥ दध्यौ कुमारो विद्विष्टे । विश्वासो युज्यते न हि ॥ त्यक्त्वा पल्यंकमिति स । कोणे क्वापि तिरोदधे ॥ ७२ ॥ यंत्रेण मुक्तया सद्यः । शिलया तस्य पश्यतः ॥ सा चूर्णीकृत्य पल्यंकं । निःशंकं पुनरागमत् ॥ ७३ ॥ मद्भ्रातुर्जीवितं हृत्वा । कस्त्वमद्यापि जीवसि ॥ जल्पंतीमिति तां केशै–र्धृत्वा बहिरुपानयत् ॥ ॥ ७४ ॥ तथैव तद्गृहद्वारं । पिधाय स तया युतः ॥ तामेवाग्रोपदीकृत्य । प्रज्ञाते नृपमानमत् ॥ ७५ ॥ शौर्यं प्रशंसन् साश्चर्यं । कुमारस्य नरेश्वरः ॥ पौरेभ्यो दापयामास । तच्चौरापहृतं धनं ॥ ७६ ॥

सहस्रं दंतिनां जात्य–वाजिनामयुतं तथा ॥ रत्नालंकारवस्त्राद्यं । सुवर्णं कोटिसंमितं ॥ ॥ ७७ ॥ ग्रामलक्षान्वितं राष्ट्रं । कोशयानासनैः सह ॥ कन्यां कमलसेनां च । प्रीतस्तस्मै

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ददौ नृपः ॥ ७८ ॥ युग्मं ॥ पृथक्प्रासादमध्यास्त । कुमारः सपरिच्छदः ॥ आराधयन्नुपाध्यायं । मेने जनकवन्नृपं ॥ ७९ ॥ अन्यदा वनिता काचि—द्दर्शयित्वा तमन्यधात् ॥ यत्त्वया तोषिता श्रेष्ठि–पुत्री मदनमंजरी ॥ ८० ॥ सा ते ददितदमं राज–रंजनं चौरनिग्रहं ॥ राजपुत्रीविवाहं च । श्रुत्वाऽनंदितमानसा ॥ ८१ ॥ मां प्रैषीदिति सोल्लाय । तत्कंठे हारमक्षिपत् ॥ ऊचे च नूनं निर्भाग्या । न स्मृता या पुनस्त्वया ॥ ८२ ॥ सोऽपि प्राह तया खेदो । न कर्त्तव्यः कथंचन ॥ यदुक्तं सह नेष्यामि । जायते किं तदन्यथा ॥ ८३ ॥ सत्कृत्य तामथो तस्यै । दत्वा रत्नांगुलीयकं ॥ प्रैषीदथान्यदाऽन्येत्य । प्रतिहारो व्यजिज्ञपत् ॥ ८४ ॥ राजदौवारिकौ देव । द्वारि शंखपुरागतौ ॥ तव क्रमौ दिदृक्षाते । सोऽपि प्रावेशयन्मुदा ॥ ॥ ८५ ॥ उपलक्ष्याऽनिलवेग–शुभ्रवेगाभिधौ स तौ ॥ प्रणमंतौ समालिंग्य । प्रावेशयदथांतिके ॥ ८६ ॥ पित्रोः क्षेमकथां पृष्टः । सुवेगो वेगतोऽवदत् ॥ सर्वत्र कुशलं देव । त्वद्वियोगस्तु दुस्सहः ॥ ८७ ॥ दृशं सबाष्पां बिभ्राणः । कुमारोऽपि तदाऽवदत् ॥ धिक् शत्रुरूपं मादृक्षं । ध्यायंति पितरः सुतं ॥ ८८ ॥ यदुक्तं—

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

बब्बूलवत्तुदंत्येके । वप्तारमपि कंटकैः ॥ घर्षतोऽप्युपकुर्वंति । केचिच्चंदनवत्पुनः ॥ ८९ ॥ प्रवासे सहवासेऽपि । दुःखमेव मया कृतं ॥ पित्रोरिति विषीदंतं । सुवेगस्तं पुनर्जगौ ॥९०॥ प्रवासोऽपि न दुःखाय । सुतस्य गुणिनः पितुः ॥ यत्पुनः सहवासोऽस्य । तद्धि स्वर्णस्य सौरभं ॥ ९१ ॥ तत्प्रीणय रयात्पित्रोः । स्वगुणैर्दर्शनेन च ॥ चिरं विरहजोत्कंठ–सत्वरः कुमरोऽप्यथ ॥ ९२ ॥ तौ सत्कृत्य सहादाय । भवनं भूपतेर्ययौ ॥ सुवेगेन च वृत्तांतं । समग्रं तं न्यवेदयत् ॥ ९३ ॥ राज्ञा भुवनपालेन । स्वदेशगमनाय सः ॥ सुतासंवाहनापूर्व–मनुमेने कथंचन ॥ ९४ ॥ अथोपाध्यायमापृच्छ्य । श्वश्रूविहितमंगलः ॥ प्रतस्थेऽनुगतो राज्ञा । कुमारः सपरिच्छदः ॥ ९५ ॥ प्रवृत्ते कटके गंतुं । व्यावृत्य कुमरः स्वयं ॥ रजन्यां स्थापयामास । दूतिकामंदिरे रथं ॥ ९६ ॥ ततः सत्वरमारोप्य । रथे मदनमंजरीं ॥ समगंस्त स्वसैन्यस्य । गच्छन् शून्येन वर्त्मना ॥ ९७ ॥ तस्यान्यदा विंध्यवने । तस्थुषः शिबिरांतरे ॥ पपात सौप्तिकं पल्ली–पतेर्भीमाभिधानतः ॥ ९८ ॥ युद्ध्यमानास्ततो माना–रूढाः कुमरपत्तयः ॥ नीता दिशो दिशं तेन । पलाशा इव वायुना ॥ ९९ ॥ प्रवृत्तेऽथ कुमारेण । भीमपल्लीप-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ते रणे ॥ एहिरेयाद्दिरांचक्रे । जयश्रीरंतरा चिरं ॥ १०० ॥ ग्लादग्रेङ्गती पत्यु–र्जयं मदनमंजरी ॥ ज्ञेजे सारथितां स्फार–शृंगारद्रुममंजरी ॥ १ ॥

समरेऽथ कुमारेण । ज्ञीमः पंचत्वमापि सः ॥ स्वयं चैकरथेनाथ । प्रस्थितस्तेन वर्त्मनि ॥ २ ॥ संजग्मेऽर्धपथे तस्य । पुरतः पुरुषद्वयं ॥ तेनोचे दूरमार्गोऽयं । याति शंखपुरंप्रति ॥ ३ ॥ अयं तु निकटः पंथा । दुर्गमः परमत्र यत् ॥ चौरो दुर्योधनाख्योऽस्ति । हस्ती चैकस्तथा हरिः ॥ ४ ॥ तदपाकर्णयं सोऽन्यास–वर्त्मनाऽखेटयद्रथं ॥ केचित्तस्यैव सार्थेन । । पांथा अपि प्रतस्थिरे ॥ ५ ॥ गच्छतोंतर्वणं राज–सूनोरन्यूनचेतसः ॥ कपालमालालंकारो । हस्तोदस्तकमंडलुः ॥ ६ ॥ रणद्घंटारणोज्जाग्र–ज्जटाजूटविभूषितः ॥ कापालिकः पुरोभूय । साशीर्वादमदोऽवदत् ॥ ७ ॥ युग्मं ॥ यियासुस्तीर्थयात्राया–महं ते सार्थमर्थये ॥ प्रतस्थेऽनुरथं सोऽपि । कुमाराऽनुज्ञया ततः ॥ ८ ॥ विधृत्य टंकनकुर्वी । तदन्यर्थनया रथे ॥ गतः कंचिद्गिरिग्रामं । कुमारो दिनयौवने ॥९॥ अथ तत्रैव तिष्ठत्सु । मुनिरूचे नृपात्मजं ॥ धर्मज्ञ वत्सरेऽमुष्मि–न्नहं वर्षा इह स्थितः ॥ १० ॥ तदद्य प्रथयिष्यंति । मामातिथ्यममी ज-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नाः ॥ त्वमप्यद्य ससार्थोहि विवेकिन्नतिथीभव ॥ ११ ॥ न युक्तं मुनिभक्तं मे । भोक्तुमिहं विवेकिनः ॥ वर्जितोऽप्ययमानैषी—दधिदुग्धादिकं ग्यात् ॥ १२ ॥ कुमारवर्जं सर्वेऽपि । भुक्त्वा सुप्तास्तरोस्तले ॥ स्वपार्थेयं कुमारोऽपि । यावद्भोक्तुमुपाविशत् ॥ १३ ॥ सोऽहं दुर्योधनो नामा । चौरः किं न त्वया श्रुतः ॥ प्रियां लक्ष्मीमिवादाय । क्व रे यासि ममाग्रतः ॥ ॥ १४ ॥ विषेण मारिताः पांथाः । खड्गेन त्वां त्विति ब्रुवन् ॥ दधावे खड्गमाकृष्य । पाखंडी कुमरंप्रति ॥ १५ ॥ विशेषकं ॥ विस्मितो भूपजातोऽपि । पक्वकर्कटिकामिव ॥ द्विधा व्यधित तन्वीर्षं । मंडलाग्रेण लीलया ॥ १६ ॥ कुमारो नीरमानीय । ददौ तस्मै पिपासिने ॥ चौरोऽपि रंजितस्तस्य । गुणैरिदमवोचत ॥ १७ ॥

गिरेरस्य निकुंजांत—र्विवरे मेऽस्ति मंदिरं ॥ तत्रैव कोशसर्वस्वं । सुंदरी नाम च प्रिया ॥ १८ ॥ विक्रमैकधनादत्स्व । तत्सर्वं मदनुज्ञया ॥ गत्वा तत्र कुमारोऽपि । तत्पत्न्यै तन्न्यवेदयत् ॥ १९ ॥ स तां रतिमिवालोक्य । कंदर्पमिव सापि तं ॥ भेजेऽनुरागितां कामः । किमौचित्यं विचारयेत् ॥ २० ॥ तौ तथालोक्य सक्रोधं । तदा मदनमंजरी ॥ धारयामास म-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

र्यादा–पर्योन्नोधिमिवामराः ॥ २१ ॥ स्त्रियं श्रियं च तां चौर–सत्कां त्यक्त्वा च भूपभूः ॥ चचाल रथमारुह्य । पुरो वीरधुरंधरः ॥ २२ ॥ व्रजन्नंतर्वणं भूयः । पुरः क्रूरांतकाकृतिं ॥ वानेयं दंतिनं वीक्ष्य । वश्ययामास हेलया ॥ २३ ॥ पुनः केसरिणं वीक्ष्य । पुरो दंष्ट्राबिभीषणं ॥ वस्त्रावृतं भुजादंडं । मुखे क्षिप्त्वाऽनयत्क्षयं ॥ २४ ॥ तीर्णः क्रमेणाऽरण्यानीं । स ज्ञानीव भवोदधिं ॥ पुरश्च सैन्यमङ्काक्षी–न्मोक्षसौख्यमिवाऽमदः ॥ २५ ॥ तन्मुख्यानथ पप्रच्छ । पुरावृत्तांतमादितः ॥ तेऽप्याख्यन् श्रूयतां देव । सौप्तिके पतिते तदा ॥ २६ ॥ शठेन केनाप्यश्रावि । यत्कुमारः पुरोऽगमत् ॥ सेनां कमलसेनां च । संवाह्य झाक् ततो वयं ॥ २७ ॥ निर्गता बाह्यमार्गेण । भुवमेतावतीमिताः ॥ युष्मानदृष्ट्वा चालोच्य । स्थितमत्रैव सत्रपैः ॥ ॥ २८ ॥ ततः कुमारः सैन्येना–ऽनुयातो निर्विलंबितः ॥ प्राप्तः शंखपुरं साद्धं । पितृमातृमनोरथैः ॥ २९ ॥ प्रत्युद्गतो नृपादेशा–न्मंत्रिसामंतपुंगवैः ॥ प्रविवेश पुरं पौर–कृतमंगलमालिकं ॥ ३० ॥ लुलोठोत्कंठया सद्यः । कुमारः पितृपादयोः ॥ राजापि सस्वजे स्नेहा–त्सरोमांचं निजांगजं ॥ ३१ ॥ राजादेशादथो मातुः । पादवंदनमादधौ ॥ स्नपयंतीव सा बा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ष्पैः । पुत्रांगं पाणिनाऽस्पृशत् ॥ ३२ ॥ यथौचित्येन संन्नाह्य । पौरामात्यादिकांस्ततः ॥ तातनिर्देशतः प्राप । कुमारोऽथ निजं गृहं ॥ ३३ ॥ पुण्येऽह्नि नृपतिः सूनौ । यौवराज्यश्रियं न्यधात् ॥ बंधुवत्प्रीणयामास । प्रकृतीश्च निजैर्गुणैः ॥ ३४ ॥ कुमारो वल्लभां ज्येष्ठां । प्रेम्णा मदनमंजरीं ॥ मेने कमलसेनां तु । कृतज्ञात्मा लघीयसीं ॥ ३५ ॥ सर्वकर्मसु मेने स । ज्येष्ठामेव प्रियां धुरि ॥ तथापि कुढ्या सा लध्वी । रुरोष न मनागपि ॥ ३६ ॥

प्रवृत्तेऽथ वसंततौ । कोकिलालापमंजुले ॥ गतोऽन्निरामामाराम–भूमिं राजा सवल्लभः ॥ ३७ ॥ कुमारोऽगमदत्तोऽपि । व्यापिकंदर्पदर्पभृत् ॥ साऽपि मदनमंजर्या । मंजर्या कृतशेखरः ॥ ३८ ॥ जाताऽविगीतसंगीत–मर्दलध्वनिबंधुरं ॥ प्रापद्युद्यानमानंद–मयः स रथवाहनः ॥ ३९ ॥ युग्मं ॥ दिनं समग्रं निर्माय । वनक्रीडामसौ सुधीः ॥ श्रांतो जायायुतोऽशेत । रथ एव महारथः ॥ ४० ॥ निशावशात्प्रियाबाहुं । लंबमानं रथाद्बहिः ॥ दष्टवान् भुजगो दैवा–त्तस्याः कर्मेव मूर्त्तिमत् ॥ ४१ ॥ विनिश्या तया दष्टा–दष्टेति गदिते सति ॥ रथोत्तीर्णः कुमारोऽथ । ददृशूकमलोकयत् ॥ ४२ ॥ विषेण तस्यां मूर्छत्या–ममूर्छन्नृपनूरपि ॥ कुमार-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स्त्वाप चैतन्यं । वनवातैर्न चाऽपरा ॥ ४३ ॥ कुर्वते मांत्रिका याव–न्मंत्रतंत्रौषधादिकं ॥ विषोर्मिलुप्तचैतन्या । तावन्निश्चेष्टतामगात् ॥ ४४ ॥ ततः कृत्वा कुमारोंके । विलप्य करुणं चिरं ॥ चितामारचयामास । प्रवेष्टुं प्रियया सह ॥ ४५ ॥ श्रुतश्च खेचरः कश्चि–त्तन्निष्कारणबांधवः ॥ तीर्थयात्रां व्रजन् श्रुत्वा । तत्कोलाहलमागतः ॥ ४६ ॥ कुमाराऽन्यर्थितो विद्यां । स्मृत्वा विद्याधरस्ततः ॥ आच्छोद्य सलिलैरस्या । विषवेगमपाहरत् ॥ ४७ ॥ योगीव शक्तिमुन्मील–न्नयनामाप्य स प्रियां ॥ आनंदाद्वैतपीयूष–हृदमग्न इवाऽभवत् ॥ ४८ ॥

तस्मिन् घन इवाऽकस्मा–दुपकृत्य यथागतं ॥ गते कुमारस्तां निन्ये । कामायतनमंडपं ॥ ४९ ॥ नक्तायां शीतबाधायां । तया पत्न्या वनांतरं ॥ गत्वाऽरणिं च निर्मथ्य । स्वयमग्निमुपाहरत् ॥ ५० ॥ दीपोद्योतमिवाऽकस्माद् । दृष्ट्वा शाकू च निमीलितं ॥ दूरादायतने तस्मिन् । विस्मितः कुमरस्ततः ॥ ५१ ॥ स पप्रच्छ प्रियां स्वच्छो । दीपोद्योतस्य कारणं ॥ सा प्राह वह्निस्त्वत्पाणि–स्थितः कुड्येऽनुबिंबितः ॥ ५२ ॥ ततस्तस्याः करे खड्गं । वितीर्य शुचिमानसः ॥ अस्याः शीतापनोदाय । कृशानुमुददीपयत् ॥ ५३ ॥ तस्मिन्नधोमुखे वह्निं । फूत्कु-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वर्णेऽसिवल्लरी ॥ द्योतमाना विद्युदिव । ध्वनंती पतिता क्षितौ ॥ ५४ ॥ अथ सशंकमुत्थाय । किमेतदिति भूपजे ॥ ब्रुवाणे सा पुनः प्राह । शीतकंप्रात्करान्मम ॥ ५५ ॥ निर्गत्य कोशतः खड्गः । पपात सरणत्कृतिः ॥ निःशंकः स ततस्तस्याः । शीतं जह्रे कृशानुना ॥ ॥ ५६ ॥ ततः परिच्छदेनासौ । प्रातराजग्मुषा युतः ॥ सार्द्धं मदनमंजर्या । स्वकीयं गृहमासदत् ॥ ५७ ॥ त्रिवर्गं साधयामास । यथायोग्यं वशेंद्रियः ॥ न्यायधर्मौ विशेषेण । पोषयामास च क्रमात् ॥ ५८ ॥ मध्येसन्नमथान्येद्यु—र्युवराजस्य तस्थुषः ॥ दर्शयामासिवान् कश्चि—दाश्वीयं वाजिवाणिजः ॥ ५९ ॥ तत्रातिविस्तृतं वक्षः—पृष्टे निर्मांसितं मुखे ॥ लघुं कर्णे स्फिजिस्थूलं । संयुक्तं दर्शिन्निर्ध्रुवैः ॥ ६० ॥ मध्ये क्षामं पृथुं पृष्टे । प्रचलाग्रपदं रयात् ॥ कुमारोऽथ समारोह—त्तुंगमेकं तुरंगमं ॥ ६१ ॥ युग्मं ॥ प्लवमानं निरुंधान—स्तंसवद्धगामाकर्षयन् ॥ प्रपेदे पंचमीं धारां । स्पर्द्धयेव ततो हयः ॥ ६२ ॥ संभ्रांतैरपरैश्चाश्व—वारैरुत्तेजिता हयाः ॥ केचिद्विवलिरे श्रांताः । केचिच्चानुप्रतस्थिरे ॥ ६३ ॥ कुशिष्य इव कोपार्त्तो । गुरूनश्वः स शूकलः ॥ कुमारं प्रापयामास । निर्जनामटवीं क्षणात् ॥ ६४ ॥ यावदेषोऽमुचद्व-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दृगां । श्रमार्त्तो दिनयौवने ॥ तावदश्वोऽपतद्भूमौ । घनातौ प्रतिभूरिव ॥ ६५ ॥ प्रविशन् व-
नमश्वकी–त्चैत्यं नाभिजिनेशितुः ॥ पुरःस्थदीर्घिकानीर–कृतस्नानो विवेश सः ॥ ६६ ॥ स-
द्यःफलं जिनं नत्वा । जगत्यां पुनरागतः ॥ कुर्वाणं देशनां जैनं । मुनिमेकमलोकत ॥६७॥
प्रदक्षिणय्य नत्वा च । पुरस्तस्योपविष्टवान् ॥ व्रतायोत्कंठितान् पंच । पुरुषान् वीक्ष्य पृष्ट-
वान् ॥ ६८ ॥ स्वामिन् क एते प्रत्यग्र–वयसश्चरणार्थिनः ॥ योजितांजलयः पंच । किं वा
वैराग्यकारणं ॥ ६९ ॥ मुनिराख्यत तद्भद्र । शृणु विंध्याटवीस्थितिः ॥ पल्लीशो भीमना-
माऽभू–त्तस्यामी पंच बांधवाः ॥ ७० ॥ तत्र राजसुतः कोऽपि । स्कंधावारं न्यवेशयत् ॥ त-
त्सैन्ये सौप्तिकं पल्ली–पतिश्च प्रददौ ततः ॥ ७१ ॥ किंचिद्व्याकुलतां नीते । कुमारे तस्य व-
ल्लभा ॥ बभूव सारथिः क्लृप्त–शृंगारा स्यंदने स्वयं ॥ ७२ ॥ ततस्तद्विभ्रमभ्रांतं । हत्वा प-
ल्लीपतिं द्रुतं ॥ स प्रतस्थे पुरस्तस्य । भ्रातरोऽमी च सोदराः ॥ ७३ ॥ तदैव संगताः स्वी-
य–ग्रामतोऽमर्षतोऽथ ते ॥ वैरनिर्यातनां कर्तु–कामास्तमनु निर्गताः ॥ ७४ ॥ तस्मिन्नप्रभ-
वस्तेऽपि । प्रहर्तुमथ कानने ॥ दृष्ट्वा प्रियासखं तस्थु–श्चक्रं देवकुलांतरे ॥ ७५ ॥ अथ व-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

छन्नया सर्प–दष्टया सह नृपजे ॥ वह्नौ प्रवेष्टुकामे तां । जीवयामास खेचरः ॥ ७६ ॥ नक्तायामथ शीतार्त्तौ । तया नृपसुतः स्वयं ॥ जगाम वह्निमाहर्त्तुं । चौराश्चैत्यांतरेऽथ ते ॥ ॥ ७७ ॥ पुरात्तं दीपमुद्धाव्य । कुमारशयनास्पदं ॥ यावत्पश्यंति तावत्त–त्पत्न्या दृग्गोचरं गतः ॥ ७८ ॥ लघीयान् सोदरोऽमीषां । सोऽपि तां वीक्ष्य सस्पृहं ॥ मिथोऽनुरागितां जज्ञे । क्व त्रपा कामिनां यतः ॥ ७९ ॥ स्वयमन्यर्थ्ययंतीं तां । कामुकीं प्राह तस्करः ॥ पत्यौ जीवति को नाम । त्वामादातुं प्रभुः शुन्ने ॥ ८० ॥

साऽप्याह तर्हि हत्वैनं । त्वां निःशल्यं करोम्यहं ॥ वदंत्यामिति तस्यां त–त्पतिरागात्कृशानुयुक् ॥ ८१ ॥ विधाय दीपकं तेऽपि । परतोऽपसृता मनाक् ॥ द्योतहेतौ पृष्टे च । प्रतिबिंबितमाह सा ॥ ८२ ॥ दत्वा कृपाणं तत्पाणौ । यावद्गमति पावकं ॥ तत्पतिस्तावदेषापि । प्रहर्त्तुं तमसज्जयत् ॥ ८३ ॥ इतश्च दध्यौ चौरोऽपि । धिगस्या दुष्टचित्ततां ॥ यन्मयि क्षणरागेण । स्वपतिं हंतुमिच्छति ॥ ८४ ॥ येनैतस्याः कृते साई । मृत्युर्दासत्वमीदृशं ॥ अंगीकृतं न तस्याऽन्न–न्मयि स्थैर्यवती कथं ॥ ८५ ॥ अमुं च नररत्नं हा । सत्त्वशौंडीर्यसेव-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

धिं ॥ विनाश्य कतमां दुष्ट–गतिं यास्याम्यहं मुधा ॥ ८६ ॥ विमृश्येति झटित्येत्य । स पु-
मांस्तत्कराग्रतः ॥ कृपाणं स्खलयामास । स्निग्धबंधुरिवापदं ॥ ८७ ॥ श्रुत्वेत्यचिंतयच्चित्ते ।
कुमारो धिगहो स्त्रियः ॥ धिक् साहसं च मे येन । सैव चाग्रेसरी कृता ॥ ८८ ॥ जातिमा-
लां तिरस्कृत्य । धत्तूरं रत्नसाद्यधे ॥ मोहाद्धर्मप्रियां त्यक्त्वा । मया मेने यदित्वरी ॥ ८९ ॥
मुनिरूचे ततः श्रुत्वा । कुमारः खड्गजात्कृतिं ॥ किमेतदिति पप्रच्छ । साऽप्यूचे शीतकंपतः
॥ ९० ॥ वैराग्यात्तेऽत्र पंचापि । पल्लीपतिसहोदराः ॥ भ्रातृवैरगृहणेच्छां । विहाय हितकांक्ष-
या ॥ ९१ ॥ दध्युर्यासां कृते प्राणां–स्तृणीकृत्यापि मानवः ॥ सुखं बुभुक्षते तासां । स्त्रीणां
चेष्टितमीदृशं ॥ ९२ ॥ इत्यादिन्नवनिर्वेदा–द्व्रजंतः स्वजिघांसया ॥ मदेशनामथाकर्ण्य । ध-
न्या वांछंत्यमी व्रतं ॥ ९४ ॥ इत्याकर्ण्य कुमारोऽपि । प्राह सर्वोऽप्ययं प्रश्नो ॥ पोक्तो मदी-
यो वृत्तांतो । यत्सोऽहं सा च मे प्रिया ॥ ९५ ॥ जाता विरोधिदंष्ट्रेन । ममामी बांधवा ध्रुवं
॥ बाह्यांतरंगाः प्राणा यै–रिहामुत्र च रक्षिताः ॥ ९६ ॥ धन्या सेयमरण्यानी । यत्र देवो
जिनेश्वरः ॥ तत्त्वज्ञानं सद्गुरुश्च । प्राप्तं रत्नत्रयं मया ॥ ९७ ॥ संसारस्तदयं धिक् धिक् । स-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वैयाऽनर्थसागरः ॥ चरणौ चारणवर्षे ते । शरणं चरणेन मे ॥ ९८ ॥ ततः सर्वैर्युतो गेहं । गतः पित्रोरनुज्ञया ॥ कुमारो जगृहे दीक्षां । सार्द्धं कमलसेनया ॥ ९९ ॥ जायाविरामेण स वर्द्धमान-शुद्धिं समाराध्य चिरं चरित्रं ॥ निर्मूल्य कर्माण्यगडाञ्च दत्तो । मोक्षस्य सौख्यानि समाससाद ॥ २०० ॥

॥ इति श्रीरुद्रपल्लीयगच्छे श्रीसंघतिलकसूरिपट्टावतंसश्रीसोमतिलकसूरिविरचितायां श्रीशीलतरंगिण्यां अगडदत्तमुनिकथा समाप्ता ॥ श्रीरस्तु ॥

नारीविश्वस्तस्य दुर्दशाप्राप्तिमाह—

॥ मूलम् ॥—मुद्धमहुरासु निग्घिण-मणासु नारीसु मुद्ध वीसासं !! जंतो लहसि अवस्सं । पएसिराजव्व विसमदसं ॥ ८७ ॥ व्याख्या—हे मुग्ध! मुखमधुरासु आपातरमणीयासु च निर्घृणमनस्सु निःशूकहृदयासु एवंविधासु नारीषु यदि त्वं विश्वासं लप्स्यसे तदा प्रदेशिराज इवाऽवश्यं विषमदशां लप्स्यसे, इति गाथार्थः, भावार्थाय च कथानकमुच्यते, तथा—

नगर्यामलकल्पास्ति । यत्र कल्पमहीरुहः ॥ अनेकतामिवापन्ना । लक्ष्यंते घनदंभतः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ १ ॥ तस्यां समवसृत्यंतः । श्रीमद्वीरं जिनेश्वरं ॥ दिविषदो दिवोऽभ्येत्य । श्रीसूर्याभो व्यजिज्ञपत् ॥ २ ॥ भक्तिव्यक्तिरसादद्य । स्वामिन्नाट्यविधिं नवं ॥ गौतमादिमहर्षीणां । दर्शनायान्ववेहि मां ॥ ३ ॥ तेन त्रिरिति विज्ञप्तः । स्वामी मौनावलंबनः ॥ अनिषेधन्ननुमति–परोऽबोधि सुरेण तत् ॥ ४ ॥ ऐशानीं दिशमाश्रित्य । देवो निजभुजद्वयात् ॥ विकृत्याष्टशतं देवान् । देवीश्चाऽकृत नाटकं ॥ ५ ॥ स द्वात्रिंशद्विधं नाट्यं । दर्शयित्वा महर्द्धिकः ॥ विद्युद्दंडमिवोत्प्लुत्य । सूर्याभः स्वर्ययौ पुनः ॥ ६ ॥ अथान्यलोकबोधित्सु–र्वीरं पप्रच्छ गौतमः ॥ कोऽयं देवः कुतो बोधि–रस्य श्रीरियती कथं ॥ ७ ॥ प्राह श्रीमान् महावीरः । श्रूयतां वत्स गौतम ॥ क्षेत्रेऽत्रैव पुरी नाम्ना । श्वेतांबी वीतदुर्दशा ॥ ८ ॥ तां शास्ति नास्तिकः कामं । प्रदेशीनामभूपतिः ॥ स्फुलिंग इव यत्कोप–वह्नेर्नाति दिवाकरः ॥ ९ ॥ सूर्यकांतास्ति तज्जार्या । सूर्यकालश्च नंदनः ॥ जिनधर्मरतश्चित्र–नामाऽस्य सचिवोत्तमः ॥ १० ॥ सोऽन्यदा राजकार्येऽगा–ज्जितशत्रुनृपांतिके ॥ श्रावस्त्यां प्राणमत्तत्र । केशिनं गणधारिणं ॥११॥ स चतुर्ज्ञानिनस्तस्मा–त्प्रतिपद्य गृहिव्रतं ॥ श्वेतांव्यां च विहाराय । तमभ्यर्ण्य गृहं ययौ ॥१२॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

विहरंतोऽथ भूपीठं । श्रीमंतः केशिसूरयः ॥ आरामे श्वेतांबीपुर्या । गत्वा च क्रमतः स्थिताः ॥ १३ ॥ उद्यानपालकेभ्योऽथ । स विज्ञाय तदागमं ॥ मुदितो मनसा नत्वा । तं तत्रैवेत्यचिंतयत् ॥ १४ ॥ सचिवे मय्यपि स्वामी । चेदसौ नरकंगमी ॥ अनृणश्च तदा तस्या—हं कथं स्यां कुपुत्रवत् ॥ १५ ॥ तदुपायात्कुतोऽप्यस्य । श्रावयामि गुरोर्गिरः ॥ प्रकटे सेवधौ साध्यं । भाग्यमेव शरीरिणां ॥ १६ ॥ वाहवाहनदंभेन । मतिमांश्चित्रमंत्रिराट् ॥ प्रदेशिनं प्रदेशं तं । निन्ये न्यायं गुणा इव ॥ १७ ॥ श्रांतः श्रितस्तरोश्छायां । श्रुत्वा तद्देशनागिरं ॥ उद्वेगं परमं प्राप । वीणानादमिवामयी ॥ १८ ॥ मुखमर्कटिकां कुर्वन् । बभाषे चित्रमंत्रिणं ॥ किमसौ नीरसो दूरं । रारटीति व्यथार्त्तवत् ॥ १९ ॥ किमस्ति निगदन्नेवं । गत्वा निश्चीयतेंतिके ॥ तेनेति निकटं नीतः । स शुश्रावेति देशनां ॥ २० ॥ मूढास्तत्वमजानाना । नानायुक्त्यर्थपेशलं ॥ असद्वासनया जन्म । हारयंते मुधा हहा ॥ २१ ॥ नरकातिथितां यांति । वृथा जीवाः कदाग्रहात् ॥ न पुनस्तत्वमादृत्य । श्रयंत्यूर्ध्वगतिं शुभां ॥ २२ ॥ प्रमाणमप्रमाणं वा । निषेधं वान्यवस्तुनः ॥ केवलाऽध्यक्षजल्पाको । नैव वक्तुमपि क्षमः ॥ २३ ॥ यो-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

गिप्रत्यक्षतस्तस्मा–दथवाऽप्यनुमानतः ॥ आत्मानुमेयः स्वात्मान्य–कर्मलोकादिसाधकः ॥ ॥ २३ ॥ इच्छाद्वेषप्रयत्नाद्या । अपि दृष्टेरगोचराः ॥ चैतन्यं नातिवर्त्तते । यत्र निर्मुक्तगोलवत् ॥ २४ ॥ जीवेषु ज्ञानविज्ञान–तारतम्यं यदीप्सितं ॥ तत्रादृष्ट्वाविनाभाव–श्चित्ते कस्य न व-र्त्तते ॥ २५ ॥ फलादौ चक्षुषा दृष्टे । दशनोदकसंप्लवः ॥ रसस्मृतिभवोऽकस्मा–ज्जायते हर्ष-पूरतः ॥ २६ ॥ तदिंद्रियातिरिक्तोऽस्ति । कश्चिदव्यक्तदर्शनः ॥ रूपं दृष्ट्वानुरूपस्य । रसस्य स्मरतीह यः ॥ २७ ॥ बालवृद्धाद्यवस्थासु । परिणामस्य भेदतः ॥ स्मृतेरयोगस्तत्कश्चि–दुक्तः कर्त्तानुमीयतां ॥ २९ ॥ कुड्यवत्कृतभग्नांग–रोहवृद्ध्यादिकर्मणां ॥ प्रयत्नवद्विधातृत्वा–च्चिह्नं यं लिंगमिवात्मनः ॥ ३० ॥ दृष्टे पदार्थे चक्षुर्न्यां । द्वेषरागादिविक्रियाः ॥ जन्याः स्वजनकं कं-चि–ददृष्टं ब्रुवते स्फुटं ॥ ३१ ॥ रूपादिवद्गुणत्वेन । सुखादीनामपि ध्रुवं ॥ गुणी कश्चिदवेष्ट-व्यः । स चात्मा दृगगोचरः ॥ ३२ ॥

अहमस्मि सुखी दुःखी–त्यादिसंवेदनाध्वना ॥ प्रत्यक्षेऽप्यात्मनि मुधा । व्यामोहस्त्यज्यतामयं ॥ ३३ ॥ चंद्रसूर्योपरागादे–रविसंवादयुक्तितः ॥ सर्वज्ञः प्रणिधातव्यो–ऽनुमेयत्वेन वह्निवत् ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ ३४ ॥ सूक्ष्मांतरितभावानां । ज्ञातृत्वाद्यनुमानतः ॥ सर्वज्ञो ध्रुवमेष्टव्यः । कुड्यांतरितवत् ॥ ३५ ॥ आप्तवाक्यानुमानाभ्यां । सर्वज्ञं प्रतिपद्य तत् ॥ सम्यग्मार्गस्तदादिष्टः । श्रयणीयः शिवश्रिये ॥ ३६ ॥ इत्यादि तर्करा तत्व–गर्भया शिक्षिलाग्रहः ॥ संदेहांदोलितो राजा । रयादाजग्मिवान् सद्मां ॥ ३७ ॥ सूरेः स्निग्धदृशा क्षीर–धारयेव रयादसौ ॥ प्रक्षालितमलो भूपो । मधुरामशृणोद्गिरं ॥ ३८ ॥ भवन्मतेन भगवन् । मत्पिता नरकं गतः ॥ माता च युष्मद्धर्मज्ञा । नूनं दिवमुपेयुषी ॥ ३९ ॥ न तथा कस्यचित्कोऽपि । यथाहं वत्सभन्नस्तयोः ॥ तत्किं तावेत्य युक्तार्थं । न निवेदयतो मम ॥ ४० ॥ गुरुराचष्ट नरका–त्प्राणी परवशः कथं ॥ पशुवत्कर्मभिर्वद्धः । स्वैरमागंतुमर्हति ॥ ४१ ॥ देवाश्च विषयासक्ताः । संक्रांतप्रीतयो दिवि ॥ नराऽनधीनकर्त्तव्याः । कथमायांतु भूतलं ॥ ४२ ॥ योजनानां शतान्यस्या । भूमेश्चत्वारि पंच च ॥ ऊर्ध्वं गच्छति दुर्गंधो । नाऽायांति तदिहाऽमराः ॥ ४३ ॥ अर्हतां पंचकल्याण–महेषु तपसा तथा ॥ मर्त्यलोके समायांति । देवा न पुनरन्यथा ॥ ४४ ॥ भूयो भूपतिरप्राक्षी–द्दस्युरेको मया प्रभो ॥ क्षिप्त्वा कुंभ्यंतरे द्वारं । नीरंध्र्यं स्थापितः स्वयं ॥४५॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

क्रम्याकुलतनुः काले । स दृष्टो नष्टचेष्टितः ॥ न जीवनिर्गमाध्वातु । प्रवेशाध्वान्यदेहिनां ॥ ॥ ४६ ॥ पुनश्च चूर्णवत्तस्मिन् । पिष्ट्वापि प्रविलोकिते ॥ न जीवः सर्वथा दृष्टो । यदिवा नोपलक्षितः ॥ ४७ ॥ तोलयित्वान्यदा चौरः । श्वासं रुध्ध्वा विनाशितः ॥ न जीवाऽजीवयोर्दृष्टो । विशेषस्तुलिते पुनः ॥ ४८ ॥ गुरुराख्यदयस्कुंभ्यां । नीरंध्रायां स्थितो नरः ॥ शंखं धमति तच्छब्दो । बहिराकर्ण्यते कथं ॥ ४९ ॥ ध्वनेः पौद्गलिकत्वेन । सूक्ष्मास्तत्पुद्गला बहिः ॥ भित्त्वा कुंभीं विनिष्क्रांता । निर्गमाध्वा च नेक्ष्यते ॥ ५० ॥

तथैवाऽमूर्त्तो जीवोऽपि । कुंभीतो निर्गतो बहिः ॥ शब्दपुद्गलवत्किंतु । सूक्ष्मत्वेन न लक्ष्यते ॥५१॥ वह्निर्न वीक्ष्यते यद्व—द्भिन्नेऽप्यरणिदारुणि ॥ समस्त्येव तथा जीवः । प्राणिपिंडे प्रपद्यतां ॥ ५२ ॥ हृतावपूर्णे पूर्णे च । पवनेन यथा तुला ॥ न भिद्यते तथा भूप । किमु जीवेऽपि नेष्यते ॥ ५३ ॥ मूर्त्तानामपि सूक्ष्माणां । भावानामीदृशी गतिः ॥ स्वभावात्तदमूर्त्तस्य । किमु वक्तव्यमात्मनः ॥ ५४ ॥ आत्मानं चिन्मयं सूक्ष्मं । कर्मबद्धं महाबलं ॥ ज्ञात्वा कुरु महाराज । मतिं श्रीजैनशासने ॥ ५५ ॥ ततो नास्तिकतां त्यक्त्वा । पारंपर्या-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

गतामपि ॥ परीक्ष्य हेमवज्जैनं । श्रेयसे मतमाश्रय ॥ ५६ ॥ सोऽपि विज्ञाणमिथ्यात्व–मु-
ज्झे निस्तंद्रबोधिन्नाक् ॥ द्वादशात्मतया सूर्य । इव धर्ममवाप्तवान् ॥ ५७ ॥ पालयन्निर्मलं
श्राद्ध–धर्मं स वसुधाधवः ॥ बाह्याभ्यंतरंगेष्वाप । विषयेषु विरागतां ॥ ५८ ॥ तज्जार्या सूर्य-
कांताख्या । रागिणी पुरुषांतरे ॥ तस्मै ददौ विरक्ताय । विषं पौषधपारणे ॥ ५९ ॥ ज्ञात्वा-
पि तत्कृतं तत्रा–ऽद्विष्टचित्ततया नृपः ॥ परमेष्ठिनमस्कार–स्मरणप्रवणाशयः ॥ ६० ॥ स्व-
चित्ते धृतिमाधाय । स्वयमात्तमहाव्रतः ॥ मृत्वा विमाने सूर्याभे । सौधर्मे त्रिदशोऽभवत् ॥
॥ ६१ ॥ स एष मत्वाऽवधिना स्वबोधिं । सूर्याभनामा भुवमभ्युपेतः ॥ भुक्त्वा ततः पल्य-
चतुष्कमायु–श्च्युतो विदेहेषु शिवं समेता ॥ ६२ ॥

॥ इति श्रीरुद्रपल्लीयगच्छे श्रीसंघतिलकसूरिपट्टावतंसश्रीसोमतिलकसूरिविरचितायां
श्रीशीलतरंगिण्यां प्रदेशिनृपकथा समाप्ता ॥ श्रीरस्तु ॥

नारीणामविश्वसनीयतामाह—

॥ मूलम् ॥—अणुकूलसपिम्माणवि । रमणीणं मा करिज्ज वीसासं ॥ जह रामलक्क-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मणेहिं । सुप्पणहाए महारण्णे ॥ ८९ ॥ व्याख्या—अनुकूलप्रेम्णामपि हिताचरणाऽरीणस्नेहयुक्तानामपि रमणीनां स्त्रीणां विश्वासं मा कुर्याः? यदुक्तं—न नारीषु न मूर्खेषु । न विराऽरिषु शत्रुषु । न चाऽविज्ञातशीलेषु । विश्वसंति मनीषिणः ॥ १ ॥ अनुकूलाश्च ताः सप्रेमाणश्चेति समासः, दृष्टांतमाह—यथा महारण्ये दंडकारण्ये रामलक्ष्मणाभ्यां सूर्पणखाया रावणभगिन्या विश्वासो न कृतः, कामयमानापि सा परिहृतेत्यर्थः, तथाहि—सुर्पणखा सौमित्रिविनाशितशंबूकाख्यपुत्रशोकार्त्ता भ्रमंती पंचवटीवने तस्थिवांसौ रामलक्ष्मणौ दृष्ट्वा रूपसौभाग्यव्यामूढा विस्मृतपुत्रवधकष्टा कामुकी तावेव कामयतेस्म. मम जायास्तीति रामेण निराकृता सौमित्रिमनुससार. पूर्वं रामंप्रति अभिसृतत्वान्मम प्रजावती त्वमिति तेनापि विवेकिनाऽमुनोपायेन परिहृतेति. विस्तरस्तु पुरोवक्ष्यमाणसीताचरित्राद् ज्ञेयः, इति गाथार्थः ॥ ८९ ॥ पूर्वोक्तमेव विशेषयन्नाह—

॥ मूलम् ॥—पररमणिपत्थणाउ । दक्खिन्नाउवि मुंच मा मूढ ॥ पमुसि अणत्थे किं किल । दक्खिन्नं रक्कसीहिं समं ॥ ९० ॥ व्याख्या—हे मूढ पररमणीप्रार्थनायां दाक्षिण्यादपि

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मा मुह्य? परस्त्रियां दाक्षिण्येनापि मा रमस्व? ननु दाक्षिण्याऽनंगीकारे पुरुषगुणहानिरित्याह—अनर्थे पतिष्यसि, राक्षसीभिः किं किल दाक्षिण्यं? स्त्रीणां च राक्षसीत्वं प्रसिद्धमेव. यदुक्तं—दर्शने हरते प्राणान् । स्पर्शने हरते बलं ॥ मैथुने हरते कार्यं । स्त्री हि प्रत्यक्षराक्षसी ॥ १ ॥ इत्यर्थः ॥ ए० ॥ अथ परस्त्रीसंगेऽपि सुभगंमन्यान्निर्भर्त्सयन्नाह—

॥ मूलम् ॥—पररमणीरंगान्न । सोहग्गं मा गणेसु निप्पग्ग ॥ जइ सिद्धिवहूरंगं । काररइता मुणसु सोहग्गं ॥ ए१ ॥ व्याख्या—हे निर्भाग्य दुर्दैवत! पररमणीरंगात्सौभाग्यं रूपादिगर्वं मा मन्यस्व? तर्हि कथं गर्वं उचित इत्याह—यदि सिद्धिवध्वा मोक्षलक्ष्म्या रंगं करोषि तदा सौभाग्यं मन्यस्व? यदुक्तं—रज्यते मुक्तिकांतायां । या विरागिणि रागिणी॥ कोऽन्यस्त्रियां हि रज्येत । या रागिणि विरागिणी ॥ १ ॥ इति भावः ॥ ए१ ॥ संसाराभिलाषिणां मोक्षलाभदुर्लभतामाह—

॥ मूलम् ॥—बहुमहिलासु पसत्तं । सिवलच्छी कह तुमं समीहेइ ॥ इअरावि पोढमहिला । अन्नासत्तं न ईहेइ ॥ ए२ ॥ व्याख्या—बहुमहिलासु अनेकस्त्रीषु प्रसक्तं त्वां शिव-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

लक्ष्मीर्मोक्षश्रीः कथं समीहते? नाभिलषतीत्यर्थः, अर्थापत्त्या दृढयन्नाह—इतरापि प्रौढमहिला अन्यासक्तं नेहते न कांक्षति, यदुक्तं—अन्याऽन्यरमणीरक्त—श्चक्रवर्त्त्यपि मा वरः॥ परस्त्रीसंगविरतो । हालिकोऽपि वरं वरः ॥ १ ॥ निर्मलशीलपालनेनैव मौक्षः प्राप्यत इति भावः ॥ ए२ ॥ तदेवोपदिशन्नाह—

॥ मूलम् ॥—सायससुहसिरिरम्मं । अविहडपिम्मं समिछसिछिवहुं ॥ जइ ईहसि तापरिहर । इअरां तुछ्छमहिलाउ ॥ ए१ ॥ व्याख्या—शाश्वतसुखश्रीरम्यामविघटप्रेमाणं समृछिसिछिवधूं यदीहसे यदि वांछसि, तदितरास्तुछ्छमहिलाः सांसारिकस्त्रियः परिहर? शीलमेव पालयेत्यर्थः ॥ ए३ ॥ कामार्त्तानां सुखविपर्ययमेवाह—

॥ मूलम् ॥—रम्माउ रमणीउ । दछुं विविहाउ कामतविअस्स ॥ कछ सुहं तुह होही । जणिअमिणं आगमेवि जउ ॥ ए३ ॥ व्याख्या—विविधा अनेकप्रकारा रम्या मनोज्ञा रमणीः स्त्रीर्दृष्ट्वा कामतप्तस्य रे जीव तव कुत्र क्व सुखं भविष्यति? संताप एव भवता प्राप्य इत्यर्थः, आगमे सिद्धांतेऽपि यत इदं भणितमिति भावार्थः ॥ ए३ ॥ तदेवाह—

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ मूलम् ॥—जइ तं काहिसि भावं । जाजा दिछसि नारीउ ॥ वायाइधुयहठ्ठोव । अ-
ट्ठिअप्पा भविस्ससि ॥ ९४ ॥ व्याख्या—यदि त्वं या या नारीरीक्षसे, तासु तासु भावं
चित्तविकारं करिष्यसि, यत्तदोर्नित्यसंबंध इति. तदा वातोद्भूतो हठो वृक्ष इवाऽस्थितात्मा
क्वाप्यप्राप्तस्थैर्यो भविष्यसीति भावः ॥ ९४ ॥ स्त्रीशरीरेऽपि वैराग्यहेतुतां दर्शयन्नाह—

॥ मूलम् ॥—रमणीणं रमणीयं । देहावयवाण जं सिरिं सरसि ॥ जुव्वणविरामवेर-
ग्ग—दाइणिं तं चिय सरेसु ॥ ९५ ॥ व्याख्या—रमणीनां देहावयवानां स्त्रीणामंगोपांगानां
रमणीयां रम्यां यां श्रियं स्मरसि, तामेव श्रियं यौवनविरामे वैराग्यदायिनीं स्मर ? यौवन-
स्य विरामो वार्द्धक्यं, तत्र विरक्ततोत्पादयित्रीं चिंतय ? वृद्धत्वे हि शीर्णपर्णां लतामिव श्लथां-
गीं नारीं विलोक्य सर्वः कोऽपि विरज्यते; अतस्तां दशां यौवनेऽपि स्मृत्वा शीलमेव पा-
लयेति गाथार्थः ॥ ९५ ॥ शीलस्यैव माहात्म्यं, तद्रहितस्य निंद्यतां चाह—

॥ मूलम् ॥—सीलपवित्तस्स सया । किंकरभावं करंति देवावि ॥ सीलभ्भट्ठो नट्ठो । पर-
मिट्ठीवि हु जइ भणियं ॥ ९६ ॥ व्याख्या—शीलपवित्रस्य देवा अपि सदा किंकरभावं कु-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वैति, शीलभ्रष्टः पुनः परमेष्टी ब्रह्मापि नष्टः, सर्वथा विगुप्त इत्यर्थः, यतो भणितं चिरंतनमुनिभिरिति. ॥ ९६ ॥ तदेवाह—

॥ मूलम् ॥—जइ णाणी जइ मोणी । जइ मुंमी वक्कली तवस्सी वा ॥ पत्थेंतो अबंभं । बंभावि न रोअए मज्झ ॥ ९७ ॥ व्याख्या—यदिशब्दाः सर्वेऽप्युपगमे, पुनःपुनर्यच्छब्दोपादानं च समग्रगुणवानपि प्राणी शीलरहितो न किंचिदित्यतिशयदर्शनार्थं, तत्र स्थानी कायोत्सर्गिको, मौनी वचःसंयमवान्, मुंमी केशविकलमौलिः, वल्कली वृक्षत्वग्वस्त्रः, तपस्वी निरंतरतपःसेवनरीणशरीरः, वा शब्दाज्जातिकुलादिसंग्रहः, किं बहुना अब्रह्म मैथुनं प्रार्थयन् ब्रह्मापि लोकोक्त्या सृष्टिकर्त्तापि मह्यं न रोचते, न प्रतिभासते, आस्तां सामान्यनर इति गाथार्थः ॥ ९७ ॥ सामान्योपदेशानुक्त्वा नामनिर्देशेनाह—

॥ मूलम् ॥—इय भावंतो भावं । सजोगजुत्तो जिइंदिउ धीरो॥ रक्खइ मुणी गिहीवि हु । निम्मलनिअसीलमाणिक्कं ॥ ९८ ॥ व्याख्या—इति पूर्वोक्तं भावं भावयन् स्वयोगगुप्तो मनोवचनकायनिरोधवान् जितेंद्रियः स्वायत्तीकृतेंद्रियव्यापारो धीरो निश्चलचित्तो मुनि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स्तपोधनो गृहीत्वा खु निश्चितं निजशीलमाणिक्यं रक्षति, माणिक्यमिव शीलं सुरक्षितं करोतीत्यर्थः ॥ ९८ ॥ अथ मुनेरेव शीलरक्षोपायमाह–

॥ मूलम् ॥—एगंते मंताइ । पासत्थाइकुसंगमवि सययं ॥ परिवज्जंतो नवबंभ–गुत्तिगुत्तो चरे साहू ॥ ९९ ॥ व्याख्या—एकांते विजने मंत्रादिकं वनिताभिः पर्यालोचं, आदिशब्दात्तत्संसक्ते स्थाने स्थातुं परिवर्जयन्, अन्यच्च पार्श्वस्थादिषु संगं सततं परिवर्जयन्, नवब्रह्मचर्यगुप्तिगुप्तः साधुश्चरति, आदिशब्दादवसन्नकुशीलसंसक्तयथाछंदाः, तत्र वनितायतनसंगो वर्जनीयः, यदागमः–खणमवि न खमं कातुं । अणाययणसेवणं सुविहिआणं ॥ जं मंधं होइ वणं । तग्गंधो मारुउ होइ ॥ १ ॥ पार्श्वस्थलक्षणं चेदं, यदागमः–सो पासत्थो दुविहो । सव्वे देसे य होइ नायव्वो ॥ सव्वंमि नाणदंसण–चरणाणं जोउ पासंमि ॥ १ ॥ देसंमि अ पासत्थो । सिज्जायरपिंडं च ॥ नीअं च अग्गपिंडं । भुंजइ निक्कारणे चेव ॥ २ ॥ अवसन्नादिलक्षणं सूत्राद् ज्ञेयं. नवब्रह्मगुप्तयस्त्विमाः–वसहिकहनिसिज्जिंदिअ–कुड्डंतरपुव्वकीलिअपणीए ॥ अइमायाहारविभू–सणाय नवबंभचेरगुत्तीउ ॥ १ ॥ इति नवगु-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स्तिनिर्गुप्तो रक्षितशीलो महात्मा चारित्रं पालयतीति गतं ॥ ९९ ॥ गृहस्थस्यापि शीलरक्षोपायमाह—

॥ मूलम् ॥—वेसादासीइत्तर—परमुहाणमसेसदुट्ठनारीणं ॥ सीलवयरक्खणट्ठं । गिहीवि संगं विवज्जिज्जा ॥ १०० ॥ व्याख्या—गृही गृहस्थोऽपि शीलव्रतरक्षणार्थं वेश्यादासीअसतीप्रमुखाणामशेषदुष्टनारीणां संगं संसर्गं विवर्जयेत्, तत्र वेश्या वारविलासिनी विटनटभोग्या, दासी कर्मकरी, असती पतिवंचनया परपुरुषरमणशीला, प्रमुखशब्देन नटीप्रभृतयः, तासां संगं परिहरेदित्यर्थः, यदुक्तं—दुर्मैत्रान्नृपतिर्विनश्यति यतिः संगात्सुतो लालनात् । विप्रोऽनध्ययनात्कुलं कुतनयान्नीलं खलोपासनात् ॥ मैत्री चाऽप्रणयात्समृद्धिरनयात्स्नेहः प्रवासाश्रयात् । स्त्री मद्यादनवेक्षणादपि कृषिस्त्यागात्प्रमादाद्धनं ॥ १ ॥ इति गाथार्थः ॥ १०० ॥ मुनिगृहस्थयोः शिक्षामाह—

॥मूलम्॥—वेसादासीइत्तर—परंगणालिंगिणीणसेवाउ ॥ वज्जिज्ज उत्तरोत्तर । एएसिं दोसा विसेसेणं ॥१०१॥ व्याख्या—वेश्यादासीइत्वरीपरांगनालिंगिनीनां सेवा उत्तरोत्तरमधिकाधिकं वर्जये-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

त् तत्र स्त्वर्यो ऽव्यगृहीताः संग्रहण्यादयः, परांगना ऽव्यरूपसौन्नाग्यादिलुब्धाः, लिंगिन्यो व्रतधारिण्यस्तासां सेवा रतक्रीडाः परिहरेत्, यत एता विशेषेण दूष्याः, यदागमः—संजइ-पमिसेवाए । देवदव्वस्स न्नक्खणे ॥ इसिघाए सासणुड्डाहे । बोहिघाउ निवेइउ ॥ १ ॥ इति न्नावः ॥ १०१ ॥ उन्नयोरपि कुसंसर्गपरिहरणीयतामाह—

॥ मूलम् ॥—जूआरपारदारीअ–नडविडपमुहेहिं सह कुमित्तेहिं ॥ संगं वज्जिज्ज जया–संगाउ गुणावि दोसावि ॥ १०२ ॥ व्याख्या—द्यूतकारपारदारिकनटविटप्रमुखैः कुमित्रैः सह संगं सदा वर्जयेत्, यतः सत्संगाद्गुणाः कुसंसर्गाच्च दोषा अपि. यदुक्तं—गुणा गुणज्ञेषु गुणीन्नवंति । ते निर्गुणान् प्राप्य न्नवंति दोषाः ॥ सुस्वादुतोयप्रन्नवा हि नद्यः । समुद्रमासाद्य न्नवंत्यपेयाः ॥ १ ॥ इति न्नावः ॥ १०२ ॥ नारीणां गुणानाह—

॥ मूलम् ॥—मिउन्नासिणी सुलज्जा । कुलदेसवयाणुरूववेसधरा ॥ अन्नमणसीला चत्ता–सइसंगा हुज्जनारीवि ॥ १०३ ॥ व्याख्या—मितन्नाषिणी परिमितालापा, सुलज्जा त्रपावती, यदुक्तं—असंतोषा द्विजा नष्टाः । संतोषेण तु पार्थिवाः ॥ सलज्जा गणिका नष्टा । नि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

र्लज्जाश्च कुलस्त्रियः ॥ १ ॥ इति, कुलदेशवयोऽनुरूपवेषधरा नाऽनुचितामंबरवतीत्यर्थः, अत्र-मणशीला अत्यक्तस्वदेहलीका, यदाहुः—स्वगेहदेहलीं त्यक्त्वा । निस्त्रपा याति या बहिः ॥ ज्ञेया कुलस्थितेर्लोपात् । कुलटा कुलजापि सा ॥ १ ॥ इति, त्यक्ताऽसतीसंगा, एवंविधा या नारी भवेत् सा श्लाघ्येति गाथार्थः ॥ १०३ ॥ पुनस्तद्गुणानेवाह—

॥ मूलम् ॥—देवगुरुपियरसुसराइ–एसु भत्ता थिरा वरविवेआ ॥ कंताणुरत्तचित्ता । विरला महिला सुदढचित्ता ॥ १०४ ॥ व्याख्या—देवगुरुपितृश्वसुरादिकेषु भक्ता, स्थिरा, वरविवेका, कांतानुरक्तचित्ता, भर्तृभक्ता, सुदृढचित्ता, निजशीलरक्षणदृढा विरला महिला, आदिशब्दादेवरभर्तृमित्रादिपरिग्रहः, एवंविधा काचिद्भवेदित्यर्थः ॥ १०४ ॥ महासतीनां शीलदार्ढ्यमेवाह—

॥ मूलम् ॥—निम्मलमहासईणं । सीलवयं खंभिउं न सक्कोवि ॥ सक्केइ जेण ताणं । जीवाउ सीलमग्गहिअं ॥ १०५ ॥ व्याख्या—निर्मलमहासतीनां शीलव्रतं खंभयितुं शक्कोऽपि न शक्तो न समर्थः, येन तासां जीवात्प्राणनाशाच्छीलमभ्यधिकं, ताः शीलरक्षा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

र्थं प्राणनाशमपि सहंते, यदुक्तं—वरं भ्रांतावर्त्ते सन्नयजलमध्ये प्रविशनं । वरं सर्पाकीर्णे तृणगहनकूपे प्रपतनं ॥ वरं विंध्याटव्यामनशनतृषार्त्तस्य मरणं । न शीलाद्भ्रंशो भवति कुलजानामिह पुनः ॥ १ ॥ इति गाथार्थः ॥ १०५ ॥ सतीशब्दस्य गाथयाऽर्थमाह—

॥ मूलम् ॥—सच्चिअ सइत्ति भणइ । जा विहुरेवि हु न खंडइ सीलं ॥ तं किल कणयं कणयं । जं जलणाउवि विमलतरं ॥ १०६ ॥ व्याख्या—सैव सतीति भण्यते, महासतीनाम लभते, या विधुरेऽपि संकटेऽपि शीलं न खंडयति. दृष्टांतमाह—तत्किल कनकं कनकं, यज्ज्वलनाद्वैश्वानराद्विमलतरं, तदेव सुवर्णनाम प्राप्नोति, यद्वह्नेरुत्तीर्णं सन्निर्मलं विशिष्य प्रतिभासते. एवं सत्यपि सैव या परायत्तापि स्वात्मानं रक्षति, न पुनर्यथा—रहो नास्ति क्षणो नास्ति । नास्ति प्रार्थयिता नरः ॥ तेन नारद नारीणां । सतीत्वमुपजायते ॥ १ ॥ इत्यादीति गाथार्थः ॥ १०६ ॥ सतीमन्यानां दुष्टत्वमाह—

॥ मूलम् ॥—निअसत्तवज्जिआउ । पावाउ नराण दूसणं दिंति ॥ किं काहीमो अम्हे । निरग्गला जेणिमे पुरिसा ॥ १०७ ॥ व्याख्या—निजसत्त्ववर्जिताः शीलदार्ढ्यरहिताः पापा

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दुष्टाचारिण्यः स्त्रियो नराणां दूषणं ददति, येन हेतुना किं कुर्मो वयं? पुरुषा इमे निरर्गलाः स्वच्छंदं लंपटाचाराः, अमीषामेव दोषो नास्माकमित्यर्थः ॥ १०७ ॥ निजोक्तमेव महासतीदृष्टांतेन दृढयन्नाह—

॥ मूलम् ॥—तिहुयणपहुणावि हु । रावणेण जिसे न रोममित्तंपि ॥ संचालिउं न कीरइ । चरित्रं चित्तंति सीआए ॥ १०८ ॥ व्याख्या—त्रिभुवनप्रभुणापि जगत्त्रयजिगिप्सुनापि रावणेन राक्षसाधिपतिना यस्या रोममात्रमपि न संचालितं, कायोऽपि न संस्पृष्ट इत्यर्थः, तस्याः सीतायाश्चरित्रं सचित्रमिव कस्य नाश्चर्यं जनयतीति संक्षेपार्थः ॥ १०८ ॥ विस्तरार्थस्त्वयं, तथाहि—

पुर्यस्ति मिथिला यत्र । पुण्यवंतोऽखिला जनाः ॥ स्वर्गंतुं शिथिला नित्य—मघवंतं सुरालयं ॥ १ ॥ जनकस्तत्र भूपोऽभू—द्यस्य शक्तिर्वृषानुगा ॥ प्रतापयशसी सद्यो—ऽसूत सूर्येंदुदंभृतः ॥ २ ॥ विदेहा एव यद्देह—सौंदर्यादखिलाः स्त्रियः ॥ इतीव तत्प्रिया नाम्ना । विदेहा प्रथिता भुवि ॥ ३ ॥ राज्यनीतिरिव प्राज्या । सुप्रयुक्ता यशःश्रियौ ॥ युगपत्समयेऽसूत । सा

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

राज्ञी पुत्रकन्यके ॥ ४ ॥ जहार युग्मतस्तस्मा–ज्जातमात्रादथामरः ॥ दारकं पूर्ववैरेण । वै-
नतेय इवोरगं ॥ ५ ॥ स वैताढ्यगिरौ बालं । विद्युत्पुंजमिवाऽमुचत् ॥ खेचरश्चंद्रगत्याख्यः ।
। पतितं तमथैक्षत ॥ ६ ॥ अधीशो दक्षिणश्रेणे–रथनूपुरनायकः॥ भुवस्थं बालमादाय । पु-
त्रीकृत्यान्वपालयत् ॥ ७ ॥ नाम्ना भामंडलः सूनु––र्ववृधे बालचंद्रवत् ॥ विदेहापि हृते त-
स्मिन् । शोचित्वा सुचिरं स्थिता ॥ ८ ॥ ततः पितृभ्यां सा पुत्री । युग्मजाऽपहृते सुते ॥
सीतेयं कथितेतीव । सा सीतेति प्रसिद्धिभाक् ॥ ९ ॥ पुत्रापहारेणातंक–शंकितैः स्वजनैर-
थ ॥ लोठिता भूमिपीठे सा । प्रथिता भूसुतेत्यतः ॥ १० ॥ सा वर्द्धमाना लक्ष्मीर्व । कला-
भिर्वयसापि च ॥ अवाप यौवनं यूना–मुन्मादे कापिशायनं ॥ ११ ॥ वरार्थचिंतयाचांत–
स्वांतेऽथ जनके नृपे ॥ आतरंगतमम्लेच्छ–राजस्तन्मंडलं ललौ ॥ १२ ॥ ततः पुर्यामयोध्या-
या–मासीद्दशरथो नृपः ॥ मित्रं जनकभूभर्तु–श्चतस्रस्तस्य वल्लभाः ॥ १३ ॥ कौशल्याथ सु-
मित्राख्या । कैकेयी सुप्रभा तथा ॥ रामलक्ष्मणभरत–शत्रुघ्नाः क्रमशः सुताः ॥ १४ ॥ रा-
मः पद्माख्यया ख्यातो । बलदेवोऽष्टमोऽभवत् ॥ नारायणो महाप्राणो । लक्ष्मणश्चार्द्धचक्र्य-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

न्नूत् ॥ १५ ॥ अथो जनकदूतस्तं । प्रणत्य न्यषदत्पुरः ॥ श्रेयः पप्रच्छ सोऽपि झाक् । सुहृदो मैथिलस्य च ॥ १६ ॥ जाने श्रेयःप्रवृत्त्यर्थं । मम त्वं प्रेषितोऽधुना ॥ तथाप्यागमने हेतुं । ब्रुतं दूत निवद्यतां ॥ १७ ॥ दूतः प्राह स मे न्नर्तु–राज्ञाः संति सहस्रशः ॥ न्नवानेव स्मृतः किंतु । शत्रुकष्टे स्वबंधुवत् ॥ १८ ॥ अस्त्यंतराले वैताढ्य–कैलासनगयोरिह ॥ अर्द्धबर्बरनामा च । देशः क्लेश श्वांगवान् ॥ १९ ॥

पुरे मायूरशालाख्ये । आतरंगतमान्निधः ॥ तृष्णानिष्णो ज्वर इव । म्लेच्छराजोऽस्ति दुर्जयः ॥ २० ॥ परेसहस्रास्तत्पुत्राः । प्राज्यराज्यधुरंधराः ॥ तेजन्नालेजकंबोजा–ईन् देशानुपभुंजते ॥ २१ ॥ सांप्रतं स बन्नंजास्य । मंडलं सुहृदस्तव ॥ तद्विलंबं परित्यज्य । प्रयतस्व यथोचिते ॥ २२ ॥ निवार्य पितरं रामः । सन्नह्य तं ततः स्वयं ॥ लक्ष्मणेन युतः प्राप । मिथिलां सबलो द्विधा ॥ २३ ॥ हत्वा म्लेच्छाधिपं राम–चंडस्तम इव क्षणात् ॥ जनकं तोषयामास । द्विधा निकटदूरगं ॥ २४ ॥ दातुमैहत रामाय । सीतां जनकन्नूपतिः ॥ इतश्च नारदः कन्यां–तःपुरं कौतुकादगात् ॥ २५ ॥ कोपीनधारिणं पिंग–केशं ब्रत्रवृषीधरं ॥ तं दृष्ट्वा न्नी-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

षणाकारं । सीता न्नीतांतराविशत् ॥ २६ ॥ दासीन्निः कंठकर्णांतः—शिखासु विधृतो हठात् ॥ मुक्तस्ताभ्यः स उत्प्लुत्य । वैताढ्यं क्रोधतो ययौ ॥ २७ ॥ तत्र न्नामंमलाख्यस्य । सूनोश्चंद्रगतेः पुरः ॥ कृत्वा चित्रपटे सीतां । दर्शयामास नारदः ॥ २८ ॥ ततश्च कामं कामार्त्तं । ज्ञात्वा न्नामंमलं पिता ॥ नामरूपादिकं तस्याः । पुनः सर्वमबुध्यत ॥ २९ ॥ विसृज्य नारदं चित्र—गतिर्न्नामंमलं जगौ ॥ वत्स मा खिद्यतां सीतां । त्वयोद्वाहयितास्म्यहं ॥ ३० ॥ अथो चपलगत्याख्य—खेचरेण निशि द्रुतं ॥ आनाय्य जनकं सीतां । ययाचे निजसूनवे ॥३१॥ तेन रामाय दत्तेति । प्रोक्ते चंद्रगतिर्जगौ ॥ मित्रत्वेन न दत्से चेत् । तदा हर्त्तुमपि क्रमः ॥ ॥ ३२ ॥ यत्तु रामं परित्यज्य । परिणेष्यति मत्सुतः ॥ यदि वा शृणु सर्वेषा—मनिंद्यं वचनं मम ॥ ३३ ॥ विद्येते धनुषी वज्रा—वर्णावावर्त्ते गृहे मम ॥ पृथक् यक्षसहस्रेणा—धिष्ठिते देवताज्ञया ॥ ३४ ॥

न्नविष्यतोः कृते सीरि—शार्ङ्गिणोः स्थापिते इमे ॥ एतद् द्वयमुपादाय । कुरु सीतार्पणे पणं ॥ ३५ ॥ युग्मं ॥ अप्येकमेतयोर्योमे । यद्यारोपयति धनुः ॥ जित एव स ज्ञेयश्च । ते-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नोद्वाह्या सुता त्वया ॥ ३६ ॥ क्षणं विमृश्य जनकः । कालक्षेपचिकीर्षया ॥ एवमस्त्विति तं विद्या–धराधीशमवोचत ॥ ३७ ॥ वज्रावर्त्तार्णावावर्त्ते । ततो दत्वा स कार्मुके ॥ प्रापयामास सानंदं । मिथिलां जनकेश्वरं ॥ ३८ ॥ नामंडलयुतश्चंड–गतिरप्याशु संगतः ॥ प्रारेजे मिथिलेशोऽपि । प्रातः सीतास्वयंवरं ॥ ३९ ॥ निविष्टास्तत्र नृपाला । नूचराः खेचरा अपि ॥ रामश्च लक्ष्मणश्चापि । निषण्णौ पितुरंतिके ॥ ४० ॥ अथालंकारिता सीता । सन्नामध्यमवातरत् ॥ पेतुश्च तत्र सर्वेषां । दृशोंबुज इवालयः ॥ ४१ ॥ अथ वेत्री समाचष्ट । नोनोः शृण्वंतु नूभुजः ॥ वज्रावर्त्तं धनुरिदं । ज्यारूढं यः करिष्यति ॥ ४२ ॥ अस्यां सन्नायां नूचारि–खेचरैरैः समर्चितः ॥ कन्याललामवैदेहीं । सोऽवश्यं परिणेष्यति ॥ ४३ ॥ ततः सरन्नसंशावा । इवैकवजिघृक्षवः ॥ समीयुर्मुदिताः कामं । नूमिपा नपकार्मुकं ॥ ४४ ॥ केऽपि नेशुरुदंतेऽपि । नैके शेकुरपीक्षितुं ॥ न स्पृष्टुमप्यलं केचि–त्पेतुरादौ पणे परे ॥ ४५ ॥ सहर्षं सीतया दृष्टो । रामोऽथ पितुराज्ञया ॥ धनुर्नामितवान् वज्रा–वर्त्तं सह नृपाननैः ॥ ४६ ॥ आकृष्य सह वैदेही–हृदा दशरथात्मजः ॥ नत्तार्यं तद्धनुश्चक्रे । प्राणैः सार्द्धं तथैव च ॥ ४७ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

लक्ष्मणोऽप्यर्णवावर्त्तं । धनुरारोप्य लीलया ॥ विद्याभृतामुपायंस्त । तदाष्टादश कन्यकाः ॥ ॥ ४८ ॥ भामंडलोऽपि सीतार्थं । ताभ्यन् केनापि साधुना ॥ तवेयं युग्मजातेति । ज्ञानिना प्रतिबोधितः ॥ ४९ ॥ सत्कृता वाजिरत्नाद्यै–र्जनकेन नृपा गताः ॥ स्वस्थानमपि रामोऽपि । राजधानीं निजामगात् ॥ ५० ॥ अभिषेक्तुमना राम–मथो दशरथो जरन् ॥ कैकेय्या या-चितः स्वैरं । पुरान्यासीकृतं वरं ॥ ५१ ॥ निःश्वस्य स्वप्रतिज्ञात–मनुल्लंघ्यमथोऽवदत् ॥ रा-ममाकार्य भूमींद्रः । सविषादमथोऽवदत् ॥ ५२ ॥ मया सारथ्यतुष्टेन । पुरा वत्स स्वयंवरे ॥ दत्तो वरस्तं कैकेयी । पुत्रराज्येन याचते ॥ ५३ ॥ हृष्टस्तातमभाषिष्ट । रामोऽपि विनया-नतः ॥ समौ हि तनयावावा–महं च भरतोऽपि ते ॥ ५४ ॥ राज्यं तद्दीयतामेव । भरताय मतं तु मे ॥ पुष्पे शीर्षधृते शेष–पुष्पाणि न विभ्रांति किं ॥ ५५ ॥

श्रुत्वेति भूभुजादिष्टो । राज्याय भरतोऽवदत् ॥ त्वया सह वनं गंता । न राज्ये मे प्र-योजनं ॥ ५६ ॥ राजाप्याह प्रतिज्ञां मे । मातुराज्ञां च पूरय ॥ याचते त्वयि राज्यं य–त्पू-र्वदत्तमसौ वरं ॥ ५७ ॥ रामोऽपि भरतं प्राह । न राज्ये लोलुता तव ॥ तथापि राज्यमादा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

य । तातं सत्यापयाधुना ॥ ५८ ॥ प्रणम्य राममाहस्म । भरतोऽपि सगद्गदं ॥ युक्तं तातार्ययो राज्यं । दातुं लातुं न मे पुनः ॥ ५९ ॥ रामोऽथ दध्यौ मय्यत्र । सति नैष गृहीष्यति ॥ राज्यं येन कुलीनानां । दुर्लंघ्यो विनयक्रमः ॥ ६० ॥ नत्वेति पितरं सार–तूणीरधनुरंचितः॥ रामोऽपराजिताख्यां च । प्रणम्योवाच मातरं ॥ ६१ ॥ मातर्मामिव वीक्षेथा । भरतं तथ्यवृत्तितः ॥ भरताय ददौ राज्यं । यत्तातः स्वप्रतिज्ञया ॥ ६२ ॥ मय्यत्र विद्यमानेऽसौ । न राज्यं प्रतिपत्स्यते ॥ तदहं यातुमिच्छामि । वनं तेनेत्युदीरिते ॥ ६३ ॥ पपात मूर्छिता देवी । व्यजनैर्जातचेतना ॥ विललाप कथं राम–वियोगार्त्तिमहं सहे ॥ ६४ ॥ रामः प्राह तवेयं का । मातः कातरता नवा ॥ दुःखिनी किं भवेत् सिंही । गते सिंहे वनांतरं ॥ ६५ ॥ यतस्तातेन कैकेय्या । देयमस्ति ऋणं वरं ॥ सत्यव्रतस्य तस्याद्य–मानृण्येनोत्सहे कथं ॥ ६६ ॥

इत्थमंबां विबोध्यासौ । मातृः शेषाः प्रणम्य च ॥ निःशंकः सिंहवद्रामः । प्रतस्थे काननंप्रति ॥ ६७ ॥ सीतापि नृपमापृच्छ्य । मता तेनाऽनिषेधतः ॥ स्वभर्तुरनुयानाय । श्वश्रूं पप्रच्छ भक्तितः ॥ ६८ ॥ सबाष्पमंकमारोप्य । सापि प्राह सगद्गदं ॥ वत्से सर्वंसहस्तेऽस्ति ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पतिः किं तस्य दुःकरं ॥ ६९ ॥ त्वं बाले जातिमालेव । म्लायसि श्वसनादपि ॥ वनवासं महायासं । कथंकारं सहिष्यसे ॥ ७० ॥ भर्त्तारमनुगच्छंति । संकटेऽपि पतिव्रताः॥ अनुरोधुमशक्ताहं । त्वां विधिप्रतिषेधयोः ॥ ७१ ॥ सीताह मातस्तत्रैव । सर्वं मम शिवंकरं ॥ यत्र त्वत्पुत्रशुश्रूषा–मविश्रांततया लप्स्ये ॥ ७२ ॥ श्वश्रूवर्गमिति प्रीति–परा नत्वा विदेहजा ॥ वाहिवेलेव शीतांशु–मन्वियाय पतिं द्रुतं ॥ ७३ ॥ लक्ष्मणोऽपि वने यांतं । राममाकर्ण्य सत्वरं ॥ सवैलक्ष्यं हृदा दध्या–वर्णवावर्त्तदत्तदृक् ॥ ७४ ॥ अहो भयंकरा सैषा । कैकेयी कालरात्रिवत् ॥ या वव्रे समयेऽमुष्मि–न्नमुमुत्पातकृद्वरं ॥ ७५ ॥ कैकेयीसूनवे राज्यं । दत्वा तातोऽनृणोऽभवत् ॥ आहूय पुनरेतस्मा–ज्ञमाय वितराम्यहं ॥ ७६ ॥ यद्वा न दास्यते राज्यं । सत्ववान् भरतः स्वयं ॥ कुलवैरुद्ध्यमुन्मुच्य । राममेवानुयामि तत् ॥ ७७ ॥ ध्यात्वेति तातमापृच्छ्य । सुमित्रां चापराजितां ॥ सीतासमन्वितं रामं । सौमित्रिरनुजग्मिवान् ॥७८॥ पौरैरपारबाष्पौघै–रीक्ष्यमाणास्त्रयोऽपि ते ॥ प्रफुल्लवदनाः पुर्या । अयोध्याया विनिर्ययुः ॥ ७९ ॥ रामः सौमित्रिसीताभ्या–मन्वितः संचरन् भुवं ॥ दंडकाख्यामरण्यानीं । गत्वाऽस्थाद्गिरिग-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ह्वरे ॥ ७० ॥ हिमासक्तपणप्रांते । तत्राऽऽयातौ महामुनी ॥ जानकी पारयामास । प्रासु-
काशनदानतः ॥ ७१ ॥ गंधांबु ववृषुर्देवा । दुंदुभिध्वनिपूर्वकं ॥ एत्य तक्षंधतो रोगी । खगः
कश्चिन्मुनी नतः ॥ ७२ ॥ सगंधनामा पक्षींद्रः । पादस्पर्शवशात्तयोः ॥ रत्नांकुरजटो नीरुक्
। स्वर्णपक्षो बभूव च ॥ ७३ ॥ नत्वा रामोऽपि पप्रच्छ । दुष्टात्मासौ कथं खगः ॥ युष्मत्पा-
र्श्वस्थितः शांत । श्वाऽजायत संप्रति ॥ ७४ ॥ तावूचतुः कुंभकार—कृदत्राऽभूत्पुरं पुरा ॥ दं-
डकिस्तत्र भूपालो । मंत्री पालकसंज्ञकः ॥ ७५ ॥ पीडितः स्कंदकाचार्यो । मंत्रिणा तेन दं-
भतः ॥ निदानतो मृतो वह्नि—कुमारेषु सुरोऽभवत् ॥ ७६ ॥ दग्धमेतत्पुरं तेन । सराष्ट्रं सह
भूभुजा ॥ तदिदं दंडकारण्यं । ख्यातं जातं तदाख्यया ॥ ७७ ॥ दंडकिस्तु भवं भ्रांत्वा । कु-
ष्टी सोऽयं खगोऽभवत् ॥ जातिस्मरणतश्चावा—मालोक्य द्रुतमीयिवान् ॥ ७८ ॥ नीरोगः क-
रुणासारो । जिनधर्मपरायणः ॥ जातः साधर्मिकश्चायं । जटायुर्युवयोरतः ॥ ७९ ॥ राघवा-
वपि तं बंधुं । मन्वानौ सीतया युतौ ॥ प्राप्तौ पंचवटीं वल्ली—गृहेषु स्थितिमीयतुः ॥ ८० ॥
अथ क्रौंचरवानद्या—स्तटे दाशरथिर्लघुः ॥ वंशजाढ्यां ददर्शैकं । खड्गं क्रीडापरायणः ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ ९१ ॥ सकौतुकमथादाय । कंपयन् पाणिना रयात् ॥ लुलाव लीलया वंश–जालीं बाल-मृणालवत् ॥ ९२ ॥ सधूमकुंभं मुंडं स । तत्रालोक्य धरातले ॥ स्रवदस्रं कबंधं च । स्वचित्तांतरचिंतयत् ॥ ९३ ॥ हहा मया हतः कश्चि–त्पुमानेष विनायुधः ॥ चिराय शोचयित्वा स्वं । रामाय तदशंसत ॥ ९४ ॥ रामोऽप्याख्यदसौ सूर्य–हासः खड्गोऽन्निधानतः ॥ साधकोऽस्य हतः किंच । रक्षितापि भविष्यति ॥ ९५ ॥ इतः पातालंकेश–खरराक्षसवल्लभा ॥ दशग्रीवस्वसा चंड–णखाऽगात्पुत्रमीक्षितुं ॥ ९६ ॥ दृष्ट्वा वंशांतरे सूनोः । कबंधं रुधिरारुणं हा वत्स हतकेनेति । हतः केनेति साऽरुदत् ॥ ९७ ॥ सौमित्रेरथ पादांक–वर्त्मना तत्र साऽगमत् ॥ दृष्ट्वा दाशरथी पुत्र–शोकमेषाऽप्यमुंचत ॥ ९८ ॥ विलोक्य कामुकी रामं । कामं कामवशेंद्रिया ॥ कृत्वा कन्याकृतिं स्वीय–पाणिग्रहमयाचत ॥ ९९ ॥ रामेणाभाणि भद्रेऽसि । मम भार्येयमंतिके ॥ अंगीकुरु कनिष्ठं मे । सौमित्रिमिति साऽप्यगात् ॥ १०० ॥ सोऽप्याह मेऽग्रजाश्रित्या । भवसि त्वं प्रजावती ॥ निराकृतेति सा रामं । कामार्त्ता पुनराश्रयत् ॥ १ ॥ हसिता सीतया साथ । विकृत्य विकृताकृतिं ॥ कोपाद्गत्वा खराय शशंकु । वृत्ति ॥ ५५० ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

शंबूकवधमाख्यत ॥ २ ॥ चतुर्दश सहस्राणि । गृहीत्वा सुभटानसौ ॥ प्रतस्थे योऽुमुद्भूत-क्रुधा दशास्यात्मजौ ॥ ३ ॥

कुतुकादथ तान् हंतुं । राममन्यर्थ्य लक्ष्मणः ॥ संकटं सिंहनादेन। ज्ञापयेथा ममेत्यथ ॥ ४ ॥ शिक्षामादाय रामस्य । प्रस्थितो राक्षसान्प्रति ॥ हंतुं प्रवृत्तश्चैकाकी । गरुत्मानिव पन्नगान् ॥ ५ ॥ युग्मं ॥ अथ चंद्रणखा पत्युः । साहाय्यप्रविधित्सया ॥ त्रिकूटे सत्वरं गत्वा । दशास्यमिदमब्रवीत् ॥ ६ ॥ विद्येते दंडकारण्ये । वीरौ दाशरथी नृनौ ॥ यमाय तव जामेय-स्ताभ्यां बलिरदीयत ॥ ७ ॥ नावुको नवतां क्रोधा-त्ताभ्यां योऽुमुपस्थितः ॥ सौमित्रिरेको निर्नीको । युद्ध्यमानोऽस्ति तैः सह ॥ ८ ॥ रामस्तु तस्य शौर्येण । स्ववीर्येण च गर्वितः ॥ सीतया जायया स्वैरं । क्रीडन्नस्ति स हस्तिवत् ॥ ९ ॥ स्त्रीरत्नं न च तादृक् ते । दुर्मदौ च न तौ जितौ ॥ तन्मन्ये टिट्टिभस्येव । भ्रातस्ते खलु दोष्मतां ॥ १० ॥ तत्कालं मदनोद्रेक-वशोऽथ दशकंधरः ॥ पुष्पकेण विमानेन । सीतोपांतमुपेयिवान् ॥ ११ ॥ रामपार्श्वे निषण्णां तां । द्रष्टुं दृष्ट्वापि नाऽशकत् ॥ दूरे किं तु स्थितो नाग-दमन्या इव पन्नगः ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ १२ ॥ स्मृत्वाऽवलोकिनीं विद्यां । प्राह सीतामुपाहर ॥ साऽप्युवाच त्वदादेशा–त्र मे किमपि दुःशकं ॥ १३ ॥ किं तूपायोऽस्ति येनासौ । सौमित्रमनुधावति ॥ मिथो यदेतयोरस्ति । संकेतः सिंहनादतः ॥ १४ ॥

तेनाप्यनुमता सापि । विदधे केसरिध्वनिं ॥ श्रुत्वा रामोऽपि साशंक–माः किमेतदिति ब्रुवन् ॥ १५ ॥ बन्नाषे सीतया स्वामिन् । किमद्यापि विलंबसे ॥ प्रयाहि शीघ्रं त्रायस्व । लक्ष्मणं संकटादतः ॥ १६ ॥ प्रसन्नं सीतया नुन्नो । रामोऽपि सहसाग्रहात् ॥ मौर्वीमारोपयंश्चापे । सौमित्रिमनुजग्मिवान् ॥ १७ ॥ अथोत्तीर्य दशग्रीवो । व्यग्रां लक्ष्मणचिंतया ॥ आरोपयितुमारेभे । विमाने जानकीं रयात् ॥ १८ ॥ जटायुरथ सीतायाः । श्रुत्वा रुदितमागतः ॥ सीतामाहस्म मा वत्से । भयं कुर्या इति क्रुधा ॥ १९ ॥ कठोरनखराघातै–र्दशाननमुपाऽवत् ॥ क्रुद्धः सोऽपि कृपाणेन । तं पृथिव्यामपातयत् ॥ २० ॥ अथारोप्य विमाने सा । नीयमाना तदाऽलपत् ॥ रक्ष नामंमल भ्रात–र्हा मां राम सलक्ष्मण ॥ २१ ॥ तदा नामंमलस्यैकः । पत्तिः श्रुत्वा तदारवं ॥ खेचरो योद्धुमागच्छन् । पातितस्तेन भूतले ॥ २२ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अथ लंकापतिः प्राह । किमाक्रंदसि जानकि ॥ त्रिलोकीकंटकः सोऽहं । पतिर्यस्या निदेशकृत् ॥ २३ ॥ इह लंकामहोद्याने । देवीनामपि दुर्लभां ॥ कुरु क्रीडां हतव्रीडं । स्वर्णरत्नशिलातले ॥ २४ ॥ वनेचरेण किं तेन । श्रय मां यौवनोत्कटं ॥ मरुं स्मरति किं भृंगी । रंभोरु सति नंदने ॥ २५ ॥ ब्रुवन्निति पथा सिंधो—स्तां रुदंतीं निनाय सः ॥ सापि श्रीरामरामेति । न मुमोच मुखाद्वचः ॥ २६ ॥ चाटु कुर्वन् पपाताथ । पौलस्त्यस्तत्पदांबुजे ॥ समकोचयदेषापि । परपुंस्पर्शशंकया ॥ २७ ॥ मुहुरभ्यर्थ्यमाना च । शशापेति पतिव्रता ॥ अवाप्स्यसि फलं मृत्योः । परस्त्रीवांछयाऽनया ॥ २८ ॥ पश्यंती सुखमामेषा । प्रसादं स्वयमेष्यति ॥ इति प्रत्याशया हृष्टो । लंकेशः स्वपुरं ययौ ॥ २९ ॥ वणिक् पण्यांगना दस्यु—र्द्यूतकृत्पारदारिकः ॥ परस्वांतमजानाना । ग्रंथौ ग्रंथंति मारुतं ॥ ३० ॥ न यावत्कुशलोदंतं । रामलक्ष्मणयोर्लंके ॥ तावन्नाभ्यामि सा चेति । तदाऽभिग्रहमग्रहीत् ॥३१॥ स देवरमणोद्याने । त्रिजटारक्षितामथ ॥ गुप्तां च यामिकैः सीता—मशोकद्रुतलेऽमुचत् ॥ ३२ ॥ दृष्ट्वाथ रामायांतं । संभ्रांतो लक्ष्मणोऽवदत् ॥ आर्यामेकाकिनीं मुक्त्वा । त्वमपीह किमागतः ॥ ३३ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

आकर्ण्यागां तव क्वेडा–मित्युक्ते प्राह लक्ष्मणः ॥ न भ्रातर्मत्कृता याहि । द्रुतं केनापि वं-
चितः ॥ ३४ ॥ निहत्यारिकुलं पृष्टे । तवैवाहं समागतः ॥ व्यावृत्तश्च निजं याव–दुटजं या-
ति राघवः ॥ ३५ ॥ तावत्सीतामनालोक्य । तत्र चित्तोपतापतः ॥ पपात मूर्छितो रामः ।
क्षितौ कृत इव द्रुमः ॥ ३६ ॥ वनानिलैस्ततो लब्ध–संज्ञश्चेतस्ततो भ्रमन् ॥ हतं जटायुमा-
लोक्य । सीतापहरणं विदन् ॥ ३७ ॥ ददौ पंचनमस्कारं । तस्मै स परमार्हतः ॥ मृत्वा मा-
हेंऽकल्पेऽभू–ज्जटायुस्त्रिदशोत्तमः ॥ ३८ ॥

दर्शंदर्शमरण्यानीं । तरुकुंजादिगह्वरान् ॥ रामः सीतामनालोक्य । मूर्छितो न्यपतत्पु-
नः ॥ ३९ ॥ समेतो भुतसंपातं । विराधेनान्वितस्तदा ॥ सौमित्रिर्मूर्छितं राम–मेकाकिनम-
लोकत ॥ ४० ॥ सिक्त्वाशु सलिलैर्वीज–यित्वाथ तरुपल्लवैः ॥ तेन सुस्थीकृतो रामो । वि-
योगग्रहिलोऽवदत् ॥ ४१ ॥ सर्वत्र वीक्षितं तावद् । दृष्टा क्वापि न जानकी ॥ नूनं दृष्टास्ति
युष्माभिः । किं न ब्रूत वनांगनाः ॥ ४२ ॥ त्वामेकाकितया मुक्त्वा । जातोऽहं लक्ष्मणानु-
गः ॥ भ्राता च त्वत्कृते मुक्तो । धिग्मे कुमतिमीदृशीं ॥ ४३ ॥ विलपन्निति भूपीठे । निप-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पपात पुनः पुनः ॥ साश्चर्यं परितस्तस्थुः । पक्षिणो हरिणा अपि ॥ ४४ ॥ साश्रुः सौमित्रि-
रप्याह । नत्वार्यं किमिदं वद ॥ जितारिः पुरतस्तेऽहं । स्थितो भ्रातास्मि लक्ष्मणः ॥ ४५ ॥
रामोऽपि तत्क्षणं सिक्तः । सुधयेव गिरा तया ॥ सहर्षबाष्पं सौमित्रि—मालिलिंग पुनः पुनः
॥ ४६ ॥ सौमित्रिराह नेदानीं । विषादः खलु युज्यते ॥ म्लेनापहृता सीता । तदुपायाय
यत्यते ॥ ४७ ॥ विराधस्त्वेष पाताल—लंकायाः पैतृकं पदं ॥ राज्यमर्हति मित्रं वः । प्रति-
ज्ञातं मयास्ति यत् ॥ ४८ ॥ ततो निवेशितो राज्ये । गत्वा रामेण स द्रुतं ॥ सुंदश्चंद्रणखा
चापि । नीतौ रावणमाश्रितौ ॥ ४९ ॥ किष्किंधायामथो रामः । सुग्रीवं शरणागतं ॥ स्था-
पयामासिवान् हत्वा । विटसुग्रीवमाहवे ॥ ५० ॥ स्पष्टमष्टादश स्वीयाः । कन्या दातुमथो-
द्यतं ॥ सुग्रीवं प्रार्थयामास । रामः सीताप्रवृत्तये ॥ ५१ ॥

अथ हृष्टः कपींशोऽपि । वीरो वीरान् दिशो दिशि ॥ सर्वत्र प्रेषयामास । रामस्येव म-
नोरथान् ॥ ५२ ॥ सुग्रीवः पुनरुद्ग्रीवः । कंबुद्वीपं स्वयं व्रजन् ॥ दृष्ट्वा नूपतितं रत्न—जटिनं
राममानयत् ॥ ५३ ॥ पत्निर्नामंगलस्यासौ । रक्षोऽपहरणादिकं ॥ सीतायाः सकलं वृत्तं ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

राघवाय व्यजिज्ञपत् ॥ ५४ ॥ रावणापहृतां सीतां । ज्ञात्वा रामोऽथ हर्षवान् ॥ कियद्दूरेऽस्ति सा लंका । पप्रच्छेति मुहुर्मुहुः ॥ ५५ ॥ सुग्रीवाद्या अपि प्रोचुः । किं दूरासन्नचिंतया ॥ यस्त्रिलोकीभटः पापी । दुर्जयो दशकंधरः ॥ ५६ ॥ रामोऽभाषत पर्याप्तं । यज्जयाऽजयचिंतया ॥ सौमित्रिर्दृश्यतां किंतु । ततो विज्ञास्यते बलं ॥ ५७ ॥ सौमित्रिरपि साक्षेपं । प्राह तं तस्य किं बलं ॥ यो वायस इवापूपां । हृत्वा सीतां पलायितः ॥ ५८ ॥ जांबवानथ मंत्रीशः । सौमित्रिमिदमाख्यत ॥ नुत्पाटयति यः कोटि--शिलां तं च स हिंस्यति ॥ ५९ ॥ निन्यिरे सिंधुदेशेऽथ । सर्वे संभूय लक्ष्मणं ॥ तस्यामुत्पाटितायां च । पुष्पवृष्टिं दधुः सुराः ॥ ६० ॥ नत्वा कोटिशिलां शैले । सम्मेते च जिनेश्वरान् ॥ विमानयानाः सर्वेऽपि । किष्किंधां पुनरैयरुः ॥ ६१ ॥ कपिवृद्धा अथ प्रोचु--र्युष्मतो रावणक्षयः ॥ मानयज्ञिः परं नीतिं । दूतः प्रेष्योऽत्र संप्रति ॥ ६२ ॥ तथेत्युक्तेऽथ पद्मेन । समर्थं सर्वकर्मसु ॥ आह्वास्त हनुमंतं तं । कपींद्रः सूर्यपत्तनात् ॥ ६३ ॥ पुरस्कृत्यांजनेयं च । सुग्रीवो राममभ्यधात् ॥ देवासौ जीवितं राज्ये । मम वीरोऽर्जुनध्वजः ॥ ६४ ॥ तदेष प्रेष्यतां स्वैरं । देवीसीताप्रवृत्तये ॥ पद्मोऽपि

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मुद्रिकां दत्वा । देव्यै वाचिकमब्रवीत् ॥ ६५ ॥ गत्वा हनुमल्लंकायां । संकेतायाऽर्पयेरिमां ॥ शंसेश्च त्वां विना राम–स्त्वन्मयं वीक्षते जगत् ॥ ६६ ॥ मा त्यक्षीः प्राणान् परित्याक्षी–र्वृथैव विरहे मम ॥ रामोऽहं यदि तत्प्रत्या–हरिष्ये त्वां सुतं ॥ ६७ ॥ ॐमित्युक्त्वा ततो रामं । नत्वा व्योमाध्वना ययात् ॥ आंजनेयो गतो लंकां । बिभीषणमदोऽवदत् ॥ ६८ ॥ तवैव पुरतो न्यायाऽन्यायौ कुलिन वच्म्यहं ॥ तन्मोचय रघोः पत्नीं । भ्रातुः श्रेयो यदीच्छसि ॥६९॥ बलवानपि ते भ्राता । कारायां यस्य तस्थिवान् ॥ ज्ञात्वा तस्यापि हंतारं । रामं सीतार्प्यतां सुतं ॥ ७० ॥ सोऽप्याख्यत्पुरैवोक्तो । भ्रातास्माभिः कथामिमां ॥ वक्ष्यते च पुनर्यस्मात् । श्रेयः कस्य न वल्लभं ॥ ७१ ॥

हनुमानपि तत् श्रुत्वा । झाक् देवरमणे गतः ॥ मुंचंतीं दीर्घनिःश्वासान् । कृशांगीं मलिनांबरां ॥ ७२ ॥ सततं रामरामेति–ध्यायंतीं योगिनीमिव ॥ ददर्श रुदतीं सीता–मशोकाख्यतरोस्तले ॥ ७३ ॥ साधु साधु सती ध्यायं । ध्यायमिह्नं हनूमता ॥ तदंके मुद्रिकाऽमोचि । विद्यापिहितवर्ष्मणा ॥ ७४ ॥ हर्षाश्रुसलिलैः सापि । स्नपयित्वा च तां जगौ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मुद्रिके कुशली कश्चि–द्राघवो लक्ष्मणान्वितः ॥ ७५ ॥ सोऽथ प्राह प्रवृत्त्यै ते । प्रभुणा प्रेषितोऽस्म्यहं ॥ मयि तत्र गते देवः । समेष्यति रिपुच्छिदे ॥ ७६ ॥ सीताऽपृच्छत्कथं वत्स । वार्द्धिं लंघितवानसि ॥ हनुमानाह खेचारि–विद्यया तमलंघयं ॥ ७७ ॥ तत्पृष्टां राघवादिष्टां । जगौ सोऽप्यखिलां कथां ॥ प्रभुप्रत्यायनाहेतो–श्चूडारत्नमयाचत ॥ ७८ ॥ तत्समर्प्याऽवदत्सापि । वत्स तूर्णमितो व्रज ॥ मा भूयादत्र तेऽनर्थो । निष्कृपे राक्षसास्पदे ॥ ७९ ॥ सोऽप्यूचे मातर्मा शंकां । कुरु वत्सलमानसे ॥ दर्शयित्वैव यास्यामि । पत्नित्वं रामपादयोः ॥ ॥ ८० ॥ नत्वाऽशोकवनीं भंक्त्वा । हत्वा चाक्षादिराक्षसान् ॥ निपात्य लंकासद्मानि । त्रोटयित्वात्मबंधनं ॥ ८१ ॥ दशास्यमुकुटं सद्य–श्चूर्णयित्वा महाभटः ॥ नत्वा रामाय सीतायाश्चूडामणिमथार्पयत् ॥ ८२ ॥ रामेणापि समालिंग्य । पृष्टः सीताकथामसौ ॥ शशंस सकलां लंका–मंदिरध्वंसनादिकां ॥ ८३ ॥ विराधजांबवन्नील–भामंडलनलांगदैः ॥ संयुतः प्रस्थितो रामो । लंकायां गगनाध्वना ॥ ८४ ॥

सुग्रीवप्रमुखैरग्रे–सरैर्मार्गेऽनुपद्रुताः ॥ चचाल रामसौमित्रि–चमूरुपरि नीरघेः ॥८५॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अब्ध्यंतर्नलनीलाऱ्यां । संग्रामे द्वीपनायकौ ॥ नाम्ना समुद्रसेतू तौ । बद्धौ रामस्य चार्पितौ ॥ ८६ ॥ पुनर्निवेश्य तौ राज्ये । रामः सेवापरायणौ ॥ सुवेलाद्रिस्थितं वेल–नृपमेष जिगाय तं ॥ ८७ ॥ हंसद्वीपेऽथ लंकायाः । पार्श्वे हंसरथं नृपं ॥ जित्वा तत्र स्थितो दत्वा–ऽवासान् दशरथात्मजः ॥ ८८ ॥ श्रुत्वाथ राममायांतं । रावणोऽपि रणोत्कटः ॥ सैन्यं प्रगुणयामास । कुदृष्टिरिव दुर्गतीः ॥ ८९ ॥ अथो बिभीषणो नत्वा । प्रोवाच दशकंधरं ॥ प्रसीद देव स्वस्यापि । शुभोदर्कं विचारय ॥ ९० ॥ परदारापहारेण । लज्जितं प्रथमं कुलं ॥ सांप्रतं सर्वसंहारं । मा कुर्वर्षय जानकीं ॥ ९१ ॥ इत्यादितद्वचःकुद्ध–स्तथा नर्त्सितवानमुं ॥ स परित्यक्तसंयुक्तो । रामचंद्रं यथाऽश्रयत् ॥ ९२ ॥ समयज्ञेन तेनापि । सत्कृत्य स्थापितोंतिके ॥ प्रतिपेदे च लंकाया । राज्यमस्मै शुभात्मने ॥ ९३ ॥ अथ रामाज्ञया लंकां । कपयो रुरुधुः क्षणात् ॥ सर्वाः प्रकृतयो जीवं । गुणस्थान इवादिमे ॥ ९४ ॥ हस्तप्रहस्तमारीच–शुकसारणसंज्ञकाः ॥ निर्गता दुर्गतो योद्धुं । सेनान्यो रक्षसां विभोः ॥ ९५ ॥ कपयः क्षोभयामासु–र्युद्ध्यमाना महाबलाः ॥ रक्षोबलमशेषं त–त्तुषपुंजमिवानिलाः ॥ ९६ ॥ अथो दशा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ननो बंधु–युतो योद्धुं समागतः ॥ बभूवुः संमुखास्ते च । रामभ्रामंभलादयः ॥ ९७ ॥ वा-
द्यमानैर्महातूर्यैः । खड्गाखड्गि शराशरि ॥ वीक्ष्यमाणाः सुरैर्व्योम्नि । चिरं युयुधिरेऽथ ते ॥९८॥
शूलं बिभीषणेऽमुंच–त्क्रोधोध्मातो दशाननः॥ शुभ्रध्यानीव कर्माणि । सौमित्रिः कणशोऽद-
लत् ॥ ९९ ॥ ततः प्रवर्द्धितक्रोधो । दशास्यो हृयताडयत् ॥ सौमित्रिं शितयाशक्त्या । सोऽ-
प्युर्व्यां मूर्छितोऽपतत् ॥ १०० ॥ शोकार्ते राघवानीके । व्यावृत्ते शिबिरंप्रति ॥ दशास्योऽप्य-
विशल्लंकां । जितकाशी रणांगणात् ॥ १ ॥ पपात मूर्छाविच्छिन्ना । तन्निशम्य विदेहजा ॥ वि-
द्याधरीभिः संसिक्ता । जलैश्चैतन्यमाप च ॥ २ ॥ मंदभाग्या दुरात्माहं । न मृता शैशवेऽपि
किं ॥ भर्तृदेवरयोरिष्टं । यत्कृते कष्टमापतत् ॥ ३ ॥ इत्यादिविलपंतीं तां । काचिद्विद्याधरी
जगौ ॥ भ्रातस्ते देवरो भावी । निःशल्यो देवि मा शुच ॥ ४ ॥ स्वस्थाऽभवत्तदा सीता ।
ध्यायंती तपनोदयं ॥ सौमित्रिं पतितं दृष्ट्वा–ऽपतद्भामोऽपि मूर्छितः ॥ ५ ॥ मूर्छांते प्राह किं
तूष्णी–मकाले वत्स तिष्ठसि ॥ संभावयानुगानेता–ऽभिजान् वाचा दृशापि वा ॥ ६ ॥
लंकाराज्यं तदा वत्स । प्रतिपद्य बिभीषणे ॥ निश्चिंत इव किं शेषे । शेषपृष्ट इवाऽभ्यु-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तः ॥ ७ ॥ हा वत्स तिष्ठ यन्नामि । तं हत्वाऽस्मै तदास्पदं ॥ इत्युक्त्वा धनुरास्फाल्य । या-
वच्चलति राघवः ॥ ८ ॥ तावद्विभीषणो हस्ते । तमादायान्यधादिदं ॥ मोहं जहीहि धीरत्व-
मवलंबस्व नायक ॥ ९ ॥ जीवत्यपि हृतः शक्त्या । यावन्नानूदयं पुमान् ॥ मंत्रतंत्रादिभि-
स्तस्मा-त्प्रतीकाराय यत्यतां ॥ १० ॥ आमेत्युक्तेऽथ रामेण । चतुर्दिक्षु चमूयुताः ॥ राघव-
परितस्तस्थुः । सुग्रीवाद्या नदायुधाः ॥ ११ ॥ प्रतिचंद्र इतोऽन्येत्य । खेचरो राममन्यधात्
॥ शक्तेर्विनिर्गमोपाय-मनुभूतममुं शृणु ॥ १२ ॥ मातुलो भरतस्यास्ति । द्रोणमेघो नरेश्व-
रः ॥ विशल्या नामतः कन्या । तस्याः स्नानांबुसेचनात् ॥ १३ ॥ शक्तेर्विनिर्गमो भावी—
त्युक्ते भामंडलादयः ॥ गत्वा रामाज्ञया तामा-नीयाऽसिंचंश्च लक्ष्मणं ॥ १४ ॥ ज्वलंती नि-
र्गता शक्ति-रुदियाय दिवाकरः ॥ दध्वनुः पद्मसैन्ये च । श्रेयोदुंदुभयः प्रगे ॥ १५ ॥ शकु-
नैर्वार्यमाणोऽपि । रावणोऽथ रणांगणं ॥ प्रातरागात्सैन्ययुतः । प्रातराशसमुत्सुकः ॥ १६ ॥
रामरावणयोर्भूयः । प्रवृत्तः समरोत्सवः ॥ प्रजहुर्वानरा रक्षः-शीर्षाण्यादाय गोलवत् ॥ १७ ॥
भनिष्टमानं वेगेन । भत्वा सौमित्रिरग्रजं ॥ विधूय वेदनां शक्ते-रुत्तस्थे समरेच्छया ॥ १८ ॥ प्र-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वर्द्धमानशौर्यौ । लक्ष्मणं वीक्ष्य रावणः ॥ बहुरूपकरीं विद्या–मस्मरत्तज्जिगीषया ॥ १९ ॥ स्मृतमात्रतया शक्त्या–मागतायां दशाननः ॥ विचकार सशस्त्राणि । निजरूपाणि भू-रिशः ॥ २० ॥ पुरस्तात्पार्श्वयोः पृष्ठे । भूमौ व्योम्नि च लक्ष्मणः ॥ ददर्श रावणानेव । स-मंतादस्त्रवर्षिणः ॥ २१ ॥ एकोऽपि लक्ष्मणस्तार्क्ष्य–रूढोऽनेक इवोर्जितः ॥ परितः पातया-मास । रावणान्निशितैः शरैः ॥ २२ ॥ अथार्द्धचक्री लंकेश–श्चक्रं स्मृत्वा करेऽकरोत् ॥ भ्रम-यित्वा शिरस्सिन्नि । मुमुचे चाऽन्निलक्ष्मणं ॥ २३ ॥ परीय चक्रं सौमित्रे–र्दक्षिणं पाणिमा-सदत् ॥ अष्टमो हरिरित्येष । जुघुषुश्च सुरा दिवि ॥ २४ ॥ तेनैव लक्ष्मणेनापि । तच्छिरोऽ-लूयत क्षणात् ॥ पपात पुष्पवृष्टिश्च । सुरमुक्ता नभोंगणात् ॥ २५ ॥ निवेश्य राघवौ लंका –राज्येऽग्र श्रीविभीषणं ॥ जग्मतुः सीता–मादातुं सपरिच्छदौ ॥२६॥ विलोक्य दूरा-दायांतौ । हर्षोत्फुल्ला विदेहजा ॥ नवमेघपयःसिक्ता । वनालीव व्यराजत ॥ २७ ॥ धन्या महासती सीते–त्याहुर्दिवि दिवौकसः ॥ लक्ष्मणाद्या नतास्तस्यै । नंदिताश्च तयाऽऽशिषा ॥ ॥ २८ ॥ शशांक इव रोहिण्या । पद्मिन्येव दिवाकरः ॥ तदानीं रामभद्रेण । रेजे सीता म-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

हासती ॥ २९ ॥ अन्वीयमानौ सुग्रीव–नामंमलविन्नीषणैः ॥ आरुह्य पुष्पकं प्राप्तौ । साकेतं राघवौ रयात् ॥ ३० ॥ भरतः सानुजोऽन्येत्य । सरामं विष्णुमानमत् ॥ लक्ष्मणोऽपि नमंतौ तौ । हर्षेण परिषस्वजे ॥ ३१ ॥ वाद्यमानेषु तूर्येषु । प्रविष्टावथ मंदिरं ॥ श्वश्रूभिर्नंदिता सीता । भव वीरप्रसूरिति ॥ ३२ ॥ लक्ष्मणस्यार्द्धचक्रीत्वा–ऽभिषेकानंतरं हली ॥ सुग्रीवादीन् स्वदेशेषु । विससर्जाखिलान्नृपान् ॥ ३३ ॥ गर्भे बभार सीताथ । शरभस्वप्नसूचितं ॥ संमेतशैलयात्रादौ । जातास्तस्याश्च दोहदाः ॥ ३४ ॥ अत्रांतरेऽस्फुरत्तस्या । दक्षिणं चक्षुरक्ष्णे ॥ तदाचचक्षे रामाय । सीतापि चकिताशया ॥ ३५ ॥ दुर्निमित्तमिदं भद्रे । तद्भत्वा मंदिरे निजे ॥ देवानां क्रियतामर्चा । दानं पात्रेषु दीयतां ॥ ३६ ॥ भर्तुः शिक्षामिति श्रुत्वा । जानक्यपि तथाऽकरोत् ॥ पुरीमहत्तराः सत्य–गिरो राममथाभ्यधुः ॥ ३७ ॥ देव सत्यमसत्यं वा । सर्वलोकैर्यदुच्यते ॥ श्रद्धातव्यं बुधैरेत–द्दीप्सितं चाऽप्यनीप्सितं ॥ ३८ ॥

तथाहि दशकंठेन । नारीलोलेन जानकी ॥ एकाकिनी हृता साथ । षण्मासीं स्थापिता गृहे ॥ ३९ ॥ सा च रक्ता विरक्ता वा । दुर्लक्ष्यमिति योषितां ॥ संमत्याथ दृगादेषा ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

भुक्ता नो वेत्यलक्षितं ॥४०॥ युक्तियुक्तः प्रवादोऽयं । तैलबिंदुरिवांभसि ॥ सर्वत्र प्रसृतो लोके । तन्मा मृष रघूद्वह ॥ ४१ ॥ तदनेन प्रवादेन । पवनेनेव राघव ॥ नोपेक्षस्वादर्शमिव । स्वकुलं मलिनीभवत् ॥ ४२ ॥ कलंकमिति सीतायां । रामो निश्चित्य दुःखितः ॥ जातस्तूष्णीमुखो भूयो । धैर्यमालंब्य तान् जगौ ॥ ४३ ॥ साधु व्यक्षपि युष्माभि--र्न स्त्रीमात्रकृतेऽप्यहं ॥ सहिष्ये दुर्यशस्तानि--त्युदित्वा विससर्ज सः ॥ ४४ ॥ बंधुमभ्यर्थ्य काकुस्थो । निशीथे वीरचर्यया ॥ चर्मकुन्मंदिरासन्नं । गत्वाधो यावता स्थितः ॥ ४५ ॥ तावदेष चिरात्प्राप्तां । स्वभार्यां प्रतिवेश्मतः ॥ साक्षेपमूचिवानिंद्वं । हत्वा पादेन चर्मकृत् ॥ ४६ ॥ इयत्कालं स्थिता कासीः । साप्यूचे त्वं नवः पुमान् ॥ रामो रक्षोगृहानीतां । सीतां राज्ञीं न किं दधौ ॥ ४७ ॥ तेनापि सोढा षण्मासी । न त्वं क्षणमपि क्षमः ॥ सोऽप्यूचे स्त्रीजितः सोऽस्ति । नाहं तादृक् कथं सहे ॥ ४८ ॥ श्रुत्वेति दध्यौ दुःखार्त्तो । रामो धिक् स्त्रीकृते ह्यहं ॥ नीचानामपि धिक्कारान् । स्वकर्णातिथितां नये ॥ ४९ ॥ नूनं पतिव्रता सीता । दुःशीलः स च रावणः ॥ वंशश्च निःकलंको मे । हा किं रामो विचेष्टतां ॥ ५० ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ध्यात्वेति मंत्रयामास । समं सौमित्रिणा रहः ॥ सोऽप्याख्यन्मास्म लोकोक्त्या । सी-
तां त्यज महासतीं ॥ ५१ ॥ रसिकः परदोषोक्तौ । स्वज्ञातावादेव यज्जनः ॥ श्लिक्ष्णीयः स ज्ञू-
पालै–र्यन्नोपेक्ष्यो महात्मभिः ॥ ५२ ॥ रामोऽप्याख्यदिदं सत्यं । लोकः प्रायो यदीदृशः ॥
किंतु सर्वविरुद्धोऽर्थ–स्त्याज्य एव यशस्विभिः ॥ ५३ ॥ सिद्धाज्ञेयेति सौमित्रिं । निषिध्य प्र-
सभं बलः ॥ ऊचे कृतांतं सेनान्यं । सीतां रे त्यज्यतां वने ॥ ५४ ॥ किंच सम्मेतयात्राया–
मस्या जातोऽस्ति दोहदः ॥ तेनैव वर्त्मना गंगा–परकूले नयेरिमां ॥ ५५ ॥ नत्वा सोऽपि रथे
सीता–मारोप्य स्वामिशासनात् ॥ सम्मेते कारयन् यात्रां । नीषणे काननेऽमुचत् ॥ ५६ ॥
ऊचे च लोकनिर्वादा–देवी त्वं त्याजिता वने ॥ हतोऽहं हंत कार्येऽस्मि–न्नियुक्तः स्वामिना
हहा ॥ ५७ ॥ श्रुत्वेति मूर्छिता सीता । पतिता रथतो भुवि ॥ स्वस्थीभूय चिरादूचे । रामंप्र-
ति पतिव्रता ॥ ५८ ॥ यद्यज्ञानजनाल्लोका–ऽपवादन्नयन्नीरुता ॥ दिव्यं किमिति तन्नादाः ।
समक्षं जगतो मम ॥ ५९ ॥ इदं कुलोचितं किं ते । निर्घृणेन्योऽपि निर्घृणं ॥ एकाकिनीं व-
नेऽत्याक्षी–र्यदाधानवतीं प्रियां ॥ ६० ॥ तथाप्यहं भविष्यामि । वनेऽप्यत्र सुधर्मिणी ॥ चि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रं जयतु किंतु श्री–राघवो लक्ष्मणान्वितः ॥ ६१ ॥ इत्युक्त्वादिश्य सेनान्यं । विससर्ज महासतीं ॥ क्षरदश्रुप्लुतः सोऽपि । नत्वा सीतां न्यवर्त्तत ॥ ६२ ॥ जानक्यपि निजं कर्म । निंदंती प्राग्जन्मार्जितं ॥ यूथभ्रष्टा कुरंगीव । बभ्राम चकिता वने ॥६३॥ अथ श्रीवज्रजंघेन । तत्राऽऽयातेन भूभुजा ॥ भगिनीकृत्य सा निन्ये । पुंडरीकपुरे मुदा ॥ ६४ ॥ इतश्च निजसेनान्यास्तत्तथाकर्ण्य राघवः ॥ असहिष्णुर्वियोगार्त्तिं । सीतायास्तत्क्षणं ततः ॥ ६५ ॥ तेनैव सह सेनान्या । तत्रारण्ये गतः स्वयं ॥ सर्वत्राऽन्वेषयामास । न च प्रैक्षिष्ट जानकीं ॥ ६६ ॥ विमृश्येति गृहेऽन्येत्य । तस्याः प्रेतक्रियां दधे ॥ ध्यायंश्च सीतासीतेति । रामः कालमवाहयत् ॥ ६७ ॥ सीतापि सुषेवे तत्र । युग्मजौ तनयौ ततः ॥ अनंगलवणाभिख्य–मदनांकुशसंज्ञितौ ॥ ६८ ॥ वज्रजंघस्तयोर्जन्मो–त्सवं चक्रे स्वपुत्रवत् ॥ ख्यातौ कुशलवावुल्ला–पनैस्तौ मिथिलीसुतौ ॥ ६९ ॥ कलाकलापसंपूर्णौ । प्रपन्नयौवनश्रियौ ॥ जातौ महाभुजाविंश–विव वीरौ सुदुर्धरौ ॥ ७० ॥ शशिचूलां निजां पुत्रीं । कन्या द्वात्रिंशतं पराः ॥ वज्रजंघो मुदाऽनंग–लवणेनोदवाहयत् ॥ ७१ ॥ अंकुशाय ययाचेऽथ । पृथुपृथ्वीपतेः सुतां ॥ अज्ञातवंश

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

इत्येष–स्तस्मै नाऽदत्त कन्यकां ॥ ७२ ॥

इतश्च वज्रजंघेन । पृथोर्जाते महाहवे ॥ पृथोर्बभ्रंजतुः सैन्यं । संकुद्धौ लवणां कुशौ ॥ ॥ ७३ ॥ पृथुं पलायमानं तौ । साक्षेपमिदमाहतुः ॥ अवंशजान्यामावाभ्यां । नाशिता वंशजाः कथं ॥ ७४ ॥ वलित्वा पृथुनाऽभ्राणि । शौर्याद् ज्ञातं कुलं तव ॥ ततः श्रीवज्रजंघेन । संधानं समजायत ॥ ७५ ॥ इतश्च शिबिरे तत्र । निषण्णे सर्वराजभिः ॥ समेतो नारदो नत्वा । वज्रजंघेन चोच्यत ॥ ७६ ॥ अंकुशाय मुने कन्यां । पृथुराजः प्रदित्सति ॥ वंशं तदनयोर्ब्रूहि । येनासावपि तुष्यति ॥ ७७ ॥ हसित्वा नारदोऽप्यूचे । को न वेत्त्यनयोः कुलं ॥ दक्षिणौ रावणवधे । यत्तातौ रामलक्ष्मणौ ॥ ७८ ॥ लोकनिर्वादभीतेन । रामेण जनकात्मजा ॥ गर्भस्थयोरप्यनयो–स्तत्यजे गहने वने ॥ ७९ ॥ अंकुशोऽथावदद्ब्रह्म–न्न चक्रे तेन साध्विदं ॥ न ह्यनालोच्य लोकोक्त्या । तस्यैतत्कर्तुमर्हति ॥ ८० ॥ लघुराह कियद्दूरे । सा पुरी यत्र तौ नृपौ ॥ मुनिराख्यदितः षष्टि–युग्योजनशतं हि सा ॥ ८१ ॥ अथो कनकमालाख्यां । पृथुभूपस्य कन्यकां ॥ परिणाय्यांकुशेन श्री–वज्रजंघोऽगमत्पुरीं ॥ ८२ ॥ अथ मातुलमा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पृच्छय । प्रसूं च लवणांकुशौ ॥ जननीत्यजनाऽमर्षा–त्प्रस्थितौ सेनया सह ॥ ८३ ॥ क्रमेण गत्वोपायोध्यं । तस्थतुस्तौ रणोन्मुखौ ॥ श्रुत्वा योद्धुमथाऽऽयातौ । ससैन्यौ रामलक्ष्मणौ ॥ ॥ ८४ ॥ जाते समरसंमर्दे । दोष्मंतौ लवणांकुशौ ॥ निन्यतुर्लीलया राम–सैन्यं दैन्यदशा-मिमौ ॥ ८५ ॥ अयोधिषातामथ्र तौ । रामन्नइं सलक्ष्मणं ॥ मुमोच कुपितश्चक्रं । कुशाया-थ्र स लक्ष्मणः ॥ ८६ ॥ चक्रं चागत्य वेगेन । परीयांकुशमक्रतं ॥ पूर्वकर्मेव कर्त्तारं । पुन-र्लक्ष्मणमाश्रयत् ॥ ८७ ॥

अथ श्रीरामसौमित्री । विषण्णाविति दध्यतुः ॥ बलनारायणावेतौ । न चावां किमु नू-तले ॥ ८८ ॥ नामंडलयुतोऽन्येत्या–त्रांतरे नारदो मुनिः ॥ खिन्नं सलक्ष्मणं रामं । विहस्य प्रोचिवानिति ॥ ८९ ॥ कोऽयं विषादो युवयो–र्हर्षस्थाने रघूद्वहौ ॥ कस्य नाऽनंदयेच्चित्तं । निजपुत्रात्पराजयः ॥ ९० ॥ तवैव तनयावेतौ । सीताकुक्षिसमुद्भवौ ॥ त्वां द्रष्टुं रणदंभेन । संगतौ नत्विमौ रिपू ॥ ९१ ॥ बभूव नालं यच्चक्र–मज्ञिज्ञानमिदं तु ते ॥ अंतरेण स्वगोत्रं य–न्न चक्रं क्वापि निष्फलं ॥ ९२ ॥ अथो तनयवात्सल्या–न्मुदा रामः सलक्ष्मणः ॥ लव-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

णांकुशयोः पार्श्वे । जगाम जवतः स्वयं ॥ ९३ ॥ विनीतौ तावपि क्षिप्र–मवतीर्य रथादथ ॥ प्रणतौ शिरसाऽघ्रातौ । ताभ्यामपि सगौरवं ॥ ९४ ॥ तदुत्सवमयं सर्वं । सैन्यद्वंद्वमभूत्तदा ॥ महर्द्ध्या पुष्पकारूढो । रामोऽपि प्राविशत्पुरीं ॥ ९५ ॥ अथ सौमित्रिसुग्रीव–वज्रजंघविभीषणैः ॥ विज्ञप्तो राघवः शीघ्रं । सीतामानाययन्मुदा ॥ ९६ ॥ सौमित्रिः संमुखं गत्वा । नत्वा चाह प्रजावतीं ॥ निजप्रवेशतो देवि । पवित्रय चिरात्पुरीं ॥ ९७ ॥ सीता प्रोचे विना शुद्धिं । न प्रविक्ष्यामि तां पुरीं ॥ गृहं च यावन्निर्वादो । ममायं नोपशाम्यति ॥९८॥ मया चांगीकृतं दिव्य–पंचकं तदिदं यथा ॥ ज्वालालीढे विशाम्यग्नौ । यदिवाऽभामि तंडुलान् ॥ ९९ ॥ पिबामि तप्तं कोशं वा–ऽधिरोहामि तुलामथ ॥ लिहामि जिह्वया फालं । यद् ब्रूत करवाणि तत् ॥ ३०० ॥ राघवोऽपि तदाकर्ण्य । समेतस्तत्र सीतया ॥ अत्याग्रहगृहीतश्च । वह्निदिव्यममन्यत ॥ १ ॥ शतानि त्रीणि हस्तानां । रामो गर्त्तामखानयत् ॥ पुरुषद्वयदध्नं च । पूरयामास चंदनैः ॥ २ ॥ विहिते ज्वलने दीप्ते । स्मृतपंचनमस्कृतिः ॥ सीता सत्यापनामेवं । चक्रे वक्रेतराशया ॥ ३ ॥ लोकपालाश्च शृण्वंतु । चेदहं राघवं विना ॥ नरं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मनस्यधामन्यं । दहत्वग्निस्तदा मम ॥ ४ ॥

अन्यथा वह्निरप्येष । सुधाकुंभमिवास्तु मे ॥ इत्युक्त्वा स्मृतसर्वज्ञा । ददौ झंपां हुताशने ॥ ५ ॥ प्रविष्टायां च तत्रास्यां । वह्निरह्राय शांतवान् ॥ क्रीडावापीव संजज्ञे । जलपूर्णा च खातिका ॥ ६ ॥ मध्येजलं सहस्राब्ज–सिंहासनवरस्थिता ॥ शीलप्रभावतः सीता । रराज श्रीरिवांगिनी ॥ ७ ॥ शीर्षोपरिष्टाज्जानक्याः । पुष्पवृष्टिं व्यधुः सुराः ॥ अहो शीलमहो शीलं । प्रशशंसुश्च मानवाः ॥ ८ ॥ दृष्ट्वाऽनुभावं मातुश्च । तरंतौ लवणांकुशौ ॥ गत्वा प्रणेमतुः पादौ । राजहंसाविव डुनं ॥ ९ ॥ लक्ष्मणाद्या नमश्चक्रु–र्वैदेहीमथ भक्तितः ॥ तामभ्येत्य च रामोऽपि । प्रोवाच रचितांजलिः ॥ १० ॥ देवि त्यक्ताऽप्यरण्ये त्व–मजीवः स्वानुभावतः ॥ तदेवासीन्महादिव्यं । न पुनर्ज्ञातवानहं ॥ ११ ॥ क्षांत्वा सर्वं तदध्यास्व । पुष्पकं स्वगृहे चल ॥ राज्यश्रियमिमां भुंक्ष्व । पुरेव सफलीकुरु ॥ १२ ॥ सीताप्युचे न दोषस्ते । न लोकस्यापि कश्चन ॥ सोढव्यः किंतु जीवेन । विपाकः पूर्वकर्मणां ॥ १३ ॥ पर्यायं भवभासेन । ममातः परमीदृशं ॥ तदुच्छेदाय चारित्रं । श्रयिष्यामि महाफलं ॥ १४ ॥ त-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तो महाऽहिनो जात–स्तद्व्रतग्रहणोत्सवः ॥ स्वयं जग्राह रामस्त–त्केशांश्च क्लेशमुक्तये ॥१५॥ चारित्रमाचर्य चिरं च सीता । कल्पेऽच्युते प्राप सुराधिपत्वं ॥ क्रमेण कर्माणि विधूय शुक्ल –ध्यानेन रामोऽपि शिवं समेतः ॥ १६ ॥

॥ इति श्रीरुद्रपल्लीयगच्छे श्रीसंघतिलकसूरिपट्टावतंसश्रीसोमतिलकसूरिविरचितायां श्रीशीलतरंगिण्यां साध्वीसीताचरित्रं समाप्तं ॥ श्रीरस्तु ॥

महासतीलक्षणमाह—

॥ मूलम् ॥—जा सीलऽंगसामग्गि–संऽन्नवे निच्चला सई एसा ॥ इयरा महासईउ । घरे घरे संति पउराउ ॥ १०९ ॥ व्याख्या—या शीलऽंगसामग्रीसंऽन्नवे निश्चला, एकांतस्नेहमोहाऽन्यर्थनादिसंकटे समापतितेऽपि स्वीयशीलं रक्षितुं कृतमहाग्रहा, एषा सतीति कथ्यते. इतरा महासत्योऽप्रार्थिता असंकटे पतिताश्च शीलपालनप्रवणा गृहे गृहे प्रचुरा अपरिमिताः संति, यदुक्तं—विरला महिलाः शील–कलिता अपि संकटे ॥ प्रायोऽनऽन्यर्थिता एव। सांप्रतं हि पतिव्रताः ॥ १ ॥ इति भावः ॥ १०९ ॥ एवं सति शीलरक्षणोपायमाह—

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ मूलम् ॥—तहवि हु एगंताइ–संगो निच्चंपि परिहरेअव्वो ॥ जेण य विसमो इंदिय–गामो तुच्छाइं सत्ताइं ॥ ११० ॥ व्याख्या—यद्यपि शीलं दुःप्रतिपाद्यं, तथापि पालयितुमिच्छता एकांतादिसंगो नित्यं परिहर्त्तव्यः, येन कारणेन इंद्रियग्रामो विषमो दुःरक्ष्यः, तुच्छानि सत्वानि, चित्तदार्ढ्यं जीवानामल्पमेव, अतः स्वसंबंधिनीभिरपि स्त्रीभिः सहैकांतसंगो वर्जनीयः, यदाहुः—मात्रा स्वस्रा दुहित्रा वा । नाविविक्तासनो भवेत् ॥ बलवानिंद्रियग्रामो । विद्वांसमपि कर्षति ॥ १ ॥ इति गाथार्थः ॥ ११० ॥ निर्दोषतायामपि संगादूषणांतरमाविर्भावयन्नाह—

॥ मूलम् ॥—जइवि हु नो वयभंगो । तहवि हु संगाउ होइ अववाउ ॥ दोसनिहालणनिउणो । सव्वो पायं जणो जेण ॥ १११ ॥ व्याख्या—यद्यपि तादृगजिह्मवर्त्मवतां महात्मनां व्रतभंगो न भवति, तथापि संगादपवादो दोषारोपः प्रकट एव, यतः प्रायो बाहुल्येन न सर्वो जनो लोको दोषनिभालननिपुणः, परदोषग्रहणदक्षः, भणितं च—इक्कंपि नत्थि लोयस्स । लोयणं जेण नियइ नियदोसे ॥ परदोसपिछणेणं । लोयणलक्खाइं जायंति ॥ १ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अन्यच्च—अगुणावि गुणत्ति जहिं । हियए निवसंतु सो गउ कालो ॥ अहुणा गुणावि अगुण—त्तणेण जायंति लोयाणं ॥ २ ॥ इति भावार्थः ॥ १११ ॥ अथ फलोपदर्शनपूर्वं शीलोपदेशोपसंहारमाह—

॥ मूलम् ॥—तो सव्वहावि सीलंमि । उज्जमं तह करेह भो भव्वा ॥ जह पावेह लहु च्चिय । संसारं तरिय सिवसुक्खं ॥ ११२ ॥ व्याख्या—भो भव्यास्तस्मात्त्रिकरणशुद्ध्या शीले तथोद्यमं कुरुत ? यथा लघु शीघ्रं संसारं तीर्त्वा शिवसौख्यं प्राप्नुत. भव्या इति सामान्यवचनेन पुरुषस्त्रीणां साधारणतया शीलपालनादेव मोक्षः, त एव चोपदेशतत्वयोग्याः, अभव्यानां हितोपदिष्टमपि प्रवचनतत्त्वं हृदये न संक्रामति, यदर्हद्वचः—मिच्छदिट्ठी जीवो । उवइट्ठं पवयणं न सद्दहइ ॥ सद्दहइ असब्भावं । उवइट्ठं तहइ अणुवइट्ठं ॥ १ ॥ इति गाथार्थः ॥ ११२ ॥ अथ ग्रंथकारो गर्वपरिहारपूर्वकं प्रवर्त्तकाद्यनेकोपदेशपरंपरोपसंवर्गणामाह—

॥ मूलम् ॥—इय सीलभावणाए । भावंतो निच्चमेव अप्पाणं ॥ धन्नो धरिज्ज बंभं । धम्ममहाभवणथिरथंभं ॥ ११३ ॥ व्याख्या—इति पूर्वोक्तोपदेशश्रवणजनितशीलभावनया नि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

त्यमेवात्मानं भावयन्, शीलप्रतिपालनाय स्वात्मानं दृढीकुर्वन् धन्यः पुण्यपरिणामी जीवो धर्ममहाभवनस्थिरस्तंभं पुण्यप्रासादावष्टंभस्तंभरूपं ब्रह्म शीलव्रतं धारयेत्, धन्या एव तद्धारयितुं क्षमाः, न तु मादृशः पापीत्यर्थः, किल ग्रंथकारो ज्ञापयति, संगदोषेऽपि धन्याः शीलं पालयंत्येव, तादृक् शीलातिशयपरीक्षाया अभावेऽपि शीलवंतः श्रद्धातव्या इति. अत्र च धनश्रीसतीदृष्टांतः, तथाहि—

नगर्युज्जयिनीत्यस्ति । स्वस्तिवाद इव श्रियः ॥ श्रेयःपुंजा इवाभांति । कुंभा यत्रत्यवेश्मसु ॥ १ ॥ जितशत्रुरिति ख्यातः । प्रतापी तत्र भूपतिः ॥ कमला यद्भुजस्तंभे । पांचालीव—न्यलीयत ॥२॥ श्रेष्ठी सागरचंद्रोऽस्ति । चंद्रश्रीरिति तत्प्रिया ॥ यच्चित्तवार्द्धिः पुण्येन । चंद्रेणेव प्रमोदते ॥ ३ ॥ पुत्रः समुद्दत्तोऽस्ति । तयोरादेयवाक्सुधः ॥ कलाकलापशिक्षार्थमुपाध्यायस्य सोऽर्पितः ॥ ४ ॥ पाठकेन सहान्येद्युः । स लुब्धां वीक्ष्य मातरं ॥ विवाहान्निग्रहं चित्ते । जग्राह स्त्रीविरक्तिमान् ॥ ५ ॥ पिता च यौवनस्थस्य । तस्योद्वाहनहेतवे ॥ आदत्त शतशः कन्या । अनुरूपवयःकुलाः ॥ ६ ॥ लक्ष्मीरिव यतिः सोऽपि । निराचेष्टेऽखि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

लाः कनीः ॥ इत्थं तस्य विरक्तस्य । समयो याति योगिवत् ॥ ७ ॥ अन्यदा व्यवहारेण । सौराष्ट्रं तत्पिता गतः ॥ धनस्य सार्थवाहस्य । गेहे गिरिपुरे स्थितः ॥ ८ ॥ कृते समुद्दत्तस्य । तस्य पुत्रीं धनश्रियं ॥ आदर्यालक्षितां श्रेष्ठी । समियाय निजे गृहे ॥ ९ ॥ उक्तः समुद्दत्तश्च । पुरे गिरिपुरे मम ॥ संति ज्ञातीनि तानि त्वं । वत्स गत्वा समानय ॥ १० ॥

कन्याग्रहणवृत्तांतं । सर्वं तत्सुहृदां पुरः ॥ रहो निवेदयामास । श्रेष्ठी स्वेष्टविधित्सया ॥ ॥ ११ ॥ स्वोचितोपवितस्फूर्त्या । ततो विततवाहनः ॥ प्रतस्थे मित्रयुक् श्रेष्ठी–सूनुर्गिरिपुरंप्रति ॥१२॥ संप्राप्तस्तत्पुरोद्यानं । स्वेप्सितं पुण्यवानिव ॥ वयस्या ज्ञापयामासु–र्धनस्य च तदागमं ॥ १३ ॥ सोऽपि विवाहसामग्रीं । प्रगुणीकृत्य सर्वकां ॥ कुमारं सपरीवारं । निमंत्र्य स्वगृहेऽनयत् ॥ १४ ॥ विधाप्य ब्रह्मना पाणि–ग्रहणं पुत्र्या धनश्रियः ॥ श्रीधनस्तुष्टिदानेन । जामातरमतोषयत् ॥ १५ ॥ गतो वासगृहे मित्र–कृतसर्वोचितक्रियः ॥ दृष्ट्वा धनश्रियं नीर–मिव फेरुर्न्यवर्त्तत ॥ १६ ॥ आगत्य सुप्तो मित्रेषु । विज्ञातायामथो निशि ॥ शरीरचिंतादंभेन । कानने स पलायितः ॥१७॥ वयस्यैर्ज्ञापिते तस्मिन् । स्वरूपे श्वसुरादिभिः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ सर्वत्राऽन्वेषितं नैव । जामातुः शुद्धिराप्यत ॥ १८ ॥ श्रुत्वा सागरचंद्रोऽपि । तत्रैवोपेयि-
वान् रयात् ॥ कतिचिद्दिवसान् स्थित्वा । पुनः स्वपुरमासदत् ॥ १९ ॥ द्वादशाब्दामतीता-
या—मितः कार्पटिकान्वितः ॥ समुद्दत्तस्तत्रागात् । प्ररूढश्मश्रुमांसलः ॥ २० ॥ गृहाराम-
स्थितं चैष । सार्थेशं धनमब्रवीत् ॥ उद्यानपालकस्तेऽहं । जाये वेतनमंतरा ॥ २१ ॥ श्रेष्ठि-
नांगीकृते सोऽपि । वृक्षायुर्वेदपंडितः ॥ तमारामं सुराराम—रम्यमारचयत्क्रमात् ॥ २२ ॥ ता-
मुद्यानश्रियं वीक्ष्य । सर्वर्तुफलशालिनीं ॥ आनंदसांद्रः सार्थेशो । मनसीदमचिंतयत् ॥२३॥
नहीदृशकलापात्र—मयं योग्योऽत्र कर्मणि । किमु चिंतामणिर्द्वागो—गलालंकारभाजनं ।२४।
ततो न्ययुंक्त तं हट्ट—व्यापारे सार्थनायकः ॥ वाणिज्यकलया चक्रे । तत्रापि स्ववशाः प्रजाः
॥ २५ ॥ विश्रंभपात्रं सर्वेषां । लक्ष्मीसंवननौषधं ॥ नाम्ना विनीतक इति । सर्वत्र प्रथितोऽ-
भवत् ॥ २६ ॥ माऽमुं सर्वगुणं ज्ञात्वा । लोभाक्रुद्धातु भूपतिः ॥ इत्येनं दिष्टवान् श्रेष्ठी । स-
र्वेषु गृहकर्मसु ॥ २७ ॥ मनीषितानि कुर्वाणं । सर्वकर्माणि तं धनः ॥ पुत्रादप्यधिकं मेने ।
गुणाः कस्य न मानदाः ॥ २८ ॥ समग्रकार्यसारत्वा—द्विनीतत्वेन च क्रमात् ॥ सत्या धनश्रि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

योऽप्येष । विश्वासास्पदतामगात् ॥ २९ ॥ अन्येद्युस्तां तलारक्षो । वीक्ष्य वातायनस्थितां ॥ मन्मथव्यथितोऽत्यर्थं । तन्मयं विश्वमैक्षत ॥ ३० ॥

अथो सदा तदासन्नं । स विज्ञाय विनीतकं ॥ अन्यदर्थं प्राहिणोद्दौत्ये । कामुकोऽधिधनश्रियं ॥ ३१ ॥ सोऽप्यूचेऽवसरं ज्ञात्वा । तमुदंतं धनश्रियः ॥ धूर्त्ता हि किं न चेष्टंते । परमार्थजिघृक्षवः ॥ ३२ ॥ धूनयंती शिरः प्राह । धनश्रीरपि तं सती ॥ विनीतक चिरं त्वं मे । प्राणेभ्योऽप्यसि वल्लभः ॥ ३३ ॥ अमुना कर्मणा किंतु । शत्रुभ्योऽप्यसि दारुणः ॥ मदीयशीलमाणिक्यं । यद्दूषयितुमिच्छसि ॥ ३४ ॥ कायेन मनसा वाचा । स एव मम वल्लभः ॥ समुद्दत्तो दत्तो यः । पितृभ्यां सर्वसाक्षिकं ॥ ३५ ॥ पुनर्विनीतकः प्राह । गूढहर्षो धनश्रियं ॥ इविणं कृपणेनेव । मुधा किं जन्म हार्यते ॥ ३६ ॥ रक्तां त्वामपि यो हित्वा । गतः शुद्धिश्च नाप्यते ॥ प्रतिभाति मुधा तस्य । कृते तज्जन्महारणं ॥ ३७ ॥ विनीतोऽप्यविनीतोऽसि । ममेदं श्रावयन्मुहुः ॥ पद्मिन्या इव हैमंतः । समीरः सीकरान्वितः ॥ ३८ ॥ शीलमेव कुलस्त्रीणा–मिहाऽमुत्र च जीवितं ॥ नष्टे शीले पुनः प्राणी । जीवन्नपि मृतोपमः ॥ ३९ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

शीलमेकमिदं मागा–त्सर्वमन्यन्नविष्यति ॥ सति कंदे न संदेहो । वल्ल्याः पल्लवप्रोक्षमे ॥ ॥ ४० ॥ चिरं परिचितत्वेना–ऽधुना जीवन्नुपेक्षितः ॥ पुनरिह्रं प्रवक्ता चे–द्दुरुसाध्योऽसि सर्वथा ॥ ४० ॥ इति निर्भर्त्सितः सार्थ्र–पतिपुत्र्या विनीतकः ॥ निपत्य पादयोरूचे–ऽपराधः क्षम्यतामयं ॥ ४१ ॥ कोऽयं समुद्दत्तस्तु । पतिस्तव निवेद्यतां ॥ धनश्रीरप्यन्नाषिष्ट । विशालायां महापुरि ॥ ४२ ॥ श्रेष्टी सागरचंद्रोऽस्ति । तत्सुतोऽयं गुणाकरः ॥ समुद्र इव रत्नानां । यः कलानां निकेतनं ॥ ४३ ॥ ऊचे विनीतकस्तर्हि । तवाहं रंजितो गुणैः ॥ समन्वेष्य समानेष्ये । पतिं तव यतस्ततः ॥ ४४ ॥ इत्युक्त्वा निर्गतस्तस्या । विमृशन् शीलमुज्ज्वलं ॥ मुमोच गर्वं ज्ञानीव । स्त्रीषु दुःशीलताऽग्रहं ॥ ४५ ॥ गतश्चोज्जयिनीं माता–पित्रोरानंदयन्मनः ॥ धनाय ज्ञापयामास । तत्पितापि तदागमं ॥ ४६ ॥ पुनर्जातममन्यंत । पितरौ श्वसुरश्च तं ॥ बन्नूवुश्चोन्नयत्रापि । वर्द्धापनमहोत्सवाः ॥ ४७ ॥ समृद्ध्याथ महीयस्या । गृहयालुर्धनश्रियं ॥ समुद्दत्तः संप्राप्तः । पुरं गिरिपुरं रयात् ॥ ४८ ॥ वीक्ष्य जामातरं तीर–मिव योगी नवांबुधेः ॥ सद्यश्चमत्कृताः सर्वे । प्रमोदाद्वैतमासदन् ॥ ४९ ॥ सती

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

धनश्रीरपि निष्कलंकं । शीलप्रभावाद्भुतवैभवेन ॥ चिरादिहामुत्रभवोद्भवानि । कल्याणसौख्यान्यखिलान्यवाप ॥ ५० ॥

॥ इति श्रीरुद्रपल्लीयगच्छे श्रीसंघतिलकसूरिपट्टावतंसश्रीसोमतिलकसूरिविरचितायां श्रीशीलतरंगिण्यां धनश्रीमहासतीकथा समाप्ता ॥ श्रीरस्तु ॥

अथ ग्रंथसमाप्तौ स्वनामगर्भां मंगलाशिषमाह—

॥ मूलम् ॥—इइ जयसिंहमुणीसर–विणेयजयकित्तिणा कयं एयं ॥ सीलोवएसमालं । आराहिय लहह बोहिसुहं ॥ ११४ ॥ व्याख्या—इति पूर्वोक्तप्रकारेण श्रीजयसिंहमुनीश्वरविनेयजयकीर्त्तिना कृतामेनां शीलोपदेशमालामाराध्य बोधिसुखं लभध्वमिति समुदायार्थः. भो भव्या इति गम्यं, तत्रश्रीजयसिंहसूरिनामधेया आचार्यास्तेषां विनेयः शिष्यो जयकीर्त्तिनामा प्रकरणकारः, जयप्रधाना कीर्त्तिर्यस्य, यद्वा जगति कीर्त्तिर्यस्येति स्वपरहितोपदेशकत्वेन सान्वयनाममहात्मना, तेन कृतां सिद्धांतोक्तगाथार्थसंग्रहेण ग्रथितां शीलोपदेशमालां शीलसारोपदेशानां मालां श्रेणिं, यदिवा मालामिव मालां पुष्पमयीं, सर्वेषामुत्तमांगकंठधार्य-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

त्वेन, तामाराध्य स्वयं सेवित्वा श्रोतॄणामुपदिश्य वा बोधिसुखं प्राप्नुत? बोधे सम्यक्त्वे सति सुखं पारंपर्येण मोक्षरूपं, यतस्तदेवाऽनुत्तरमनंतमव्याबाधमव्ययं समग्रं मंगलमूलं चेति गाथार्थः ॥ ११४ ॥ इति समाप्तं शीलोपदेशमालाख्यं प्रकरणं, तत्समाप्तौ च संपूर्णेयं शीलतरंगिणीनामश्रीशीलोपदेशमालावृत्तिरिति ॥ आ श्रीशीलोपदेशमालानी शीलतरंगिणी नामनी वृत्ति जामनगरनिवासि पंडित श्रावक हीरालाल हंसराजे स्वपरना श्रेयमाटे छापी प्रसिद्ध करी छे. ॥ श्रीरस्तु ॥

॥ समाप्तोऽयं ग्रंथः गुरुश्रीमच्चारित्रविजयसुप्रसादात् ॥

For Private And Personal

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ इति श्रीशीलतरंगिणी समाप्ता ॥

For Private And Personal